CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीतारोपासकमहाकविसुकृतिदत्तपन्तप्रणीतश्रीकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गद्वयाधृतः

श्रीकार्तवीर्योदयमकरन्दः

{संस्कृत-नेपाली-टीकाटिप्पणीसमलङ्कृतः टीकाग्रन्थः}



मकरन्दकारः

प्रा.डा. वेणीमाधवढकालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

महाकविसुकृतिदत्तपन्तप्रणीतश्रीकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गद्वयाधृतः

श्रीकार्तवीर्योदयमकरन्दः

{ नेपालसंस्कृतविश्वविद्यालयीयशास्त्रिस्तरीयपाठ्यक्रमे निर्धारितश्चूडामणि-नाम्न्या संस्कृतटीकया, दिव्यलक्ष्मीरित्यभिधानया नेपालीटीकया, त्रिशक्तिसंज्ञया टिप्पण्या च समलङ्कृतष्टीकाग्रन्थः }

मकरन्दकारः

प्रा.डा. वेणीमाधवढकालः

नेपालसंस्कृतविश्वविद्यालयः

वाल्मीकिविद्यापीठम्, काष्ठमण्डपः ।

प्रकाशकः

नवेन्दुढकालः

तिलोत्तमा क्याम्पस, बुटवल ।

वितरकः

विद्यार्थी पुस्तक भण्डार

भोटाहिटी, काठमाडौं ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकम्	:	कार्तवीर्योदयमकरन्दः
रचयिता	:	महाकविः सुकृतिदत्तपन्तः
मकरन्दटीकाकारः	:	प्रा.डा. वेणीमाधवढकालः ठिमुरे गा.वि.स.-५, पोरकनी, पाल्पा । फोन : ४३११३३०
प्रकाशकः	:	नवेन्दुढकालः ठिमुरे गा.वि.स.-५, पोरकनी, पाल्पा । मोबाइल - ९८४७०३१९३०
वितरकः	:	विद्यार्थी पुस्तक भण्डार भोटाहिटी, काठमाडौँ फोन : ४२२७२४६, ४२४५८३४
संस्करणम्	:	प्रथम, आश्विन नवरात्र २०६९
सर्वाधिकारः	:	मकरन्दकारे निहितः
प्रकाशित संख्या	:	१०००
मूल्यम्	:	रू.२७५/-
ISBN	:	978-99946-1-666-4
कम्प्युटरटङ्कणम्	:	क्वालिटी लेजर प्रिन्ट, बागबजार फोन : ४२४२६५६
मुद्रणम्	:	श्रीवेङ्कटेश छापाखाना काठमाडौं-१०, शंखमुल, बानेश्वर फोन : ०४७८४८४५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीणाधरे विपुलमङ्गलदानशीले
भक्तार्तिनाशिनि विरिञ्चिहरीशवन्द्ये ।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे
विद्याप्रदायिनि सरस्वति ! नौमि नित्यम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातृपितृ-वन्दना

पिताश्री चूडामणि ढकाल
(वि.सं. १९७२-२०४५)

माताश्री दिव्यलक्ष्मी ढकाल
(वि.सं. १९७९-२०६४)

चन्द्रचूडोपमं तातं
नत्वा चूडामणिं बुधम् ।
अम्बां तामम्बिकाकल्पां
दिव्यलक्ष्मीं नमाम्यहम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

टीकाकारकृतं समर्पणम्

निष्काममानसौ दिव्यैर्गुणग्रामैरलङ्कृतौ ।
सुस्मितौ सुहितौ स्निग्धौ सत्यंवदप्रियंवदौ ।।

वन्द्यौ पूज्यौ सदा ध्येयौ वैकुण्ठधामवासिनौ ।
जननीजनकौ दिव्यलक्ष्मीचूडामणीति कौ ।।

विदितौ श्रद्धया ध्यात्वा सुकृतेः सुकृतेः कृतेः ।
मकरन्दाभिधां टीकां ताभ्यां भक्त्या समर्पये ।।

मद्रागरञ्जितां भूयादियन्तद्भालभूषणम् ।
आकल्पं जगते दद्यान्मोदं तोषञ्च तर्पणम् ।।

- भवदीयचरणारविन्दचञ्चरीकः
पुत्रः
वेणीमाधवढकालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

महाकविकृतं समर्पणम्

ब्रह्मोपेन्द्रगिरीशमुख्यविबुधैराराधिताङ्घ्रिद्वये
तारे ! शुद्धसुवर्णनिर्मितमिदं रीत्यादिसङ्गस्थितम् ।
उन्मीलन्मधुरध्वनिप्रतिपदं स्यूतं गुणौघैरलं
काव्यन्ते चरणेऽर्पयामि तदिदन्मञ्जीरवद्राजताम् ।।

- भगवत्यास्तारायाश्चरणकमलचञ्चरीको महाकविः
सुकृतिदत्तपन्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्तव्य-सन्दर्भः

कार्तवीर्योदयमकरन्दस्य अन्तर्वस्तुवीक्षणम्

- प्रा. विद्यानाथ उपाध्यायो भट्टः
अध्यक्षः - जयतु संस्कृतम्, काष्ठमण्डपः

विद्वद्वरेण्याः कविकुलतिलकाः पण्डितवर्याः सुकृतिदत्तपन्तमहोदया नेपालदेशस्य महार्हा रत्नभूताः । कुलञ्च तत्र भवतां जन्मना स्वनामधन्यानां विद्वद्धौरेयाणां पन्तो-पाह्वभवदत्तशर्मणाम्, विद्यया च न्याय-व्याकरण-साहित्य-वेदान्त-मीमांसा-धर्मशास्त्रादिविविधविद्यावैदग्ध्यपूर्णानां नीलदेवपन्त-तदात्मज-वाचस्पतिपन्त-महोदयानामिति, ते स्वयमपि विद्यारत्नाकरसम्भूताः समुज्ज्वल-निर्मल-यशोवन्तो विद्यावन्तश्च नेपालस्य गौरवास्पदभूता मणयः । सुकृतिदत्तपन्त-महोदया हि न केवलं साहित्यशास्त्रे नैपुण्यमासादितवन्तो विद्वांसोऽपि तु धर्मशास्त्रेऽपि वैदग्ध्याधिकारं संस्थापितवन्तो लोकव्यवहारे समुत्थापितानां समुत्थितानां वा कर्तव्याकर्तव्यविषयक-विविधसमस्यानां शास्त्रीयमाधिकारिकं निर्णयं प्रददतो लोकैर्धर्माचार्यपदे प्रतिष्ठाप्य सुसम्मानिताः । छात्रसम्पत्त्या च ते अतीव समृद्धा विद्यार्थिभिः सुसमादृताः सद्गुरवः। न्यायशास्त्रे तन्त्रशास्त्रेऽपि च तेषामधिकारोऽप्रतिमः।

सुकृतिदत्तपन्तमहोदयानां कृतयोऽनेकाः सत्योऽपि तासु कार्तवीर्योदय-महाकाव्यरूपा रचना अन्यतमा वैदुष्यपूर्णा यशःप्रदा संस्कृतवाङ्मये आह्लाददायिनी चन्द्रिकेव विलसतीति नास्ति सन्देहलेशोऽपि । स्वकीयमहाकाव्यविषये स्वयं ग्रन्थ-कृतामेव गर्वोक्तिः -

फणिपतिभणितिप्रविष्टचेता उदयनवाचि विशारदः स्मृतिज्ञः ।
भरतवचनभारतोक्तिविज्ञो मम कृतिदर्शनमातनोतु विद्वान् ।।

(कार्तवीर्योदयमहाकाव्यम्- १७/१७)

सत्यमेवेयं तेषां गर्वोक्तिर्ग्रन्थस्य वैशिष्ट्यदृष्ट्या अन्वर्था । सहस्रार्जुन इति ख्यातनाम्नः कार्तवीर्यस्य वंश-तद्वीर्य-वैशिष्ट्यादिविवृतिगर्भं तन्महाकाव्यं नैकविध-वैशिष्ट्यसमन्वितं कविभिः समालोचकैश्चातीव प्रशंसितमिति अस्य प्रकर्षः । नेपालस्य (नेपाले, नैपालकै रचितेषु) महाकाव्येषु तस्य स्थानं महनीयं काव्यशास्त्रदृष्ट्या,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिल्पविद्यावीक्षया चातीव विशिष्टम्, तन्निष्ठं दार्शनिकचिन्तनं वैदुष्यास्पदम्, भावपक्षो हृदयग्राही, तत्रत्यो धर्मशास्त्रविषयाणां समावेशः प्रशस्यः, कलापक्षोऽतीव सुन्दरः, पद्यानि उत्कृष्टानि, प्रबन्धविधानं च प्रकृष्टमिति एतावन्तो गुणगणा महाकाव्यस्य प्रकर्षं प्रकाशयन्तो ग्रन्थकृतः सुकृतिदत्तपन्तमहाभागस्य कवित्वम्, पाण्डित्यम्, कौशलम्, शिल्पम्, नैपुण्यञ्च विततं तन्वते । विशेषतो महाकाव्ये निबद्धानां ग्रन्थीनां भञ्जनन्तु विशिष्टकवीनां मूर्धन्यविदुषाञ्चापि दुष्करमिति काव्यमेतद् विदुषामपि परीक्षास्थानम्।

कार्तवीर्योदयमहाकाव्यस्य प्रणेतारः सुकृतिदत्तमहोदयास्तन्त्रशास्त्रस्यापि मर्मज्ञा भगवत्याः श्रीतारिणीदेव्याः समुपासकाश्च । महाकाव्यस्यादावेव मङ्गलरूपेण समुक्तानि-

कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम् ।

ताराभिधानममलं हृदये ममास्तु ।

इत्यादि वाक्यानि, ग्रन्थान्ते च-

श्रीकार्तवीर्यचरितोदितकाव्यमेतत् श्रीतारिणीकरुणया परिपूर्णमासीत् ।।

पतन्तु करुणादृशो भुवनतारिकायाद्भुतम् । इत्यादिना भगवत्याश्चरणयोर्ग्रन्थ-समर्पणं काव्यकृतः साधनोत्कर्षं प्रमाणयन्ति । ततोऽप्यधिकम्, काव्यकृद्भिः स्वकीयकृतौ नैकेषु स्थलेषु भगवत्यास्तारिणीदेव्या वन्दनं विहितम्, तद्गुणगणा विकृताः, तत्कृपा-कटाक्षाः सम्प्रार्थिताः । विशेषतः स्वजीवनावसानेऽपि तारिणीपदप्राप्तेराकाङ्क्षा प्रकटिता इति एतावन्तः प्रसङ्गाः कविवर्याणां श्रीतारिणीभक्तिप्रकर्षं प्रकाशयन्ति ।

कार्तवीर्योदयमहाकाव्यस्य मातृकायाः सम्पादनं प्राथम्येन विद्वद्वर्यैः डा. प्रपन्नाचार्यैः स्वामिभिः सम्पादितम् । तत्राचार्यप्रवरैः सुकृतिदत्तपन्तमहाभागस्य वंशानुवर्णनम्, तत्कृतेः कार्तवीर्योदयमहाकाव्यस्य वैशिष्ट्यप्रकाशनञ्च वैदग्ध्यपूर्णदृष्ट्या विस्तारितम्। ग्रन्थश्च स नेपाल (राजकीय) प्रज्ञाप्रतिष्ठानतः २०५१ तमे वैक्रमाब्दे एव प्रकाशितः। महाकाव्यस्य तस्यैव विविधवैशिष्ट्यं ग्रन्थकृन्निबद्धग्रन्थिभङ्गञ्च विषयीकृत्य विद्वद्वर्यैः प्रा.डा. वेणीमाधवढकालमहाभागैः संस्कृत-विश्वविद्यालयान्तर्गत-वाल्मीकि-विद्यापीठस्य साहित्यविभागाध्यक्षैर्बृहती गोष्ठी २०५९ तमे वैक्रमाब्दे समायोजिता । तत्र पञ्चाश-दधिकसङ्ख्याकैर्विद्वद्भिर्विविधशास्त्रविचक्षणैः काव्यस्य वैशिष्ट्यं विवेचितं प्रकाशितञ्च। तत्रैव काव्यस्य ग्रन्थिभङ्गोऽपि विहितः । एतेन ग्रन्थकृतः सुकृतिदत्तपन्तमहोदयस्य तत्कृतेश्च महनीयं वैदग्ध्यं प्रकाशितम्, तस्मिन् विदुषां समादरोऽपि वर्धितः । संस्कृत-विश्वविद्यालयेनापि ग्रन्थस्य कश्चन विशिष्टांशः पाठ्यक्रमे समाहितः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्तव्यसन्दर्भः

प्रकृते, विद्वत्प्रवरैः प्रा.डा. वेणीमाधवढकालमहाभागैर्महाकविना सुकृतिदत्तपन्त-महोदयप्रणीत-कार्तवीर्योदयमहाकाव्यान्तर्गतस्य अष्टम-नवमसर्गद्वयस्य चूडामणिनाम्न्या संस्कृतटीकया, दिव्यलक्ष्मीनाम्न्या नेपालीटीकया, त्रिशक्तिनाम्न्या टिप्पण्या च समलङ्कृतो मकरन्दाभिधानष्टीकाग्रन्थः प्रकाशितः। एतेन मूलग्रन्थस्यान्तर्हितं मर्म, तद्रहस्यञ्च सौकर्येणा-वगन्तुमात्मसात्कर्तुञ्च तदध्ययनपराश्छात्रा तच्छिक्षकाश्च समर्थाः, कृतार्था भवेयुर्नूनम्। विशेषतो महाकाव्यस्य टीकाकृतां ढकालमहाभागानां पाठ्यविषयोचित-परिशीलनमस्य भूषणभूतम्। तत्र ग्रन्थकृतां सुकृतिदत्तपन्तमहोदयानामितिवृत्तम्, काव्यस्य बाह्यस्वरूपम्, तद्विषयवस्तुपरिशीलनम्, तत्रत्यकथाभागविवरणं तत्रत्यं साहित्यिकं सौन्दर्यम्, टीकाकृद्भि-र्ढकालमहाभागैर्विवृतमतीव महत्त्वास्पदम्, ग्रन्थस्य वैशिष्ट्यवृद्धौ सहायकञ्चेति मे मतम्।

पण्डितप्रवराः प्रा.डा. वेणीमाधवढकालमहाभागाः शास्त्रानुशीलनपराः, अनुसन्धातारः, शास्त्रीयमर्मप्रकाशननिपुणा विश्लेषकाः, शिक्षणकुशलाः, साहित्य-दर्शनादिविविधशास्त्राभ्यसनपरा विचक्षणाः, विविधग्रन्थकृतः, विशिष्टग्रन्थानुवादका दुर्लभग्रन्थसम्पादकाश्च सन्ति मम सुहृदः ।

एतैरनेका गोष्ठ्यः समायोजिताः, श्रीगणेशपुराणस्य, अगाधज्ञानसिन्धो-र्निर्णयसिन्धोश्च गुरुतरं शोधपूर्णं सम्पादनं विधाय नेपालीभाषायां भाष्याकारं रूपान्तरणं विहितम् । एतैर्विश्वविद्यालयस्यानुसन्धानकेन्द्रे कार्यकारिनिर्देशकपदग्रहणसमये शास्त्रानुसन्धानकार्यं प्रकर्षतां नीतम्, अनेके शिक्षकाश्छात्राश्च अध्ययनानुसन्धानविधौ प्रेरिताः प्रोत्साहिताश्चेति एतेषां कार्यजातमतीव प्रशंसनीयं महनीयञ्चेति मदीयं मतम्।

महाकविसुकृतिदत्तपन्तप्रणीतकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गसम्बद्धस्य कार्तवीर्योदयमकरन्दाभिधेयस्य अस्य महनीयस्य टीकाग्रन्थस्य प्रकाशनविधौ मम सम्मतिमिच्छद्भिर्मित्रवर्यैर्वेणीमाधवढकालमहाभागैरहं भृशमुपकृत इति मन्ये । यतो हि जगज्जनन्याः श्रीमत्तारिणीदेव्याः कृपाकटाक्षपात्रभूतानां भक्तप्रवराणां सुकृतिदत्त-महोदयानां देव्या वरप्रसादकृपारूपायाः कृतेः कार्तवीर्योदयमहाकाव्यस्य वैशिष्ट्यं यथामति प्रकाशयता मयापि भगवत्या वाक्यप्रसूनैः सपर्यैव सम्पादितेति तदङ्घ्रिद्वय-मङ्गलं साधितम् । मित्रवर्येभ्यः प्रा.डा. वेणीमाधवढकालमहाभागेभ्योऽन्ते कृतज्ञतावचनं व्याहृत्य तेषां साफल्यं कामयमानो विरमतेऽयं विद्यानाथ उपाध्यायो भट्टः ।

शरण्या तारिणी देवी विदधातु सुमङ्गलम् ।
यद्यत्कर्म करोमि तत्तदखिलं तारे ! तवाराधनम् ।। इति शम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ने.सं.वि. वाल्मीकिविद्यापीठान्तर्गतसाहित्यशिक्षणविभागस्य

सम्मोदसुरभिता सम्मतिः

- प्रा. डा. टीकारामोऽधिकारी
अध्यक्षः - साहित्यशिक्षणविभागः
ने.सं.वि., वाल्मीकिविद्यापीठम्, काष्ठमण्डपः

नेपालदेशस्य कृष्णाविलसितपर्वतमण्डलस्य विद्याभासुरभूसुरपन्तकुलजातेन भार्गवीभवदत्ततनुजेन सर्वतन्त्रस्वतन्त्रमहाकविसुकृतिदत्तपन्तेन दत्तात्रेयकृपाभाजनतया सहस्रबाहुरिति सहस्रार्जुन इति हैहय इति नानानामभिः पुराणप्रसिद्धं चन्द्रवंशोद्भवं लब्धसप्तद्वीपाधिकारं माहिष्मतीश्वरं भूपं कार्तवीर्यमधिकृत्य प्रणीतं शास्त्रप्रधानमपि काव्यशास्त्रदृष्ट्या विशिष्टगुणसम्पन्नं कार्तवीर्योदयमहाकाव्यमिदं सरससरलटीकामन्तरा दुर्बोध्यं छात्रैरनास्वादितरसं वर्तते स्म । परमधुनाऽतुलहर्षस्य विषयो वर्तते यत् काव्यशास्त्र-मर्मज्ञैरस्मिन् साहित्यशिक्षणविभागे निरन्तरसेवाभिरतैर्विश्वविद्यालयीयसंस्कृतभाषा-पाठ्यक्रमकाठिन्यमनुभवद्भिश्चाऽत्रभवद्भिः प्रा.डा. वेणीमाधवढकालमहाभागैरेतस्य कार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गद्वयस्य चूडामणिनाम्नीं संस्कृतटीकां दिव्यलक्ष्मीनाम्नीं नेपालीटीकां त्रिशक्तिनाम्नीं टिप्पणीञ्च प्रणीय कार्तवीर्योदयमकरन्दनामा टीकाग्रन्थो व्यरचि ।

विविधकाव्यप्रबन्धप्रणयनविशिष्टग्रन्थटीकानुवादग्रन्थसम्पादनपाठ्यक्रम-परिमार्जनशोधनिर्देशनप्रभृतिमहनीयकार्यसम्पादननेन विश्वविद्यालयीयसाहाय्यमाचरतां पदलालित्यपटीयसामत्रभवतां भाषाद्वयात्मिकीयं टीका प्रस्तुतग्रन्थभागस्य पाठ-संशोधनाऽन्वयव्याख्याकोषव्याकरणाऽलङ्कारनिर्वचनश्लिष्टपदविश्लेषणव्यङ्ग्यार्थ-प्रकाशनशास्त्रान्तरनिदर्शनप्रभृतिभिर्नानाविधिभिः संस्कृतवाङ्मयाऽमृतायमानायां टीका-लेखनपरम्परायामद्वितीयं स्थानं बिभर्तीति सानन्दमनुभवामि ।

उत्तरमध्यमाकक्षानिर्धारितस्य काव्यदीपिकेति लक्षणग्रन्थस्य, शास्त्रिकक्षा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्तव्यसन्दर्भः

निर्धारितस्य हरिकेलिमहाकाव्यान्तर्गतनिर्धारितग्रन्थभागस्य च सुबोध्यां छात्रोपयोगिनीं व्याख्यां प्रस्तुत्य विद्वत्समाजे लब्धप्रतिष्ठानामत्रभवतां टीकेयं छात्राणां प्रयोजनसिद्ध्यर्थ-मुपयोगिनी सेत्स्यति । अन्ये स्वतन्त्रपाठकाश्च कार्तवीर्योदयमहाकाव्यस्य सुप्तिङ्मुखां परम्परागतकाव्यशास्त्रीयामुपयोगितां भावाभिव्यञ्जिकां सहृदयहृदयानुसृतिं वा विभावयितुं सफला भविष्यन्ति ।

इतः पूर्वं नारिकेलफलमिवाऽऽस्वाद्यमपि दुर्भेद्यतया दृष्टिगोचरं महाकाव्यमिदं स्वकीयविभागाध्यक्षकार्यकाले समीक्षात्मिकीर्नानागोष्ठीः सम्पाद्य शास्त्रीयदृष्ट्याऽत्र-भवद्भिर्नानाविद्वन्मुखैरालोडितं विषयमपि सम्प्रति प्रकृतटीकाद्वयमाध्यमेन सर्गद्वयस्य राज्यशासन-जनरञ्जन-राजमहिषीकनकप्रभावर्णनमुखाः कतिपयविषयाः सरलतया समुपस्थापिताः । अत्र भवद्भिः प्रणीतं गभीरविषयामर्दनजनितसौरभ्यमाधुर्यविलसितं कार्तवीर्योदयमकरन्दं निपीय सन्तृप्ता अध्ययनमननशीलाश्छात्रा आत्मनि तदानीन्तन-समाजस्य मुनिचर्यागुरुशिष्यादर्शपरोपकारादिविश्वबन्धुत्वपरकमानवीयमहागुणाऽऽधानेन काव्यशास्त्रनिहितहितभाजो भविष्यन्ति नूनम् ।

विविधालङ्कारनिर्वचनेन गूढाऽगूढव्यङ्ग्यार्थप्रकाशनं हि प्रस्तुतव्याख्याप्रयोजन-माभाति हृदयङ्गमम् । काव्यघटकानां गुणालङ्काररसभावादितत्त्वानां मूलतोऽनुसन्धानमपि सूक्ष्मेक्षिकयाऽत्रोन्मीलितम् । मुख्यतो निर्धारितटीकाप्रणयनरूपेण कर्तव्यनिर्वहिणाऽत्र-भवद्भिर्वर्तमानसाहित्यशिक्षणविभागसमर्थने संवत्सरं यावद् विश्वविद्यालयाल्लब्धस्य स्वाध्ययनाऽवकाशसमयस्य सदुपयोगश्च विहित इति विभागोऽयमपूर्वकर्तव्यपरायणतां संस्तुवन्नत्रभवतां मकरन्दकारविदुषां प्रतिभाश्रीवृद्धिञ्च कामयते ।

दिनाङ्कः २०६९/७/१३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

वचनरचनं किमपि

ओङ्कारात्मनः परमात्मनः सच्चिदानन्दमयस्वरूपसाक्षात्कारप्रयोजनया हृदयाभिरामया वैदिकसनातनसंस्कृत्या सुरभिता, नयनाभिरामया प्रकृतिसुषमया च समञ्चिता, धराधामभूता, धन्या विद्योतते नेपालवसुन्धरा । कृष्णागण्डकीप्रभृतिभिरमरधुनीभिः पावितायां रुरुक्षेत्र-वराहक्षेत्र-मुक्तिक्षेत्रादिभिर्धामभिर्धरणीतलतिलकायमानायां हिमगौरायां यस्यामाविर्भूता गिरिराजतनया भगवती गौरी, जनकाधिराजेन जनकेन प्रकटीकृता जगज्जननी जानकी, वैकुण्ठाच्छान्तिलीलायै समागतः शान्तिदूतो भगवान् तथागतः, तामेव दिव्यसौन्दर्यवाटिकां दिव्यलक्ष्मीदीपिकां शालग्रामशालिनीं न्यायपालिनीं नेपालभूमिं महाकविचूडामणिः सुकृतिः सुकृतिः स्वजनुषा समलञ्चकार ।

भगवत्यास्ताराया उपासनया दीप्तमानसो भगवतो योगिनः कार्तवीर्यस्योपासको महाकविः सुकृतिरनेकविधान्तर्गताभिरुच्चस्तरीयाभिः सुकृतिभिः सुरभारतीं जनभारतीञ्चापि समेधयामास । सौवस्य रचनामयस्य जीवनस्योत्तरार्धे कान्तिपुरमधिवसता महाकविना सुकृतिना सकलमहाकाव्यमौलिभूतं कार्तवीर्योदयाभिधमेतन्महाकाव्यं १९२८ तमे वैक्रमाब्दे पूर्णतां नीतम् । दीर्घकालपर्यन्तं नेपालराष्ट्रियाभिलेखालयस्य ग्रन्थागारे पाण्डुलेखाकारे वर्तमानमेतन्महाकाव्यं सं. डा. स्वामिप्रपन्नाचार्यमहोदयैः सम्पादितम्। एतेन तदीयेन पुण्यकर्मणेतिहासगर्ते निपतितो महाकविः सुकृतिश्च समुद्धृतः।

समयान्तरे नेपालप्रज्ञाप्रतिष्ठानमेतन्महाकाव्यं प्राकाशयत्। महाकाव्ये प्रकाशिते नेपालसंस्कृतविश्वविद्यालयेन राष्ट्रगौरवपताकायमानस्यैतस्याष्टमनवमसर्गौ साहित्यशास्त्रिद्वितीयवर्षस्य पाठ्यक्रमे निर्धारितावलङ्कारशास्त्रीयसिद्धान्तानां प्रयोगपरिपाटीप्रतिपिपादयिषया ।

प्रतिभाव्युत्पत्तिचमत्कृतमेतन्महाकाव्यं नारिकेलाकारमस्तीति विभाव्य मयाऽस्याष्टमनवमसर्गयोर्लेखनटङ्कणजातदोषनिःसारणपूर्वकं सटिप्पणीकं पुनः सम्पादनं विधाय **ऋतम्भरायाः** अनेकेष्वङ्केषु प्रकाशितमासीत्, तदेव सम्पादनं सम्बद्धच्छात्राणामध्ययने सहायकं जातमिति विदन्ति तद्विदः। तदतिरिक्तसहयोगिसामग्रीणामभावेन काठिन्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनुभवतां छात्राणां कृतेऽष्टमनवमसर्गयोष्टीकैव हितकारिणी भवितुमर्हतीति विभाव्य कार्तवीर्योदयमहाकाव्यस्य अष्टम–नवमसर्गयोश्चूडामणीत्यभिधायाः संस्कृतटीकायाः, दिव्यलक्ष्मीरित्यभिधाया नेपालीटीकायाः, त्रिशक्तिरित्यभिधायाष्टिप्पण्याश्च प्रणयने २०६४ तमे वैक्रमाब्दे मम प्रवृत्तिर्जाता । सम्पन्ने कार्यजाते मयाऽस्य टीकाग्रन्थस्य कार्तवीर्योदय–मकरन्द इति नूतनमभिधानं कल्पितम् ।

टीकाप्रणयनकार्यस्यारम्भे मत्सन्निधौ डा. स्वामिप्रपन्नाचार्यमहोदयैः कृतं कार्तवीर्योदय–महाकाव्यसम्पादनम्, जोहेन्नेसनाम्ना शर्मण्यविदुषा कृतं कार्तवीर्योदयमहाकाव्य–सम्पादनम्, मया **ऋतम्भरायाः** विविधेष्वङ्केषु प्रकाशिताः सम्पादनप्राणाश्चत्वारो निबन्धाः, वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेनायोजितायां कार्तवीर्योदयमहाकाव्य–विवेचनगोष्ठ्यां विद्वद्भिः प्रस्तुतानि ग्रन्थिभेदनपत्रसहितानि विचारपत्राणि च सहायको–पकरणान्यासन्। कालिदासादिप्रणीतानां महाकाव्यानामधीतिजन्येन संस्कारेण, व्याकरण–कोषग्रन्थानां सहयोगेन, मित्राणां विदुषां परामर्शेन, उपर्युक्तसकलसामग्रीणां विश्लेषणेन च कथमपि मया टीकायुग्मं विरचितमिति सविनयं विनिवेदयामि । सटिप्पणीकं टीकायुग्ममिदं यदि छात्राणामधीतिक्रियासौकर्यापादकं सम्पद्येत तदा श्रमगुरुणाध्यव–सायेन संवलिता टीकानिर्मितिव्यापृतिरियं सार्था भवेन्नूनम् ।

परनिर्मितमार्गानुसरणापेक्षया नवमार्गनिर्मितिपूर्वकं गन्तव्यानुसरणं दुष्करं भवतीति तथ्यं मया यथार्थतयाऽनुभूतम् । नवनिर्मिते मार्गेऽग्रेसरतां कार्येष्वन्यजननिर्मितानां कार्याणां काऽपि छाया नैव प्रतिबिम्बिता भवति । परमत्र नवनिर्मितिजन्यानि दूषणानि भवितुमर्हन्ति । दोषज्ञा विबुधाः सौजन्यपूर्वकं दोषनिर्देशनं विधाय टीकाग्रन्थस्य निर्दोषत्वापादनाय कीर्तनीयं सहयोगं विधास्यन्तीति वर्तते मदीयः पूर्णो विश्वासः ।

टीकानिर्मितविधौ स्थले स्थले ग्रन्थिस्फोरणे, नूतनार्थसमुद्भावने च प्राज्ञिक–मनुपमं सहयोगं विधाय अस्य टीकाग्रन्थस्य विषये नैजं मूल्यवन्मन्तव्यं प्रदाय कृतार्थ–यद्भ्यो महेन्द्रसंस्कृतविश्वविद्यालयस्य पूर्वशिक्षाध्यक्षेभ्यः प्रा. विद्यानाथोपाध्याय–भट्टमहानुभावेभ्यो भावपूर्णा कृतज्ञतोपायनीक्रियते ।

टीकाद्वयस्य स्थले स्थले वाक्यपरिष्कारे, दोषनिस्सारणे, कतिपयपद्यानामर्थ–स्फोरणे च संस्मरणीयं सहयोगेन साकं मूल्यवद् विभागीयं मन्तव्यं प्रदाय कृतार्थयतां विपश्चिदपश्चिमानां विशिष्टसाहित्यकाराणां वाल्मीकिविद्यापीठान्तर्गतसाहित्यशिक्षण–विभागाध्यक्षाणां प्रा.डा. टीकारामाधिकारिमहोदयानां कृते सहर्षं कृतज्ञतावचनं प्रकटी–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रियते । दूरभाषयन्त्रमाध्यमेन कतिपयशब्दानां व्युत्पत्त्या, कतिपयपद्यानां शब्दार्थस्फोरणेन च संस्कृतटीकानिर्मितावविस्मरणीयं योगदानं कृतवतां साहित्यव्याकरणादिविविधशास्त्र-विदुषां प्रा.डा. दुर्गादत्तशर्मोपाध्यायपौडेलमहोदयानां कृते हार्दिकी कृतज्ञता प्रकाश्यते।

प्रा. श्रीविदुरपौडेल – प्रा. श्रीमाधवराजगौतम – प्रा.डा. विष्णुराजात्रेय–प्रा.डा. विष्णुप्रसाददेवकोटामहोदयैर्विविधविषयेषु परामर्शं प्रदाय कीर्तनीयं योगदानं कृतमिति तेभ्यः सर्वेभ्यो विद्वन्मूर्धन्येभ्यः कृतज्ञतावचनानि उपाह्रियन्ते गुणग्राहितया । अस्य टीकाग्रन्थस्य मुद्रणवितरणोत्तरदायित्वमङ्गीकृत्य सहयोगमाचरते विद्यार्थीपुस्तक-भण्डारस्याध्यक्षाय श्रीशान्तगौतममहोदयायाभारिता प्रकाश्यते धन्यवादज्ञापनपुरस्सरम्।

कार्तवीर्योदयमकरन्दस्य सूक्ष्मेक्षिकया सम्पादनपूर्वकं नेपालीभाषायां प्रस्तावना-लेखं विरचय्य महाकाव्यगतं वैशिष्ट्यं सर्वजनबोधगम्यं विधातुं रमणीयं योगदानं विहितवते सहप्रा. डा. जीवनाधिकारिमहोदयाय, कार्तवीर्योदयमकरन्दं नयनविषयीकृत्य प्रमुदिताय, व्याख्यानकर्मणि सहयोगिने, मकरन्दकारविषये निजं भावपूर्णं वचनरचनं व्याहरते सहप्रा. श्रीमुकुन्दलामिछानेमहोदयाय, अस्य ग्रन्थस्य सम्पादने तथा सज्जीकरणे भावपूर्णं सहयोगं विदधते श्रीमुरारिराजपाण्डेमहोदयाय च साधुवादशतं प्रकटीक्रियते सहर्षम्। अस्य ग्रन्थस्य मुद्रणप्रकाशनोपयोगिकार्यजातेषु तत्परतापूर्वकं व्यासक्ताय श्रीटी.पी. धमलामहोदयाय धन्यवादवचनं व्याह्रियते प्रीतिपूर्वकम् । मदीयटीकाग्रन्थरत्नं प्रकाशयितुं समुत्सुकं पितृभक्तं प्रथमतनयं श्रीनवेन्दुढकालाभिधं वात्सल्यभाजनं शुभाशीराशिभिः स्नापयित्वा प्रीत्या धन्यवादः प्रयच्छ्यते । तथैव मदीयरचनात्मकव्यापारे सदैव सहयोगिभ्यः परिवारसदस्येभ्यः साधुवादशतानि समर्प्यन्ते ।

अवसाने च, टङ्कणप्रकाशनादिकार्यजातेषु साहाय्यमाचरद्भ्यो मित्रजनेभ्यः सज्जनेभ्यश्च साधुवादं व्याहृत्य भगवतो गजाननस्य, भगवतः कार्तवीर्यस्य, भगवत्यास्ताराया:, भगवत्या वाग्वादिन्या जगज्जनन्याः श्रीत्रिशक्तेश्च पुण्यस्मरणपूर्वकं वाग्व्यापाराद् विरमति एष जनः।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।

२०६९/७/१३
कोजाग्रत पूर्णिमा

विदुषां वशंवदः
मकरन्दकारः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकविसुकृतिदत्तप्रणीतकार्तवीर्योदय-महाकाव्यान्तर्गतस्याष्टम-नवमसर्गद्वयस्य पाठ्यविषयोचितं परिशीलनम्

१. उपक्रमः

नेपालजननीसुपुत्रेण महाकविना सुकृतिदत्तेन प्रणीतं कार्तवीर्योदयचरितं नैपालकैभारतीयैः शर्मण्यदेशवासिभिरन्यैश्च साहित्यमर्मज्ञैर्विपश्चिद्भिः साभिरुचि परिशीलितं समादृतं संस्तुतञ्च कल्पनाचिन्तनहृद्यमनवद्यं महाकाव्यमस्ति ।

अस्यां प्रस्तावनायां सर्वप्रथमं महाकवेः सुकृतिदत्तस्य सङ्क्षेपेण परिचयं प्रस्तुत्य कार्तवीर्योदयमहाकाव्यस्य कथावस्तु–काव्यकला–चिन्तनगभीरताप्रभृतिविषयव्यूहदृष्ट्या सामान्येन, नेपालसंस्कृतविश्वविद्यालयस्य साहित्यशास्त्रिस्तरीयपाठ्यक्रमे निर्धारितयोरष्टमनवमसर्गयोश्च पाठ्यविषयौचितीं हृदयङ्गमां विधाय विशेषेण परिशीलनं विधास्यते।

२. महाकविः पन्तोपाह्वः सुकृतिदत्तः

कूर्माचलाभिजनवसुपन्तवंशे समुत्पन्नो विद्वन्मूर्धन्यो रमापतिस्तीर्थराजप्रयागात् कदाचन तीर्थाटनप्रसङ्गे नेपालमागत्य भगवन्तं मुक्तिनाथं नयनगोचरीकृत्य प्रत्यावर्तनसमये वाग्लुङ्नगरे पर्वताधिराजं घनश्याममल्लं ददर्श । वैदुष्यवशीभूतस्य मल्लनृपतेरनुरोधाद् रमानाथो राजगुरुपदमलञ्चकार । सकलशास्त्रपारङ्गतः परमेश्वरभक्तश्च स कृष्णागण्डकीतटे लक्ष्मीनारायणमन्दिरं संस्थापयामास । रमापतेरात्मजौ हरिरामशिवरामौ सकलशास्त्रधुरन्धरौ बभूवतुः। ज्येष्ठो हरिरामस्तु कृष्णानद्याः प्रारभ्य अरुणकौशिकीनदीपर्यन्तं मध्ये निवसतो बुधान् विद्वत्सभायां विजित्य विद्यासम्राडिव बभौ। कीर्तिबम्बनृपतेर्गुरुः कनिष्ठः शिवरामः कल्पद्रुम इव दाता दुःखिनां दैन्यं जहार । तद्दृष्टिपतिताः क्षुत्क्षामा निर्वसना जडाश्च जनास्तदनुकम्पया भोजनं वसनं चेतनां विद्याञ्च प्राप्य स्वस्था जायन्ते स्म । यावज्जीवनं दानव्रतं कलयन्नेष मनीषी दिग्दिगन्तव्यापिन्या कीर्त्या समलङ्कृतो बभूव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवरामस्य शिवराम-भवदत्त-रुद्रदत्ताभिधा विधिनारायणशङ्करसमानास्त्रय आत्मजा आसन् । तेषु भवदत्ताभिधो बुधः सकलशास्त्रपारावारपारीण आसीत् । स हि विद्वच्छिरोमणिर्व्याकरणे न्याये साहित्ये साङ्ख्ये चाप्रतिभटो नेपालक्षितिपाल-पूजितचरणारविन्दो भुवि नितरां रेजे ।

भवदत्तस्य वामाङ्गिनी भार्गवीनाम्ना प्रसिद्धा आसीत् । भार्गवीभवदत्तयोः शैलजासमाराधनोत्पन्नाः पुमर्था इव चत्वारो व्यासदत्त-श्रीदत्त-ज्वालादत्त-सुकृति-दत्ताभिधाः सूनवोऽभूवन् । तेषु ज्वालादत्तो मूर्धन्यो नैयायिकः, श्रीदत्तः साहित्य-सागरपारगः, ज्वालादत्तः ज्योतिश्शास्त्रविदांवरः, चतुर्थश्च सुकृतिदत्तः सकलशास्त्र-धुरन्धर आसीत् ।

वागलुङ्गमण्डलस्य गैरीग्रामान्तर्गते ओखलेनामके स्थाने लब्धजन्मा सुकृति-र्वाराणस्यां नीलदेवपन्तशिष्यतया सकलशास्त्राणि सम्यगधीत्य कालान्तरे स्वगुरुणा साकं नेपालमागतः । भगवत्या ताराया उपासक एष महामनीषी लोकोत्तरेण वैदुष्येण कालिदासभारविमाघादिकवित्वप्रतिस्पर्धिना कवित्वेन च समलङ्कृतो भूभासुरो भूसुर आसीत् । कार्तवीर्योदयमहाकाव्यानुशीलनेन तस्य विलक्षणं पाण्डित्यमवगन्तुं शक्यते।

१८८० तमे वैक्रमाब्दे स्वजनुषा नेपालभुवमलङ्कृत्य सकलशास्त्राधिगमेन स्वात्मानं वाचस्पतितुल्यं विधाय नैकविधाभी रचनाभिः संस्कृतसाहित्यागारं परिपूर्य पर्यन्ते एष मनीषी स्वाध्ययनानुभूतिवैदुष्यकल्पनाशक्तिप्रमाणभूतं कार्तवीर्योदयं महाकाव्यं १९२८ तमे वैक्रमाब्दे पूर्णं चकार । तदनन्तरं कियत्कालपर्यन्तं स जीवन् आसीदिति श्रूयते, परं कदा स्वर्लोकं सनाथयामासेति विषये पर्याप्तं प्रमाणं नैव लभ्यते । अन्त्यकाले गुल्मरोगेण पीडित एष महाकविर्गुल्मरोगनिवारणाय भगवत्या नीलसरस्वत्या आराधनां कुर्वाणः पीडामयानि दिनान्यतिवाहयामास । तस्मिन्नेव काले तेन महाकविना तारावरिवस्या-नामकं स्तवकाव्यं प्रणीतम् । तदनन्तरं तद्रचिता रचना नैवोपलभ्यन्ते । पाशुपतक्षेत्रे आर्यघट्टे भगवत्यास्ताराया नामसंस्मरणपूर्वकं स पञ्चत्वमापेति कर्णाकर्णिकया श्रूयते । सम्प्रति तस्य हंसधवला कीर्तिरिव विराजते । पुनश्च निजेन गुरुत्वेन विभ्राजमानं सर्वविद्याधिष्ठानं कार्तवीर्योदयमहाकाव्यं कवित्वस्य परां काष्ठां कलयत् सुकृतिदत्तस्य वाङ्मयमूर्तिरूपेण सम्प्रत्यपि संसारे विद्योतते ।

विद्वन्मूर्धन्येन महाकविना सुकृतिना विविधाः शास्त्रीयग्रन्थाः, टीकाग्रन्थाः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रोडग्रन्थाः, काव्यमहाकाव्यप्रबन्धाश्च प्रणीताः । तेषु ग्रन्थेषु केचन सम्प्रति प्रकाशिता उपलभ्यन्ते, केचन ग्रन्थेषु नाम्नैव ज्ञायन्ते । केचन ग्रन्था विविधग्रन्थागारेषु पाण्डुलिपि-रूपेण वर्तमानाः सन्ति । सुकृतिदत्तस्य प्रकाशिता अप्रकाशिता पाण्डुलिपिरूपेण वर्तमाना यत्र तत्र सङ्केतिताश्च रचना निम्नरूपेण परिगणिताः सन्ति ।

रचनाविवरणम् – कार्तवीर्योदयमहाकाव्यम्, तारिणीवरिवस्या, वृद्ध्यादि-सूत्राष्टकवृत्तिः, परिभाषेन्दुशेखरक्रोडपत्रम्, शक्तिवादक्रोडपत्रम्, नैषधीयक्रोडपत्रम्, शब्देन्दुशेखरक्रोडपत्रम्, रसिकमाला, रसरञ्जनी, शब्दशक्तिप्रकाशिका टीका, गादाधरी टीका, मकरन्दस्तुतिटीका, शृङ्गारसङ्ग्रहः, उदाहरणचन्द्रिका, शाहवंशविरुदावली, भावामृताभिधाना गीतगोविन्दस्याष्टपदीव्याख्या, सिद्धान्तवादः, स्फोटवादः, रत्नावली, गङ्गाप्रसादः, अलङ्काररचूडामणिः, मन्दारमाला, छन्दःप्रबन्धश्चेत्यादयः सुकृतिदत्तप्रतिभा-चिन्तनचमत्कृता रचनाः सन्ति । एताभी रचनाभिरयं महाकविः कालिदासभारविमाघ-श्रीहर्षादिमहाकविकोटौ प्रतिष्ठापितस्तन्महत्त्वविदांवरैः समीक्षकैः ।

३. कार्तवीर्योदयमहाकाव्यस्य बाह्यस्वरूपम्

सप्तदशसर्गैः १७२८ सङ्ख्यकैः पद्यैश्च समन्वितं चित्रालङ्कारार्थालङ्कारादि-प्रयोगप्रविधिदिग्दर्शकं महाकविना सुकृतिना प्रणीतं कार्तवीर्योदयमहाकाव्यं वैदुष्य-कवित्वयोर्दर्पणमिव विभाति । महाकाव्यस्यास्य बाह्यं कलेवरं मध्यमाकारं वर्तते । एष एवाकारः समीक्षकैः सर्वसम्मान्यतया स्वीकृतः । इतोऽधिकपद्यसर्गविशिष्टानि इतोऽल्पपद्यसर्गसहितानि च महाकाव्यानि बहुत्वाल्पत्वकारणादरुचिजनकानि भवन्ति। अस्य महाकाव्यस्य सर्वगुणसम्पन्नं स्वरूपं विलोक्य विद्यालङ्कारेण योगिशिरोमणिना नरहरिनाथमहाभागेन सहर्षं कथितम्–

सुकृतिदत्तकृतिः सुमनोहरा विहरतीह हिमालयवासिषु ।
विहरतादवनीतलवासिषु नरहरेरिदमेव निवेदनम् ।।

४. श्रीकार्तवीर्योदयमहाकाव्यस्य विषयवस्तुपरिशीलनम्

पूर्वकथा

कार्तवीर्योदयमहाकाव्यस्य नेपालसंस्कृतविश्वविद्यालयस्य शास्त्रिस्तरीय-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाठ्यक्रमे निर्धारितयोरष्टमनवमसर्गयोरेव विवेचनीयत्वादष्टमनवमसर्गयोः कथावस्तु विशेषरूपेण अन्येषां सर्गाणां कथा च सामान्यरूपेण प्रस्तूयते ।

प्रथमसर्गे- मङ्गलाचरणपुरस्सरं राज्ञः श्रीकृतवीर्यस्य राजधानी माहिष्मती नगरी पाण्डित्यसमेधितया काव्यशैल्या वर्णनविषयीकृताऽत्र महाकविना सुकृतिना । **द्वितीयसर्गे-** प्रजाहिताधानपरस्य विश्वविजयिनस्तस्योज्ज्वलेन चरितेन कीर्तनीयेन गुणगणेन च साकं निरपत्यताहैतुकं सन्तापं समुदीर्य तन्निवृत्तये तपोवनविराजिते दत्ताश्रमे तत्प्राप्तिञ्च प्राकाशयत् सूक्तिमधुरया सालङ्कारया काव्यवाचाऽस्मिन् सर्गे महाकविः । **तृतीयसर्गे-** पुत्रैषणाभिभूतस्य तस्य दयालुना दत्तात्रेयेण सह शिष्टाचारप्राणं संवादं प्रस्तुत्य तदीयपुत्राभिलाषपूर्तये दत्तोपदिष्टः समन्त्रको भगवदाराधनाविधिः कविना हृदयहारिण्या काव्यगिरोपस्थापितः । सर्गान्ते च मुनेरनुकम्पया विद्याविशेषस्य पुत्रवान् भवेत्याशीर्वादविशेषस्य च लाभेन प्रमुदितमानसो महिषीसहितः स स्वां पुरीं प्रपेद इति वस्तुजातं समुन्मीलितं सुकृतिना तृतीयसर्गे ।

चतुर्थसर्गे- सुकृतिना कृतवीर्यानुष्ठितायाः संवत्सरव्यापिन्या भगवदाराधनायाः समुदीरणेन तदाराधनाप्रीतस्य भक्तवत्सलस्य हरेराविर्भाववर्णनम्, मदंशश्चक्ररूपी हरिस्त्वत्पुत्ररूपेणावतीर्य विदर्भविषये कनकप्रभाख्ययाऽवतीर्णाया महामायाया साहचर्यं प्राप्य एकातपत्रं महीतलं धर्मेण धारयिष्यतीति नारायणोक्तेर्विशदीकरणम्, कनकप्रभाया मङ्गलमयानि गर्भलक्षणानि पुरस्कृत्य गर्भकालिकसंस्कारनिरूपणपुरस्सरं मङ्गलमये मुहूर्ते चक्ररूपस्य हरेरर्जुनाख्ययाऽवतरणवृत्तस्य प्रकाशनम्, अवतरणसमये देवकृतायाः कुसुमवृष्टेर्देवाङ्गनासम्पादिताया हृद्याया नृत्यकलायाश्च निरूपणं विहितमस्ति चतुर्थसर्गे।

पञ्चमसर्गे- अत्र कविर्दत्तात्रेयविहितप्रथमसंस्कारदीप्तस्य कार्तवीर्यार्जुनस्य संस्कारान्तरदिग्दर्शनपुरस्सरं तदीयया सहजया बाललीलया पित्रोर्मोदातिरेकं स्वभावोक्तिमधुरैर्वचोभिरवर्णयत् । पुनः पञ्चमे वर्षे दत्तात्रेयः शारदाहरिगणेशपूजनपूर्वकं वर्णपङ्क्तिं पाठयित्वा कार्तवीर्यमनुगृहीतवान् । श्रीगुरोरनुकम्पया सकलविद्यावाचस्पतितां कलयतस्तस्य मुखपङ्कजनिलये सानन्दं विहरन्ती भारती नितरां मुमुदे चेति वृत्तजातं कविर्न्यरूपयत् कलात्मकैर्भावगभीरैश्च वचोभिः ।

षष्ठसर्गे- सकलविद्यावारिधेर्महीमहेन्द्रसूनोः परिवेल्लितजटाजूटस्य कार्तवीर्यस्य तपोवैलक्षण्यं दीर्घसमाधिकलनञ्चात्र कविना हृद्यैः पद्यैश्चित्रितम् । ततस्तदीयतपसा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोकपालानां विधेश्च व्याकुलतां निर्दिश्य महेन्द्रप्रेरितस्य ससैनिकस्य मदनस्य कार्तवीर्यतपोभङ्गप्रयासं वर्णयता कविना प्रसङ्गतो मधुमाससमाधुर्यं समुन्मीलितं प्रकृतिसौन्दर्यप्रकाशनपटीयस्या वाचा। ततोऽप्सरसां नैकविधैर्भावाकूतैरप्रभावितं नयने समुन्मील्यापि क्षिप्रमेव निमीलितनयनं संयमिनं कार्तवीर्यं वशीकर्तुमसमर्थस्य पुष्पबाणस्य परमां व्रीडां प्रकाश्य कविः कार्तवीर्यस्य स्वस्वरूपाभिरमणं प्रत्यपादयत् समाधुर्यम्।

सप्तमसर्गे- अत्र सुकृतिनाऽकारादिभिः स्वरैः ककारादिभिर्वर्णैश्च क्रमशः स्वरव्यञ्जनसङ्ख्याबोधकानि पद्यानि सम्पुटीकृत्य चित्रालङ्कारमयो विचित्रः कोऽपि नूतनः पन्थाः प्रकाशितः, चित्रालङ्कारस्य परम्परागता अनेके भेदाश्च स्वकीयेषु पद्येष्ववतारिताः। वस्तुतः सप्तमसर्गस्थं सचित्रं चित्रकाव्यं कवेरालङ्कारिकमूर्धन्यतां प्रमाणयति। चित्रालङ्कारप्रधानेऽपि सर्गेऽस्मिन् कथाप्रवाहभङ्गो नानुभूयते। अत्र सर्वप्रथमं तपोनिरतस्य कार्तवीर्यस्य प्रलोभनाय विरिञ्चिप्रेषितानामणिमादीनामष्टसिद्धीनां कार्तवीर्यसमक्षेऽसामर्थ्यमूलां विमूढतां प्रतिपादयन् कविः कार्तवीर्यतपसा प्रसन्नस्य सदत्तस्य विधेस्तत्सन्निधाववतरणं विधिकृतं कार्तवीर्याय वरप्रदानञ्च प्रकाश्य तस्य स्वधामप्रयाणं कार्तवीर्यस्य च माहिष्मतीप्राप्तिं न्यरूपयच्चित्रालङ्कारगर्भितया वाचा।

अष्टमनवमसर्गव्यापिनी कथा

अष्टमसर्गे- महाराजः कृतवीर्यः पुत्रमवनीतलसार्वभौमं विधित्सुः कुलगुरुं दत्तात्रेयं सविनयमाह- 'गुरो ! भवतः प्रसादान्मामकीनं मनो मोक्षमभिलषति, धुर्ये तनये राज्यधुरं निधाय शान्तिमिच्छामि। मया विषाभा विषया भुक्ताः पुनस्तेषां भोगे नाभिरुचिर्मम काऽपि। यो जनो भुवि दुर्लभं मानवजन्म लब्ध्वा निर्मलैश्चरितैर्भुवनं प्रकाश्य विष्णुपदे विलीयते जगति स एव धन्यः। नृपरूपेण मया प्रभूतानि जटिलानि कार्याणि विधाय महीमण्डलं साधु पालितम्। लोके चक्रवर्तिना राज्ञा यल्लभ्यं तत्सर्वमेव मया लब्धम्। परिणामनीरसैर्लौकिकैर्भोगैर्नात्मा कदापि तृप्तिमधिगच्छतीति तथ्यमनुभूयाहं सम्प्रति भवतोऽनुकम्पया तदितरं नैःश्रेयसं सुखमेव कामये।' एवमुदीरयन्तं कृतवीर्यं प्रति प्रसन्नो दत्तात्रेयः साधु समुपदिष्टवान्।

दत्तात्रेय उवाच - 'महीमण्डलाखण्डल! कीर्तेः प्रथिम्ना पार्थिवकुले पृथुवत् प्रतीयमानो भगवान् धन्यः। सम्प्रति भवान् निजैरुदात्तैश्चरितैर्भगवान् ऋषभ इव प्रतिभाति। त्वरितमेव विद्याविनीते शिष्टे सर्वगुणविशिष्टे सुपुत्रे कार्तवीर्यार्जुने राज्यधुरं निधाय

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवान् परमं पदं प्राप्स्यति । परं गृहाभिनिष्क्रमणात् पूर्वं पुत्रस्य राज्याभिषेको विधिवद् विधेयः ।' गुरोरिमामाज्ञां शिरसि निधाय कृतवीर्योऽपि प्रशस्ते दिने विदुषां भूसुराणा-मुपस्थितौ पुत्रस्य राज्याभिषेकं चकार । पुत्राय महीमण्डलसाम्राज्यम्, विप्रवृन्दाय चिरार्जितधनहिरण्यादिकं सकलजनाय निर्भयत्वं परमेश्वराय चित्तं च ददानः स विनीतमपि पुत्रं शास्तुमना रहसि कदाचिदुपदिष्टवान् ।

कृतवीर्य ऊचे – वत्स ! जनरञ्जनादेव कश्चन जनाधिपती राजपदसम्बोध्यता-मर्हति । प्रकृतिकोपो राज्यविप्लवाय जायते त्वया सदा तन्निराकरणाय स्वस्थः प्रयासो विधेयः । मन्वादिनिर्दिष्टां नृपनीतिमवलम्ब्य शासनपरस्य राज्ञः समक्षे सर्वे प्रणता भवन्ति । लक्ष्मीर्निसर्गचपला विषमस्वभावा च भवति तस्मात्तामधिगम्य नोन्मादाय प्रसरावसरो देयः । रूपसंपद् यौवनं महीमण्डलराज्यं सर्वप्रभुत्वञ्चेति सर्वमेव चेतो-विकारहेतुभूतं मत्वा भवता धीरेण भाव्यम् । उत्कोचजीविनः सचिवोपजापिनो निरपराध-जनसन्तापिनो गोसज्जनविरोधिनश्च धूर्ता राज्यान्निर्वासनीयाः ।

पुनः स उक्तवान्– शासनस्थैर्याय मन्त्रो नितरां गोपनीयः । शासनकार्येषु कुत्र कस्योपयोगः समुचित इति सम्यङ्मनसा चिन्तनीयम् । जनरञ्जनं द्विजसेवनं भोगासक्त-जनसङ्गवर्जनं भगवच्चिन्तनञ्च विधाय सदा शुक्लेन कर्मणा जीवनं यापनीयम् । विषयलौल्यं परिहृत्य प्रोज्ज्वलां मतिञ्चास्थाय निर्मलाय यशसे यत् समुचितं तदेव कर्तव्यम् । शास्त्रेषु श्रद्धा विधेया सा हि सर्वमङ्गलकामधेनुः । संसारे राज्ञां प्रजानाञ्च सर्वमङ्गलविधायिनी नारायणचरणारविन्दयोर्भक्तिर्भवति । विद्वान् विवेकशीलश्च धरणीश्वरो धर्मार्थकाममोक्षाभिधानानां पुरुषार्थानां जीवनसरणौ समुचितोपयोगेन राष्ट्रमेव पुरुषार्थमयं निष्पादयति । सम्प्रति सिंहासनारूढस्य भवतोऽपि तथैव तत्र प्रवर्तना स्यादिति ममाभिलाषः, कल्याणं ते भूयादिति ।

इत्थं पुत्रं कार्तवीर्यमुपदिश्य भाविविरहविचारव्याकुलैर्नयननीराकुलैः पौरैः सस्पृहं सभक्ति विलोकितो राजा कृतवीर्यः सर्वं विहाय तपोवनं जगामेति विषयवस्तु-समन्वितमर्थालङ्कारचमत्कृतं काव्यमष्टमसर्गे विद्योतते ।

नवमसर्गे– श्रीतारिणीपदपङ्कजस्मरणात्मकं मङ्गलं सम्पाद्य काव्यकलाहृद्यै-रनवद्यैः पद्यैर्वर्णयति महाकविः– कृतवीर्यानुशासनमङ्गीकृत्य वसुन्धरां साधु परिपालयतः कार्तवीर्यस्य सन्निधावेकदा सम्प्राप्तो विदर्भभूपतिदूतो विप्रविशेषो मधुरं जगाद–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन् ! भूमण्डलेऽस्मिन् द्वितीयं नाकतलमिव सुराङ्गनारमणीयममन्दानन्दमयं विदर्भ-संज्ञया विश्रुतं राष्ट्रं विजयते । धर्मेण शास्त्रानुशीलनेन ऐश्वर्येण च देदीप्यमानस्य विदर्भदेशस्य विजयोत्सवमहनीया बुधविबुधसेवनीया सौन्दर्यस्पृहणीया मणिमाणिक्य-मनोहरैर्विलासभवनैः सचन्द्रशालैर्विलक्षणैश्वर्यसहितैः सौधैः कलाकोमलेनाभ्रंलिहेन सौन्दर्यसारश्रिया समलङ्कृतेन राजभवनेन भासमाना रमणीजनरमणीया राजधानी कुण्डिननगरी नितरां विद्योतते ।

कुण्डिननगर्याः साहित्यसङ्गीतकलाकलनमनोहरे विद्वद्भिराजिते मणिमये राजभवने क्रथकैशिकवंशमणिः सकलराजन्यचूडामणिर्गुणगरिमवान् भोजराज इति विश्रुतो वसुन्धराजानिर्विराजते । धर्मेण न्यायेन सम्यक्प्रजापालनेन युद्धार्जितेन सद्यशसा स्ववशवर्तिन्या राज्यश्रिया च दीप्तमानसो भूपतिः सदाचारेण सद्व्यवहारेण च सज्जन-मनांस्याह्लादयन् यज्ञाचरणेन लोकहितं प्रकाशयन्, पराक्रमेण शत्रुगणे सततं भीतिं सञ्चारयँश्च विश्वविख्यातो वर्तते ।

महासागराल्लक्ष्मीरिव भोजधराधिपात् कनककान्तिकमनीया कनकप्रभाभिधा कन्या विधातुर्विलक्षणा कृतिरिव प्रादुर्भूता । शैशव एव न केवलं स्वरूपसौन्दर्येणापि तु गुणवैभवेनापि जगत्त्रयीभुवां रुचिगर्वितसुभ्रुवां सुषमाविजयिनी त्रिभुवनसुन्दरी-मूर्धन्येति ख्यातिङ्गता ।

प्रभापूराप्लावितेन वदनमण्डलेन निरवद्येन लावण्यभरेण चमत्कृतायाः कनकप्रभायाः कनकाभस्य कलेवरस्य रचनायां विधुमण्डलवर्तिपीयूषप्रयोगं विधाय विधिर्विधुं गतसारं सम्पादितवानिति मन्ये । यतो हि सम्प्रत्यपि वराको विधुः कनकप्रभाकान्तिकामनया विष्णुपदे स्थित्वा तपस्यन् तनुतां प्राप्य निजां द्विजराजतां प्रकाशयति । तपस्विशिरोमणित्वे प्रदर्शिते सत्यपि निशि कनकप्रभायां निद्रितायां तदीयवदनस्यापि निश्चेष्टत्वाल्लब्धावसरो विधुरसौ कथञ्चित् चन्द्रिकाभिर्विद्योतते, परं यदा निशावसाने कनकप्रभा जागरां कलयति तदा भयभीतोऽसौ प्रभामण्डलं निगूह्य पलायते ।

निर्मले पङ्कजे सुधाऽभावः, सुधासिन्धौ चन्द्रमसि सौरभाऽभावः, परं कनकप्रभा-मुखमण्डलं तदुभयमेव धत्त इति ताभ्यां तस्योपमितिप्रयासो नूनं व्यर्थ एव । पुनश्च कमलं कमलमेवार्थाज्जलीयं मलमेव, विधुमण्डलञ्च सकलङ्कमिति निखिलं जगदेव जानाति । अनयाऽपि दृष्ट्या कनकप्रभावदनं जगति निरुपमं सद् विद्योतते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कनकप्रभाया नयने शिशुखञ्जनगर्वगञ्जने मदनोद्धारमहौषधिरूपे निस्सन्देहम्। वस्तुतः कनकप्रभेयं त्रिगजज्जययात्रायात्रिणो रतिस्मरयोर्विजयपताकायष्टिरिव विराजते। कनकप्रभाकवरीं विलोक्य वराकी चमरी निजं चामरं निष्फलं मत्वा पृष्ठतो विधाय जघनेन बिभर्ति। अस्याः सुधाधरमधरं लावण्यपूराप्लावितं दीप्तं मुखमण्डलं सरस्वती-वीणाझङ्कारमनोहरं स्वरमाधुर्यञ्च स्मारं स्मारं हे राजन्! भवान् कल्पपादपः सा च कल्पलतेति मदीया प्रतीतिरुदेति।

कनकप्रभाया बालमृणालकोमलं भुजयुग्मम्, मृदुलाः करशाखाः, मृदु मांसल-मुन्नतमंसयुगलम्, विमलं कुचकोरकयुग्मम्, सूक्ष्मं मध्यम्, मन्मथरथरूपं नितम्बम्, लोहितमरविन्दाभं चरणयुग्मम्, विलक्षणे ऊरू च मनसिकृत्य वक्तुर्हृदये सेयं कनकप्रभा कस्य कृतिनोऽङ्के शयितेति चिन्ता जागर्ति। कनकप्रभाया अनुदिनमुदयन्तं यौवनारम्भं वीक्ष्य धराधिपो भोजः स्वयंवरोत्सवमाध्यमेनास्याः पाणिपीडनसंस्कारसम्पादनाय राजन्यवर्गमामन्त्रयितुं दूतान् सन्दिश्य मामत्र प्रेषितवान्। अतो भवान् कतिपयेन दिनेन भाविनं स्वयंवरमहोत्सवमलङ्कृत्य तत्परिधापितां वरमालाञ्चाङ्गीकृत्य रत्या मन्मथ इव तया कनकप्रभया समलङ्कृतो जगद्वशीकारं करोत्विति भोजधराधिपदूतवचनामृतं निपीय राजा कार्तवीर्यः सौख्यक्षेमपयोधिमग्नः संवृत्तः।

उत्तरकथा

दशमसर्गे– महाकविरस्मिन् सर्गे कनकप्रभायाः स्वयंवरसमारोहमुपश्रुत्य कार्तवीर्यस्यार्जुनस्य विदर्भनगरीं प्रति यात्राम्, प्रसङ्गतश्च विदर्भराजधानीमवर्णयत्। **एकादशसर्गे–** प्रभातवर्णनोपक्रमे कार्तवीर्यस्य कनकप्रभास्वयंवरस्थलगमनवृत्तान्तोऽत्र ग्रथितः। **द्वादशसर्गे–** कनकप्रभायाः स्वयंवरवृत्तान्तवर्णनं रघुवंशीयेन्दुमतीस्वयंवरवर्णनं नैषधमहाकाव्यान्तर्गतदमयन्तीस्वयंवरवर्णनञ्चादर्शतयाऽङ्गीकृत्य सुविशदं कृतमस्ति द्वादशे सर्गे। **त्रयोदशसर्गे–** अत्र स्वयंवरमण्डपे सर्वोत्कृष्टत्वेन विद्यमानस्य कार्तवीर्यस्य कनकप्रभया वरणं वचनविषयीकृतं कविना।

चतुर्दशसर्गे – कनकप्रभाकार्तवीर्यार्जुनयोर्विवाहवर्णनमत्र काव्यकथाविषयीभूतं कृतमस्ति। अत्रैव विवाहसंस्कारसंस्कृतः कार्तवीर्यः कनकप्रभया देव्या सहोपवनादिषु विहरन्नेकदा जलक्रीडार्थं शर्मदाया नर्मदाया उपकण्ठं याति। तौ यदा जलक्रीडाव्यापृता-वास्तां तदा लङ्केश्वरो रावणोऽपि विहारार्थमागतः। तत्र नर्मदायां क्रीडन्तं तं दृष्ट्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्पवशात्कार्तवीर्यं कुप्यति । ततश्च तत्र तयो रावणकार्तवीर्ययोर्युद्धं समजनि । तत्र युद्धे चासौ कार्तवीर्योऽर्जुनो दशमुखं विंशतिबाहुं रावणं पराजित्य गतदर्पमकार्षीदिति वर्णितम् । **पञ्चदशसर्गे–** महाकविरत्र क्रमशो वर्षाशरदृतुवर्णनेनोपक्रम्य कार्तवीर्यस्य सप्तसु सागरेषु सप्तसु च द्वीपेषु निर्द्वन्द्वं विहारवर्णनं निबद्धवान् । सर्गोऽयं सम्पूर्णेऽपि महाकाव्ये विशालतमः । **षोडशसर्गे–** अत्र कविना विविधानां दर्शनशास्त्रीयाणां सिद्धान्तानां निबन्धनं विधाय चरमपुरुषार्थभूतस्य मोक्षस्य स्वरूपं विशदीकृतम् । सूक्ष्मतमाश्च सिद्धान्ताः प्रकटीकृताः । **सप्तदशसर्गे–** महाकविः सप्तस्त्रिंशत्सङ्ख्यकैः पद्यैरत्र स्ववंशवर्णनं कृत्वा महाकाव्यमिदं पूर्णतामनयत् ।

५. कार्तवीर्योदयमहाकाव्यस्य साहित्यिकं सौन्दर्यम्

अस्मिन्महाकाव्ये महाकविः सुकृतिर्विभावसञ्चारिभावानुभावानां साधुनिष्पत्तिजन्यं माधुर्यमुपस्थाप्य भावानां रसानाञ्चाभिव्यञ्जनेनाऽपूर्वं काव्यसौन्दर्यं प्रसारयामास। शास्त्रीयमहाकाव्यलक्षणमनुसृत्य प्रणीतस्य शृङ्गारप्रधानस्य कार्तवीर्योदयमहाकाव्यस्य धीरोदात्तनायको हरेश्चक्रावताररूपो महामहिमः श्रीकार्तवीर्यः, नायिका च महामायास्वरूपा महाराज्ञी कनकप्रभा । महाकाव्यस्यास्याङ्गी रसः शृङ्गारः । विदर्भराजतनयां ककप्रभामाधृत्य कार्तवीर्याश्रया रतिरत्र स्थायिभावः । यद्यपि प्रायो वीरादयः सर्वे रसा अत्र पुष्टिमाप्ताः परन्तु प्रधानरसस्तु रसराजः शृङ्गार एव । कनकप्रभाकार्तवीर्ययोर्द्वीपद्वीपान्तरविहारक्रमे सहजतयाऽभिव्यक्तस्य शृङ्गारस्य छटा रसिकहृदयद्रावकतया विलसति यथा–

रणद्रत्नाढ्यमञ्जीरं क्वणत्कनककङ्कणम् ।
चलत्काञ्चीकलकलं सङ्कुचन्नेत्रपङ्कजम् ।।
मिलत्सीत्कारवदनं प्रेङ्खद्धारकरम्बितम् ।
वान्तमल्लिकधम्मिल्लतल्लजं सल्लयान्वितम् ।।
कपोतपोतमणितानुकुर्वन्मणितोज्वलम् ।
अवाञ्चच्चूचुककुचं बन्धनद्वाहुवल्लरि ।।
खिद्यन्मध्यं त्रुटन्नीविस्विद्यद्वक्त्रञ्चलत्कचम् ।
धृष्णुवज्जघनं रिङ्गन्नितम्बपृथुबिम्बकम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रगल्भमानकरजमेधमानोपचारकम् ।
बहिर्विहसमानालिप्रेङ्खमाणभुजिष्यकम् ।।
प्रेक्षमाणामरवधूस्पृहितं प्रावृतत्ततः ।
सुरतं सुरतन्त्रस्य तस्य ताभिरनारतम् ।।
वात्स्यायनादिमुनिभिस्सूत्रिता ये रतोत्सवाः ।
तद्भाष्यभूतास्तास्वासन्भूपतेः स्मरकेलयः ।।

(कार्त० १५/१०९-११५)

यद्यप्यत्राभ्यासव्युत्पत्तिप्रतिभाभिधैः काव्यकारणैः पोषमाप्ता काव्यकलाऽनितरसाधारणी वर्तते तथापि तेषु बहुज्ञताऽपरपर्याया व्युत्पत्तिरेव चूडामणितया विराजते । सामान्यसंस्कृतज्ञजनदुर्बोध्या पदावली, श्लेषस्य चूडान्त उपयोगः, वेदोपवेदवेदाङ्गधर्मशास्त्रपुराणेतिहासगद्यकाव्यपद्यकाव्यकथावाङ्मयसन्निहितानां चिन्तनानां भूयस्त्वम्, वैदिकसनातनसंस्कृतेः शुभ्रा वर्णना, सकलशास्त्रकाव्यसारसन्दोहरूपा भव्या निर्मितिः, विच्छित्तिपूर्णायां शास्त्रभित्तौ देदीप्यमाना काव्यकला, वैदिकसनातनधर्मस्य शुभ्रा वर्णना, नेपालीयपरम्पराया गौरवपूर्णः प्रपञ्चः, लब्धरक्षणार्थस्य मङ्गलार्थस्य च क्षेमशब्दस्य सर्गान्ते प्रयोगः, क्षेमाङ्कनाम्ना महाकाव्यस्य व्यपदेशः प्रज्ञाकल्पनयोर्विचित्रः संयोगश्चेत्यादयो विषया महाकाव्यमेतद् विलक्षणमहाकाव्यकोटौ प्रतिष्ठापयन्ति ।

शास्त्रकाव्यव्युत्पत्तिपरिज्ञानार्थं पाठकैः कार्तवीर्योदयमहाकाव्यस्य प्रथम-पञ्चम-षोडशसर्गा मननीयाः सन्ति । भक्तिजन्यां माधुरीं पातुं तृतीयसर्गोऽध्ययनीयः । तपःस्वरूपनिभालनार्थं षष्ठसर्गो विचारणीयः । स्वरवर्णैः क्रमशः पद्यानि प्रारभ्य तेष्वेव स्वरवर्णेषु पद्यसमापनं सुकृतेरेव विशेषता । तादृशानि पद्यानि सप्तमे सर्गे विलसन्ति। सप्तम एव पाठकविस्मापिनी चित्रकाव्यकला विद्यातते । अष्टमे सर्गे उपमातः प्रारभ्य सङ्क्रान्तानां षष्ट्यधिकानामर्थालङ्काराणां प्रयोगेण साकं कथावस्तुनोऽव्याहतो विस्तारो विलोक्यते। एतादृशं कविकर्म सिद्धहस्तानां महाकवीनां काव्येष्वेव विलोकयितुं शक्यते।

नवमसर्गे निर्दिष्टं कनकप्रभाङ्गप्रत्यङ्गवर्णनं निजेन चमत्कारेण नैषधचरितान्तर्गतं दमयन्तीसौन्दर्यवर्णनं प्रतिस्पर्धते । दशमे सर्गे सूक्तिमधुरया वाचा वर्णितो गृहस्थजीवनमहिमा न कस्य हृदयं चुम्बति । एकादशे सर्गे प्रस्तुता प्रातःकालिकी बन्दिजनगीताऽपूर्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वा पाठकहृदयेषु अमन्दं प्रसादं प्रसारयति। द्वादशत्रयोदशसर्गयोर्भारतवर्षीयाणां भूपानां स्वयंवरार्थमागतानां वंशदेशसौन्दर्यकलाकारित्वपाण्डित्यादिसंवलितं निर्वर्णनं नैषधकाव्ये प्रस्तुतात् तादृशवर्णनादपि सूचनाबोधप्रदं चमत्कारचारु विभाति। चतुर्दशसर्गे प्रस्तुतं विदर्भराजधानीसौन्दर्यम्, वैदिकसनातनधर्मानुकूलपाणिग्रहणसंस्कारः, विवाहसमारोहे जन्यानां कन्यापक्षीयैः साकं नेपालदेशीयपारम्पर्यानुकूलः पद्यात्मकः संवादः, जन्यानां भोजनवर्णनञ्चेत्यादयो विषयाः कस्य हृदयमानन्दद्रुतं न सम्पादयन्ति ?

पञ्चदशे सर्गे कनकप्रभाकार्तवीर्ययोः शिष्टशृङ्गारमयो विहारश्चर्वणीयैरिव सुकोमलैः सुमधुरैश्च पद्यैर्गुम्फितोऽनिर्वचनीयं काव्यपीयूषं पाययति। पञ्चदशे सर्गे एव महाकाव्यं समाप्य विश्रान्तेन कविना पुनः स्वकीयशास्त्रव्युत्पत्तिप्रदर्शनाय प्रणीते इव षोडशे सर्गे प्रतिपादिता दार्शनिकाः सिद्धान्ताः षोडशसर्गीयं काव्यं शास्त्रकाव्यमिति निश्चाययन्ति। सप्तदशे सर्गे कविना विद्या–सदाचार–भगवद्भक्तिविशेषैर्जगतिविश्रुतो निजो वसुपन्त–वंशो वचनविषयीकृतः, पाठकसमक्षे निजः प्रामाणिकः परिचयश्च प्रतिपादितः।

अस्य महाकाव्यस्य श्लेषानुप्रासमयं धीरोदात्तनायकपुरुषार्थानुप्राणितं वीरादिभि–रङ्गरसैर्मनोहरं व्यङ्ग्यार्थमहनीयं सौन्दर्यं प्रतिपादयता कविना स्वयमेवोक्तम्–

भङ्गश्लेषप्रचुरमुदयद् बह्वनुप्रासपद्यं
धीरोदात्तस्मृतिगदिलसन्नायकं पूर्णमङ्गैः ।
वीरप्रायाखिलरसयुतन्नातिसंक्षिप्तसर्गं
प्रायो व्यङ्ग्यप्रकटितचमत्कारसारप्रचारम् ।। (कार्त० १७/१६)

महाकाव्यमिदं श्रीहर्षप्रणीतनैषधमहाकाव्यसदृशमित्याकूतं विशदीकुर्वता महाकविना निष्पक्षमूल्याङ्कनाय विद्वांसः पाठका अभिप्रेरिताः। यथा –

नासूयामो वयमिह बुधा मत्सरत्यक्तचित्ताः
श्रीहर्षोक्तिस्सहृदयहृदां हर्षवर्षन्तनोतु ।
तुल्या हीना मम नु भणितिर्यादृशी चास्ति तस्याः
सत्यं सत्यन्निगदत तथा नानृतात्पापमन्यत् ।। (कार्त० १७/२०)

विशेषतो भगवत्या नीलसुन्दर्यभिधानायास्तारायाः कृपाप्रसादरूपमिदं महाकाव्य–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मस्ति । तस्मात् तदीयदिव्यसौन्दर्यमेवात्र प्रतिबिम्बितमिति वक्तुं शक्यते । भगवत्या ताराया: साधकेन महाकविना निर्मितमेतन्महाकाव्यं श्रद्धापूर्वकमनुशीलने प्रवृत्तेभ्यः पाठकेभ्यस्ताराया: कृपादृशं गमयितुं समर्थमिति महाकविना स्वयं समुदीरितम्-

चिरञ्जयतु रञ्जयत्वलमिदं सुकाव्यं बुधान्
मुदेव वसुधातले भवतु मिष्टमिष्टन्नृणाम् ।
मयीव परिशीलनश्रमयुतेऽस्य मर्त्यान्तरे
पतन्तु करुणादृशो भुवनतारिकाया द्रुतम् ।। (कार्त० १७/३६)

कार्तवीर्योदयमहाकाव्यस्य सर्वाङ्गीणं सौन्दर्यन्त्वस्यामूलचूडं परिशीलिता जन एव याथार्थ्येन प्रतिपादयितुं शक्नोति नेतरः ।

विद्वच्चूडामणिना महाकविना सुकृतिना कार्तवीर्योदयमहाकाव्ये विशिष्टया काव्यकलया साकं साङ्ख्यस्य, योगस्य, वेदान्तस्य, न्यायदर्शनस्य, जैनदर्शनस्य, बौद्धदर्शनस्य च सिद्धान्ता व्याकृता विभिन्नेषु सन्दर्भेषु । महाकवेः कालिदासस्य महाकाव्यानां नाटकानाञ्च, भारविप्रणीतस्य किरातार्जुनीयमहाकाव्यस्य, माघकृतस्य शिशुपालवधमहाकाव्यस्य, बृहत्कथायाः, बाणरचितायाः कादम्बर्याः, महाभारतस्य, रामायणस्य, ऋग्यजुःसामाथर्वाख्यानां वेदानाम्, धनुर्वेदगान्धर्ववेदादीनामुपवेदानाम्, व्याकरणस्य, निरुक्तस्य, छन्दःशास्त्रस्य, शिक्षायाः, ज्योतिषस्य च शुक्लानि चिन्तनानि सनामोल्लेखं प्रौढ्या प्रकाशितानि विभिन्नेषु सर्गेषु । इत्थं महाकविरस्मिन्महाकाव्ये सर्वशास्त्रसर्वकाव्यानुशीलनजन्यां निजां व्युत्पत्तिं प्रकाशयामास । सप्तमे सर्गे चित्रालङ्कार-विज्ञतां निजां व्युत्पाद्य अष्टमे सर्गे च सनामनिर्देशमर्थालङ्कारप्रयोगं विधाय महाकविर्निजां काव्यशास्त्रीयामसाधारणीं वैदुषीं व्युत्पादयामास ।

कार्तवीर्योदयमहाकाव्यस्य शास्त्रचिन्तनमहिमवत्त्वं प्रकाशयता कविना तत्रैवोदीरितम्-

कतिपयपदयोजनासु वाच-
स्पतिरनुयातु तुलाङ्गुरोः प्रसादात् ।
अहमिव न निबन्धगाढबन्धे
प्रभुरयमस्ति सुरक्षितीक्षितस्सः ।। (कार्त० १७/१८)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्तवीर्योदयमहाकाव्यमिदं विविधशास्त्रपाण्डित्यचमत्कृतैर्विद्वद्भिरेव पठनीयं न तु साधारणैः पाठकैरिति प्रतिपादयन् महाकविराह –

फणिपतिभणितिप्रविष्टचेता
उदयनवाचि विशारदः स्मृतिज्ञः ।
भरतवचनभारतोक्तिविज्ञो
मम कृतिदर्शनमातनोतु विद्वान् ।। (कार्त० १७/१७)

पर्यन्ते काव्यशास्त्रस्य प्रयोगशालेव विद्यमानमपि नैसर्गिकगुणैरोतप्रोतं रसभाव-गङ्गातरङ्गचमत्कृतं व्युत्पत्तिविशिष्टं महाकाव्यमेतन्न केवलं नेपालस्य, न च केवलं भारतवर्षस्यापितु समग्रस्यैव संसारस्यामूल्यं रत्नमस्तीति निष्कर्षतया वक्तुं शक्यते ।

६. अष्टमनवमसर्गयोः साहित्यिकं सौन्दर्यम्

श्रीकार्तवीर्यस्य भौतिकमाध्यात्मिकञ्चोदयं विषयीकृत्य प्रणीतमिति सार्थकमिदं कार्तवीर्योदयमहाकाव्यमिति ग्रन्थनाम । अनुकरणीयचरितसमुज्ज्वलमिदं महाकाव्यं महाकाव्यसंसारे विशिष्टं स्थानं धत्ते । तदन्तर्गतमष्टमसर्गमधिकृत्येह साहित्यिकमनुशीलनं विधीयते सङ्क्षेपेण ।

एकनवतिसङ्ख्यकैर्वसन्ततिलकावृत्तगुम्फितैः सप्तभिर्मालिनीवृत्तनिबद्धैः पद्यैः शार्दूलवृत्तनिबद्धेन पद्यद्वयेन चैकैकाभ्यां शिखरिणीश्लोकपद्याभ्यां निर्वृत्तः कार्तवीर्योदय-महाकाव्यस्याष्टमसर्गोऽर्थालङ्कारप्रयोगदृष्ट्या प्रणीतोऽर्थालङ्कारकाव्यरूप एव। वाग्देवता-वतारेण मम्मटेन 'काव्यप्रकाशे' विमृष्टानामुपमापूर्णोपमालुप्तोपमादिसङ्करान्तानां सप्तति-सङ्ख्यकानामर्थालङ्काराणां प्रायस्तेनैव क्रमेण कुत्रचित् च क्रमव्यत्ययेनोदाहरणरूपाणि पद्यानि प्रणीय सुकृतिर्निजामर्थालङ्कारनर्तननिपुणतामभिव्यक्तवान् सहजतया । साग्रह-मर्थालङ्कारोदाहरणप्रणयनपरोऽपि सुकृतिः काव्यकथाया उत्तरोत्तरमुत्कर्षमेव कृतवान्। नात्र काव्यगुणविकर्षो विलोक्यते नापि मूलकथाप्रवाहभङ्गः ।

अलङ्कारशास्त्रचूडामणेः 'काव्यप्रकाशस्य' दशमोल्लासगतानामर्थालङ्कार-लक्षणानां प्रयोगशालास्वरूपोऽयमष्टमः सर्गः । विलक्षणेयं शक्तिर्नेपालीयस्य महाकवेः। नूतनोऽयं पन्थाः काव्यकलाकलनकर्मणि । काव्यप्रकाशोत्तरवर्तिष्वनेकेषु लक्षणग्रन्थेषु सत्स्वपि काव्यप्रकाशीयामलङ्कारमान्यतां समादृतवता सुकृतिना मम्मटीयेषु काव्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धान्तेषु परमा श्रद्धाऽभिव्यक्ताऽनेनैव व्याजेनेति प्रतिभाति। सहैवार्थालङ्कारैरत्र शब्दालङ्कारचमत्कृतिरपि रसिकान् मोदयति नितराम्। सम्पूर्णोऽष्टमसर्गोऽर्थालङ्कारमय इति तत्रत्यानामुदाहरणानामत्र प्रस्तुतिरर्थहीना । सर्गान्ते कविर्माधुर्यादिगुणानां गुणसङ्करस्य चोदाहरणपद्यान्यपि प्रणीतवान् । माधुर्यं यथा –

अथ कनकतनूजो न्यस्य भार्यां तनूजे
गुरुपदमनुयास्यन्मौनमाधाय वेषम् ।
मितहितवचनेनाश्वासयन्पुत्रपौत्रान्
तपसि विहितकामो मन्दिरात्सम्प्रतस्थे ।। (कार्त० ८/९७)

करुणरसेनोज्ज्वलः शान्तरसोऽत्र माधुर्यगुणानुकूलैर्वर्णैश्चमत्कृतो विभाति ।

अस्मिन् सर्गे गुणेषु माधुर्यस्य रीतिषु च वैदर्भ्या बाहुल्येन प्रयोगो जातः । पुनश्चात्र रसेषु शान्तरसस्यैव परिपाकः कविना कृतः । यथा –

उटजविपुलसौधः शान्तिराज्ञीविहारी
शमदमसचिवाढ्यः कामक्रोधादिशत्रून् ।
द्रुततरमभिभूय प्राप्तयोगाग्रभूमि-
र्व्यहरदतुलसौख्ये भूमिजानिः पुराणः ।। (कार्त० ८/९९)

कविगता तारिणीविषयिणी भक्तिः, कृतवीर्यगतां दत्तात्रेयविषयिणी रतिः, कार्तवीर्यगता कृतवीर्यविषयिणी रतिश्चेह भावरूपेण पोषमापन्नाः सन्ति । कविगता तारिणीविषयिणी रतिर्यथा –

आविर्भवतु तारिण्याः करुणापङ्गसन्ततिः ।
या चरीकर्ति वैधेयान्मादृशानपि सत्कवीन् ।। (कार्त० ८/१)

प्रभूतेषु पद्येषु लक्षणामूलार्थान्तरसंक्रमितवाच्यध्वनेरर्थशक्तिमूलध्वनेश्च प्रयोगा लभ्यन्ते । यथा –

शूराद् बिभेत्युपहसत्यपि भीरुकञ्च
नास्तेऽति दातरि न तुष्यति बद्धमुष्टौ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नानारतं भजति च त्यजति प्रहृष्टा,
मुग्धाङ्गनेव नरनाथरमापि वत्स ।। (कार्त० ८/७३)

अत्र स्वतः सम्भविना स्वभावोक्त्यलङ्कारेण राज्यसत्तायाः कुशलसञ्चालनस्य कर्तव्यता वस्तुरूपेणाभिव्यक्ता वर्तते । काव्यगुणैरेभिः साकं शब्दार्थयोर्मिथः प्रतिस्पर्धया रमणीयोऽयमष्टमः सर्गो निजामुत्तमोत्तमकाव्यतां प्रमाणयति नूनम् ।

कार्तवीर्योदयमहाकाव्यस्याष्टमसर्गः प्रायो मम्मटक्रमेण उपमादिसङ्करान्तानाम-लङ्काराणां प्रयोगभूमितया कविना निष्पादितः । गतिशीलेन कथावस्तुना साकमर्था-लङ्काराणामपि अव्याहतागतिरत्र अनुभूयते । कथावस्तुचमत्कृतिरलङ्कारनिष्पत्तिश्चापि सारस्वतानां महाकवीनामेव कृतिषु सम्भवति । प्रतिपद्यमलङ्काराणां नामग्रहणेन कवि-स्तत्तदलङ्काराणां परिपाकं विदधे । एतेन छात्रा लक्ष्यलक्षणसङ्गमने पटीयांसो भवितु-मर्हन्तीति तेषां प्रांयोगिकी विशिष्टोपलब्धिः सम्भविनी अष्टमसर्गाधीतिजन्या । इत्थमेवात्र माधुर्यप्रसादगुणयोरपि प्रयोगपरिपाटीदिग्दर्शकानि सन्ति पद्यानि कानिचन ।

नवमसर्गे दत्तप्रसादादवतीर्णस्य हरेश्चक्रावताररूपस्य काव्यनायकस्य कार्तवीर्यस्य विद्याध्ययन-शत्रुसन्तापनतपोनिष्ठाचमत्कृतं व्यक्तित्वं प्रतिष्ठापयता महाकविना सहृदयाहृदयाह्लादिनीं काव्यकलामनुसृत्य जागतिकजनानां सर्वाधिकतया हृदयस्पर्शिनो हृदयद्वयमेलनजन्यचमत्कारावहस्य लौकिकपारलौकिकमङ्गलजनकस्य पाणिपीडन-संस्कारस्य प्रतिपिपादयिषया कौतूहलोत्पादिनी पृष्ठभूमिर्विरचिता विभाति ।

रसराजस्य विप्रलम्भशृङ्गारस्य पूर्वरागभेदमाध्यमेन नवमसर्गेऽस्मिन् विदर्भनरेश-दूतस्य विप्रस्य सन्देशवचनानि कविना तथोपस्थापितानि विच्छित्तिपूर्वकं यथा सहृदय-हृदयानि भवन्ति कनकप्रभाया आभापूरविलीनानि । अत एव समीक्षकः पं. श्रीब्रह्मदत्त आह- 'महाकाव्येऽस्मिन् नवमसर्गात् काव्यार्थो मुकुलीभवन् दृश्यते । आलम्बनभूतायाः कनकप्रभाया स्वयंवरे योजनामुपक्रान्तुं महाकविः सुकृतिदत्तपन्तः प्रथममत्र सर्गे रूपगुणादिवैभवं वर्णयति' इति । इत्थं नवमसर्गीयं वस्तु काव्यकलादृष्ट्या महनीयमिति प्रमाणितं भवति ।

कलेवरेऽङ्गप्रत्यङ्गानां समुचिता संस्था यदा हृद्या भवति तथैव काव्यकलेवरे सुविन्यस्ता पदसङ्घटना काव्यसौन्दर्यं समेधयति। महाकवेः श्रीहर्षस्य **धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि** इत्युक्तिवशीभूतो महाकविः सुकृतिः कनकप्रभायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वरूपसौन्दर्यस्य मानसिकसौजन्यस्य च निरीक्षणकर्मणि सावधानमनाः प्रकृतशृङ्गार-रसानुकूलां वैदर्भीरीतिमत्र नवमसर्गे साधु प्रयुक्तवान् समुचितपदसन्दर्भैर्विशेषतः, सामान्यतश्च वैदर्भीपाञ्चालीगुणमिश्रिता लाटी कविना प्रयुक्ता विभाति । अत्र गाढबन्धाया गौड्या दीर्घसमस्तपदप्रयोज्यायाः पाञ्चाल्याश्च निष्पादने शृङ्गारानुसन्धानद्रुतचेतसा कविना नैवायासो विहितः । दिग्दर्शनार्थमेकं वैदर्भीविशिष्टं माधुर्यानुप्राणितञ्च पद्यम् –

पदयुगमतिमन्दं चञ्चलं नेत्रयुग्मम्
कृशतरमवलग्नं पीनपीनो नितम्बः ।
कुचयुगलमपीषत्प्रांशु नाभिर्गभीरा
जयति मदनमित्रं यौवनं प्राप्य तस्याः ।। (कार्त० ९/१०७)

वैदर्भीपाञ्चालीगुणमिश्रिता लाटी रीतिरत्र कविनेत्थं पुरस्कृता –

पृथुवृत्तनितम्बमण्डलोपरिशिञ्जन्मणिमञ्जुमेखला ।
दरघूर्णितनेत्रपङ्कजा शयिताङ्के कृतिनो नु कस्य सा ।।
(कार्त० ९/९०)

कार्तवीर्योदयमहाकाव्यस्य नवमसर्गे चित्तवृत्तेर्द्रुतिदीप्तिस्फीतिहेतुभूतेषु माधुर्यौजःप्रसादेषु माधुर्यप्रसादयोरतिशयेनाभिव्यक्तिरनुभूयते । ओजसस्तु क्वचिदेव। प्रसादानुप्राणितं पद्यमेकं यथा –

हरलोचनवह्नितापितो मदनोऽस्यास्सरसे पयोधरे ।
त्रिवलित्रिपथातटान्तरे रमते नाभिसरोवरेऽप्यलम् ।। (कार्त० ९/८४)

कार्तवीर्योदयमहाकाव्यस्य नवमसर्गेऽर्थालङ्काराणामहमहमिकया सहृदय-हृदयझङ्कारकारि प्रस्फुटनमनुभूयते । विशेषतो रूपकपरिणामोत्प्रेक्षातिशयोक्त्यपह्नुतीनां रामणीयकमत्र विभाति । शब्दालङ्कारेषु अनुप्रासोऽपि क्वचन सङ्गीतधर्मितया विच्छित्तिं वितनुते । भञ्जिकागञ्जिकारञ्जिकापञ्जिकापदैर्निष्पन्नस्यानुप्रासस्य छटा विलोक्यताम्-

इह सञ्जितशालभञ्जिका प्रविशच्चित्तविषादगञ्जिका ।
नरनाथमनोऽनुरञ्जिका समितिः शिल्पपदार्थपञ्जिका ।।
(कार्त० ९/३२)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदर्भभूमिरेव स्वर्गभूमिरित्यर्थे निष्पन्नं रूपकं निभाल्यताम् –

जयतीह विदर्भसञ्ज्ञया प्रथितन्नाकतलं स्वलङ्कृतम् ।
विबुधैर्गुरुशिक्षितैर्भृतं विलसन्निर्जरसुन्दरीश्रितम् ।। (कार्त० ९/४)

विधिः स्वयं स्वर्णकमलचन्द्रकर्पूरचूर्णलेपं निष्पाद्य कनकप्रभां विलिम्पतीवेति सम्भावनया निष्पन्नोत्प्रेक्षा कियन्मनोहारिणी वर्तत इति ज्ञायताम् –

कनकाम्बुजचन्द्रचन्दिरात् क्वथितात्सौरभवत्सुशीतलम् ।
हृदयङ्गममुज्ज्वलञ्जलं विधिरादाय विलिम्पतीव ताम् ।।
(कार्त० ९/४९)

कुण्डिननगरीस्थराजभवनं सूर्याय विश्रान्तिं प्रयच्छतीति वचनभङ्ग्या निष्पन्नाऽतिशयोक्तिर्यथा –

यदिधिष्ठितराजमन्दिरं वरमभ्रंलिहमर्वतां रवेः ।
पथि विश्रमदं हरेः पदे तनुते रूपकशातिशातनम् ।। (कार्त० ९/२२)

कनकप्रभायाः पयोधरपरिसरे दृश्यमाना तन्वी रोमावली, नास्ति रोमावली अपितु सा सूक्ष्मपिपीलिकावलीति वचनरचने प्रकाशिताऽपह्नुतिरत्र विलोक्यताम् –

सविधेऽस्ति पयोधरोन्नतिरिति संसूचयितुं विनिस्सृता ।
किमु सूक्ष्मपिपीलिकावलिस्तनुरोमावलिकैतवादिह ।।
(कार्त० ९/८६)

यौवनं स्वयं नायकतामङ्गीकृत्य कनकप्रभाकलेवरे रमत इति कथनेन प्रकटीकृता समासोक्तिर्यथा –

इयमस्ति नरेन्द्रनन्दिनी शिशुताप्रेमवतीति यौवनम् ।
शिशुतामवलम्ब्य तत्तनौ रमते सम्प्रति सत्प्रतिश्रवम् ।।
(कार्त० ९/१०३)

निदर्शनाय प्रदर्शितानीमानि कानिचिदालङ्कारिकपद्यानि । विस्तरभयान्नाधिकमुच्यते स्वयमेव पाठकैर्यत्र तत्र लक्ष्यलक्षणसमन्वयो विधेयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवमसर्गे कविनैकवारमेव देवतानिष्ठभावस्य परिपाकः कृतो यथा –

कुण्डलीश्वरमञ्जीरमणिसिञ्जितरञ्जितम् ।
विघ्नव्यूहं गञ्जयतान्तारिणीपदपङ्कजम् ।। (कार्त० ९/१)

अत्र तारिणीचरणारविन्दगतो कविनिष्ठो रतिभावः सहृदयप्रतीतिविषयतां कलयति। नवमे सर्गे राजविषयिण्या रतेर्भावरूपता विलोकनीया । यथा –

क्रथकैशिकवंशमौक्तिकं गुणविश्रामललामधाम सः ।
इह भोज इति प्रथाङ्गतो धरणीजानिरलं विराजते ।। (कार्त० ९/३५)

नवमे सर्गे विप्रलम्भशृङ्गारस्य पूर्वरागनामा भेदो विजृम्भते । विदर्भराजपुत्रीं कनकप्रभामालम्ब्य अर्जुनाश्रयो रतिभाव आस्वाद्यतेऽस्मिन् रसराजशृङ्गारमहनीये नवमे सर्गे । आलम्बनभूतायाः कनकप्रभायाः स्पृहणीयं स्वयंवरोत्सवमुपलक्ष्य तत्पृष्ठ-भूमितया मधुरैः पदसन्दभैर्हृदयोद्दीपकैरन्यैर्वस्त्वलङ्काररसध्वनिभिश्च संवलितमास्वाद्यं काव्यं प्रणीतवान् महाकविः सुकृतिः । निदर्शनार्थमेकमुदाहरणम्–

पदयुगमतिमन्दञ्चञ्चलन्नेत्रयुग्मम्
कृशतरमवलग्नम्पीनपीनो नितम्बः ।
कुचयुगलमपीषत्प्राशुनाभिर्गभीरा
जयति मदनमित्रं यौवनं प्राप्य तस्याः ।। (कार्त० ९/१०७)

नवमे सर्गे कनकप्रभायाः सौन्दर्यवर्णनं नैषधमहाकाव्ये कृतेन दमयन्तीसौन्दर्य-वर्णनेन प्रभावितमिव प्रतीयते ।

७. अष्टमनवमसर्गयोः शास्त्रीयचिन्तनदृष्ट्या परिशीलनम्

श्रीसुकृतिदत्तः पूर्वं विद्वन्मूर्धन्यः पश्चान्महाकविः । अतस्तत्प्रणीतमहाकाव्ये विद्याव्युत्पत्तिः स्वाभाविकी । यतो हि सुकृतिना प्रणीतानां ग्रन्थानां भूयसी सङ्ख्या कवेस्तस्याऽप्रतिभटं वैदुष्यं प्रमाणयति ।

कवेः प्रतिभया चमत्कृतं वैदुष्येण गभीरञ्च काव्यं भावसम्प्रेषणेन मानवहृदय-परिवर्तने सहायकं कर्तव्याकर्तव्यविवेकप्रदायकं भावरसास्वादविधायकं च सम्पद्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावचिन्तनयोश्चमत्कृत्याधायकः समानुपातिकः संयोगः केषाञ्चिदेव महिमवतां महाकवीनां काव्येषु अनुभूयते । कार्तवीर्योदयमहाकाव्यस्याष्टमसर्गान्तर्गतं काव्यञ्चै-तादृशमेवानुभूयते । अत्र कर्मोपासनाज्ञानसम्बद्धा विषयाः कविना पाठकहृदयनिपेयतया काव्यकलामाश्रित्य प्रस्तुताः ।

कविरत्र कृतवीर्यदत्तात्रेयसंवादमाध्यमेन वेदानां सनातनधर्मप्राणरूपत्वं सम-सूचयत्, वैदिकविधिना सम्पन्नस्य राज्याभिषेकस्य वृत्तञ्च निरदिशत् । शब्दानुशासनस्य निपातप्रक्रियां विग्रहविधिञ्च संसूच्य.निजां व्याकरणवैदुषीं स प्रकाशितवान् । यथा- **ये दुर्हृदं च सुहृदं युगपन्निपात्य** (कार्त० ८/८८), **वृत्त्यर्थविग्रहगिरः खलु शब्दशास्त्रे** (कार्त० ८/६४) इत्यादि । कविरत्र मन्वादिसम्मतां कौटिल्यादिसंवर्धितां धर्मानुप्राणितां राजनीतिं कृतवीर्यप्रदत्तस्योपदेशस्य माध्यमेन प्रकाश्य निजां राजनीतिनिपुणतां न्यरूपयत्।

नाभि-ऋषभ-विध्यादिपदान्युपमानतया प्रयुज्य कविना स्वीया पुराणगवीक्षीर-पायिताऽभिव्यक्ता । अष्टमसर्गस्यादावन्ते च वेदान्तसम्बद्धा विचारा प्रस्तुताः । क्वचन कविर्न्यायदर्शनस्य पारिभाषिकशब्दान् प्रयुज्य नैजं न्यायविद्यावैदुष्यं प्रमाणितवान् । यथा - **नो पक्षतान्वयिविवेकविशुद्धचित्तेऽसाध्यस्य किन्तु कथनीयमिदं ब्रवीमि।** उपासनाशास्त्रेषु पुराणादिषु च पल्लवितस्य भक्तियोगस्य हृद्यान् विचारान् काव्यकलया प्रस्तुत्य कविरात्मनो भक्तियोगसाधकत्वमभिव्यक्तवान् । यथा-

आसाद्य जन्म शरदिन्दुकरावदातै-
राच्छाद्य सर्वभुवनं चरितैः सुहृद्यैः ।
यो हंससारमहितः शरदभ्रचर्य्यः
संलीयते विमलविष्णुपदे स धन्यः ।। (कार्त० ८/७)

शास्त्रीयैः कविनिरूपितैरेभिर्विषयैः समनुप्राणितोऽष्टमः सर्गश्चिन्तनगाम्भीर्येण पाठकानुपकरोति । 'वैयाकरणो नैयायिको नाट्यशास्त्रनिपुणो महाभारतमर्मज्ञः सकल-स्मृतिविज्ञश्च विद्वान् जन एव मदीयायाः कृतेस्तत्त्वं ज्ञातुं शक्नोति' इति कवेः सुकृतिदत्तस्य घोषणानुरूपमिह शास्त्रव्युत्पत्तिर्विजृम्भते ।

नवमसर्गे च वैदुषीविभूषितात्मना सुकविना सुकृतिना स्थले स्थले निजा शास्त्रव्युत्पत्तिः प्रकाशिता । तया व्युत्पत्त्या काव्यमिदं कल्पनाचिन्तनव्यतिकरमनोहरं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोमाञ्चकं किमप्युत्प्रेरकञ्च संवृत्तमस्ति । ब्रह्मणो वर्णनविधौ **अनुवाकविवेककुण्ठधीः** (कार्त० ९/४५) इति वाक्यविन्यासः कवेर्वेदैकदेशस्यानुवाकस्याभिज्ञतां प्रकाशयति। यज्ञानुष्ठानविषये **यदनुष्ठितसप्ततन्तुजा भुवने कीर्तिपटीं समश्नुते** (कार्त० ९/४०) इति वाक्यं पुरा श्रौतयज्ञानां सम्पादनाधिक्यं प्रकाशयति । भोजराजकृतदाननिरूपणे निरूपितं **विसर्जनाम्बुना** (कार्त० ९/४०) इति पदं दानमाहात्म्यं विशदीकरोति ।

प्रतपन्-तनुतामुपागतः (कार्त० ९/५३) इति वाक्यञ्च तपस्याया महिमवत्त्वं प्रत्याययति । **आयादायाति चायास्यति** (कार्त० ९/१११) इति क्रियापदैः कवेर्व्याकरण-प्रयोगनर्तनपाटवो ध्वन्यते । **हरलोचनवह्निकीलया मदनं भस्मकृतम्** (कार्त० ९/६०) इति पदावली कवेः पुराणानुशीलनपाटवीं ज्ञापयति । शृङ्गारमयं माधुर्यानुप्राणितं नवमसर्गस्य काव्यं काव्यशास्त्रज्ञानस्य प्रयोगस्य च नैपुणीं निरूपयति । **वाक्यं रसात्मकं काव्यम्** (सा.द. १) इति विश्वनाथीयं काव्यलक्षणं कवये रोचते स्मेति तथ्यं **कविता भविता रसान्विता** (कार्त० ९/७३) इति वाक्येन ज्ञायते ।

८. अष्टमनवमसर्गयोः सामाजिकं चिन्तनम्

कविः समाजहिताय स्वान्तःसुखाय च काव्यप्रणयनं विधत्ते विशेषतः । सुकृतिदत्तः समकालिकस्य समाजस्य स्वरूपं हृदि निधाय तत्रावश्यकपरिवर्तनं कामयमानः प्राक्कालिकं सामाजिकस्वरूपमचित्रयन्निदर्शनरूपेण । अष्टमसर्गे कविनोपस्थापितः समाजो वर्णाश्रममर्यादया नियन्त्रितः पुरुषार्थसाधनप्रवृत्तस्त्यागोज्ज्वलश्च विभाति । यथा-

कामेन सार्धमुपयोजय धर्ममार्गं
शौर्यं भजस्व घृणया सह वित्तराशिम् ।
धर्मेण साकमभिवाञ्छ विहाय सर्व-
मन्ते रमस्व निरपायविमुक्तिवध्वा ।। (कार्त० ८/७५)

तत्र ब्राह्मणानां विदुषां च सर्वोच्चं स्थानमासीत् । तेषां परामर्शेनैव राजानः शासनसञ्चालनमकार्षुः । प्रतिगृहं भगवदाराधनाया याचकाभ्यागतसेवायाश्च परम्परा तत्र प्राचलत् । समये समये जनैर्यज्ञा यागाश्च सम्पाद्यन्ते स्म । राज्याभिषेकानन्तरं राजानो दिग्विजयाभिधाने सन्नद्धा जायन्ते स्म। शासनस्थैर्याय भ्रष्टाचारनिवारणं मन्त्र-गोपनञ्चावश्यकं मन्यते स्म ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मिन् समाजे वेदवेदाङ्गादीनामध्ययनं सत्कार्यसाधनं भगवदुपासनाविधानं स्वात्मचिन्तनं च स्वाभाविकरूपेण जायमानमासीदिति प्रतिपादयति कार्तवीर्योदय-महाकाव्यस्यायमष्टमः सर्गः । इत्थं कविः प्राचीनसमाजस्य प्रतिबिम्बनेन नवीनसमाजाय कमप्यादर्शं दातुं यतमानः प्रतिभाति ।

नवमसर्गस्थं कथातत्त्वं निखिलं तदानीन्तने समाजे राजभिः कन्याविवाहविधौ स्वयंवरसमारोह आयोज्यते स्मेति वृत्तं प्रकाशयति । स्थापत्यविज्ञानस्य, शिल्पस्य, कलायाः, सङ्गीतस्य च तदानीन्तनीमभिव्याप्तिं प्रकाशयन्ति नमवसर्गस्य पद्यानि नैकानि । कनकप्रभाया नखशिखवर्णनञ्च समग्रं कवेर्विकसितां सौन्दर्यचेतनां प्रकाशयति।

९. अष्टमनवमसर्गाश्रिता वर्णनीया विषयाः

कृतवीर्य-दत्तात्रेयसंवादः

एकदा पुत्राय राज्यं दत्त्वा तपसे वनं गन्तुकामो राजा कृतवीर्यः सद्गुरुं दत्तात्रेयं विनिवेदितवान्- गुरुदेव ! राजकार्यं धुर्ये पुत्रे कार्तवीर्ये निधाय भवतः कृपयाऽहं निर्वाणसुखं लब्धुमिच्छामि । संसारस्यागमगममार्गं दृष्ट्वा खिन्नोऽहं शान्तिं वाञ्छामि । मया बहुविधा विषाभा विषया भुक्ताः, परन्तु पूर्णा तृप्तिर्नैव लब्धा । अत एव एतान् विषयान् परित्यज्य शाश्वतशान्तिलाभाय वनं गन्तुं कामये । नाहं पुनर्भोगसुखं प्राप्तुं लालायितोऽस्मि । यो हि जनो मानवजन्म लब्ध्वा महनीयचरितैर्जगतीमाच्छाद्य विष्णुपदे संलीयते स एव धन्यो भवति । मया सन्ततिवत् प्रजा रक्षिता, रणे शत्रवो विजिताः, शीलमनुशीलितम्, वैदिकसनातनधर्मो निषेवितः, सद्गुरूपासनया शास्त्रमधीत्य व्यवहारे प्रयुक्तं धर्मपूर्वकञ्च पृथिवी परिरक्षिता । राज्यशासनजन्या कीर्तिर्मम जगति स्फीता वर्तते । सर्वं सुखं मयानुभूतमिदानीं मम विषयप्रपञ्चे नास्ति काचनाऽऽसक्तिः । इदानीं केवलं भवतः कृपया पारमार्थिकसुखप्राप्तेरिच्छां मूर्तिमतीं विधातुं कामये ।

इत्थं राज्ञः कृतवीर्यस्य वचनं श्रुत्वा सद्गुरुर्दत्तात्रेय उवाच- हे राजन् ! भवान् धन्योऽस्ति। यथा मया मनसि चिन्तितं तथैव भवताऽपि समुदीरितम् । स्वकीयै-र्योगदानैर्भवान् पृथुवत् जगति प्रख्यातो वर्तते । भवन्तमिदानीं काचन दिव्यलक्ष्मीर्वरीतुं कामयते । भवान् सम्प्रति मुक्तेरेवाधिकारी न तु भुक्तेः । वीरशिरोमणिर्भवान् सम्प्रति आत्मज्ञशिरोमणिर्भवितुं वाञ्छतीति प्रसन्नताया विषयः । भवन्तं दृष्ट्वा सम्प्रत्यहं चतुरानन-मृषभदेवञ्च संस्मरामि । इदानीं पुत्रस्य स्कन्धयो राज्याभिषेकविधिना राज्यं निधाय भवान् भवहरं पदं विलोकयताम् । दत्तात्रेयवचनं निशम्य कृतवीर्यो मुमुदे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्तवीर्यस्य राज्याभिषेकः

भवान् राज्याभिषेकविधिना पुत्राय राज्यमर्पयित्वा मुक्तिपदवीं प्राप्तुं गृहं त्यक्त्वा वनं गच्छेदिति गुरोर्दत्तात्रेयस्य वचनं निशम्य कृतवीर्यो विद्वद्भिः सह सदस उदतिष्ठत्। ततस्तेन राज्ञा राज्याभिषेकसम्भाराः सर्वे यथायथं परिकल्पिताः । कृतवीर्यः पुत्रस्य राज्यशासनं समुज्ज्वलं स्यादिति चिन्तयन् राज्याभिषेकमुहूर्तं प्रतीक्षते स्म। राज्याभिषेक-मुहूर्ते सम्प्राप्ते राजलक्ष्मीवरणोचितवेषभूषालङ्कृतः कार्तवीर्यो राज्याभिषेको विधेय इति पितुराज्ञां लब्ध्वा नवं राज्याभिषेकभवनं प्राप्तः । तदा राजभवनं तौर्यत्रिकेण मनोहरं सुसज्जितैः शृङ्गारितैः गजराजैश्च समाकुलमिव बभूव । तदानीं देवाङ्गना निजाभ्यः करलताभ्यो लाजान् पुष्पाणि च वर्षन्ति स्म । सिंहासनं समारुह्य जयाभिषेकं प्राप्तवतः कार्तवीर्यस्य तुलना हेमाद्रिशृङ्गमधिरूढेन सप्तर्षिकृतगाङ्गजलाभिषेकं प्राप्तवता विवस्वता सह एव योग्याऽऽसीत् । उक्तञ्च-

> **भद्रासनं समधिरुह्य जयाभिषेकं**
> **यातोऽर्जुनस्य तुलनां झगियात्तदानीम् ।**
> **हेमाद्रिशृङ्गमधिरुह्य यदा विवस्वान्**
> **सप्तर्षिगाङ्गजलसेचनमाप्नुवीत ।।** (कार्त० ८/३०)

वर्षाभिषेकेण सूर्य इव, सिन्धुजलेन वडवानल इव, घनरसेन मेघ इव, राज्याभिषेकेण कार्तवीर्यो नितरां शुशुभे । भद्रासनोपरिगतं कार्तवीर्यं विलोक्य जना निर्भया बभूवुः। पूर्वं विद्वांसोऽभिषेकजलं वर्षन्ति स्म ततो विद्वत्सु राजहस्तात् कनकानि वर्षन्ति स्म, ततो मेघा वर्षाजलानि वर्षन्ति स्म, ततश्च शत्रुरमण्यश्चिन्ताजनितानि अश्रूणि वर्षन्ति स्म । राज्याभिषेकानन्तरं कार्तवीर्यो विप्रेभ्यो गा दत्तवान्, स्वयञ्च समुज्वलां कीर्तिमाप्तवान् ।

तदा दैत्याः सन्तप्ता बभूवुः, हरिणशावकलोचना नार्यश्च प्रसन्ना बभूवुः । तदा सरसानि विद्वद्वचनानि यत्र तत्र प्रसृतानि आसन् । राज्याभिषेकं प्राप्य कार्तवीर्यः प्रियकरैर्जगदाह्लादयन् इन्दुरिव कान्तिमान् संवृत्तः । कार्तवीर्यस्य राज्याभिषेकं विलोक्य जना नलभगीरथनाहुषादीन् पूर्वभूपतीन् विसस्मरुः । कार्तवीर्यस्य शिरसि राजच्छत्रे विराजमाने सति सुहृदां तापो विननाश परन्तु प्रत्यर्थिभूपतिमुखानि मलिनानि जातानि। उज्ज्वलयशाः कार्तवीर्यः शत्रूणां कृते इन्दुरिव, विदुषां कृते च सुमेरुरिव, सुन्दरीणां कृते कामदेव इव प्रतीतिगोचरोऽभूदिति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतवीर्यस्य कार्तवीर्याय राजनीत्युपदेशः

राज्याभिषेकानन्तरं कृतवीर्यः पुत्रं कार्तवीर्यमुपदिशति- वत्स ! मन्वादिनीति-शास्त्रनिर्दिष्टया सरण्या शासनं कुर्वतो राज्ञः पर्वतपारावारपवनातिशायि गौरवं विलसति। पृथुप्रभृतिभी राजभिः पूर्वं यथा पृथिवी पालिता तथैव राज्ञा त्वया पृथिवीपरिपालनं विधेयम् । समृद्धिः स्वभावतः साधारणजनान् चपलयति, मदयति च । सुवर्णादिधातु-वृद्धिश्चापि निःसत्त्वं जनं परिभवति । तस्माद् धनस्य सुवर्णादिधातुचयस्यापि सत्पात्रे सत्कार्ये च प्रयोग एव सकलहितावहः सम्पद्यते । अभिनवा रूपसम्पत्तिः, कान्तानुराग-चपलं यौवनं नूतनो राज्याधिकारश्च सामान्यभूपतिमुन्मादयन्ति । यथा ते सर्वे विषया उन्मादहेतवो न भवन्ति तथा निर्मलं चरितमङ्गीकृत्य शासनं विधेयम् ।

राज्यशासनविधावुत्कोचजीविनः सचिवोपजापिनो निरपराधजनोपतापिनः सज्जन-मत्सरपराश्च कर्मकरा राज्यस्य विप्लवकरा भवन्तीति विभाव्य भवता ते सर्वे दूरं परिहरणीयाः । शस्त्रकलानिपुणता राजव्यक्तित्वस्य विभूषणं भवति । मिथ्याप्रशंसका दुर्जना मार्गधूलिसमानाः सन्तः पश्चाच्छिरसि आरोहणं कुर्वन्ति। अतः प्रशंसयाऽऽत्मानं विस्मृत्य दुर्जनप्रोत्साहनं न कर्तव्यम् । दुर्भेद्या मन्त्रणा चारैः शत्रुमित्रगतिविधिविज्ञानञ्च राजलक्ष्मीचिरस्थायित्वकारणं जायते । यावत् कार्यसिद्धिर्न भवति तावन्मन्त्रो गोपनीयः। मन्त्रे कथञ्चित् प्रस्फुटे मिथ्यावचनेनापि तस्य गोपनं विधेयम् । दूता अपि मन्त्रणा-गोप्यतासाधका भवेयुः । राज्ञः कार्यं जनरञ्जनमेव, राज्ञो ध्येयं नारायणचरणयुगलमेव, राज्ञः सेव्यं सज्जनवृन्दमेव, राज्ञो हेयञ्च भोगासक्तजनयूथमेवेति विचार्य सरण्याऽनया निजव्यक्तित्वनिर्माणं विधेयम् ।

राज्ञः कृते निर्मला कीर्तिरिव विभूषणं भवति, विषयासक्तिरेव शत्रुर्भवति, उज्ज्वलमतिर्यः कोऽपि मित्रं भवति, आर्यचरितमेव वृत्तं भवति। उत्तमनरपतेः शासने न भवति कुत्रापि व्यभिचारोऽसद्विचारश्च । राजानः शास्त्रमधीत्य विनम्रा भवन्ति, विनयेन प्रभूतं धनमर्जयित्वा सत्सु वितरणं कुर्वन्ति, वितरणजन्यया कीर्त्या समलङ्-कृतास्ते त्रिभुवनमेव वशीकृत्याक्षयं सुखमाप्नुवन्ति । सुशासने प्रवृत्ते प्रजा राज्ञे करमर्पयति राजा च प्रजायै चतुर्वर्गसाधनाजन्यं फलमर्पयति। एष जनभूपयोरन्योन्याश्रितः सम्बन्धः सर्वमङ्गलप्रदो भवति । आश्रितजनरक्षकेण याचकवाञ्छापूरकेण च राज्ञा निर्मला कीर्तिरवाप्यते । उत्तमशासकस्य सेनाधिपाः कर्मकरा अधिकृताश्चेङ्गितवेदिनो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवन्ति । शरीरमिदममेध्यपूर्णमस्ति यशश्चाकल्पं पवित्रं भवति । अमेध्येन शरीरेण आकल्पस्थायिनो यशसः प्राप्त्यै नित्यं निरता राजानो धन्या भवन्ति । राजलक्ष्मीर्निसर्ग-चपला भवति, तस्याः स्थायित्वाय संयमपूर्वकं व्यवहरणीयम् । राज्ञः पुरुषार्थसिद्धिरेव महती प्राप्तिर्भवति । निष्कण्टकराज्यसञ्चालनाय वीरताऽवलम्बनीया । सुराज्ञा पृथिवी राजन्वतीति निगद्यते। भवतः शासनकाले पृथिवीयं राजन्वती भवतु । भवदीयराज्ये सर्वा जातयः सर्वे वर्णाश्च निर्भया भवन्तु। राजकार्ये निरतेन भवता निर्मलचिद्विलास-कार्येऽपि निरन्तरं तत्परेण भाव्यम् ।

भवान् नारायणस्यांशावतार इति जनानां कृते पितृमित्रबन्धुभ्योऽपि विशिष्ट उभयलोकसुखप्रदानसहयोगी महापुरुष इति मया ज्ञातम् । यथा मया ज्ञातं तथैव भवता जनपरिपालनं कर्तव्यमिति मदीया भावना वर्तते । दत्तेन गुरुणा मह्यं दत्तः सर्वगुणसम्पन्नो भवान् मया प्रजायै समर्पित इति मदीयं मानसं तोषमेति । भवता नित्यं सच्छास्त्रपरिशीलनं विधाय रूपयौवनप्रभुतादयः साधारणजनोन्मादहेतवो विषया विनयवृद्धिहेतवः सम्पादनीयाः । सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाणां षड्गुणानां समुचितेनोपयोगेन भवान् विपक्षगणैरविजेयो भविष्यति । भवान् शत्रुमित्रसज्जनपरिचय-पूर्वकं शत्रुविजयसमर्थो भवेदिति मदीयोऽभिलाषः । मयोपरि निरूपितैः कार्यैर्भवान् त्रिभुवनसम्मोहनो भूपतिर्भविष्यति नूनम् । पृथिवीयं भवन्तं राजानं प्राप्य धूर्जटिकपर्दं प्राप्य गङ्गेव चन्द्रं प्राप्य च चन्द्रिकेव विभातु ।

कृतवीर्यस्य तपोवननिवासः

पूर्वभूपः कृतवीर्यः पुत्रं सुचारुतया पृथिवीपालनायादिश्य तपसि विहितकामः पुरवासिनां मनांसि विरहव्याकुलानि कारयन् हितमितवचनैश्च तान् समाश्वासयन् वनाय प्रतस्थे । मुनिभिः सह मौनाश्रममेत्य पर्णशालानिवासी एष राजा कृतवीर्यः शुष्कफलपर्णादिभिः शरीररक्षां विधाय प्रणवजपप्रतिबद्धोऽभेददर्शकश्च सन् यमनियम-तपोभिः समयं यापयामास । कृतवीर्यस्य कृते पर्णशाला राजभवनम्, शान्तिर्महाराज्ञी, शमदमादयः सखायः, कामकोपादयश्च शत्रव आसन् । स्वयञ्चासौ अतुले आत्मानन्दे-ऽरमत । उक्तञ्च –

उटजविपुलसौधः शान्तिराज्ञीविहारी
शमदमसचिवाढ्यः कामकोपादिशत्रून् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रुततरमभिभूय प्राप्तयोगाग्रभूमि-
व्र्यहरदतुलसौख्ये भूमिजानिः पुराणः ।। (कार्त० ८/९९)

कार्तवीर्यस्य सुशासनम्

ताते कृतवीर्ये वनं प्रस्थिते सति पितृविरहेण दुःखितमानसः कार्तवीर्यो जनरञ्जन-कार्येषु व्यापृतः सन् तद्दुःखं क्षपितवान् । ततः स निरन्तरं नवैरुद्योगैर्विलक्षणैः कार्यजातैश्च जनाननुरज्याऽनुपमया सरण्या सुशासनं कृतवान्। सा एव तस्य शासनसरणि-र्भविष्यत्कालिक्या राज्यसमुन्नतेराधारशिलेव बभौ । उक्तञ्च -

गते ताते कञ्चिद्दिवसगणमुद्विग्नहृदय-
स्ततो राज्यासक्तिक्षपितपितृविश्लेषभवशुक् ।
स चक्रे स्वे चक्रे नवनवजनानन्दमनिशं
तदात्वे चायत्यामपि सफलयोगैर्नरपतिः ।। (कार्त० ८/१००)

विदर्भदेशवर्णनम्

देवगुरोरुपासनया सुशिक्षितैर्देवैरिव सद्गुरूपासनया शास्त्रज्ञानं प्राप्य सुशिक्षितै-र्जनैर्युतं दिव्याङ्गनानामुपस्थित्या शोभायमानं स्वर्गतलमिव रूपयौवनवेषभूषाचमत्कृता-नामनुपमानां सुन्दरीणामुपस्थित्या रमणीयं सन्तानपरम्परया धृतविद्यं धर्मसुरक्षितं कुबेर-समानधनिकजनैश्वर्यभासुरं नाकतलमिव विदर्भराष्ट्रं महीयते स्म । उक्तञ्च -

जयतीह विदर्भसञ्ज्ञया प्रथितन्नाकतलं स्वलङ्कृतम् ।
विबुधैर्गुरुशिक्षितैर्भृतं विलसन्निर्जरसुन्दरीश्रितम् ।। (कार्त० ९/४)

कुण्डिननगरीवर्णनम्

विदर्भदेशे धरणीमण्डलमण्डनायितं विजयमहोत्सवमयममरावतीतुल्यं कुण्डिननगरं विद्योतते । उक्तञ्च-

नगरं खलु तत्र कुण्डिनं धरणीमण्डलमण्डनायितम् ।
विजयप्रभवं महोत्सवं दधदेतन्न किलामरावती ।। (कार्त० ९/६)

अप्सरोगणतुल्याभिः सुन्दरीभिर्गुरुसेवानिरतैश्च देवतुल्यैरैश्वर्यमयैः सज्जनैः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समलङ्कृतं कुण्डिननगरं शोभते । कुण्डिननगरनिवासिन्यः सुन्दर्योऽप्सरोभ्योऽपि गुरुत्वभाजा सौन्दर्यसारश्रिया विलसिता भाग्यवत्यश्च सन्ति । कुण्डिनसुन्दरीणां निर्माणकाले सावधानो विधिः पूर्वमप्सरोगणनिर्माणाभ्यासजन्यविशिष्टकौशल-मुपादानीकृत्य कुण्डिननगरीसुन्दरीगणं रचितवानिति प्रतीयते । उक्तञ्च-

यदधिष्ठितसुन्दरीगणं प्रसिसृक्षुः पुरतो विशेषतः ।
शतशोऽप्सरसो विधाय तद् दृढमभ्यासमुपादधे विधिः ।।

(कार्त० ९/१५)

कुण्डिननगरस्य गगनस्पर्शिभवनेषु विद्योतमाना पताका अमरावतीमाह्वयते इव ज्ञायते । कुण्डिननगरीराजभवनं निशि चन्दिरचारुरोचिषा द्विगुणीभूतसुधाकरमिव विहसच्छतसौधदम्भत इन्द्रस्य पुरः परिहासं वितन्वानमिव विभाति ।

कुण्डिननगरस्य भवनोपरि वर्तमानासु चन्द्रशालासु चन्द्रकरस्पर्शान्नित्यं चन्द्रशीतलं जलमुत्पद्यते । रजन्यां चन्द्रकान्तमणिप्रवाहितजलैः कुण्डिननगरेऽवग्रहजन्यं कष्टं न कदापि भवति । ज्येष्ठमासे पद्भ्यां सूर्यकान्तमणिनिबद्धे पथि व्रजतां जनानां चरणेषु सूर्यघर्मजन्यस्तापो न भवति । कुण्डिननगरे सूर्यकान्तोपलनिबद्धेषु भवनेषु निवसतां जनानां शीतकालेऽपि शीतप्रभवा बाधा न भवति । कुण्डिननगरे शोभायमानं राजभवनं स्वीयोत्तुङ्गतया गगनं स्पृशति यत्र सूर्यस्य वाहा नित्यं विश्रान्तिं लभन्ते ।

राजभवननिबद्धैर्मणिमाणिक्यैर्निःसृता बहुरङ्गाः किरणाः सदा जनानां हृदयेषु वर्षर्तुधियं व्युत्पादयन्ति । नृपमन्दिरभित्तिषु प्रविशन्तः प्रतिबिम्बिता जनाः प्रतिहार-निवारिता इव पुनः प्रतियान्तः प्रतिभान्ति । मरकतमणिरचितं नृपमन्दिराभ्यन्तरं नूतन-गामिनां हृदि नवशाद्वलभूमिविभ्रमं कुरुते । नृपमन्दिरस्य स्फटिकाशमतलेषु प्रतिबिम्बितं योषितां पदपद्मं गगनकमलमिव प्रतिभाति । राजभवनस्वर्णशिखरकान्तिः प्रतिदिनं सूर्यघर्षणसाधनभूता सूर्यमुत्तेजयति । मदमत्तगजा निजैः कर्णतालवृन्तकैर्नित्यं राजभवनं वीजयन्ति । कुण्डिननगरराजभवने मणिमयदीपधानीसहिता प्रविशतां चित्तविषादनाशिनी भूपतिगणमनोहारिणी युधिष्ठिरस्य धर्मसभेव सकलपदार्थमयी काचन सभा वर्तते ।

नृपभोजवर्णनम्

विदर्भनरेशदूतः कथयति – कुण्डिननगरे क्रथकैशिकवंशमौक्तिकमिव गुण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गणालङ्कृतो भोज इति जगति विश्रुतो विदर्भभूपतिर्विराजते । उक्तञ्च-

क्रथकैशिकवंशमौक्तिकं गुणविश्राममलललामधाम सः ।
इह भोज इति प्रथाङ्गतो धरणीजानिरलं विराजते ।। (कार्त० ९/३५)

निरन्तरदानकर्मव्यापृतस्य भोजस्य दानजलधाराभिर्मरुरपि कच्छभूमितामाप्नोति। भोजस्य भवने याचनायै सम्प्राप्ता याचकाः कुबेरमपि दरिद्रं मन्यन्ते । एतावता महीतलेऽद्वितीयः समृद्धिमान् राजा भोजो महीयते । भोजेन समराङ्गणेऽद्भुतं शौर्यं प्रदर्श्य दिग्दिगन्तव्यापिनी कीर्तिः समर्जिता स्थिरा विजयलक्ष्मीश्च अधिगता । राज्ञो भोजस्य भयेन शत्रुराजरमण्यः शरणाय भिल्लाश्रयं वनं प्राप्ताः शवरीसहयोगेन दरीषु निवासं कुर्वन्ति । भोजेन खड्गप्रहारेण भयङ्कराररण्येषु क्षपिताः शत्रवो दरीनिवासिभिः सर्पैः सख्यं विधाय प्राणान् धारयन्ति । भोजविहितैरसङ्ख्यैर्यज्ञैः समुत्पन्ना कीर्तिर्विश्व-व्यापिनी वर्तते । भोजस्योदारः पाणिर्नित्यं दानजलाभिषेकं कुरुते । एतादृशो महिमशाली विदर्भनरेशो जगति विजयते ।

कनकप्रभासौन्दर्यवर्णनम्

भगवान् ब्रह्मा योग्यस्य वरस्य कृते योग्यां कन्यां नैव निर्माति इति लोकपरिवादं परिमार्ष्टुमाश्रयभूता सकलगुणाधिष्ठानभूता कन्या विधिना भोजपुत्रीत्वेन निर्मिता । यथा बहुवाहिनीपतेर्महासागरात् पूर्वं महालक्ष्मीः प्रादुर्भूताऽऽसीत् तथैव बहुवाहिनीपतेर्भोजात् कनकप्रभानाम्नी कन्या प्रादुर्भूता । उक्तञ्च-

अमुतो बहुवाहिनीपतेरुदितास्ते कनकप्रभाभिधा ।
कमला विमलाब्जभूषितं दधती पाणिपदं सुकोमलम् ।।

(कार्त० ९/४२)

ब्रह्मा कनकप्रभां योगेन हृदयनिरोधं कृत्वा निर्मितवानिति कनकप्रभाया दर्शनेन दर्शकानां हृदयरोधो जायते । कनकप्रभायां कनकस्य प्रभा नास्ति, अपितु कनकप्रभाया प्रभा कनके सङ्क्रान्ता । यतो हि जगत्यामतुलनीयायां तस्यां क्षुद्ररङ्गस्य कनकस्य क्व प्रभावो भवितुमर्हति ?

शिशुरेवेयं जगतीसुन्दरीशिरोमणिभूता वर्तते । कनकप्रभाया वदनमाभासदनम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयने साचिविलोकनायने, केशाश्च सौन्दर्यसारभूता इति तदीयं कलेवरमनिन्द्यसौन्दर्यधाम वर्तते। सुवर्णश्वेतकमलकर्पूरचन्द्राणां क्वाथं निर्माय विलेपितमिव कनकप्रभामुखं निरतिशयसौरभं प्रसारयति। प्रतिदर्शमदर्शनं गतान् चन्द्रान् विचूर्ण्य विधिः कनकप्रभीया मुखनिर्णेजनचूर्णपूरणं कुरुत इति प्रतीयते। कनकप्रभामुखसौन्दर्यं प्राप्तुं चन्द्रमा आकाशे तपस्यन् क्षीणतां भजते। वराकश्चन्द्रमा निशि कनकप्रभामुखं सुप्तं ज्ञात्वा निर्भयो रश्मिजालं वितनोति, जागृते कनकप्रभामुखे प्रातर्भयेन अज्ञातदेशं प्रति पलायते। उक्तञ्च–

निशि सुप्तमवेत्य तन्मुखं रजनीशो द्युतिभिर्विजृम्भते।
प्रतिबुध्य तदानने जगत्युदिते स क्व दिवा भृशायते॥

(कार्त० ९/५३)

विधिर्विधुमण्डलात् सम्पूर्णं पीयूषमाकृष्य तदीयमुखमण्डलं व्यरचयदिति ज्ञायते। तन्मुखमण्डलसन्निधौ विधुमण्डलं मधूच्छिष्टमिव प्रतिभाति। कनकप्रभा वस्तुतः कमलैव वर्तते, तस्मात् तच्चरणाम्बुजासनं कमलं तस्या वदनेन सह कथमुपमितुं शक्यते। कमले सुधाया अभावः, अमृतसागरे शीतरश्मौ सौरभस्याभावः, परन्तु तद्वदनं तु अमृतं सौरभञ्चेति द्वयमेव धारयतीति ताभ्यां तुलयितुमनुचितं प्रतिभाति। कमलं कमलमेवार्थाज्जलमलमेव वर्तते, चन्द्रमण्डलञ्च स्फुटं सकलङ्कमस्ति, तस्माद् विश्वस्मिन् विश्वे कनकप्रभामुखण्डलस्य तुलनायै किमपि नास्ति योग्यं वस्तु। मधुकर-चुम्बितं सरस्वतीचरणाश्रयभूतञ्चेति कमलं केनापि अचुम्बितेन कस्याऽपि आसनतया-ऽप्रसिद्धेन कनकप्रभामुखमण्डलेन कथं तुलयितुं शक्यते। वस्तुतो विकचमपि कमलं चन्द्रप्रभायाः समक्षे हतप्रभं सम्पद्यत इति दन्तकान्त्या मनोहारिण्या स्फुरितं कनकप्रभाननं कमलतुल्यं कथं बोभवीति।

कनकप्रभायाश्चञ्चले नयने मृगीनयनदर्शनलिप्साविमोचने वर्तेते, लसदञ्जने ते पुनः शिशुखञ्जनगर्वगञ्जने स्त इति कनकप्रभानयनयोरुपमा केन दातुं शक्यते। वस्तुतः कनकप्रभानयने भस्मीभूतस्य मदनस्य जीवातुसञ्चारौषधिरूपेण विद्येते। कनकप्रभा-कमनीयकलेवरे विद्योतमानं नयनयुगलं मकरध्वजस्य ध्वजायां विद्योतमानं मकरयुगल-मेवास्ति। रुचिहीनेन मांसलेन मीनेनापि कनकप्रभानयनोपमा दातुं न शक्यते।

कनकप्रभायाः श्रुतियुगलं व्यासकृतपुराणवृन्दमिव विभाति। कनकप्रभायाः कबरी चमरीहृदयकुण्ठोत्पादिनी वर्तते। अत एव लज्जिता चमरी चामरं जघनेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बिभर्ति । कनकप्रभायाः केशकान्तिं स्पर्धमाना मयूरी स्पर्धाजन्येन पापेनाभिभूता शरदि बर्हनिबर्हदण्डं लभत इति प्रतीयते । अनुपमं तदीयं ललाटपट्टमष्टमीतिथावुदीय-मानस्य चन्द्रस्य सौन्दर्यं तिरस्करोति। पुराणवर्णितस्य शुकदेवस्वामिनो मुखं कनकप्रभाया नासिकाच्छलेन निरतिशयं शोभते । तस्या नागवल्लीपत्रोत्पन्नद्रवरञ्जिता दन्ता विश्वविमोहनाः सन्ति ।

कनकप्रभाया मसृणः कुङ्कुमकान्तिरधरः श्रुतिमात्रेण तरुणैर्गवेषितामृतोऽनुपमो विराजते । तन्मुखं त्रिजगद्गतकान्तिदर्शनं दर्पणमिव प्रतिभाति । वीणामधुरध्वनि-निष्पादकः कनकप्रभाकण्ठः सकलस्वरसञ्चारनिपुणा सरस्वतीवीणेव प्रतिभाति । तस्यास्त्रिरेखकं गलं निजाभिस्तिसृभी रेखाभिस्त्रीणि तत्त्वानि प्रकाशयति- प्रथमम्- अस्याः कण्ठे रसोचिता कविता स्थानं कलयिष्यति, द्वितीयम्- अस्याः कण्ठे सद्रचनं विवञ्चनञ्च वचनं स्थास्यति, तृतीयम्- अस्याः कण्ठस्यानुपमा कान्तिर्भविष्यतीति । कनकप्रभाभुजयुगं बालमृणालदण्डसदृशमस्ति ।

क्षितौ कल्पलतेव विराजमाना कनकप्रभा भुजच्छलात् प्रतनुमङ्गुलिनालपल्लवां व्रततिं धत्ते । तस्याः करशाखा बहुमीलितपर्वसन्धयो महाभारतस्य वाच इव विद्योतन्ते। तदीयमंसं मृदु मांसलमाकर्षकञ्च विभाति । तस्याः कुचकोरकयुगलस्योपमायै विपुलास्थि बदरफलं नैव योग्यम्, कषायरसान्वितं धात्रीफलमपि तुच्छमेव । तदीयं वक्षस्थलमनुपमसौन्दर्यमण्डितमस्ति । तस्याः कुचौ कामुकजनोल्लासभूतौ स्तः । वस्तुतः कनकप्रभाकुचयुंगलं मदनप्रहृतगुलिकायुग्ममिव विद्योतते । मुखनिर्जितचन्द्र-मण्डलाऽधरस्थापितनूतनासवरसा मध्यसंस्थापितबलित्रया एषा विश्वनमस्या वर्तते ।

अस्याः कोमलायां गभीरायाञ्च नाभौ हरलोचनानलसन्तप्तो मदनः शैत्यलाभाय वसतीव प्रतीयते । तस्या उरसि दृश्यमाना तनुरोमराजिर्जलनीलीव महीयते । सूक्ष्म-परमाणुनिर्मित इव कनकप्रभाकलेवरमध्यभागः कारणजन्यां सूक्ष्मतां कलयति । त्रिभुवनविजयिनो मदनस्य रथचक्रमेव तन्नितम्बरूपेण मूर्तिमदस्ति । पृथुवृत्तनितम्ब-मण्डलोपरिशिञ्जन्मणिमञ्जुमेखला दरघूर्णितनेत्रपङ्कजा कनकप्रभा यस्य वामाङ्गिनी भविष्यति जगति स भाग्यवान् पुरुष इत्यहं विचारयामि ।

कनकप्रभाया ऊरुद्वयं कदल्या करिराजकरेण च तुलयितुमयोग्यम् । यतो हि कदली चिक्कणा सरसापि तदूरुसन्निभा नास्ति । छिद्रवान् गजशुण्डादण्डोऽपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोमवत्त्वात् रन्ध्रवत्वाच्च न तदूरुसमानः । कनकप्रभाया ऊरुभ्यां हरिणीनाम्नी स्वर्वेश्या पराजिता । कनकप्रभोरुकाण्डौ सौन्दर्यगर्वेण परस्परं विवदमानौ विलोक्य तत्कलह-निवारणाय विवादसाक्षि कनकप्रभाजघनं तयोर्मध्ये पिप्पलपत्राकारं पिधानमयं कामकेन्द्रं स्थापयामासेति मन्ये ।

धृतभृङ्गालिजपाक्षिमालिकं कमलं कनकप्रभाचरणकमलयोः कान्तिमाप्तुं तपस्यतीति ज्ञायते । वस्तुतो जले तपस्यत् कमलं जलवासात्मकतपसः पुण्येन कनकप्रभा-पदकमलरूपे परिणतमिति प्रतिभाति । कनकप्रभायाश्चरणकमलयुग्ममतुलनीयसौन्दर्य-हेतोर्विद्रुमात् किसलयाच्च विशिष्टमस्ति । एतच्च पदयुग्मं सर्वोत्तमकनकादपि मनोहर-मस्ति। भाविनि समये कनकान्वयमौलिभूषणं भवन्तमपि कामकलाप्रदर्शनविधौ विलोडयि-ष्यतीति सम्भावयामि । कनकप्रभाया नखा अपि रक्तिमकान्तिकमनीया विराजन्ते । तस्याः सविलासां गतिं विलोक्य ऐरावतमहागजस्य पत्नी अभ्रमुरपि व्रीडामनुभवति।

विधिना एषा कनकप्रभा कचपाशात् प्रपदपर्यन्तम्, प्रपदाच्च केशपाशपर्यन्तं सकलगुणनिवासललामधामेति विरचिता सकलसौन्दर्याधिष्ठानभूता विराजते । अस्याः शैशवावसानं यौवनारम्भञ्च विज्ञाय कामदेवो वसन्तेन, इन्दुना, मैरेयेण च साकं सन्धिं विधाय तेषां सर्वेषामुन्मादनसामग्रीं च प्रयुज्य तदीयाङ्गेषु स्वस्य व्याप्तये प्रयतमानो दृश्यते । इयं भोजकन्या शैशववयोऽनुरागिणीति विचार्य कामदेवः स्वयमपि शिशुर्भूत्वा तदीये कमनीये कलेवरे रमते । तस्याः कलेवरे परम्परयागता शिशुता, सद्यः प्रविष्टा युवता च स्वस्वव्याप्तिकामनया काञ्चीमणिशिञ्जनेन कलहं विस्तारयन्त्यौ दृश्येते । चतुरः कामदेवोऽपि भयप्रदर्शनेन शिशुतां विनिवारयितुं धृतरोमावलिदण्डं धीरदर्शकं कुचं साक्षितया स्थापितवानिति मन्ये ।

सम्प्रति यौवनप्रसारदूरीकृतशिशुत्वमान्द्या कनकप्रभा कियत्पुराणाऽभिनवदला शृङ्गारवल्लीव विद्योतते । कनकप्रभायाश्चरणयुग्मं मन्दमस्ति, नेत्रयुगमञ्च चञ्चलं प्रतिभाति, कटिः कृशतरो वर्तते, नितम्बश्च पीनपीनो विभाति, कुचयुगलं किञ्चिद् विकसितं प्रोज्ज्वलञ्च दृश्यते, नाभिश्च गभीरा विभाति । तस्या यौवनं प्राप्य कामदेवो नितरां मोदते । उक्तञ्च-

पदयुगमतिमन्दञ्चञ्चलन्नेत्रयुग्मं
कृशतरमवलग्नम्पीनपीनो नितम्बः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुचयुगलमपीषत्प्रांशु नाभिर्गभीरा
जयति मदनमित्रं यौवनं प्राप्य तस्याः ।। (कार्त० ९/१०७)

माहिष्मतीपतिं कार्तवीर्यं प्रति भोजनृपतेर्दूतस्यानुरोधः

भोजराजेन स्वयंवरोपक्रमे कार्तवीर्यामन्त्रणाय सम्प्रेषितो दूतः कनकप्रभाङ्ग-प्रत्यङ्गकान्तिनिरूपणानन्तरं स्वयंवरसमारोहे भागग्रहणाय कार्तवीर्यं प्रार्थयन् उवाच-हे राजन्! राजा भोजः कनकप्रभाया अनुदिनमुदयन्तं यौवनारम्भं वीक्ष्य तस्याः पाणि-ग्रहणसंस्कारसम्पादनार्थं दिशि दिशि भूपानां निमन्त्रणाय दूतान् सन्दिदेश । सर्वेषु दूतेषु स्वस्वगन्तव्यं प्रति निर्गतेषु राजा भोजो मामाहूय कनकप्रभायाः प्रणयपूर्णदृष्टिभिः साकं विशेषरूपेण प्रेषितवान्। अतः कतिपयेन दिनेन जायमानं स्वयंवरसमारोहमलङ्कर्तुं भवता शीघ्रं तत्र गन्तव्यम् । सा राजपुत्री तस्मिन् समारोहे भवन्तमेव वरिष्यतीति मदीयो विश्वासः। स्वयंवरसमारोहानन्तरं रतिमन्मथाविव युवां राजतम् । उक्तञ्च -

तत्स्वयंवरमलङ्कुरु तस्या
भाविनं कतिपयेन दिनेन ।
राजतं खलु युवामभीप्सितं
सङ्गमेत्य रतिमन्मथौ यथा ।। (कार्त० ९/११०)

यद्यपि कतिपये राजानस्तत्रागताः सन्ति, कियन्तश्चागच्छन्तः सन्ति, केऽपि समागमिष्यन्ति, तथापि तस्मिन् स्वयंवरे कनकप्रभाभुजगतस्रग्धरा भवदीया कन्धरैवेति मम विश्वासो वर्तते। अतस्तत्र सहभागितया गन्तुं भवन्तं प्रति मदीयाऽभ्यर्थना वर्तते। कनकप्रभा भवन्तं भवाँश्च कनकप्रभां प्राप्यानुदिनं सौख्यं यातु । ब्रह्मापि सृष्टिप्रमोदं कलयतु । भवतोश्चरितं पापगजकुम्भदलनसमर्थं लोकपावनं स्यात् । भवन्तौ च सदा कल्याणमयौ सत्कृती स्यातामिति मदीया शुभाशंसा वर्तते । भोजदूतेनोक्तं पीयूषसमानं वचनं निशम्य राज्ञः कार्तवीर्यस्य मनः सौख्यक्षेमपारावारमग्नं जातम् ।

कार्तवीर्योदयमहाकाव्यस्य पाठ्यक्रमोचितपरिशीलनविधौ प्रकटीकृतानि तथ्यानि छात्रपाठकजनतृप्तिप्रदानि सूचनाबोधसम्पन्नानि सन्तीति मदीयो विश्वासः । उपरि वर्णितैर्विषयविशेषैर्विभूषितं कार्तवीर्योदयमहाकाव्यं रसिकानां चिन्तकानां भगवद्-भक्तानामध्यात्मजिज्ञासूनाञ्च सन्तर्पणदायकं सद् भुवि विलसति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्यन्ते महाकविसुकृतिदत्तसदृशपुत्ररत्नप्रसविनीं संसाररमणीयां नेपालवसुन्धरां काव्यवाचा स्तुवन्नेष जनो वाग्व्यापाराद् विरमति –

भूमीं नेपालनाम्नीं प्रकृतिसुषमया भूतले भ्राजमानां
शालग्रामाभिरामां सुकृतिरचनया श्रद्धया गीयमानाम् ।
वन्दे भक्त्या कवीनां यमनियमवतां क्षेमदां राजधानीं
दर्शं दर्शं तदीयां मणिमुकुटमयीं हंसगौरां हिमानीम् ।।

विदुषां वशंवदः
– वेणीमाधवढकालः

ॐ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्तवीर्योदय-मकरन्द : एक विहङ्गम दृष्टि

- सहप्रा. डा. जीवन अधिकारी
ने.सं.वि., वाल्मीकि विद्यापीठ, काठमाडौं

१. उपक्रम

दर्शन तथा शास्त्रहरूमा समेत साहित्यिक शैलीको उपयोग हुने गरेकाले संस्कृतवाङ्मयमा विद्यमान साहित्यको व्यापकता स्पष्ट झल्किन्छ । साहित्यकै विधाका रूपमा काव्य, नाटक, चम्पू, गद्य, मुक्तक आदि अनेक शाखाहरू छन् । यिनमा सर्वाधिक मौलाएको र रुचाइएका विधा कविता-काव्य र नाटक मानिन्छन्। कविता, खण्डकाव्य, महाकाव्य, नाटक आदिको प्रणयनपरम्पराले संस्कृतसाहित्यमा लामो कालखण्डलाई समेट्दछ । आदिकाव्य रामायण र महाभारतको रचनापछि तिनैका कथा र तिनैभित्रका घटना-परिघटनालाई लिएर उत्तरवर्ती कवि-साहित्यकारहरूले उत्तरोत्तर नयाँ नयाँ रचनाहरू साहित्यिक समाजसामु पस्किँदै आएका हुन् । इतिहास र पुराणका कथाहरू पनि साहित्यमा मिसिएर काव्यात्मकताका साथ आस्वाद्य बन्दै आएका छन् । यस महनीय परम्परामा संस्कृतसाहित्यमा विभिन्न रचनाहरू पस्किन समर्थ कवि-नाटककारहरूको योगदान पनि महत्त्वपूर्ण रहिआएको छ । विशेषतः लिच्छविकाल र मल्लकालमा संस्कृतभाषामै दैनिक व्यवहार चल्ने र अध्ययन-अध्यापनको क्रममा पनि संस्कृतवाङ्मयकै ग्रन्थ र साहित्यले अग्रस्थान लिने गरेकाले समेत यस अवधिमा नेपालमा संस्कृतनाटक तथा महाकाव्यहरूको रचना उल्लेख्य मात्रामा भएको तथ्य इतिहासले प्रमाणित गरेको कुरा हो ।

संस्कृतवाङ्मयको संरक्षणमा नेपालमा मात्र होइन भारतवर्षमै राजाहरूको योगदान मूल्यवान् छ । विक्रमादित्यको रत्नसमूहका कालिदास हुन् या जगज्ज्योतिर्मल्लका कविरत्न वंशमणि हुन् या बाग्लुङे मल्लराजाको आश्रय पाउने पन्तकुलीन सुकृतिदत्त होऊन्, सर्वत्र राजघरानाको विद्वत्संरक्षणप्रियता साहित्यसमृद्धिको प्रमुख आधार बन्दै आएको छ । त्यस्ता आश्रयदाताको चरित्रलाई काव्यमा उतार्ने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयासमा सुसंस्कृत एवं मर्यादित सामाजिक परम्परा पनि स्थापित हुँदै आएको हो । यसै क्रममा कालीगण्डकीको पावन जलले आप्लावित क्षेत्र बाग्लुङमा बसेर वीर, धीर, दान्त चरित्रका धनी पुराणेतिहासविख्यात **कार्तवीर्यार्जुन**का चरित्रको विशद चित्रण गर्ने नेपाली **महाकवि सुकृतिदत्त पन्त**को **कार्तवीर्योदय महाकाव्य**ले एउटा उत्कृष्ट साहित्यिक कृतिका रूपमा नेपालको गौरवलाई विश्वसामु प्रस्तुत गर्न सकेको देखिन्छ । श्रीहर्षको **नैषधीयचरित** महाकाव्यको प्रतिस्पर्धी रचना भनी लिइएको यस महाकाव्यको मूल्यवत्ताको बोध गरी **नेपाल संस्कृत विश्वविद्यालय**को अध्यापनको मूलप्रवाहमा यसको पठनपाठन हुनु आवश्यक ठानियो र शास्त्री तहको साहित्य विषयअन्तर्गत तेस्रो वर्षमा यस महाकाव्यका आठौं र नवौं सर्ग पाठ्यविषयका रूपमा स्थापित हुन पुगे । कार्तवीर्योदय महाकाव्य संस्कृतका उद्भट विद्वान् सुकृतिदत्त पन्तद्वारा रचिएकाले मात्र होइन श्रीहर्षको नैषधीयचरित्रको प्रतिस्पर्धी भएकाले पनि यसको गहनता अगाध रहन पुगेको छ । कतिपय स्थलमा शास्त्रीय ग्रन्थिभेदनमा कठिनाइको अनुभूति हुन्छ र भइरहेको छ । यही कठिनाइको निराकरण गर्ने पवित्र उद्देश्यले यी दुई सर्गको सरलतापूर्वक विषयबोध गर्ने विद्यार्थी र शिक्षकसमेतको अभिलाषापूर्ति-हेतु संस्कृतसाहित्यका मर्मज्ञ विद्वान् **प्रा.डा. वेणीमाधव ढकाल**ले संस्कृत र नेपालीमा टीका तथा विशेष स्थलको तात्पर्य प्रकाशन गर्ने टिप्पणीसहितको **कार्तवीर्योदय-मकरन्द** प्रकाशमा ल्याउनुभएको हो । यहाँ यही कार्तवीर्योदय-मकरन्दलाई लिएर यसका वैशिष्ट्य र उपयोगिताहरूलाई केलाउँदै यथाशक्य प्रकाश पार्ने जमर्को गरिंदै छ ।

२. महाकवि सुकृतिदत्त पन्त

भारतको कुमाउँमा मूलस्थल रहेका पन्तहरूको नेपाली मूल बसोबास क्षेत्र धवलागिरि अञ्चलको पर्वत र बाग्लुङ जिल्लाको सेरोफेरो रहेको पाइन्छ । सुकृतिदत्त पन्तका पूर्वजमध्येका वसु पन्त, नाथु पन्त, मगि पन्त र सरम पन्त बाग्लुङका ओखले, मूलपानी, गलकोट, गैरीगाउँ, फलेवास आदि ठाउँमा फैलिएका थिए । (ढकाल र अन्य, ऋतम्भरा : २०६०, ५०) । यसै वंशका रमापति र उमापति क्रमशः प्रयाग र कुमाउँमा जन्मिई त्यहीं शिक्षा-दीक्षा प्राप्त गर्ने मध्येका थिए । (प्रपन्नाचार्य, २०५१, २३) । विक्रमको सोह्रौं शताब्दीतिर पर्वते राजाहरूको कीर्तिबारे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जानेका पन्तपण्डितहरू मुक्तिनाथको दर्शनको उद्देश्यले नेपाल पसेका र मलयबम मल्लजस्ता विद्वत्प्रिय राजाहरूका संरक्षणमा आश्रय लिई बसेको देखिन्छ । (प्रपन्नाचार्य, पूर्ववत्) । तिनै रमापति पन्तका वंशमा भार्गवी–भवदत्तको चतुर्थ तथा कान्छो सुपुत्रका रूपमा वि.सं. १८८० मा सुकृतिदत्त पन्तको जन्म भएको कुरा ज्ञात हुन्छ (ढकाल, पूर्ववत्) । कार्तवीर्योदय महाकाव्यको सत्रौं सर्गमा कवि सुकृतिदत्तले आफ्नो वंशपरम्परा उल्लेख गर्ने क्रममा कूर्माचल निवासी वसु पन्तका विद्वान् पुत्र रमापति पर्वतका राजाका गुरु बनेर बसेको र तिनकै वंशज भवदत्तका चार पुत्रमध्ये आफू एक रहेको उल्लेख गरेबाट (कार्तवीर्योदय, १७/१, २,७,१२) उक्त तथ्यको पुष्टि हुन आउँछ । सुकृतिदत्तको जन्म बाग्लुङ जिल्लामा भएको देखिन्छ । उनका पूर्वज रमापति पन्तले बाग्लुङको बलेवा भन्ने ठाउँमा कृष्णागण्डकीको पवित्रतटमा लक्ष्मीनारायणको मन्दिर बनाई शिलालेखसमेत स्थापना गरेको प्रमाण भेटिएको र तिनकै कान्छा छोरा शिवराम पन्तका माहिला सुपुत्र भवदत्तबाट सुकृतिदत्तको जन्म भएको कुरा (कार्तवीर्योदय, १७/१२) स्वयं महाकविले प्रष्ट उल्लेख गरेका छन् ।

सुकीर्तिदत्त, सुग्रीवदत्तजस्ता नामले समेत परिचित सुकृतिदत्त पन्त न्याय, मीमांसा, व्याकरण, साहित्य आदि विभिन्न दर्शन आदि विधाका आधिकारिक विद्वान् थिए । व्याकरण, न्याय, साहित्य, ज्योतिष, तन्त्र, दर्शनजस्ता विधामा यिनले रचना गरेका ग्रन्थहरू २७ वटा उपलब्ध भएबाट पनि उनको विद्वत्ता स्वतः प्रमाणित हुन आउँछ (उपाध्याय, ऋतम्भरा : २०६०, ५३–५५) । शृङ्गारसङ्ग्रहनामक काव्यको प्रारम्भिक पद्यमा श्रीदत्तलाई उनले गुरुस्थानीय सम्मान व्यक्त गरेकाले यिनका आरम्भिक गुरु उनै थिए भन्ने स्पष्ट हुन्छ (उपाध्याय, पूर्ववत्, ५२) । पछि गएर रमानाथबाट उनले शब्दविद्या अध्ययन गरेको देखिन्छ (पूर्ववत्) । सुकृतिदत्त देवी तारिणीका उपासक थिए भन्ने कुरा उनले रचना गरेको तारिणीवरिवस्यानामक देवीस्तुतिपरक रचनाले प्रमाणित गर्दछ (पूर्ववत्, ५७) । यसैगरी यस काव्यको मङ्गलाचरण (कार्तवीर्योदय, १/१, २) आठौंदेखि सोह्रौं सर्गसम्म प्रत्येक सर्गका प्रथम पद्यमा गरिएको तारिणीस्तुति र अन्यत्र (कार्तवीर्योदय १७/३३, ३५, ३६) समेत गरिएको तारिणी चर्चाले यस तथ्यको थप पुष्टि गरेको पाइन्छ । अप्रतिम वैदुष्यले भरिएका उनका रचनाले उनको 'सुकीर्ति' यो नामान्तरको सार्थकता प्रकाशित गरेका छन् भने कार्तवीर्योदय महाकाव्यले उनलाई श्रीहर्षको समरेखामा स्थापित गरिदिएको छ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३. कार्तवीर्योदय महाकाव्य

कार्तवीर्योदय महाकाव्य विभिन्न पुराणहरूमा वर्णन गरिएको कृतवीर्यका सुपुत्र वीरचरित्रसम्पन्न कार्तवीर्यसित सम्बद्ध कथालाई लिएर रचना गरिएको सुन्दर काव्यकृति हो । पुराणहरूमा वर्णित अनेक कथाहरूमध्ये महाकवि सुकृतिदत्त पन्तले महर्षि व्यासरचित विष्णुपुराणको चौथो खण्डमा उपलब्ध कार्तवीर्य-चरितोपाख्यानसित सम्बद्ध कथालाई मुख्य आधार बनाएर यस महाकाव्यको रचना गरेका हुन् भन्ने विद्वान्हरूको मत छ (ढुङ्गाना, ऋतम्भरा : २०६०, ६६) । नायक कार्तवीर्यको चरित्रमा उत्कृष्टता ल्याउनका लागि महाकविले मूलकथामा यथोचित परिवर्तन पनि गरेका छन् । पुराणमा आएका कतिपय घटनालाई आफ्नो प्रतिभा र कल्पनाको लेप लगाएर मौलिक उद्भावनाका साथ काव्यात्मकता प्रदान गर्न पन्त सफल बनेका छन् । एउटा राजपुत्रमा हुनुपर्ने वीरोचित गुण- उत्साह, धीरता, विवेकिता, शौर्य, आकृतिगत सौन्दर्य आदिको समवेत रूप कार्तवीर्यमा झल्किएको छ । दिव्यशक्तिको प्राप्तिका लागि कार्तवीर्यले राज्याभिषेक हुनुपूर्व नै तपस्या गरेको सन्दर्भ उठाएर पन्तले आफ्नो र काव्यनायकको देवी-उपासकतालाई प्रस्तुत गरेका छन् ।

नायकजस्तो स्तरका लिइन्छन् नायिका पनि उत्तिकै स्तरीय लिनुपर्छ, यो साहित्यसिद्धान्तको चुरो रहिआएको छ । कार्तवीर्यलाई सुहाउने नायिका विदर्भराज भोजकी सुपुत्री कनकप्रभालाई देखेका छन् पन्तले र त्यही स्तरका गुण र चरित्रको आधान उनमा गरेका छन् । स्वयंवरको सन्दर्भ पारेर राजा कार्तवीर्यसामु भोजदूतका मुखबाट गरिएको कनकप्रभाको सौन्दर्यको वर्णन अतिशय हृदयहारी बनेको छ । स्वयंवरमा कार्तवीर्यलाई वरमाला पहिराएपछि कनकप्रभाको परिणयको वर्णन गरिएको छ । कनकप्रभा र कार्तवीर्यको विवाह भएपछि पत्नीका साथ विभिन्न उपवन र तलाउहरू हेर्दै विहार गरिरहेका बेला लङ्काको राजा रावण त्यहाँ आइपुग्छ । कार्तवीर्य र रावणका बीचमा युद्ध हुन्छ र कार्तवीर्यले रावणको घमण्डलाई वीरतापूर्वक चुर गरिदिन्छन् । पछि उनको जीवन सुखमय बन्दै अघि बढ्छ । शास्त्रको छलफल, यज्ञयागादि र दानदक्षिणाका प्रसङ्गहरूको वर्णनपछि कविले कार्तवीर्यलाई मोक्षप्राप्तिहेतु तपस्या गर्ने गरी वानप्रस्थी बनाइदिएका छन् । समाप्तिमा आफ्नो कुलपरम्परा र काव्यको विवरण दिएर पन्तले महाकाव्य पूर्ण गरेका छन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तन्त्रशास्त्रका मर्मज्ञ विद्वान् सुकृतिदत्त पन्त देवी तारा वा तारिणीका श्रद्धावनत उपासक थिए । यसको अभिव्यक्ति कार्तवीर्योदय महाकाव्यको मङ्गलाचरणमा आएका आरम्भिक दुई पद्यबाट (कार्तवीर्योदय, १/१,२) स्पष्टरूपले भएको छ । यहाँ आफूले रचना गर्न लागेको महाकाव्यको निर्विघ्न परिपूर्तिको कामनाका साथ 'भगवती तारिणीका कटाक्षमात्रले आइलाग्न सक्ने सम्पूर्ण विघ्नहरू नासियून्' भन्दै 'तीनै लोकका सम्पूर्ण तापहरू शान्त पार्ने 'तारा' नामक शक्तिको त्यो तेज मेरो हृदयमा सदा स्थिर बनोस्' भन्ने प्रार्थना कविले गरेका छन् । बिचमा पनि आठौं, नवौं, दशौं, एकादशौं सर्गमा पुनः तारिणीको करुणाका लागि प्रार्थना गरेका छन् । सर्ग ८-१६ का प्रथम श्लोकमा तारिणीवन्दना छ ।

कार्तवीर्योदय महाकाव्य वस्तु र चरिका दृष्टिले मात्र नभई आलङ्कारिक हिसाबले पनि एउटा सुन्दर उपवनरूप बन्न पुगेको छ । यहाँ अर्थालङ्कारको सौन्दर्यसँगै शब्दालङ्कारको विचित्र सौन्दर्य चरम उत्कर्षमा पुगेको भेटिन्छ । यस महाकाव्यको सातौं सर्गमा विशेष गरी चित्रकाव्यको अद्‌भुत छटा व्याप्त बनेको छ । कविले देवनागरी वर्णमालाका सोह्रवटा स्वरवर्ण र 'त्र' एउटालाई छाडेर 'क'देखि 'ज्ञ'सम्मका अक्षरहरूलाई श्लोकको सुरु र अन्त्यमा पर्ने गरी पद्य निर्माण गरेका छन् । यसले त्यतिबेला अक्षर सिकाउने तरिकाको वस्तुस्थितिलाई पनि झल्काउँछ भन्ने विद्वान्‌हरूको मत छ (उपाध्याय दुर्गादत्त, ऋतम्भरा : २०६०, ९९) । यी चित्रबन्धका साथमा पात्रको चरित्र प्रकाशन पनि सहज रूपमा गर्ने कविको कौशलले जो कोही पाठकलाई अचम्मित पार्दछ ।

संस्कृतमहाकाव्यका शृङ्खलामा नैषधीयचरित महाकाव्यको प्रतिस्पर्धीका स्तरमा सुकृतिदत्तरचित कार्तवीर्योदय महाकाव्यलाई हेरिन्छ । यसबारे कार्तवीर्योदय महाकाव्यका सम्पादक डा. स्वामी प्रपन्नाचार्यले भूमिकामा व्यापक चर्चा गरेका छन् । पुराण र महाभारतमा प्रसिद्ध राजा कृतवीर्यका पुत्र सहस्रार्जुन कार्तवीर्यको उदात्त चरित्रलाई लिएर महाकवि सुकृतिदत्त पन्तले आफ्नो विलक्षण प्रतिभाद्वारा प्रचुर कल्पनासाथ सम्पूर्ण साहित्यिक सौन्दर्य भरेर यस महाकाव्यको रचना गरेको देखिन्छ । संस्कृत काव्यशास्त्रले स्थापना गरेका महाकाव्यसम्बन्धी सैद्धान्तिक मान्यताको अनुसरण गर्दै पूर्ण रसपरिपाकयुक्त महाकाव्य रचना गर्ने पन्तले पात्रको जीवनका अनेक परिवेशमा प्रकृति, व्यवहार, संस्कृति र मर्यादाको अनुसरण इत्यादिको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चित्रण गरी महाकाव्यलाई जीवन्तता प्रदान गरेका छन् । गुणत्रयको अवसरोचित उपयोगका साथै प्रतिअक्षर श्लोकनिर्माण र विभिन्न शब्दार्थालङ्कारको विलासभूमि बनाएर कविले यस महाकाव्यलाई साहित्यिकताको चरमचुलीमा स्थापित गरेका छन् । महाकाव्यमा हुनुपर्ने भनी काव्यशास्त्रीहरूले निर्देश गरेका महाकाव्यका अभिलक्षणहरूको निर्वाह हुनाले पनि यस महाकाव्यले उत्कृष्टता पाएको छ ।

४. कार्तवीर्योदय महाकाव्यमा रसविधान

सहस्रार्जुन उपाधिद्वारा विभूषित राजा कार्तवीर्यका उदात्त चरित्रको वर्णन कार्तवीर्योदय महाकाव्यमा गरिएको छ । धर्मानुकूल आचरण गर्ने तथा तदनुकूल अर्थोपार्जन र त्यसको उपयोग गर्ने कार्तवीर्यको विमल चरित्रको उपस्थापन गरेर कवि सुकृतिदत्त पन्तले यस महाकाव्यलाई धर्म, अर्थ, काम र मोक्ष, यी चारै पुरुषार्थसिद्धिको आधारभूमि बनाएको अनुभूत हुन्छ । पिता कृतवीर्यको चरित्र र उपदेशबाट सुशिक्षित कार्तवीर्य युवावस्थामै आत्मसंयमका साथ तपस्या गर्ने सामर्थ्य राख्छन् । यस महाकाव्यको मुख्य पुरुषार्थ र रसको पारस्परिक सम्बन्धलाई ध्यानमा राखेर कवि पन्तले यहाँ अवसरोचित रसको विधानमा सचेष्टता अपनाएको समेत अनुभव हुन्छ ।

कार्तवीर्योदय महाकाव्यमा सन्दर्भ हेरी विशेषतः शृङ्गार, वीर, करुण र शान्त, यी चार रसको अभिव्यक्ति रहेको पाइन्छ । यस महाकाव्यमा समाविष्ट कथानकलाई गहिरिएर नियाल्ने हो भने रसको विधानसम्बन्धी कविको धारणा पनि अवगत हुन आउँछ । राजा कृतवीर्यको राजधानी माहिष्मतीको वर्णन प्रथम सर्गमा छ । यस सर्गमा प्रसङ्गवशात् शृङ्गाररसका केही झिल्काहरू भेटिन्छन् । द्वितीय सर्गमा राजा कृतवीर्यका समुज्ज्वल चरित्रको प्रकाशन गर्ने क्रममा दानशीलता, प्रजारञ्जकता आदि उदात्त गुणको चर्चा गर्दै कविले चतुरङ्ग सेनाले युक्त यी राजाले दिग्विजय गरेको सन्दर्भलाई पनि उठाएका छन् (कार्तवीर्योदय, २/१७–४२) । यसले वीररसको परिपाक भएको देखिन्छ । सन्तान नभएका कारण खिन्न मन भएका कृतवीर्य अनपत्यताको निवारणका लागि गुरु दत्तात्रेयका शरणमा जान्छन् । तेस्रो सर्गमा कृतवीर्य र दत्तात्रेयको संवाद छ । दत्तात्रेयका क्षेमकुशल प्रश्नपछि राजा कृतवीर्य आफ्नो सन्तानहीनताको स्थितिलाई प्रकट गर्दै त्यसको निवारणको उपाय बताउन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुरोध गर्छन् । 'स्वयं हरि तिम्रो पुत्रका रूपमा जन्मनेछन्' भन्दै दत्तात्रेयले कृतवीर्यसामु गरेको भक्तिमार्गको उपदेशमा शान्तरसको छटा देख्न पाइन्छ ।

चौथो सर्गको आरम्भमा पनि दत्तात्रेयको उपदेशअनुसार हृदयमा विष्णुमूर्तिको ध्यान गर्दै योगमा लीन कृतवीर्यको स्थितिको वर्णन गरी कविले शान्तरसको स्पर्श दिन खोजेका छन् (कार्तवीर्योदय, ४/१-२२) । कृतवीर्यले पाएको हरिदर्शन, सन्ततिका रूपमा जन्मिने आश्वासन आदि प्रसङ्ग पनि यसका पोषक बनेका छन् (पूर्ववत्, ४/२४-३२) । कार्तवीर्यको जन्म भएपछिको अप्सराको नृत्यवर्णन प्रसङ्गमा शृङ्गारका झिल्काहरू पाइन्छन् (पूर्ववत्, ४/६९-७३) । पाँचौं सर्गमा अर्जुन नाम रहेका कार्तवीर्यको बाल्यावस्थाको वर्णन छ । वात्सल्यको अभिव्यक्ति यसको रसभावगत विशेषता हो । अन्त्यमा लक्ष्मी र भारतीका क्रीडाभूमि कार्तवीर्य बनेको सन्दर्भ उठाएर शृङ्गारको आंशिक अभिव्यक्ति दिइएको छ । छैठौं सर्गमा कार्तवीर्य गुरु दत्तात्रेयबाट सम्पूर्ण वाङ्मयमा पारङ्गत बनेपछि योगमार्गद्वारा सम्पूर्ण उत्तम गतिलाई प्राप्त गर्न तपस्यामा लीन बनेको सन्दर्भ आउँछ । यसले शान्तरसको अभिव्यक्ति (६/४-४३) दिन खोजिएको छ भने उनको तपस्या भङ्ग गर्न सेनासहितको कामदेवलाई इन्द्रले पठाएपछि कार्तवीर्यले तपस्या गरेको ठाउँमा कामदेव पुग्दाको स्थिति, देवाङ्गनाका विभिन्न शृङ्गारिक हावभाव तथा तिनका माध्यमबाट व्यक्त भावादिको अभिव्यक्तिमा (पूर्ववत्, ६/४६-८८) शृङ्गारका उपकरणहरूको प्रचुर प्रयोग भएको छ । सातौं सर्गमा शब्दवैचित्र्यको प्रदर्शनमा कविलेखनी लालायित बनेकाले शब्दालङ्कारच्छटा व्याप्त छ । यसमा कार्तवीर्यको तपस्या, उनको व्यक्तित्व, विद्वत्ता आदिको वर्णनले युवतिहृदयमा उनीप्रति तीव्र आकर्षण पैदा गर्न सक्ने हुनाले नायकालम्बनक शृङ्गारसाधनको उपयोग यहाँ पनि भएको मात्र सकिन्छ ।

आठौं सर्गमा कार्तवीर्यको राज्याभिषेकको सन्दर्भमा नायकीय विभूति वर्णन गर्दा केही सङ्केत गरिएर बिस्तारै अघि बढेको शृङ्गारमय कथावस्तु पूर्णतया शृङ्गारिक धारामा प्रवाहित भएकाले कार्तवीर्योदय महाकाव्यमा शृङ्गाररसको परिपाक भएको पाइन्छ । कार्तवीर्यको राज्याभिषेकको सन्दर्भमा कृतवीर्यको पुत्रका प्रति उपदेश (पूर्ववत्, ४६-८८) मा केही वाक्यांशमा शृङ्गारको अंश छ भने पिता तपोवन गएपछि कार्तवीर्यमा देखिएको उद्विग्नतामा (पूर्ववत्, ८/९८-१०१) कारुण्यको स्पर्श छ ।

नवौं सर्गमा कनकप्रभाको स्वयंवरको सन्देश लिएर माहिष्मती नगरी पुगेको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोजराजको दूतको मुखबाट गरिएको कुण्डिनपुरको वर्णन (पूर्ववत्, ९/५-४१), कनकप्रभाको सौन्दर्य वर्णन (पूर्ववत्, ९/४२-१०७), दूतले व्यक्त गरेको शैलीले कनकप्रभाका हृदयमा पनि कार्तवीर्यका प्रति देखिएको प्रणयभाव (पूर्ववत्, १०९)को प्रस्तुति, कनकप्रभाले तपाईंलाई नै वरण गर्ने छिन् भन्ने विश्वस्त दूतोक्ति (पूर्ववत्, ११०-११३) यी सन्दर्भमा नायक र नायिकाका हृदयमा प्रेमाङ्कुरण भएको अनुभूति गर्न सकिन्छ ।

दसौं सर्गपछि क्रमशः कुण्डिनपुरामा आयोजित कनकप्रभा स्वयंवर, कार्तवीर्य-कनकप्रभाविवाह, नवदम्पतीको विलासपूर्ण विहार, रावणसँगको युद्ध र उसको घमण्ड चूर्ण गरिसकेपछिको पुनः विलासमय विहार आदिमा शृङ्गाररसले सम्पूर्ण सामग्रीसहित पूर्ण परिपाक प्राप्त गरेको छ । सोह्रौं सर्गमा आएको शास्त्रीय चिन्तनले अचानक शान्तरसको छनक दिन्छ । यो कविको सर्वशास्त्रपाण्डित्यप्रकाशनरूप आग्रहविशेषका परिणतिले भएको हो भन्ने विद्वान्हरूको मत छ (कार्तवीर्योदय महाकाव्यको प्रस्तावनामा डा. ब्रह्ममित्र अवस्थी, पृ. ३) । रावण-कार्तवीर्य युद्ध-वर्णन वीररसमय छ (पूर्ववत्, १४/११०-११७) ।

माथि प्रस्तुत कथा र रसको पारस्परिक सम्बन्धको संक्षिप्त उल्लेखबाट महाकाव्यको आरम्भदेखि अन्त्यसम्म व्यापक रूपमा रहेको आप्रबन्धव्यापी रस शृङ्गार नै देखा पर्दछ । यसकारण शृङ्गाररस नै यस महाकाव्यको अङ्गी रस बन्न पुगेको छ । यसको व्यापकता सम्पूर्ण प्रबन्धको आधा अंश (८-१५ सर्ग) मा समग्र सामग्रीसहित अर्थात् आलम्बन, उद्दीपन, अनुभाव र अनेक सञ्चारिभावको प्रचुर उपयोगद्वारा स्थापना गरी कवि सुकृतिले रसराज शृङ्गारलाई चरम आस्वाद्य अवस्थामा पुऱ्याएको देखिन्छ । आठौं सर्गमा राज्याभिषेकका सन्दर्भमा गरिएको कार्तवीर्यचरितोपस्थापन र विशेषतः नवौं सर्गदेखि पन्ध्रौं सर्गसम्मको नायक-नायिकाको विहारमय शृङ्गारवर्णनबाट त्यसको उत्कर्षप्राप्तिबाहेक प्रथम सर्गदेखि नै यसको अङ्कुरणका लागि साङ्केतिक अंशको समावेश कविले गरेको पाइन्छ । यसलाई अझै सूक्ष्मरूपले नियालेर पनि विवेचन गर्नु उपयुक्त हुनेछ ।

प्रथम सर्गको माहिष्मती नगरी वर्णनमा आएको तरुणीगणको रत्नता प्रकाशनको प्रसङ्ग (श्लो. ९), रेवानदीको मानवीकरणसहित तिनमा आधान गरिएका शृङ्गारिक चेष्टाको प्रस्तुति (श्लो. ११-१४), अग्ला महलमा बस्ने कुरङ्गनेत्रा सुन्दरीका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चेष्टाविशेषको प्रस्तुति (श्लो. १५), नर्मदावर्णन र त्यहाँ विहार गर्ने नारीको वर्णन (श्लो. १६-१९) र आफ्नो यस काव्यको अन्य काव्यसितको तुलना गर्ने क्रममा (श्लो. ४४-४५) समेत शृङ्गाररसका आलम्बनरूप नायिका र उद्दीपनरूप नदीविहारादिको प्रस्तुति भएकाले शृङ्गारको आरम्भिक यात्रा तय भएको देखिन्छ। यसपछि चौथो सर्गमा कार्तवीर्यको जन्मपश्चात् स्वर्गका अप्सराहरू नृत्योत्सव गरी खुसी मनाएको प्रसङ्गमा (श्लो. ६९-७३) शृङ्गारका झिल्काहरू अभिव्यक्त छन्। पाँचौं सर्गमा 'सुन्दरीसमुपभोगसंविदे' (श्लो. १९) पदले यसको निरन्तरताको सङ्केत गर्दै अन्त्यमा कार्तवीर्य लक्ष्मी र भारती दुइटीको (सौताको झैं) क्रीडाभूमि बन्दै गरेको (श्लो. ८३) सङ्केत दिएर कविले शृङ्गार विस्तारै आरूढ बन्दै गरेको अनुभूति दिएका छन्। छैठौं सर्गमा तपस्यारत कार्तवीर्यको तपोभङ्ग गर्न अप्सरासहितको कामदेवलाई कार्तवीर्यको तपोवनमा पठाएपछि प्रकृतिमा देखापरेको परिवर्तनको वर्णन र अङ्गनाका क्रीडाको (श्लो. ४६-८८) शृङ्गार सुस्पष्ट बनेर व्यक्त हुन थालेको पाइन्छ। सातौं सर्गमा कार्तवीर्यको उदात्त चरित्रको वर्णन गरेर नायकलाई आलम्बन बनाई नायिकाहृदयमा उद्‌बुद्ध हुने रतिको आधारभूमि तयार पारिएको छ। यो कनकप्रभाको चित्तमा कार्तवीर्यप्रतिको रतिभाव जगाउने मुख्य हेतु बन्न पुगेको छ। आठौं सर्गमा कार्तवीर्यको राज्याभिषेकको प्रसङ्गमा तिनको गुणगरिमा वर्णन गरी (२०, २७, २९, ३०, ३१, ३४-४४) नायकोत्कर्षको स्थापना गर्दा अझ बढी मुकुलित हुने अवसर पाएको शृङ्गार नवौंदेखि पन्ध्रौं सर्गसम्म सम्पूर्ण सामग्रीसम्पन्न बनेर व्यापक हुँदै पूर्ण आस्वाद्य बनेको प्रसङ्ग माथि उठाइसकिएको छ। यसरी यस महाकाव्यको अङ्गी रस शृङ्गार नै हो र वीर अनि शान्त, पूर्ण अनभिव्यक्त करुण, यसका अङ्ग रस हुन् भन्ने निश्चय हुन्छ। कतिपय समीक्षकहरूले 'वीरप्रायाखिलरसयुतम्' भन्ने अंशलाई आधार मानेर वीर नै अङ्गी रस मानेका छन् तर आप्रबन्धव्यापी नभएकाले त्यसलाई अङ्गी नमानी शृङ्गारको उद्‌बोधक अङ्ग रस मान्नु उपयुक्त हुन्छ।

५. कार्तवीर्योदय-मकरन्द : परिचय र विषयवस्तु

दर्शनशास्त्रका विविध विषयले भरिएको अलङ्कार-प्रयोग-प्रचुर महाकाव्य कार्तवीर्योदयका आठौं र नवौं सर्ग शास्त्रीतहको तेस्रो वर्षमा पाठ्यांशका रूपमा स्थापित छन्। उक्त महाकाव्यका ८ र ९ सर्गको चूडामणिनामक संस्कृतटीका,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मीनामक नेपालीटीका र त्रिशक्तिनामक टिप्पणीद्वारा समलङ्कृत टीकाग्रन्थ नै समग्रमा कार्तवीर्योदय मकरन्द हो । कार्तवीर्योदय महाकाव्य स्वामी प्रपन्नाचार्यले गरेको सम्पादनसहित तत्कालीन नेपाल राजकीय प्रज्ञा प्रतिष्ठानबाट २०५१ सालमा प्रकाशित छ । २०५९ सालमा वाल्मीकि विद्यापीठ साहित्यशिक्षण विभागद्वारा आयोजित पाँचदिवसीय कार्यशाला-गोष्ठीमा प्रस्तुत विविध कार्यपत्रहरूमा यस महाकाव्यका विविध पक्षमाथि चर्चा गरिएको पनि पाइन्छ । यसबाहेक समग्रमा यस महाकाव्यको विषयसमीक्षासहित टीका वा समीक्षा नभएको र पाठ्यक्रममा निर्धारण गरिएको अंशको अर्थबोध र व्याख्या, विवेचन गर्ने कार्य पनि दुष्कर बन्न पुगेको अवस्थामा निर्धारित पाठ्यांशमाथि टीका-टिप्पणीको खाँचो सर्वत्र अनुभव भएकै थियो । यस आवश्यकतालाई ध्यानमा राखी आएको यो टीका, व्याख्या र टिप्पणीसहितको त्रिवेणीरचना कार्तवीर्योदय-मकरन्द अत्यन्त उपयोगी रहेको छ । कार्तवीर्योदय-मकरन्द महाकवि सुकृतिदत्त पन्त विरचित व्युत्पत्तिविशिष्ट आलङ्कारिक काव्य-कार्तवीर्योदय महाकाव्यका आठौं र नवौं सर्गको टीकाका रूपमा रचित व्याख्याग्रन्थ हो । टीकाकारका असीम वात्सल्यस्रोत पिताश्री चूडामणि ढकाल, स्नेहमयी माताश्री दिव्यलक्ष्मी ढकाल र आराध्या जीवित जगदम्बा शक्तिमाता श्रीलीलादेवीका पावन नामबाट निर्मित सारस्वत त्रिवेणी बनेर यो मकरन्दनामक टीकाग्रन्थ प्रकाशमा आएको हो । विशेषगरी शास्त्री तेस्रो वर्षको निर्धारित पाठ्यांशको स्पष्टीकरणका लागि रचिएको यो ग्रन्थमा तिनै दुई सर्गका पद्यको व्याख्या, टिप्पणी र भूमिका उपस्थापन गरिएको छ। यद्यपि भूमिकामा मकरन्दकारले संस्कृतभाषाका माध्यमबाट यी दुबै सर्गको कथावस्तु सविस्तार दिनुभएको छ तापनि नियमित छात्रछात्राका अतिरिक्त अन्य पाठकलाई समेत निर्धारित अंशको कथावस्तुको बोध सरलरूपमा होओस् भन्ने चाहनाले यहाँ पनि यी दुबै सर्गको संक्षिप्त कथासार नेपालीभाषामा प्रस्तुत गरिँदैछ ।

६. कथावस्तु

आठौं सर्गको कथासार

अष्टम सर्ग 'मजस्ता मूर्खलाई पनि बारम्बार सत्कवि बनाउन सक्ने महाविद्या ताराको करुणामय दृष्टिपरम्परा सदा अविर्भाव भइरहोस्' भन्ने मङ्गलाचरणका साथ आरम्भ भएको छ । यस सर्गमा मुख्यरूपमा माहिष्मती नरेशका रूपमा कार्तवीर्यको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्याभिषेकको सन्दर्भलाई सविस्तार प्रस्तुत गरिएको छ ।

आरम्भमा राज्याभिषेकका लागि आवश्यक सम्पूर्ण सामग्री जम्मा गरी महाराजका रूपमा अभिषेक गरेर छोरा कार्तवीर्यलाई सम्पूर्ण पृथिवीका चक्रवर्ती बनाउन चाहने राजा कृतवीर्य गुरु दत्तात्रेयका सामु आफ्नो भावनालाई प्रस्तुत गर्दै रहेका देखिन्छन् । उनी भन्छन्– "हे गुरु ! हजूरका असीम कृपाले मेरो मन यतिबेला मुक्तिको मार्गतिर लाग्न उत्सुक भइरहेको छ । गुरुले सुयोग्य शिष्यमा विद्याको प्रचारप्रसार गर्ने अभिभारा सुम्पिएझैं म पनि सुयोग्य पुत्र कार्तवीर्यको राज्याभिषेक गरी यस राज्यको सम्पूर्ण भार सम्पिई शान्ति प्राप्त गर्न चाहन्छु । लामो समयसम्म राज्यशासन गर्ने क्रममा मैले विभिन्न विषय र ऐश्वर्यको भोग गरें । अब फेरि राजाकै अभिभारा लिएर तिनै विषतुल्य विषयको भोग गर्ने इच्छा ममा पटक्कै छैन । सांसारिक विषयले आफूलाई त्याग्नुपूर्व नै तिनलाई आफूले त्याग्ने व्यक्ति नै उत्तम हो भन्ने सत्यलाई बुझेर म पनि विषयलाई त्यागी हंसरूप भगवान् नारायणका पदारविन्दमा लीन हुन चाहन्छु । पुत्रसमान स्नेह गरी प्रजारञ्जन गर्दै मैले रुद्रले झैं शत्रुहरूको नाश पनि गरें । शास्त्रमर्यादाअनुकूल आचरण गरी मैले सम्पूर्ण पृथ्वीको पालन गरी सुयश तथा राज्यलक्ष्मीबाट सर्वथा सुपरिचित एवं सुसम्पन्न बनेर अत्यन्त भाग्यशाली पनि छु । यी सबै कुरा प्राप्त गरेर पनि म सन्तुष्ट बन्न सकेको छैन । सांसारिक भोगभन्दा धेरै उच्चकाटिको सर्वदा सर्वथा कल्याणमय आनन्द प्राप्त गर्ने मेरो तीव्र अभिलाषा छ । त्यसको पूर्तिका लागि हजुरसमानको मार्गनिर्देशक गुरु मेरो अरू कुनै हुन सक्दैन, हे गुरु ! मेरो उद्धार गर्नुहोस् ।"

यसरी विनीत भावले निःश्रेयस सुखको कामना गर्ने राजा कृतवीर्यलाई गुरु दत्तात्रेयले भन्नुभयो– "हे पृथ्वीपति महाराज ! राजा पृथु र भगवान् ऋषभजस्तै उज्ज्वल कीर्ति र उदात्त चरित्रका कारण विश्वविख्यात हुनुभएका तपाईं छिट्टै नै विद्या–विनय–शौर्यादि अनेक गुणले सम्पन्न पुत्र कार्यवीर्यमा राज्यको सम्पूर्ण शासनाधिकार स्थापना गरी परम पद प्राप्त गर्न सक्नुहुनछ । यसरी राज्यभार सुम्पिनुपूर्व कार्तवीर्यको राज्याभिषेक हुनु अति आवश्यक छ । राज्याभिषेकपछि तपाईंका सुपुत्र कार्तवीर्यले सम्पूर्ण शत्रुहरूको संहार गर्ने कुरामा म विश्वस्त छु ।"

गुरु दत्तात्रेयको यस्तो आज्ञा पाएर राजा कृतवीर्यले ज्योतिषशास्त्रका वेत्ताहरूले बताएका शुभदिनमा पृथ्वीमण्डलका अन्य राजा तथा ब्राह्मणहरूको समुपस्थितिमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेष उत्सवका साथ कार्तवीर्यको राज्याभिषेक सम्पन्न गरे । छोरालाई सम्पूर्ण राज्य र ब्राह्मणहरूलाई सम्पूर्ण धनसम्पत्ति दान गरी सबै प्रजालाई निर्भय रहन आश्वस्त पारिसकेपछि राजा कृतवीर्यले आफ्ना विनीत पुत्र कार्तवीर्यले उपदेश दिन लागे । उनी भन्छन्– "हे कार्तवीर्य ! सारा प्रजालाई हरतरहले खुसी तुल्याई सन्तुष्ट राख्न सक्ने राजा नै वास्तवमा राजा कहलाउँछन् । प्रजा रुष्ट भए भने राज्यमा अनेक प्रकारका आन्दोलनहरू हुन सक्छन् । त्यसको राम्ररी ख्याल गरी आफ्नो तर्फबाट सदैव सद्व्यवहार गर्नू । प्राचीनकालदेखि मनु आदि नीतिवेत्ताद्वारा स्थापित राजनीतिको मर्मलाई बुझी तदनुकूल शासन गर्ने राजाका सामु सबै नतमस्तक बन्दछन् । बाबु ! राज्यलक्ष्मी अत्यन्त चञ्चल छिन् । राज्यको ऐश्वर्य र शासनको अधिकारी तिमीमा नै निहित छ । यौवनमा जीवन बिताइरहेका हुनाले ऐश्वर्यको प्राप्तिबाट तिमीमा पनि उन्माद आउन सक्छ किनकि रूप, यौवन, धन, राज्याधिकार आदि कुराले मानिसलाई उन्मत्त बनाउँछन् । यिनलाई पाएर तिमी कदापि आफूमा उन्माद आउन दिनेछैनौ । विकारका कारक यिनलाई निश्चित सीमामा राखी विवेकपूर्वक राज्य सञ्चालन गर्नेछौ । घुस खाने कर्मचारी, उच्च ओहदामा रहने मानिसको चाकडी–चापलुसी गरी आफ्नो स्वार्थ सिद्ध गर्न मानिसहरू, निरपराध व्यक्तिलाई सताउने र सरल तथा सदाचारी धर्मात्माहरूलाई दुःख दिने मानिसहरू कसैका पनि मित्र हुन सक्दैनन् । त्यस्ता मानिसलाई राज्यबाट निल्कानु नै उचित हुन्छ ।"

कृतवीर्य अगाडि भन्छन् – "हे पुत्र ! शासन–सञ्चालनका क्रममा मन्त्र अर्थात् गोप्य सूचना आदिलाई राम्ररी गुप्त राख्न जान्नुपर्दछ । कार्य सम्पन्न हुनुपूर्व कसैलाई पनि 'के गर्दैछन्' भन्ने सङ्केतसम्म पनि दिनुहुँदैन । शासनकार्यमा कसको उपयोग गर्ने भन्ने कुरालाई राम्ररी ख्याल गरी समुचित व्यवस्था मिलाउनू । भोगमा अत्यासक्ति नराखी जनतालाई खुसी पार्ने, ब्राह्मणहरूको सेवा गर्ने, भगवान्का चरणारविन्दमा सदा भक्ति गर्ने र सधैं स्वच्छ पवित्र कर्म गरी जीवनयापन गर्दै निर्मल कीर्ति आर्जनका लागि प्रयत्न गर्नेछौ । शास्त्रमा श्रद्धा राखेर कार्य गरेमा सर्वत्र मङ्गल हुनेछ । संसारमा राजा र प्रजाका लागि पनि सर्वथा कल्याण गर्ने तत्त्व भगवद्भक्ति नै हो त्यसैले नारायणका चरणारविन्दमा सदा तिम्रो भक्ति लागिरहोस् । विद्वान्, विवेकशील राजा नै धर्मादि चार पुरुषार्थको उपयोगमा साथ कार्य गरी सम्पूर्ण राष्ट्रलाई सन्मार्गमा लगाउन समर्थ हुन्छन् । भर्खरै राजसिंहासनमा आसीन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भएका तिमी पनि यी महत्त्वपूर्ण पक्षलाई ध्यानमा राखी शासन गर्नेछौ भन्ने मेरो चाहना छ । तिम्रो सदा कल्याण होओस् ।"

कार्तवीर्यलाई यसरी उपदेश दिएर पूर्वराजा कृतवीर्य पत्नीलाई दरबारमा नै छाडी तपस्याका लागि तपोवनतिर लाग्छन् । उनका विरहमा नरनारीहरू र राजा कार्तवीर्यसमेत शोकमा डुब्न पुग्छन् । केही दिन खिन्न हृदय भएका राजा कार्तवीर्य राज्यको शासनादिकार्यमा संलग्न हुनुपर्दा विस्तारै आफ्ना पिताको वियोगको दुःखलाई बिर्सन पुग्छन् । शासनबाट सम्पूर्ण पृथिवी सुस्थ बनाउँदै आफ्नो अधीनमा राख्न उनी समर्थ हुन्छन् । अन्त्यमा शासनकालमा उत्तरोत्तर भौतिक कल्याण र आध्यात्मिक चिन्तनद्वारा उनले जनतालाई आनन्द प्रदान गर्दै शासन गरे भन्ने उल्लेख गरी सर्ग समाप्ति भएको सूचना दिइएको छ ।

नवौं सर्गको कथासार

कार्तवीर्योदय महाकाव्यको नवौं सर्ग 'शेषनागको मुकुटमा रहेका मणिहरूका अनेक गुञ्जनबाट नित्य गुञ्जायमान रहने भगवती महाविद्या ताराका चरणकमलले मेरा समस्त विघ्नको नाश गरून्' भन्ने मङ्गलस्तुति गर्दै आरम्भ हुन्छ । यस सर्गमा विदर्भराज भोजकी सुपुत्री कनकप्रभाको स्वयंवरको प्रसङ्ग उठाएर कविले मुख्यतः काव्यनायिकाको सौन्दर्यवर्णन गरेका छन् । यस क्रममा कार्तवीर्य राजाका सामु राजा भोजद्वारा पठाइएको सन्देशवाहक दूतले कनकप्रभाको सौन्दर्यवर्णनमा मुख्य भूमिका निर्वाह गरेको छ ।

एकदिन कनकप्रभाको स्वयंवर समारोहमा सहभागी हुनका लागि विदर्भभूपति भोजद्वारा निमन्त्रणासहित पठाइएको दूतरूप ब्राह्मण माहिष्मती राजधानीमा आई राजा कार्तवीर्यलाई प्रणाम गरेर एकान्तमा आफ्ना कुरा सुन्नमा उत्सुक मन भएका कार्तवीर्यका समक्ष नम्रतापूर्वक सन्देश सुनाउन सुरु गर्दछन् । उनी भन्दछन्– "हे नरेश ! यस संसारमा दोस्रो स्वर्गसमान बनेको विदर्भनामको देश छ । यसको राजधानी कुण्डिननगरी हो । वेदादिशास्त्र जानेका पण्डितहरूको निरन्तर सभा भइरहने, सुख समृद्धिदायक ऐश्वर्यले सम्पन्न, अनेक संस्कृति र संस्कारले परिपूर्ण, यस नगरीले अमरावतीलाई नि माथ गर्दछ । विशिष्ट विद्वान्हरू र रम्भा, हरिणी आदि अप्सराहरूलाई पनि माथ गर्ने सौन्दर्यशालिनी नारीहरूले भरिएको अनेक उद्यान, तलाउ र गगनचुम्बी भवनहरूले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खचाखच भरिएको यो नगरी अतीव सुन्दर छ । सूर्यकान्तमणि तथा चन्द्रकान्तमणिले खचित भवन र राजपथहरूले सुहाएको यो नगरी जाडो र गर्मी दुबै याममा सम्पूर्ण जनतालाई अनुकूल आनन्द दिने अत्यन्त सुखदायक छ । अनेक मनोहर विलासका साधनद्वारा सम्पन्न, विलक्षण ऐश्वर्यशाली सौन्दर्यसारको समग्रताले परिपूर्ण राजा भोजको राजभवनले चम्किलो बनेको यो सहर अत्यन्त शोभायुक्त पनि छ ।"

"यस्तो सुन्दर नगरीमा विद्यमान राजभवनमा क्रथकैशिक वंशका चूडामणिसमान बनेका सर्वत्र विख्यात राजा भोज विराजमान छन् । न्याय र धर्मपूर्वक प्रजापालन गरी जनताको मन जित्न सफल राजा भोज पराक्रम र यज्ञाचरणका कारण पनि उनी सबैतिर सुप्रसिद्ध छन् ।"

समुद्रबाट लक्ष्मी उत्पन्न भएझैं तिनै राजा भोजकी सुपुत्रीका रूपमा सृष्टिकर्ता ब्रह्माको विलक्षण सिर्जना बनेर कनकप्रभाको जन्म भएको छ । अतुलनीय सौन्दर्य र अनेक गुणहरूको खानी बनेकी कनकप्रभा तीनै लोकका सुन्दरीहरूको परमशोभालाई जित्ने हुँदा त्रिभुवनसुन्दरीका रूपमा विख्यात छिन् ।

यस क्रममा महाकवि सुकृतिदत्त पन्तले राजकुमारी कनकप्रभाको शैशवावस्थादेखि लिएर यौवनको सोपान आरोहणक्रममा उनमा विस्तारै घनीभूत बन्दै आएको सौन्दर्यसारको वर्णन गरेका छन् । नामअनुसार नै सुवर्णको जस्तै कान्तिले भरिपूर्ण उनको शरीरका प्रत्येक अङ्गको वर्णन गर्ने क्रममा कविले अनेक वस्तुहरूसित तिनको दाँजो गर्न खोज्दै अनुपमेयत्व सिद्ध गरेका छन् । चन्द्रमाको सार झिकेर कनकप्रभाको शरीररचना गरिएकाले चन्द्रमा सारहीन छ । कनकप्रभाको मुखमण्डलमा सुधा र सुगन्ध दुबै भएकाले कमल र चन्द्रमा दुबै पराजित भएका छन् । उनका नयन खञ्जनपक्षीको घमन्डलाई तोड्ने खालका छन् । केशपाशको शोभाका सामु आफ्नो चमर निष्फल भएको जानी चौंरीले त्यसलाई पछाडितिर राखेको छ । सरस्वतीका वीणाको झङ्कारजस्तो आवाज भएकी कनकप्रभाका प्रत्येक अङ्ग– हात, औंला, काँध, स्तन, कटि, नितम्ब, तिघ्रा, गोडा आदिको अनुपम सौन्दर्यको सविस्तार वर्णन गरेर कविले तिनको सौन्दर्यातिशयलाई कार्तवीर्यका समक्ष जीवन्तरूपमा उपस्थापित गरेका छन् ।

भोजराजाको सन्देशको उपसंहार गर्दै दूत भन्छन् – "यी कनकप्रभाको स्वयंवरका लागि राजा भोजले विशेष समारोह आयोजना गर्दैछन्, त्यसमा हजुर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहभागी हुनुहोला । अनुरूप वर र कन्याको मेल गराउन नै विधाताले तपाईंका लागि नै भनी कनकप्रभाको सृष्टि गरेका हुन् । तपाईंका कण्ठ कनकप्रभाका हातको वरमालाले अवश्य शोभायमान हुनेछ । राजा भोजले छोरी कनकप्रभाको प्रणयपूर्वकको हेराइका साथमा विशेष श्रद्धासहित तपाईंसमक्ष निमन्त्रणा दिन मलाई पठाउनुभएको हो । यसबाट राजा भोज र कनकप्रभा दुबै हजुरसित सम्बन्ध गाँसिएको देख्न चाहन्छन् भन्ने मलाई लाग्दछ । रति र कामदेवको सम्बन्ध भएझैं तत्तुल्य कनकप्रभा र हजुरको जोडी सदा स्पृहणीय बन्नेछ । कनकप्रभाले स्वयंवरमा हजुरलाई नै वरण गरून्, यही मेरो कामना छ ।"

अन्त्यमा, अन्तःपुरमा विचरण गरी परस्पर मेल गराउन सिपालु बनेका भोजराजाको सन्देशवाहकका सम्पूर्ण कुरा ध्यानपूर्वक सुनेपछि राजा कार्तवीर्यको मन परम आनन्दसागरमा मग्न भएको विषय प्रस्तुत गरी नवौं सर्ग समाप्त भएको सङ्केत गरिएको छ ।

कार्तवीर्योदय-मकरन्द चूडामणिनामक संस्कृत टीका, दिव्यलक्ष्मीनामक नेपाली टीका र त्रिशक्तिनामक विशेष टिप्पणीसहितको आठौं-नवौं सर्गको समग्र व्याख्यायुक्त टीकाग्रन्थ हो । मकरन्दकारकै कथनलाई उद्धृत गरी भन्ने हो भने यो व्याख्यात्मक टीकाग्रन्थ उहाँको वैयक्तिक विद्वत्ताका साथमा डा. स्वामी प्रपन्नाचार्यका सम्पादनमा तत्कालीन नेपाल राजकीय प्रज्ञा प्रतिष्ठानबाट प्रकाशित कार्तवीर्योदय महाकाव्यमा आधारित वाल्मीकिविद्यापीठ साहित्यविभागद्वारा आयोजित गोष्ठीमा प्रस्तुत विचारपत्र र ग्रन्थिभेदनपत्रहरूका कतिपय विचारबिन्दु समेतलाई समेटेर तयार हुन आएको तथ्य खुल्दछ ।

७. कार्तवीर्योदय-मकरन्दका विशेषता

कार्तवीर्योदय-मकरन्दको स्वनिर्मित भूमिकामा मकरन्दकारले कार्तवीर्योदय महाकाव्यका रचयिता सुकृतिदत्त पन्तको जीवनी र उनको विद्वत्तामाथि संस्कृतभाषाका माध्यमबाट संक्षिप्त प्रकाश पार्नुभएको छ । उहाँको यस विवेचनाबाट कार्तवीर्योदय महाकाव्यको रचना वि.सं. १९२८ मा पूरा भएको तथ्य खुल्न आउँछ । गानोगोलासम्बन्धी रोगले ग्रस्त महाकवि पन्तले अन्तिम अवस्थामा नीलसरस्वती र भगवती ताराको नामस्मरण गर्दै शरीर त्याग गर्न पुगेको कुरा श्रुतिपरम्पराबाट ज्ञात हुनआउँछ । यहाँ प्रस्तुत विद्याविशारद महाकवि पन्तद्वारा रचित संस्कृतसाहित्य र अन्य शास्त्रसम्बद्ध विविध ग्रन्थहरूको सूची पनि यस भूमिकाको महत्त्वपूर्ण अङ्ग हो । कार्तवीर्योदय महाकाव्यका सम्पूर्ण पद्यको संख्या (१७२८), यसको बाह्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संरचना, कथावस्तु (१–९ पूर्वकथा र १०–१७ उत्तरकथा), महाकाव्यको साहित्यिक वैशिष्ट्यको विवेचन, आठौं र नवौं सर्गमा प्रतिबिम्बित शास्त्रीय तथा सामाजिक चिन्तनको विश्लेषण आदिको उल्लेख पनि यहाँ भएको छ । मुख्य विवेचनीय अंश आठौं र नवौं सर्गको कथावस्तुलाई विस्तारपूर्वक प्रस्तुत गर्दै त्यसभित्र परेका कृतवीर्य र दत्तात्रेयको संवाद, कार्तवीर्यको जन्म, शिक्षा–दीक्षा र राज्याभिषेक, कृतवीर्यको तपोवनप्रति प्रस्थान, कार्तवीर्यको गुण र सुशासनको चर्चा, विदर्भदेशको वर्णनका क्रममा आएका कुण्डिनपुरको वैभव र सौन्दर्यको प्रकाशन, स्वयंवरका निमित्त प्रस्तुत हुन लागेकी कनकप्रभाको रूप, शील, गुण आदिको वर्णन र कार्तवीर्यलाई भोजराजले स्वयंवरसभामा उपस्थित हुन प्रेषित निम्तोसम्मका विषयको सविस्तार चर्चा यहाँ छ । यो विशेष गरी छात्रकेन्द्री प्रयास भएकाले तिनकै आवश्यकता र उपयोगितालाई ख्याल गरी यस प्रकारको विवेचन गरिएको कुरा प्रष्ट हुन्छ ।

कार्तवीर्योदय–मकरन्दभित्र श्लोकको उल्लेख गरी संस्कृत पदावली अनुकूलको अन्वय, मकरन्दका रूपमा टीका, त्यसअन्तर्गत विग्रह–समास–कोश–पर्यायादि प्रदर्शनपूर्वक व्याख्या, त्रिशक्ति टिप्पणीका रूपमा संस्कृतमा श्लोकको विषयसित सम्बद्ध शास्त्रीय तथा लौकिक सिद्धान्त तथा आचार आदि सन्दर्भको प्रस्तुति, दिव्यलक्ष्मीका रूपमा नेपालीभाषामा सम्बद्ध श्लोकको भावार्थसहितको व्याख्या र पुनः त्रिशक्तिका रूपमा संस्कृत र नेपालीमा पनि प्रस्तुत पद्यसम्बद्ध शास्त्रीय सन्दर्भको उल्लेख, यही क्रममा यो टीका अघि बढ्दछ । आवश्यक देखिएका स्थानमा मात्रै विशेष टिप्पणी प्रस्तुत गरिएकाले त्रिशक्तिको समावेशका तुलनामा मकरन्द दिव्यलक्ष्मीको उपयोग अधिक देखापर्दछ । मकरन्द र दिव्यलक्ष्मीअन्तर्गत स्पष्ट हुन नसक्ने विषय रहेका पद्यको विवेचनामा त्रिशक्तिरूप टिप्पणीको उपयोग गरिएको छ । स्थानअनुसार छन्द र प्रत्येक श्लोकका अन्त्यमा त्यसमा परेको अलङ्कारको उल्लेख गरिएकाले काव्यशास्त्रीय अङ्ग – अलङ्कार काव्यमा कति सुन्दर र उपयोगी बनेर आएको छ भन्ने कुरा पाठकले सजिलै जान्न सक्छन् । यसरी कार्तवीर्योदय–मकरन्द छात्र र अध्यापक दुबैका लागि सञ्जीवनीप्रद बन्ने देखिन्छ ।

८. मकरन्दकारको महनीय योगदान

साहित्य विषयको शिक्षणमा लामो समयको अनुभवका साथै विद्यावारिधिको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धान र तदुत्तरवर्ती अनेक कार्यशाला तथा राष्ट्रिय–अन्तर्राष्ट्रिय विद्वद्गोष्ठीहरूमा सहभागी हुँदै जाँदा मकरन्दकार प्रा.डा. वेणीमाधवढकाल अनुसन्धानका क्षेत्रमा दिनप्रतिदिन खारिँदै र झन् झन् उज्वल बन्दै आउनुभएका आधुनिक प्रविधिविज्ञ विद्वान् हुनुहुन्छ । लिच्छविकालीन अभिलेखमा प्रतिबिम्बित साहित्यिक मूल्यको उद्घाटन गर्दै विद्यावारिधिको उपाधि हासिल गर्नुभएका ढकाल काव्य तथा काव्यशास्त्रीय विषयको शिक्षणमा प्रखर बनेर उत्रनुभएको सत्य उहाँका लगनशील एवं जिज्ञासु शिष्यहरू राम्ररी जान्दछन् । निरन्तरको अध्यवसायका साथ उहाँले संस्कृतसाहित्यसमृद्धिको नेपाली गौरवलाई विश्वसंस्कृत वाङ्मय र विद्वत्समुदायसमक्ष पस्कने पावन कर्ममा विशेष योगदान पुऱ्याउनुभएको वस्तुसत्य कसैबाट छिपेको छैन । आचार्यस्तर र विद्यावारिधिका अनुसन्धातालाई अनवरत प्रोत्साहनका साथ कतै निर्देशकको दायित्व वहन गर्दै त कतै विशेषज्ञताको जिम्मेवारी स्वीकार्दै उहाँले थुप्रै उत्तराधिकारीहरू तयार पार्नुभएको छ । नेपाल संस्कृत विश्वविद्यालयको विभिन्न तहका पाठ्यक्रमको निर्माणमा होस् वा तिनको सामायिक संशोधनमा होस्, उहाँ निरन्तर संलग्न हुँदै र विशिष्ट योगदान गर्दै आउनुभएका विशेषज्ञ हुनुहुन्छ । पाठ्यक्रममा निर्धारित काव्य तथा साहित्यशास्त्रीय पाठ्यांशसित सम्बद्ध विषयका पाठ्यपुस्तक एवं सन्दर्भ–सहायक ग्रन्थको निर्माणको क्रममा उहाँले **काव्यदीपिका**, **हरिकेलिमहाकाव्य** (सम्पादन), **हरिकेलिनवनीत**जस्ता संस्कृतसाहित्यका कृतिहरूलाई आफ्नो विद्वत्ताको कसीमा घोटेर पूर्ण निखारका साथ छात्रवर्ग तथा विद्वत्समुदायसमक्ष प्रस्तुत गरिसक्नुभएको छ ।

नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्रको प्रमुखका रूपमा कार्यकारी निर्देशक भएर विश्वविद्यालयका सोपाधिक र निरुपाधिक शोध–अनुसन्धानका कार्यक्रमलाई पूर्ण कुशलताका साथ अघि बढाउन सफल आदरणीय गुरु प्रा.डा. वेणीमाधव ढकालले विश्वविद्यालयमा उपयोगी ग्रन्थ तथा **ऋतम्भरा**नामक अनुसन्धानपत्रिकाको प्रकाशनको विशेष अभियान नै चलाउनुभएर एउटा विशिष्ट छवि कायम गर्नुभएको छ । सो दायित्वबाट निवृत्त भएपछि उहाँको लेखनी **गणेशपुराण**को अनुवादमा व्यस्त रह्यो । तत्पश्चात् उहाँकै स्तुत्य प्रयासले नेपाली समुदायमा विशेष महत्त्व राख्ने **निर्णयसिन्धु**को नेपाली अनुवाद प्रकाशनमा आयो जसबाट सिङ्गो नेपाली समाज लाभान्वित बनेको छ र उहाँ सम्मानित पनि बन्दै

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आउनुभएको छ । विश्वविद्यालय सेवाबाट निवृत्त हुने अवसर नजिकिँदै गर्दा कार्तवीर्योदयको पाठ्यांशमा आधारित **कार्तवीर्योदय-मकरन्द** आउनु उहाँको संस्कृतवाङ्मय आराधनाको अनवरत अध्यवसायको परिणाम नै हो भन्न सकिन्छ । अनुभवले खारिएको मस्तिष्कको गहन दृष्टिकोणसहितको यो प्रयास झनै गुरुत्वपूर्ण बनेर प्रस्तुत भएको छ । यसलाई संस्कृतसाहित्यजगत्मा एउटा महत्त्वपूर्ण उपलब्धिका रूपमा लिनुपर्ने हुन्छ । संस्कृतसाहित्यमा **पृथूदयमहाकाव्य** लेखिसक्नुभएका ढकालको नेपालीभाषामा नेपाली परिवेशकै कथावस्तुमा आधारित **रश्मिप्रभास**नामक महाकाव्य पनि पनि प्रकाशनमा आएको छ । यसले उहाँ भावक, समालोचक, अनुसन्धानता मात्र नभई भावुक काव्यस्रष्टा पनि हुनुभएको सत्यलाई स्थापित गर्नेछ । आशा गरौं- उहाँको सत्प्रयासबाट आगामी दिनमा हामी अझै लाभान्वित हुन सक्नेछौं ।

९. उपसंहार

संस्कृत वाङ्मयमा निबद्ध ज्ञानराशिलाई जनसमक्ष ल्याउन हरतरहले खटिरहनुभएका प्रा.डा. वेणीमाधव ढकालज्यूको स्तुत्य प्रयासको सफल परिणाम कार्तवीर्योदय-मकरन्द बनेर प्रस्तुत भएको छ । पाठ्यविषयको खाँचो पूर्तिहेतु तयार गरिएको भए पनि सर्वसामान्य साहित्यिक पाठक तथा जिज्ञासुका लागि समेत उपयोगी हुने गरी तयार पारिएको यस रचनाले उहाँलाई अरूले नगरेका कठिन कार्य गर्ने र अक्षुण्ण विषयलाई त्यसको समाजोपयोगितासमेत पहिचान गरी समाजका सामु प्रस्तुत गर्ने सिद्धहस्त वाङ्मयसाधकका रूपमा स्थापित गरेको सत्य निर्विवाद छ । कार्तवीर्योदय महाकाव्यभित्रका आठौं र नवौं सर्गको पाठ्यक्रमोचित विवेचन, टीका-टिप्पणीसहितको काव्यात्मक विशलेषण र अर्थस्फोरणबाट टीकालेखनपरिपाटीमा एउटा नयाँ आयाम थपिनुका साथै पछिल्ला दिनमा खोज, अनुसन्धान, टीकालेखन आदिमा संलग्न हुन चाहने दृढसङ्कल्प अध्येतालाई मार्गदर्शन हुनजाने कुरामा कुनै द्विविधा छैन । गुरुको यो स्तुत्य प्रयासप्रति नतमस्तक हुँदै आगामी दिनमा उहाँबाट अझै गहन चिन्तनप्रवाह संस्कृतवाङ्मयमा हुने आशाका साथ लेखनी बिसाउँछु । अस्तु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्तवीर्योदय-मकरन्दकारको विलक्षण व्यक्तित्वका विविध आयाम

- सहप्रा. मुकुन्द लामिछाने
ने.सं.वि., वाल्मीकि विद्यापीठ, काठमाडौं

उपक्रम

शैशवदेखि नै हजारौं विद्यार्थीमा सर्वोत्कृष्ट भई आफ्नो अध्यापन यात्रा आरम्भ गर्नुहुने प्रा.डा. वेणीमाधव ढकाल संस्कृत साहित्य, दर्शन, नेपाली साहित्यका लब्ध-प्रतिष्ठ विद्वान् हुनुहुन्छ । सर्वप्रथम भारतको ऋषिकेशमा नेपाली संस्कृत महाविद्यालयमा आवासीय छात्रका रूपमा रहेर शिक्षा प्राप्ति गर्नुहुने ढकाल साहित्यदर्शनाचार्य हुनुहुन्छ। उहाँले **लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्** जस्तो महत्त्वपूर्ण शीर्षकमा विद्यावारिधि गरेर साहित्यिक र ऐतिहासिक दुबै अनुसन्धानलाई एकै साथ अघि बढाउनुभएको छ । २५ वर्षकै अल्प वयमा ऋषिकेशस्थित **बाबा कालीकमली संस्कृत महाविद्यालय**मा साहित्य विषयका विभागाध्यक्ष बन्ने गौरव प्राप्त गर्नुभएका उहाँ विद्याप्रेमी, साहित्यप्रेमी र राष्ट्रप्रेमी विशिष्ट साधक हुनुहुन्छ । विशेषगरी आफ्नो विद्वत्ता, प्रतिभा र साधनाको प्रकाश आफ्नै राष्ट्रमा फलाउने अभिधेय र राष्ट्रप्रेमलाई भारतमा प्राप्त हुँदै आएका ठूला सम्भवनाहरूलाई त्यागेर उहाँ नेपाल प्रवेश गर्नुभएको थियो । उहाँको प्रतिभा र प्रज्ञा भारतमा अपरिचित थिएन । उहाँ भारतमा रहेर आत्मख्याति बढ्ने र आर्थिक लाभ प्राप्त गर्ने शैक्षिक पदका निर्विकल्प अधिकारी हुनुहुन्थ्यो । तर उहाँलाई राष्ट्रप्रेमले नेपालमै तान्यो । उहाँ आफ्नो विद्वत्ता, प्रतिभा र पसिना राष्ट्रका लागि पोख्न चाहनुहुन्थ्यो । त्यसैले २५ वर्षमा विभागाध्यक्ष बन्ने गौरव हासिल गरिसक्नुभएका उहाँले नेपालमै बस्नुमा गौरव देख्नुभयो । उहाँ २०३२ सालमा प्रवेश गर्नुभयो र २०३३ सालमा गृहमन्त्रालयमा आफ्नो रुचि र क्षमताअनुरूपकै अनुसन्धान अधिकृतका रूपमा कार्यरत रहनुभयो भने २०३४ मा त्रि.वि. (हालको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ने.सं.वि.) अन्तर्गतको वाल्मीकि विद्यापीठमा प्राध्यापन प्रारम्भ गर्नुभयो र हालसम्म नै कार्यरत हुनुहुन्छ ।

सरल, विनम्र र सहज प्रकृतिका ढकाल सारस्वत प्रतिभा हुनुहुन्छ । व्युत्पत्तिशाली प्रतिभाका रूपमा नेपाली तथा भारतीय संस्कृत–समाजमा आफ्नो विशिष्ट छाप छोड्नु हुने उहाँ विविध क्षमता र कलाका गुणाढ्य र धनाढ्य व्यक्ति मानिनु हुन्छ । उहाँको व्यक्तित्वरूपी वृक्षका अनेक शाखा–प्रशाखा दृष्टिगोचर छन् । खास गरी उहाँको समग्र प्राज्ञिक व्यक्तित्वलाई विभिन्न आयामहरूमा अवलोकन गर्न सकिन्छ ।

सरल स्वभाव

प्रा. वेणीमाधव ढकाल हृदय खुलेका हार्दिक व्यक्तित्व हुनुहुन्छ । उहाँमा म विद्यावारिधि गरेको ठूलो विद्वान् हुँ, लेखक हुँ, कवि हुँ, प्राध्यापक हुँ आदि–इत्यादि कुनै पनि अभिमान छैन । उहाँ जोसुकैलाई जहिले पनि र जहाँ पनि आफूले जानेका कुरा सिकाउनुहुन्छ भने आफूलाई शङ्का लागेका कुरा सानोदेखि ठूला सबैसँग सोध्न र खोज्न सक्नुहुन्छ । सामान्य निरक्षर मानिसदेखि ठूला विद्वान्सम्म पनि उहाँ उत्तिकै सरल र सहज बन्नुहुन्छ । यो उहाँको नैसर्गिक स्वभाव हो । हृदय खुलेको विद्वान्को यो सबैभन्दा ठूलो लक्षण हो र यस्तो लक्षणको उदाहरणीय नमुना उहाँ नै हुनुहुन्छ । उहाँ विना कुनै आग्रह र अभिमान आफ्ना कुरा अरूका अगाडि राख्नुहुन्छ र अरूका कुरा सजिलोसँग पचाउनुहुन्छ । अत्यन्त स्पष्ट हुनुपर्ने र खुल्नुपर्ने प्रवृत्ति उहाँको सर्वाधिक प्रभावशाली चरित्र हो । त्यसैले उहाँको जीवनमा समाजमा सामु नखुलेको खुल्न बाँकी वा सम्भावित कुनै पक्ष र पाटाहरू छैनन् । उहाँको स्वभाव र चरित्र खुल्ला किताब हो । यस्ता मानिसले समाजलाई प्रशस्त कुरा दिन सक्छन्, समाजबाट लिन पनि जान्दछन् । **'विद्या गताऽहङ्कृतिः प्रसिद्ध्यति'** भन्ने दार्शनिक भनाइ उहाँको जीवनमा सहजरूपमा घटेको देखिन्छ । सादा जीवन उच्च विचार उहाँको मौलिक चरित्र हो ।

सहज प्रतिभा

सहजता उहाँको सबैभन्दा प्रभावशाली व्यक्तित्व हो । जता बग्यो, त्यहीं छङछङाउनु उहाँको स्वभाव हो । उहाँको लेखाइमा जुन तुफानी गति छ बोलीमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पनि सो तीव्रता झल्किन्छ । उहाँको प्राध्यापनको प्राण हो– उहाँको बोलीको तीव्रता र त्यसमा अनुभव हुने स्पष्टता तथा प्रभावकारिता ।

प्रतिभा, व्युत्पत्ति र अभ्यासका त्रिवेणी

प्रा.डा. वेणीमाधव ढकाल शैशवदेखि नै मेधावी, जुझारु र तीव्र धारणाशक्ति भएका विशिष्ट प्रतिभा हुनुन्थ्यो । लेखाइ, समीक्षण र अभिव्यक्ति सबैतिर उहाँको गति तीव्र छ । उहाँका कलम, मुख र शरीर तीनै कुरा असाधारण किसिमले चल्न, खट्न र डट्न सक्छन् । **हरिकेलि महाकाव्य**को अनुसन्धानात्मक तथा समीक्षात्मक सम्पादन उहाँको विशिष्ट प्रतिभाको प्रदर्शनी हो । सारस्वत शक्ति र प्रतिभाविना एक डेढ वर्षमै विशालकाय ग्रन्थहरूको साधिकार अनुवाद सम्भव हुँदैन । उहाँको प्रतिभाको प्रकाश अनुवाद, ग्रन्थसम्पादन, प्राध्यापन, व्याख्यान, काव्य–लेखन, कार्यपत्र–प्रस्तुति, गोष्ठी–सञ्चालन र ग्रन्थि–भेदन सबैतिर व्यापकरूपमा प्रकट भएको छ । युवावस्थामै उहाँले सृजना गर्नुभएका **शैलेश खण्डकाव्य, ज्योतिष्मती** र **रश्मिप्रभास**जस्ता काव्यकृति उहाँको सहज प्रतिभाका प्रमाण हुन् ।

शास्त्र–शास्त्रान्तरको अध्ययन र अध्यवसाय तथा ग्रन्थलेखनले उहाँको व्युत्पत्तिलाई धेरैमाथि उचालेका छन् । साहित्याचार्य, दर्शनाचार्य र विद्यावारिधि उहाँ व्याकरण, कोश, धर्मशास्त्र, वेद–वेदाङ्गका समेत व्युत्पत्तिशील व्यक्तित्व हुनुहुन्छ। उहाँको व्युत्पत्ति र प्रतिभालाई उहाँको अहोरात्र चलिरहने अभ्यासले ठूलो सहयोग गरेको देख्न सकिन्छ । निरन्तर कुनै न कुनै प्राज्ञिक अभ्यास, अध्ययन र अध्यवसाय नगरी टिक्नै नसक्ने उहाँका दर्जनौं ग्रन्थ अविच्छिन्न अभ्यासका प्रमाण हुन् ।

लक्ष्यभेदी प्रज्ञा

प्रा.डा. वेणीमाधव ढकाल प्रत्युत्पन्नमति देश, काल, परिवेश र परिस्थितिको सटीक विश्लेषण गर्न जान्ने, पारदर्शी प्रज्ञाका धनी हुनुहुन्छ । उहाँ जुन काममा हात हाल्नुहुन्छ त्यसलाई अत्यन्त तीव्रताका साथ पूरा गर्ने सामर्थ्य राख्नुहुन्छ । विना तयारी नै पढाउन थाले पनि उहाँले विषयवस्तुको समीक्षण, व्याख्यान र अर्थस्फोरण गरेको सुन्दा विद्यार्थी मखख पर्दछन् भने गुरुहरूसमेत दङ्ग पर्ने गर्नुहुन्छ । विद्याकी देवी नै चढेझैं श्रोताहरू विस्मित हुने गर्दछन् । पहिले नखुलेका विषय पनि उहाँले पढाउँदा पढाउँदै छर्लङ्ग हुँदै जान्छन् । शास्त्रका ग्रन्थिहरू टुट्दै जान्छन् र विषयका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मर्म खुल्दै जान्छन् । त्यसका लागि उहाँले अतिरिक्त समयमा तालु तताइरहनु पर्दैन, पढाउन प्रारम्भ मात्र गरे पर्याप्त हुन्छ ।

त्यसैले आफूले चाहेका उपाधि आर्जन, ग्रन्थलेखन, सम्पादन, अनुसन्धान-निर्देशन, काव्य-लेखन उहाँले यथोचित समयमा वा सोचेको भन्दा छिटो पूरा गरेका प्रमाणहरू पनि पेस गर्नुभएको छ । कुनै पनि विषयमा छिटो योजना बनाउनु, बनाएको योजनामा सम्पूर्णरूपमा खट्नु र लक्षित समयमा पूरा गरेरै छाड्नु उहाँका असामान्य वैशिष्ट्य हुन् । त्यसैले प्राज्ञिक क्षेत्रमा उहाँ जे चाहनुन्छ सो पूरा गर्न सक्नुहुन्छ । उहाँले **नेपाल संस्कृत विश्वविद्यालय**का प्रायः सबै प्राज्ञिक कार्यमा अग्रस्थान हासिल गर्नुका पछाडि यही लक्ष्यभेदी व्यक्तित्व नै मूल प्रमाण बन्न पुगेको छ । प्राज्ञिक क्रियाकलापमा उहाँ त्यसैगरी कतै चुक्नुभएको देखिँदैन जसरी कुशल निशानाबाज आफ्नो निशानामा चुक्तैन । आँटेको र चाहेको काम नियोजित समयमा पूरा गर्नु उहाँको लक्ष्यभेदी प्रज्ञाको परिचय हो ।

अनुसन्धानपरायणता

प्रा.डा. वेणीमाधव ढकाल शैशवदेखि नै प्राज्ञिक र अनुसन्धानकर्ममा बढी प्रवृत्त हुनुभयो । नेपाल प्रवेशपछि २०३३ मा उहाँ गृहमन्त्रालयमा अनुसन्धान अधिकृतकै रूपमा कार्यरत रहनुभयो भने आफ्नो विद्यावारिधि उपाधि प्राप्तिको अघि र पछि पनि उहाँले अनुसन्धानका क्षेत्रमा जवर्जस्त कार्यहरू गर्नुभयो । उहाँले **'लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्'** शीर्षकमा विद्यावारिधि गर्नुभयो र यो अनुसन्धान दुबै दृष्टिले नेपाल संस्कृत विश्वविद्यालयका प्राज्ञहरूका लागि महत्त्वपूर्ण अनुसन्धान ठहरियो । यस अनुसन्धानमा एकातिर नेपालमा विद्यमान संस्कृत अभिलेखहरूको खोजी भयो र विशेष लिच्छविकालिक संस्कृत अभिलेखहरूको ऐतिहासिक अनुसन्धान भयो भने त्यस्ता अभिलेखमा विद्यमान काव्यशास्त्रीय तत्त्वविश्लेषणपरक कार्यले साहित्यिक अनुसन्धानको पाटोसमेत उजागर हुन सक्यो । त्यस्तै त्यसै पद्धतिमा **'मल्लकालिकानां नाटकानां विश्लेषणात्मकमध्ययनम्'** शीर्षकमा गरिएको अनुसन्धान पनि प्राज्ञिक प्राप्ति र ऐतिहासिक नाट्यसामग्री विश्लेषणका दृष्टिले विशेष महत्त्वको स्थापित हुनसक्यो । यसैगरी **हरिकेलि महाकाव्य, चन्द्रसम्भव महाकाव्य, कार्तवीर्योदय महाकाव्य**हरूका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाण्डुलिपि–सम्पादन, शुद्ध पाठ–निर्धारण र टीका–लेखनजस्ता कार्यमा समेत उहाँका अनुसन्धानात्मक प्रज्ञाको विशिष्ट प्रकाश विस्तार भएको छ । उहाँका दर्जनौं अनुसन्धानात्मक लेख र कार्यपत्रहरूले समेत उहाँको अनुसन्धान–व्यसनितालाई व्यक्त गर्छन् । उहाँको अनुसन्धान–प्रवीणता र पाण्डित्यको सम्मानस्वरूप ने.सं.वि.ले उहाँलाई २०६०–२०६३ सम्मका लागि ने.सं.वि. अनुसन्धान केन्द्रका निर्देशकसमेत बनायो भने उहाँ ने.सं.वि.ले दिलाएका दिलाउँदै गरेका संस्कृतविषयक अधिकांश विद्यावारिधिहरूका शोध–निर्देशक तथा विशेषज्ञ बनी अनुसन्धानात्मक कार्यका पर्यायझैं बन्नुभएको छ ।

सम्पादनशीलता

नेपाल संस्कृत विश्वविद्यालयका सन्दर्भमा ग्रन्थ, पत्रपत्रिका र लेख–रचना सम्पादन क्षेत्रमा पनि सबैभन्दा बढी कलम चलाउने र चलाइसकेका व्यक्तित्व प्रा.डा. वेणीमाधव ढकाल नै हो । हरिकेलि महाकाव्यको सम्पादनमा उहाँले गर्नुभएको श्रम र अनुसन्धान विद्यावारिधिभन्दा विशिष्ट उपाधिको अधिकारी छ भन्दा अतिशयोक्ति हुने देखिँदैन । त्यसैगरी प्रज्ञाप्रतिष्ठान, काठमाडौंबाट प्रकाशित **यज्ञदत्त सूरिको चन्द्रसम्भव महाकाव्य**–सम्पादनमा समेत उहाँको विशिष्ट श्रम खर्च भएको छ । यसैगरी २०५९ सालमा वाल्मीकि विद्यापीठमा प्रा.डा. ढकालकै विभागाध्यक्षता र संयोजकत्वमा सम्पन्न **सप्तदिवसीय कार्तवीर्योदय महाकाव्यको ग्रन्थिभेदन–विषयक गोष्ठी** र शास्त्री तृतीयवर्षका लागि पाठ्य विषयका रूपमा निर्धारित यसै महाकाव्यका आठौं तथा नवौं सर्गको आधिकारिक सम्पादनसमेत उहाँको सम्पादनशीलतालाई प्रकट गर्ने साक्ष्य हुन् । त्यसैगरी **नयाँ पुकार, आलोक** र **ऋतम्भरा**जस्ता पत्रिकाहरूको सम्पादनमा उहाँले निर्वाह गर्नुभएका भूमिकाले उहाँलाई ने.सं.वि.को अनुसन्धानात्मक पत्रिका–प्रकाशनको पर्याय नै बनायो । खासगरी २०५३–२०६५ सालसम्म अर्थात् १२–१३ वर्षसम्म उहाँले गर्नुभएको त्रैमासिक अन्तर्राष्ट्रिय अनुसन्धानात्मक पत्रिका ऋतम्भराको सम्पादनले उहाँलाई धेरैमाथि उठायो भने उहाँले पनि ऋतम्भरालाई धेरै माथि उठाउनुभयो । यसैगरी संस्कृत विश्वविद्यालयको ग्रन्थसम्पादक समूहको संयोजकका रूपमा रहेर उहाँले दर्जनौं विशिष्ट ग्रन्थहरूको सम्पादनमा प्रमुख भूमिका निर्वाह गरी विश्वविद्यालयको प्राज्ञिक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्थानमा अपूर्व योगदान गर्नुभयो ।

लक्ष्मीराम भण्डारी स्मृति प्रतिष्ठानद्वारा प्रकाशित **लक्ष्मी-रामायण चित्रावली**को आफ्ना विद्वान् मित्रहरूका साथ रही प्रमुख व्याख्याताका रूपमा उहाँले नेपाली चित्रकारको तूलिकाबाट आविर्भूत तस्वीरहरूमा प्रतिबिम्बित श्रीरामलीलाका प्रमुख घटना र दृश्यावलीको **अध्यात्मरामायण, भानुभक्तीय रामायण, तुलसीकृत रामायण** एवं **आनन्दरामायण** आदि स्रोत-सामग्रीबाट मिल्दा-जुल्दा पद्यहरूको उतार गरी तिनको चिन्तनपूर्ण र भावगम्भीर शैलीमा **भावगङ्गा**नामबाट निष्कर्ष निरूपण गर्नुभयो । नेपाली चित्रकलाको इतिहासमा लक्ष्मी-रामायण चित्रावली विशिष्ट प्राप्तिका रूपमा रहेको छ भने उक्त चित्रावलीको यो प्रमाणसम्मत, अनुसन्धानपूर्ण र चिन्तनविशिष्ट व्याख्यान अपूर्व एवं अनुपम पनि छ । पारसमणिको स्पर्श पाउँदा फलाम सुवर्णमा परिणत भएझैं प्रा.डा. ढकालल‌गायतका विशिष्ट विद्वान्‌हरूको प्रतिभास्पर्श पाएर लक्ष्मी-रामायण चित्रावलीका चित्रहरू जीवन्त बनेको अनुभव गर्न सकिन्छ ।

सृजनशीलता

प्रा.डा. वेणीमाधव ढकाल मूलतः सृजनात्मक लेखनमा अजस्र गतिमान् बन्न सक्ने सहज प्रतिभा हुनुहुन्छ । सानो सङ्केत र सूत्र भेट्नेबित्तिकै त्यसलाई विस्तार गरेर ग्रन्थकै आकार दिने क्षमता उहाँमा विद्यमान छ । युवावस्थामै उहाँले रचेका **शैलेश** खण्डकाव्य, **ज्योतिष्मती** खण्डकाव्य र **रश्भिप्रभास** महाकाव्य उहाँको सृजनधर्मिताका ज्वलन्त प्रमाण हुन् । संस्कृत, नेपाली र हिन्दीमा समेत सहज रूपमा कलम चलाउन सक्ने उहाँ सृजनात्मक लेखनमा खुल्ने, रमाउने र छङछङाउने प्रतिभा हुनुहुन्छ । प्रकाशित **अर्जुन** (शोककाव्य), **दिव्यलक्ष्मी स्मृतिकाव्य**, हिन्दीमा प्रकाशित **स्वर्गद्वारी के महाप्रभु** तथा अप्रकाशित **पृथूदय महाकाव्य** (संस्कृत) र **जानकी**जस्ता रचनाहरूले ढकालका सृजनशीलताका, सजहता, तीव्रता, शीघ्रता र परिपक्वतालाई समेत अभिव्यञ्जित गर्दछन् । मौलिकता, गतिशीलता, सरलता, सहजता र सरसताले गुणाढ्य बन्न पुगेका उहाँका रचनाले नेपाली तथा संस्कृत र हिन्दी साहित्यलाई समुचित योगदान पुऱ्याउन सकेको र सक्ने कुरामा विश्वस्त हुन सकिन्छ । संस्कृत र नेपाली दुबैमा सलल बगेको सरस,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरल, हार्दिक र कोमलकान्त पदावलीयुक्त उहाँको भाषाले पाठकलाई मुग्ध बनाउँदछ। यसरी उहाँ सृजनशीलता र कल्पनाशीलताका महाजन बन्न सफल हुनुहुन्छ ।

अनुवादकुशलता

प्रतिभा, व्युत्पत्ति र अभ्यासका कारण कतै पनि रोकिनै नपर्ने योग्यता हासिल गर्नुभएका प्रा.डा. ढकाल अनुवादप्रवीण धरोहर व्यक्तित्व हुनुहुन्छ । पढाउँदा, लेखाउँदा र स्वयं लेख्दासमेत संस्कृत श्लोकका मूलभूत अर्थ र आशयलाई सहजै झम्टन र मूल ग्रन्थमा भन्दा बढी प्रष्टसँग भाषान्तरण गर्न सक्ने अद्वितीय क्षमताले उहाँलाई धुरन्धर अनुवादक प्रमाणित गरेको छ । आफ्नो प्राध्यापकीय जीवनमा **रसगङ्गाधर, ध्वन्यालोक** र **काव्यप्रकाश**जस्ता जटिलतर ग्रन्थका ग्रन्थिभेदनबाट ग्रन्थग्रन्थिभेदक व्यक्तित्व बनाउनु भएका प्रा.डा. ढकालबाट अनुवाद भई प्रकाशनमा आएका **गणेशपुराण** र **निर्णयसिन्धु** यतिखेर नेपाली पाठकका लागि आश्चर्यका विषय बनेका छन् । अप्रतिहत गतिमा अनूदित भाषा लेख्न र भन्न सक्ने, कम्प्युटरमा टङ्कण भएका विषयवस्तुलाई शीघ्रतम दृष्टि पुऱ्याउने र तत्काल त्रुटि-संशोधन गर्न सक्ने असाधारण क्षमताकै कारण उहाँले एक-डेढ/एक-डेढ वर्षका अन्तरालमा यस्ता विशालकाय ग्रन्थहरूलाई अनुवाद गर्न सक्नुभएको देखिन्छ । **काव्यदीपिका**को नेपाली अनुवादबाट अभ्यस्त बन्दै गएको उहाँको लेखनी यतिखेर कुनै पनि ग्रन्थानुवादका लागि बिजुलीझैं कुद्न सक्ने भएको छ ।

गोष्ठी-सञ्चालन, कार्यपत्र-लेखन र प्रस्तुति-कुशलता

प्रभावोत्पादक संयोजनकारी र सरल व्यक्तित्वका कारण प्रा.डा. वेणीमाधव ढकाल अत्यन्त सामाजिक सामूहिक व्यक्तित्व हुनुहुन्छ । २०४५ मा प्रज्ञाप्रतिष्ठानमा आयोजित **विश्व हिन्दूसम्मेलन**अन्तर्गतको संस्कृत सम्मेलन र २०५१ मा काठमाडौंमा आयोजित **अन्ताराष्ट्रिय संस्कृत सम्मेलन**का अनेक चरणका विशिष्ट कार्यक्रमहरूमा प्रा.डा. ढकालले संस्कृत, हिन्दी तथा नेपाली तीनै भाषामा धाराप्रवाह बोल्दै विश्वभर छरिएर रहेका संस्कृत विद्वान्हरूलाई प्रभावित बनाउनुभयो भने भारतीय विद्वान्हरू उहाँको धाराप्रवाह संस्कृत सम्भाषणबाट अत्यन्त प्रभावित रहे । त्यतिखेर नेपाली समाजले पनि उहाँलाई संस्कृतका विशिष्ट विद्वान्को रूपमा राम्रोसँग चिनेको थियो। त्यसैगरी पटक पटक नेपाल र भारतमा भएका विद्वत्सम्मेलन र गोष्ठीहरूमा उहाँले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नै नेपालले प्रस्तुत गर्न योग्य प्रतिभाका रूपमा विचारपत्र, सम्भाषण तथा प्रवचनकलाद्वारा विद्वत्सभाहरूलाई मन्त्रमुग्ध तुल्याउँदै नेपालको गौरव बढाउनुभयो।

ने.सं.वि.अन्तर्गतका विभिन्न विद्यापीठहरूमा र खासगरी **वाल्मीकि विद्यापीठ**मा आयोजना गरिएका प्रायः सबै गोष्ठीहरूमा उहाँकै विशिष्ट भूमिका रह्यो र उहाँले गोष्ठी–संयोजक, सञ्चालक, विशेषज्ञ, कार्यपत्र–लेखक, समीक्षक र सहभागीका रूपमा समेत आफ्नो विशिष्ट भूमिका निर्वाह गर्नुभयो । तिनमा पनि वाल्मीकि विद्यापीठमा २०५९ सालमा आयोजित ग्रन्थिभेदनसम्बन्धी सप्तदिवसीय कार्यशाला गोष्ठी अद्वितीय, अभूतपूर्व र अविस्मरणीय मानिएको छ । यो गोष्ठी उहाँको एकल दृष्टिकोण, साहस, क्रियाशीलता र परिश्रमको परिणाम थियो । यस पङ्क्तिकारले त्यस गोष्ठीमा प्रस्तुत भएका सत्रैवटा कार्यपत्रको भाषिक परिष्कार, टङ्कण, विषयशीर्षक, व्यवस्थापन तथा त्रुटिनिराकरण एक्लै गर्न भ्याएको देखेको थियो । त्यसैगरी आफ्नो मृदुस्वभाव, सरलता, तत्काल सच्याउन र सच्चिन सक्ने क्षमता, विनोदशीलता र प्रत्युत्पन्न मतिद्वारा गोष्ठीका सातै दिनलाई सरस, रोमाञ्चक, उल्लासमय र प्रभावकारी बनाई सहभागीहरूलाई सन्तुष्ट तुल्याउनुभएको थियो । उहाँको स्पष्ट, प्रभावकारी र सरल प्रकृतिको भाषाप्रयोगले हरेक गोष्ठी र कार्यक्रमहरूमा छुट्टै रौनक थप्ने र कार्यक्रमलाई प्राण भर्ने कुरा अनुभवसिद्ध विषय नै हो ।

त्रिविवि संस्कृतविभाग, छात्रकार्य समिति संस्कृत छात्रावास, नेपाल प्रज्ञाप्रतिष्ठान र जयतु संस्कृतम् संस्थाद्वारा आयोजित गोष्ठीहरूमा क्रमशः संस्कृतशिक्षाको लोकप्रियताका उपाय, ज्ञान–विज्ञानकोशको रूपमा संस्कृतवाङ्मय, नेपालमा संस्कृत-वाङ्मयको प्रवर्द्धनमा ब्राह्मणेतरहरूको योगदान, नेपालमा संस्कृत नाट्यकारिताको उद्भव र विकासजस्ता शीर्षकमा चिन्तनगुरु विचारपत्र प्रस्तुत गरेर बौद्धिक जगत्मा तहलका नै मचाउनुभयो ।

त्यसैगरी भारतका **तिरुपति**, **दिल्ली**, **राजस्थान** र **बनारस**जस्ता स्थानमा विभिन्न विषयमा उहाँले प्रस्तुत गर्नुभएका गहन कार्यपत्रहरूले नेपाल राष्ट्रकै गौरववृद्धि गरेका टिप्पणीहरू त्यस्ता गोष्ठीका सहभागीहरूबाट सुन्नमा आउनुले समेत उहाँको कार्यपत्रलेखन र प्रस्तुतिकलाको अनुमान गर्न सजिलो पर्छ । यसैले ने.सं.वि.का पृष्ठभूमिमा राष्ट्रका अनुसन्धाता, विद्वान्, बुद्धिजीवी, प्राध्यापक र विद्यार्थीका नजरमा सबैभन्दा बढी देखिने व्यक्तित्व हुनुहुन्छ प्रा. ढकाल ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेरक र प्रेरित व्यक्तित्व

प्रा.डा. वेणीमाधव ढकाल हरेक बौद्धिक समाज र छात्रवर्गका लागि अत्यन्त प्रेरक व्यक्ति हुनुहुन्छ । त्यसैले विद्वान्, बुद्धिजीवी र विद्यार्थी खुलेर उहाँसमक्ष प्रस्तुत हुन्छन् । खासगरी लेखन र अनुसन्धानमा विद्यार्थीहरूलाई प्रेरणा गरिहाल्ने, सहयोग गरिहाल्ने र एकै रातमा व्यक्तिका कृति, काव्य र शोध सामग्री हेरिदिने, सच्याइदिने उहाँको सरल बानीले उहाँबाट विद्यार्थीहरू बढी प्रभावित हुन्छन् र उहाँसमक्ष खुलेर प्रस्तुत हुन्छन् । खासगरी विद्यावारिधिका शोधकार्यहरूमा हरेक शोधार्थीलाई प्रेरणा प्रदान गर्ने र मार्गदर्शन गर्नुहुने ढकालको लक्ष्यभेदी क्रियाशील जीवन आफैंमा एउटा प्रेरणापुञ्ज हो ।

प्रा.डा. ढकाल त्यसैगरी कसैका पनि राम्रा कुराले अति छिटो पग्लिने, पगालिने, द्रवित हुने र प्रेरित हुने व्यक्ति हुनुहुन्छ । उहाँ आफ्ना अग्रजहरूबाट तथा ज्ञानी, ध्यानी, साधु, सन्त, योगी, संन्यासी र महन्त, मण्डलेश्वरहरूबाट विशेष प्रभावित शक्तिका उपासक व्यक्तित्व हुनुहुन्छ । स्वर्गद्वारी–महाप्रभु, भारतका अनेकौं योगीश्वर, नेपालका खप्तड बाबा र अनेक सुयोग्य पीठाधीशहरूप्रति समेत विशेष आदरभाव प्रकट गर्नुहुने प्राध्यापक ढकाल कुनै पनि राम्रा र असल कुराबाट प्रेरित हुनुहुन्छ, अलिकति पनि गर्व नराखी ती कुरा व्यक्ति र वस्तुको मुक्तकण्ठले प्रशंसा गर्नुहुन्छ । राम्रा कुरा जसबाट पनि लिने तत्परता देखाउने उहाँको चरित्रमा **'नीचादप्युत्तमां विद्याम्'** भन्ने नीति क्रियान्वित भएको देख्न सकिन्छ ।

विद्याव्यसन र अमरताप्राप्तिको चेष्टा

प्रा.डा. वेणीमाधव ढकाल अन्य कुनै प्रपञ्चमा नलागी अनवरत विद्याव्यसनमा खटिइरहने उदाहरणीय व्यक्तित्व हुनुहुन्छ । त्रि.वि., ने.सं.वि.लगायत कुनै पनि विश्वविद्यालयका जनशक्ति आफ्नो विश्व–विद्यालयभित्रका दायित्व भुलेर अन्य विभिन्न व्यवसाय र आर्थिक लाभमा भुलिरहेको परिप्रेक्ष्यमा प्रा.डा. ढकालको विद्यासाधना कर्मयोगको आदर्श उदाहरणका रूपमा अघि बढेको छ । सम्पूर्ण लेखन, सृजन, अध्यापन र अनुसन्धानलाई उहाँले पेसाभन्दा बढी आफ्नो कर्तव्य र आत्मसन्तोषको विषय बनाउनुभएको छ । एउटा सुयोग्य सन्तान र कल्याणकारी अभिभावक बनेर उहाँले गहन र गहनतर ग्रन्थका टीका, समीक्षाहरूमा आफ्ना पिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणि, माता दिव्यलक्ष्मी, पत्नी मीठालगायतलाई समेत अमर बनाउनुभएको छ र आफू आफ्ना गहन कृतिद्वारा नै यशस्वी अमर साधक र स्रष्टा बन्नुभएकै छ ।

पर्यन्त कथन

कार्तवीर्योदय–मकरन्दका स्रष्टा प्रा.डा. वेणीमाधव ढकालका विषयमा जति कुरा उल्लेख गरे पनि धेरै–विषय छुटेका हुन्छन् । यो मकरन्द उहाँको सम्पूर्ण व्यक्तित्वको दर्पण होइन । न त यो उहाँको शास्त्रीय प्रज्ञाको समग्र प्रकाश र प्रवाह नै हो । यो उहाँको लक्ष्यभेदी द्रुतलेखनको मधुपर्कमात्र हो, जो विद्यार्थी–प्राध्यापकको हातमा पर्दैछ । यो उहाँको समग्र लेखनको एउटा सानो प्रवाह वा लहर हो । यो सानो लहरले उहाँका तुफानी लेखन र विद्वत्ताका अनेक पक्षहरूलाई व्यक्त गर्न नसक्ने हुँदा उहाँको वास्तविक विद्वत्ता र व्यक्तित्वका सन्दर्भमा माथि केही बुँदाहरू उल्लेखमा आएका हुन् । उहाँका विषयमा यस लेखमा जति कुरा उल्लेखमा आएका छन् तीभन्दा बढी छुटेका छन् र त्यसमा म सङ्कोच–बोध गर्दछु । चट्टान फोरेर रसायन निकाली शिक्षक र विद्यार्थीलाई मकरन्द वितरण गर्ने सफलता प्राप्त गर्नुभएकोमा म आदरणीय गुरु प्रा.डा. वेणीमाधव ढकालज्यूप्रति हार्दिक बधाई अर्पण गर्दछु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीय

'**कार्तवीर्यार्जुन** विष्णुका अंशावतार हुन् । उनी सिद्ध महापुरुषका रूपमा प्रसिद्ध छन् । हजार हात भएका कारण उनी सहस्रार्जुन नामबाट समेत सुपरिचित छन् । **तारा** दशमहाविद्यामध्येकी एक हुन् र उनलाई नीलसरस्वती पनि भनिने कुरा तान्त्रिकसाहित्यको अध्ययनबाट अवगत हुन्छ । नेपाल तन्त्रसाधकहरूलाई सिद्धि प्रदान गर्ने स्वयंसिद्ध भूमि हो । शालग्राम र कृष्णागण्डकी एवं सेतीगण्डकीको उद्‌गमस्थल र प्रवाहस्थल धवलागिरिक्षेत्र एवं अन्नपूर्णाक्षेत्र दिव्य सिद्धिका स्रोत बनेर सुहाएका छन् । उक्त क्षेत्रअन्तर्गत बाग्लुङ जनपदले राष्ट्र र विश्वको समेत गौरव बढाउने सिद्ध विद्वान्, विदुषी र महाकवि पैदा गरेको छ । तिनमा **महाकवि सुकृतिदत्त पन्त** अग्रणी छन् ।

सुकृतिदत्त पन्तले भगवती तारा यद्वा नीलसरस्वती र भगवान् कार्तवीर्य (सहस्रार्जुन)को उपासना गरी सिद्धि प्राप्त गरेका थिए । त्यही सिद्धिको पुण्यफलका रूपमा उनीद्वारा रचिएको **कार्तवीर्योदय महाकाव्य** भारतीय उपमहाद्वीपमा कालिदास, भास आदि महाकविहरूको समयदेखि अहिलेसम्म लेखिएका उच्चकोटिका चार-पाँच महाकाव्यहरूमध्ये एक हो । यसको कथावस्तु, काव्यकला र शास्त्रीय पाण्डित्य केलाउँदा यो महाकवि श्रीहर्षद्वारा रचित **नैषधचरित महाकाव्य**को प्रतिस्पर्धामा रचिएको प्रतीत हुन्छ । एउटा नेपालपुत्रले भारतीय उपमहाद्वीपमा हजारौं वर्ष अघि र पछि रचिएका उच्चस्तरीय महाकाव्यहरूकै हाराहारीको संस्कृत महाकाव्यको रचना गरेकोमा नेपाल आमा धन्य भएकी छिन् र हामी नेपाली गौरवान्वित भएका छौं ।' यो भनाइ **डा. स्वामी प्रपन्नाचार्यज्यू**को हो ।

हामी नयाँ बानेश्वर बस्दा स्वामीजी हाम्रो निवासमा आइरहनुहुन्थ्यो । एक दिन उहाँले आफ्ना सतीर्थ्य मेरा बुबासँग कुराकानी गर्ने क्रममा कार्तवीर्योदय महाकाव्यको विषयमा उक्त विचार प्रकट गर्नुभएको थियो । तिनताका स्वामीजी उक्त महाकाव्यको सम्पादन गर्दै हुनुहुन्थ्यो । बुबा र उहाँबीच भएको कुराकानी मलाई भर्खर भएझैं लाग्दछ । त्यस बेलादेखि नै मेरो किशोर-मानसपटलमा महाकवि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुकृति श्रद्धापूर्वक स्थापित भए ।

पारिवारिक प्रभावबाट मैले बाल्यकालमा कौमुदी, कोश, हितोपदेश, तर्कसंग्रह र रघुवंशमहाकाव्यका एक–दुई सर्ग अध्ययन गरेको थिएँ । पछि विज्ञानअन्तर्गत प्राणिशास्त्र (जीवविज्ञान) अध्ययन गर्न पुगें । मेरो मूल अध्ययनक्षेत्र र जीविकाको विषय विज्ञान भए पनि त्यही पूर्वसंस्कारका कारण संस्कृतवाणी सुन्नेबित्तिकै मेरो हृदयमा अलौकिक झङ्कार पैदा हुन्छ । बाह्रै महिना र चौबीसै घण्टा अध्ययन, अनुसन्धान र कृतिरचनामा रमाउनुहुने विशिष्ट विद्वान् एवं साहित्यकार मेरो बुबाको साधनाका कारण हाम्रो घरमा अहिले पनि संस्कृतभारती र जनभारतीको वीणा घन्किरहेकै छ, जुन हामी सन्तानका लागि सौभाग्य र गौरवको विषय हो भन्ने मलाई लाग्दछ ।

विद्यार्थीहरूको पाण्डित्य र साहित्यिक बुझाइ प्रतिष्ठापित गर्न **नेपाल संस्कृत विश्वविद्यालय**को पाठ्यक्रममा स्थापित **कार्तवीर्योदय महाकाव्य**को निर्धारित अंश विद्यार्थीलाई मात्र नभएर गुरुहरूलाई समेत फलामको चिउरासरह भएको हुँदा बुबाले उक्त दुबै सर्गको मेरा पूज्य हजुरबुबाका नाममा **चूडामणिनामक** टीका र मेरी पूज्या हजुरआमाको नाममा **दिव्यलक्ष्मीनामक** नेपाली टीका तथा हाम्रो परिवारको सुरक्षा र समृद्धिका लागि छाता बनेर रहनुभएकी पूज्या शक्तिमाताका नाममा **त्रिशक्तिनामक** टिप्पणी रचना गरी तीनवटै टीकालाई समष्टिरूपमा **मकरन्द** नामकरण गरेर **कार्तवीर्योदय–मकरन्द**नामक टीकाग्रन्थ तयार पार्नुभएको हो ।

यो टीकाग्रन्थ महाकवि सुकृतिदत्त पन्तको अभूतपूर्व प्रतिभा, असाधारण वैदुष्य र विलक्षण साधनाबाट जन्मिएको कार्तवीर्योदय महाकाव्यको गाम्भीर्य र विशिष्टता बोध गराउने सन्दर्भमा **नेपाल संस्कृत विश्वविद्यालय**का शास्त्री तहका विद्यार्थी, साहित्यका प्राध्यापक तथा जिज्ञासु, साहित्यानुरागी जो–कसैका लागि अत्यन्त उपयोगी हुनेछ भन्ने मलाई पूर्ण विश्वास छ । यति गहन र महत्त्वपूर्ण ग्रन्थ प्रकाशन गर्ने अवसर प्राप्त भएकोमा म गौरवान्वित छु । यसले प्राज्ञिक जगत्मा बढीभन्दा बढी लाभ पुऱ्याउन सकोस् भन्ने कामनासमेत गर्दछु ।

कोजाग्रतपूर्णिमा — **नवेन्दु ढकाल,**

२०६९/७/१३ — **तिलोत्तमा क्याम्पस, बुटवल**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

महाकविसुकृतिदत्तपन्तप्रणीतश्रीकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गद्वयाधृतः

श्रीकार्तवीर्योदयमकरन्दः

{ चूडामणिनाम्न्या संस्कृतटीकया, दिव्यलक्ष्मीरित्यभिधानया नेपालीटीकया, त्रिशक्तिसंज्ञया टिप्पण्या च समलङ्कृतष्टीकाग्रन्थः }

अष्टमसर्गः

मकरन्दकारः

प्रा.डा. वेणीमाधवढकालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकाव्यकथासारः

आसीच्छ्रीकृतवीर्यभूपतिवरो माहिष्मतीपत्तने
लेभे सोऽर्जुनसञ्ज्ञकञ्च तनयं दत्तोपदेशाद्धरिम् ।
तं वव्रेऽथ विदर्भभूपतिसुता तौ दम्पती सप्तसु
द्वीपेष्वब्धिषु स्वेच्छया व्यहरतां वृत्तान्तमेतच्छिवम् ।।
(कार्त० १७/३७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

कार्तवीर्योदयमहाकाव्यम्

अष्टमसर्गः

आविर्भवतु तारिण्याः करुणापाङ्गसन्ततिः ।
या चरीकर्ति वैधेयान्मादृशानपि सत्कवीन् ।।१।।

अन्वयः - या, मादृशान्, वैधेयान्, अपि, सत्कवीन्, चरीकर्ति, (सा) तारिण्याः करुणापाङ्गसन्ततिः, आविर्भवतु ।

चूडामणिः - **या** = विलक्षणशक्तिसम्पन्ना, **मादृशान्** = मत्तुल्यान्, **वैधेयान्**- **विधेयस्य** = विधानस्य अधिकारिण इति वैधेयाः, तान्, मूर्खान् अपि (अज्ञे मूढयथा- जातमूर्खवैधेयबालिशाः- इत्यमरः), **सत्कवीन्** = सत्कविताप्रणयनसमर्थान्, **चरीकर्ति**= पुनः पुनः करोति, (सा), **तारिण्याः** = भगवत्यास्तारायाः, **करुणापाङ्गसन्ततिः**- **करुणौ** = दयामयौ, चेमौ, **अपाङ्गौ** = कटाक्षौ, तयोः **सन्ततिः** = पङ्क्तिः (सन्ततिः स्यात् पङ्क्तौ गोत्रे, पारम्पर्ये पुत्रपौत्राणाम्- इति मेदिनी), **आविर्भवतु**= प्रकाशिता भवतु, इत्यर्थः। आशीर्वादात्मकं मङ्गलाचरणम् । अत्र कविर्भगवत्यास्तारायाः संस्मरणेन तस्याः करुणाकटाक्षमुच्चस्तरीयकाव्यप्रणयनसामर्थ्यप्राप्तये आकाङ्क्षते । अत्रानुष्टुब्वृत्तम् ।।१।।

त्रिशक्तिः - तन्त्रशास्त्रस्य षडाम्नायेषु दशमहाविद्यासु द्वितीयाया महाविद्यायास्ताराया अथवा तारिण्या नामध्यानमन्त्ररूपोपासनाप्रभृतयो विषयाः सन्ति निर्दिष्टाः। पूर्वाम्नाये- स्पर्शतारा, नीलतारा, महातारा, त्रैलोक्यतारेति ताराभेदा वर्णिताः । दक्षिणाम्नाये- एकजटा-त्रिजटा-चिन्तामणितारा-क्रूरमारिका-क्रूरचण्डा-महाचण्डा-चतुर्वेदोदरीति ताराभेदा निरूपिताः। एतासां ताराणां योगेन माहेश्वर्यास्तारायाः स्वरूपं निर्मीयते । अस्मिन्नेवाम्नाये नारसिंही-वज्रतारा-ब्रह्माराधितातारा-मणिताराप्रभृतयोऽन्येऽपि भेदा निरुक्ताः। **पूर्वाम्नाये**- हंसतारा-मणिधरवज्रिणी-असुरेखा-महोग्रतारा-वज्ररेखा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वविघ्नोत्सारिणीप्रभृतयो भेदाः सन्ति । **उत्तराम्नाये-** उग्रा–महोग्रा–तारा–वज्रा–नीलसरस्वती–कामेश्वरी–भद्रकालीप्रभृतयस्ताराभेदाः प्रतिपादिताः। **ऊर्ध्वाम्नाये-** उग्रतारा–शाम्भवतारा–वाग्वादिनी–महानीलशारदा–नीलसुन्दरी–चीनसुन्दरी–महानीलसुन्दरीत्यादयो भेदा उक्ताः। **अधराम्नाये-** उग्रतारा–तारा–महोग्रतारा–एकजटा–नीलसरस्वतीप्रभृतयस्तारामहाविद्याया भेदाश्चर्चिताः सन्ति । **मन्त्रमहोदधौ** उक्तम्-

नैव तारासमा काचिद् देवता सर्वसिद्धिदा।
कलौ युगे ततो गोप्या वाञ्छिता सिद्धिमीप्सुना।। - ४।१२४

ताराया महिमानमेनं विदित्वा महाविद्यायामस्यां दीक्षितेन महाकविना सुकृतिना उत्तराम्नायनिरूपिताया नीलताराया उपासना कृता। नीलताराया ध्यानं मन्त्रमहोदधावित्थं समुदीरितम् -

शवासनां सर्पविभूषणाढ्यां कर्त्रीं कपालं चषकं त्रिशूलम् ।
करैर्दधानां नरमुण्डमालां त्र्यक्षां भजे नीलसरस्वतीं ताम् ।।

सुकृतिरपि निजनिर्मितायां तारिणीवरिवस्यायामुक्तवान् -

स्मितविलसितवक्त्रं कर्त्रिकाखण्डनीला-
म्बुजमनुजकपालालङ्कृताग्रप्रवेशष्टम् ।
सुविपुलहरिचर्म्माच्छादितं सत्रिनेत्रं
जननि! तव वपुः स्यान्मन्मनःस्वास्थ्यकारि ।।

इति दिशा सुकृतिर्नीलताराया उपासको नूनमिति ज्ञायते । अनेन नीलसरस्वत्या उपासनयैव कार्तवीर्योदयमहाकाव्यं प्रणीतम् । महाकाव्यस्यानेकेषु सर्गेषु मङ्गलाचरणपद्येषु मध्ये मध्ये प्रसङ्गानुसारेण चोपस्थापितेषु पद्येषु च महाकविना ताराया उल्लेखो व्यधायि । यथा – **कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम्** (कार्त० १।१)। **ताराभिधानममलं हृदये ममास्तु त्रैलोक्यतापसहने प्रथितं महस्तत्** (कार्त० १।२)। **आविर्भवतु तारिण्याः करुणापाङ्गसन्ततिः** (कार्त० ८।१)। **विघ्नव्यूहं गञ्जयतां तारिणीपदपङ्कजम्** (कार्त० ९।१)। **श्रीतारिणीपदयुगं दययावतीर्णम्** (कार्त० १०।१)। **पुरोभवतु तारिणी निगमशीर्षसञ्चारिणी** (कार्त० १२।१)। **प्रत्यूहपटलच्छेदि महस्ताराभिधं नुमः** (कार्त० १३।१)। **तारिणीपदपयोजमुज्ज्वलम्** (कार्त० १४।१)। **श्रीताराचरणाम्भोजपरागकणिका मम** (कार्त० १५।१)। **समस्तजनतारिणीपदयुगं**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दरीदृश्यताम् (कार्त० १६।१)। तारे ! शुद्धसुवर्णनिर्मितमिदम् (कार्त० १७।३३)। **श्रीकार्तवीर्यचरितोदितकाव्यमेतत् श्रीतारिणीकरुणया परिपूर्णमासीत्** (कार्त०१७।३५)। **पतन्तु करुणादृशो भुवनतारिकाया द्रुतम्** (कार्त०१७।३६)। इत्थं महाकवेः तारो-पासनाजन्यं महाकाव्यरूपमेतत् पुण्यफलमिति स्पष्टम् । विशेषेण तारास्वरूपपरिज्ञानाय जिज्ञासुभिस्तन्त्रग्रन्था विलोकनीयाः ।

दिव्यलक्ष्मी - मजस्ता मूर्खलाई पनि आफ्ना कृपाकटाक्षको लहरले सत्कविको कोटिमा पुऱ्याउने भगवती ताराका कृपाकटाक्ष ममाथि परून् ।।१।।

त्रिशक्ति – कवि सुकृतिदत्त ताराभगवतीका परम उपासक थिए भन्ने कुरा कार्तवीर्योदय महाकाव्यका मङ्गलाचरण पद्य र ताराको महिमबोधक अन्य पद्यहरूबाट अवगत हुन्छ। तारिणीले विघ्नशमन गरून्, तारिणीको ममाथि कृपादृष्टि परोस्, तारिणीका चरणकमलको धूलोले मेरो विघ्न हटाओस्, हे तारिणी ! यो काव्य हजुरको पाउमा अर्पण गर्दछु, तारिणीको कृपाबाट यो महाकाव्य पूर्ण भयो भन्नेजस्ता अनेकौं वाक्यबाट सुकृतिदत्तले भगवती ताराको दीक्षा प्राप्त गरेको बुझिन्छ । उनले गुल्मरोगको पीडाले छट्पटाएर अन्तिम समयमा **तारिणीवरिवस्या**नामक स्तुतिकाव्य रचना गरेको सन्दर्भले झन् उक्त तथ्यलाई प्रमाणित गर्दछ। ताराविद्याको एउटा भेदको रूपमा नीलसरस्वती रहेकी छिन्। मेरुतन्त्रमा निरूपित नीलसरस्वतीको स्वरूप र तारिणीवरिवस्यामा निरूपित नीलसरस्वतीको स्वरूपगत समानताले सुकृतिदत्त नीलसरस्वतीका दीक्षित उपासक रहेको तथ्य पुष्ट हुन्छ ।

कृतवीर्यदत्तात्रेयसंवादः -

राज्याभिषेकपदसम्भृतिमारचय्य
पुत्रं विधित्सुरवनीतलसार्वभौमम् ।
राजा जगाद जगदाहितकीर्तिमूर्ति-
र्दत्तं गुरुं गुरुमिवामरलोकराजः ।।२।।

– उपमालङ्कारः

अन्वयः – राज्याभिषेकपदसम्भृतिम्, आरचय्य, पुत्रम्, अवनीतलसार्वभौमम्, विधित्सुः, जगदाहित–कीर्तिमूर्तिः, राजा, अमरलोकराजः, गुरुम्, इव, दत्तम्, गुरुम्, जगाद ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - राज्याभिषेकपदसम्भृतिम् - राज्ये **अभिषेकः** = राज्याभिषेकः, तस्मै राज्याभिषेकाय, **पदानाम्** = आवश्यकवस्तूनाम् (पदं व्यवसितित्राणस्थान-लक्ष्माङ्घ्रिवस्तुषु- इति मेदिनी) **सम्भृतिः** = सम्भरणम्, ताम्, **आरचय्य** = विधाय, **पुत्रम्** = कार्तवीर्याभिधानं सुतम्, **अवनीतलसार्वभौमम्- अवन्याः** = पृथिव्याः, **तलम्** = मण्डलम्, तस्य, **सार्वभौमः** = सर्वभूमेरीश्वरः, चक्रवर्ती, (चक्रवर्ती सार्वभौमः, इत्यमरः, सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपटावपि, इति मेदिनी) तम्, पृथ्वीतलचक्र-वर्तिनम्, **विधित्सुः** = चिकीर्षुः, **जगदाहितकीर्तिमूर्तिः - जगति** = संसारे, **आहिता**= स्थापिता, **कीर्तिमूर्तिः** = यशःप्रतिमा, येन, सः, **राजा** = कृतवीर्यः, **अमरलोकराजः-** अमराणां देवानाम्, **लोकः** = भुवनम्, तस्य **राजा** = शासकः, इति देवलोकाधिपतिरिन्द्र इत्यर्थः, **गुरुम्** = बृहस्पतिम् अथवा गीर्पतिम् (गुरुर्गीर्पतिः- इत्यमरः), **इव** = यथा, **दत्तम्** = दत्तात्रेयनामकम्, **गुरुम्** = आचार्यम्, **जगाद** = निवेदितवान् । अत्र कृतवीर्येन्द्रयोर्बृहस्पतिदत्तयोश्चोपमानोपयमेयभावः, निवेदनात्मकं साधर्म्यम्, इवपदं वाचकञ्चेत्युपमालङ्कारः । उक्तञ्च- **'साधर्म्यमुपमा भेदे'** इति (का.प्र., उ. १०, सू. १२६, श्लो. ८६) । अत्र वसन्ततिलकावृत्तम् ।।२।।

दिव्यलक्ष्मी - आफ्ना उदात्त क्रियाकलापबाट आविर्भूत कीर्तिको मूर्तिले सम्पूर्ण संसारलाई ढाकेका, आफ्ना सुपुत्र कार्तवीर्यलाई पृथिवीमण्डलको सार्वभौम राजा बनाउन चाहने राजा कृतवीर्यले राज्याभिषेकका लागि आवश्यक सामग्री जुटाएपछि पहिले कुनै समयमा स्वर्गका राजा इन्द्रले आफ्ना गुरु बृहस्पतिसँग निवेदन गरेझैं गुरु दत्तात्रेयसँग निवेदन गरे ।।२।।

निर्वाणमिच्छति मनो मम ते प्रसादा-
दासाद्य चान्तिमदशां जगतः प्रकाशम्।
कार्यन्निधाय तनये लघुभास्वतीह
प्रातः प्रदीपगतरोचिरिवाचिरेण ।।३।।

– पूर्णोपमा

अन्वयः - प्रातः, प्रदीपगतरोचिः, इव, अन्तिमदशाम्, च, आसाद्य, अचिरेण, लघुभास्वति, तनये, जगतः, प्रकाशम्, कार्यम्, निधाय, ते, प्रसादात्, मम, मनः, निर्वाणम्, इच्छति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - प्रातः = प्रभाते, **प्रदीपगतरोचिः- प्रदीपगतम्** = दीपकगतम्, **रोचिः**= कान्तिः, इति, (रोचिः शोचिरुभे क्लीबे, इत्यमरः), **इव** = यथा, **अन्तिमदशाम्** = वृद्धावस्थाम्, **आसाद्य** = प्राप्य, **अचिरेण** = शीघ्रम्, **लघुभास्वति**= प्रातःकालिकसूर्यसमानज्योतिर्मये, **तनये** = पुत्रे कार्तवीर्ये, **जगतः**= संसारस्य, **प्रकाशम्** = दीप्तिकारकम्, **कार्यम्**= कर्तव्यम्, **निधाय**= संस्थाप्य, **ते**= तव, **गुरोः**, **प्रसादात्** = कृपायाः, **मम**= कृतवीर्यस्य, **मनः**= मानसम्, **निर्वाणम्**= मोक्षम् (निर्वाणमस्तङ्गमने निर्वृतौ गजमज्जने। सङ्गमेऽप्यपवर्गे च - इति मेदिनी), **इच्छति** = वाञ्छति । यथा प्रातःकालिकदीपरोचिः, लघुभास्वति बालसूर्ये जगतः प्रकाशरूपं कार्यं निधाय निर्वाणं शान्तिमुपैति तथैव अहमपि जगत्प्रकाशनरूपं कार्यं निजे उदीयमाने पुत्रे कार्तवीर्ये निधाय मोक्षलब्धये तपोवनं गन्तुमिच्छामीति कृतवीर्यस्याशयः। अत्र पूर्णोपमालङ्कारः । उक्तञ्च - **पूर्णा लुप्ता च सा** (का.प्र., उ.१०, सू.१२७, श्लो. ८६)। यत्रोपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानां शब्दानामुपादानं भवति तत्र पूर्णोपमालङ्कारो भवतीत्यर्थः । अत्रापि तेषां समेषामुपादानात् पूर्णोपमा ।।३।।

दिव्यलक्ष्मी - हे गुरु ! दीपकको ज्योतिले रातको समयमा संसारलाई प्रकाश दिने काम गरेपछि बिहानीको समयमा अन्तिम अवस्थामा पुगेर आफूले गर्ने कार्यको अभिभारा उदीयमान सूर्यलाई दिएझैं मैले पनि राजाको रूपमा जनताको सुरक्षा, पालन र शिक्षा-दीक्षाको कार्यभार सम्पन्न गरेर अथवा आफ्ना सत्कर्मले संसारलाई उज्यालो तुल्याएर अन्तिम अवस्थामा पुगेपछि जनताको सेवा गरी संसारलाई प्रकाशित गर्ने कर्तव्यको अभिभारा आफ्ना बालसूर्यसमान उदाइरहेका छोरा कार्तवीर्यको काँधमा राखी मोक्षको पथमा अग्रसर हुनुपर्दछ भन्ने कुरा मेरो मनले कामना गरिरहेको छ ।।३।।

धुर्ये निधाय धुरमत्र चिरादुदूढां
विद्यामिवागमगमान्वितमार्गखिन्नः ।
सद्यः सदक्षतनये विनयेन युक्ते
वाञ्छामि शान्तिमधुना भवतः प्रसादात् ।।४।।

- श्रौती पूर्णा

अन्वयः - आगमगमान्वितमार्गखिन्नः, चिराद्, उदूढाम्, विद्याम्, विनयेन, युक्ते सदक्षतनये, धुर्ये, निधाय, इव, आगमगमान्वितमार्गखिन्नः (अहम्), अत्र चिरात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदूढाम्, धुरम्, सद्यः, सदक्षतनये, विनयेन युक्ते, धुर्ये, तनये, निधाय, अधुना, भवतः, प्रसादात्, शान्तिं वाञ्छामि ।

चूडामणिः - आगमगमान्वितमार्गखिन्नः - आगमानाम् = वेदादिशास्त्राणाम्, **गमेन** = प्राप्त्या, **अन्वितः** = युक्तः, यो, **मार्गः** =पन्थाः, तेन **खिन्नः** = उद्विग्नः, विद्वान्, **चिरात्** = चिरकालात्, **उदूढाम्** = धृताम्, **विद्याम्** = वेदादिशास्त्रजालम्, सदक्षतनये- **सन्** = शोभनः, **अक्षतः** = अखण्डितः, **नयः** = न्यायविद्या, यस्मिन् तादृशे, **विनयेन** = विनम्रतया, **युक्ते** = सम्पन्ने, **धुर्ये** = शिष्ये, **निधाय** = स्थापयित्वा, **इव** = यथा, **आगमगमान्वितमार्गखिन्नः** - आगमश्च गमश्चेति **आगमगमौ** = जन्ममरणे, ताभ्याम् **अन्वितः** = युक्तः, इति आगमगमान्वितः, स चासौ **मार्गः** = सरणिर्जन्ममृत्युप्रक्रियया युतः संसारमार्ग इत्यर्थः, तेन, **खिन्नः** = उद्विग्नः, अहम्, **अत्र** = लोके, **चिरात्** = बहुकालात्, **उदूढाम्** =धृताम्, **धुरम्** = राज्यभारम्, **सद्यः**= शीघ्रमेव, **सदक्षतनये** - **सन्ति** = शुभानि, **अक्षाणि** = इन्द्रियाणि, यस्य स सदक्षः, सदक्षश्चासौ **तनयः** = पुत्रः कार्तवीर्य इति सदक्षतनयः, तस्मिन् अविकलेन्द्रिये, अथवा **सन्** = शोभनः, **अक्षतः** = अखण्डितः, **नयः** = न्यायः, यस्मिन् तस्मिन् शोभनन्याययुक्ते, **विनयेन** = नम्रतया, **युक्ते** = सम्पन्ने, धुर्ये - धुरां धारयतीति **धुर्यः** = धौरेयः, तस्मिन्, राज्यधुरन्धरे (धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धरा - इत्यमरः), पुत्रे कार्तवीर्ये, **निधाय** = संस्थाप्य, **अधुना** = इदानीम् , **भवतः** = सद्गुरोः दत्तात्रेयस्य, **प्रसादात्**= कृपायाः, **शान्तिम्** = निर्वाणम्, **वाञ्छामि** = इच्छामि। अत्र **कृतवीर्यः** - उपमेयम्, विद्वान् - उपमानम्, इवशब्दः - वाचकः, शान्तिकामना- साधारणधर्मश्च शब्दतः श्रूयन्ते इति श्रौती पूर्णोपमा ॥४॥

दिव्यलक्ष्मी - जन्म लिने र मृत्युको आहार बन्ने संसारको पद्धतिबाट खिन्न भएका ज्ञानी विद्वान्हरू आफ्नो सम्पूर्ण विद्या प्रचार-प्रसारको अभिभारा इन्द्रियविजयी र विनयी सुयोग्य शिष्यको जिम्मा लगाएर आफू मुक्तिमार्गको पथिक भएझैं म पनि लामो समयदेखि आफूले वहन गरेको राज्यभार संयमी, विनम्र र राज्यभार वहन गर्न समर्थ छोरा कार्तवीर्यको काँधमा राखी हजुरको कृपाबाट शान्तिलाभ गर्न चाहन्छु ॥४॥

भुक्ता मया बहुविधा विषया विषाभा
आपातभातमधुरा विधुरस्वभावाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतान्नरेन्द्रपदवीमधिरुह्य भूयो
नेच्छामि दुर्जररसैकनिदानभूतान् ।।५।।

- आर्थी पूर्णा

अन्वयः - मया, नरेन्द्रपदवीम्, अधिरुह्य, आपातभातमधुराः, विधुरस्वभावाः, विषाभाः, बहुविधा, विषयाः, भुक्ताः, भूयः, दुर्जररसैकनिदानभूतान्, एतान्, (भोक्तुम्) न इच्छामि।

चूडामणिः- मया = कृतवीर्येण, **नरेन्द्रपदवीम्- नराणाम्** = जनानाम्, **इन्द्रः** = राजा, तस्य **पदवी** = सृतिः, ताम्, **अधिरुह्य** = आरुह्य, **आपातभातमधुराः** - **आपातम्** = क्षणिकम्, **भातम्** = अनुभूतम्, **मधुरम्** = मिष्टम्, येषान्ते, क्षणिकमधुराभासाः, **विधुरस्वभावाः - विधुरः** = विश्लेषमयः, **स्वभावः** = प्रकृतिः, येषान्ते, (विधुरं तु प्रविश्लेषः- इत्यमरः, वैकल्पेऽपि च विश्लेषे विधुरं विकले त्रिषु इति त्रिकाण्डशेषः), **विषाभाः- विषस्य** = गरलस्य, **आभा** = कान्तिरिव आभा येषान्ते, गरलाकाराः, (क्ष्वेडस्तु गरलं विषम्- इत्यमरः), **विषयाः** = शब्द-स्पर्श-रूप-रस-गन्धरूपा भोगाः, (विषयो गोचरे देशे, तथा जनपदेऽपि च- इति मेदिनी), **भुक्ताः** = अनुभूताः, **भूयः** = पुनः, **दुर्जररसैकनिदानभूतान्** - दुःखेन जीर्यते इति **दुर्जरः** = दुस्त्यजः, दुस्त्यजश्चासौ **रसः** = आस्वादः, इति **दुर्जररसः** = दुस्त्यजास्वादः, स एवैकं **निदानम्** = आदिकारणम्, (निदानं त्वादिकारणम्, इत्यमरः), येषान्तान्, **एतान्** = विषयान्, **भूयः** = पुनः, (भोक्तुम्), **न इच्छामि** = न वाञ्छामि । अत्र 'विषाभाः' इति पदमर्थतो वाचकसन्निहितमिति आर्थी पूर्णा । उक्तञ्च - '..... **अग्रिमा। श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा ।।**' (का.प्र., उ. १०, सू. १२८, श्लो. ८६) ।।५।।

दिव्यलक्ष्मी - हे गुरुदेव ! राजाको पदमा आसीन भएर मैले सधैं समानरूपमा भोग गर्न नपाइने र भोगकालमा क्षणिकरूपमा गुलिया र स्वादिला लागे पनि परिणाममा विषझैं लाग्ने विषयहरूको भोग गरेको छु । फेरि म भोगका लागि तिर्सना बढाइरहने ती सांसारिक पदार्थहरूको भोग गर्न चाहन्न ।।५।।

चित्तेन नैव जहतो वहतो वयोऽन्त्यं
सन्त्यज्य याति विषयावलिरप्रसन्ना ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोगोज्झिता चतुरवारविलासिनीवत्
तस्माद् बुधः स्वयमिमां विजहीत पूर्वम्।।६।।

– तद्धितगा आर्थी पूर्णा

अन्वयः – भोगोज्झिता, अप्रसन्ना, विषयावलिः, चतुरवारविलासिनीवत्, अन्त्यम्, वयः, वहतः, चित्तेन, नैव, जहतः (जनान्), सन्त्यज्य, याति, तस्मात्, बुधः, स्वयम्, इमाम्, पूर्वम्, विजहीत ।

चूडामणिः – **भोगोज्झिता– भोगात्** = विषयास्वादग्रहणात्, **उज्झिता** = त्यक्ता, इन्द्रियदौर्बल्यहेतोरास्वादनव्यापाराद् दूरीकृतेत्यर्थः, अत एव **अप्रसन्ना** = प्रसादरहिता, **विषयावलिः** = पदार्थपङ्क्तिः, **चतुरवारविलासिनीवत्** – **चतुरा** = दक्षा (दक्षे तु चतुरपेशलपटवः– इत्यमरः), या **वारविलासिनी** = वेश्या, सा इवेति कुशलवेश्येवेति तात्पर्यम्, **अन्त्यम्** = चरमम्, **वयः** = अवस्थाम्, **वहतः** = धारयतः, परन्तु, **चित्तेन** = मनसा, **विषयान्** = भोग्यपदार्थान्, नैव **जहतः** = परित्यक्तुमसमर्थान्, जनान् **परित्यज्य**= त्यक्त्वा, **याति** = गच्छति, **तस्माद्** = ततः, **बुधः** = बुद्धिमान् जनोऽथवा विपश्चिज्जनः, **स्वयम्** = आत्मना, **इमाम्** = विषयावलिम्, **पूर्वम्** = समर्थावस्थायामेव, **विजहीत** = परित्यजेदित्यर्थः। तद्धितान्तर्गतवतिप्रत्ययाश्रितोऽयमलङ्कार इति हेतोरियमुपमा तद्धितगा आर्थी पूर्णाच्यते ।।६।।

दिव्यलक्ष्मी – वृद्धावस्थामा पुगेपछि पनि चित्तलाई विषयको तिर्सनामा डुबाइराख्ने तर भोग गर्न असमर्थ पुरुषलाई देखेर रूप, रस, गन्ध, स्पर्श, शब्द आदि सबै विषयहरूले यो वृद्धपुरुष अयोग्य छ भनी असन्तुष्ट भई वेश्याले असमर्थ ग्राहकलाई छाडेझैं आफै छाडिदिन्छन् । विषयले आफूलाई छाड्नुभन्दा पहिले नै बुद्धिमान् एवं विद्वान् पुरुषले विषयलाई छाडिदिनुपर्छ ।।६।।

आसाद्य जन्म शरदिन्दुकरावदातै-
राच्छाद्य सर्वभुवनञ्चरितैः सुहृद्यैः ।
यो हंससारसहितः शरदभ्रचर्यः
संलीयते विमलविष्णुपदे स धन्यः ।।७।।

– समासगा लुप्ता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - यः, जन्म, आसाद्य, शरदिन्दुकरावदातैः, सुहृद्यैः, चरितैः, सर्वभुवनम्, आच्छाद्य, हंससारसहितः, शरदभ्रचर्यः, च, विमलविष्णुपदे, संलीयते, स धन्यः ।

चूडामणिः- **यः** = भाग्यशाली जनः, **जन्म** = मानवजन्म, **आसाद्य** = प्राप्य, **शरदिन्दु-करावदातैः- शरदः** = शरदृतोः, **इन्दुः** = चन्द्रमाः, तस्य **कराः** = किरणाः, इव **अवदातानि** = निर्मलानि स्वच्छानि वा तैः, **सुहृद्यैः**= रमणीयैः, **चरित्रैः** = चरितैः, **सर्वभुवनम्** = सर्वलोकम्, **आच्छाद्य** = छादयित्वा, **हंससारसहितः- हंसानाम्** = मरालानाम्, **सारेण** = धवलिम्ना, **सहितः** = सम्पन्नः, अथवा **हंसस्य**= परमात्मनः, **सारेण** = ज्ञानेन, **सहितः** = सम्पन्नः, **शरदभ्रचर्यः - शरदः** = शरदृतोः, **अभ्रम्** = मेघः, तस्य **चर्या इव** = आचरणमिव, चर्या यस्य सः, शरत्कालिकमेघ-सदृशाचार इत्यर्थः, **यः**= जनः, **विमलविष्णुपदे- विमलम्** = निर्मलम्, चासौ **विष्णुपदम्** = नारायणचरणम्, अथवा गगनम्, तस्मिन्, **संलीयते** = लीनो भवति, सः, **धन्यः** = साधुवादार्ह इत्यर्थः । अत्र शरदिन्दुकरावदातैः, शरदभ्रचर्य इत्यादौ समासगा लुप्तोपमा। (का.प्र., पूर्ववत्) ।।७।।

दिव्यलक्ष्मी - जुन जीव दुर्लभ मानवदेह प्राप्त गरी शरत्कालको चन्द्रमाका किरणझैं उज्यालो र सबैलाई प्यारो लाग्ने चरित्रद्वारा सबै भुवनलाई ढाकेर शरत्कालीन आकाशझैं निर्मल र आत्माको ज्योतिले ज्योतिर्मय बनी नारायणका चरणारविन्दमा लीन हुन्छन् ती धन्य छन् ।।७।।

पुत्रीयिताः प्रकृतयः समरान्तराले
गेहान्तरीयमभवं रिपुगेहदाहे ।
नैदाघतीक्ष्णकरदर्शमदर्शदिन्द्र-
चारञ्चरन्तमरिवृन्दमिमञ्च युद्धे ।।८।।

- क्यच् - क्विप् - णमल्सु लुप्ता

अन्वयः - (मया), प्रकृतयः, पुत्रीयिताः, समरान्तराले, रिपुगेहदाहे, गेहान्तरीयम्, अभवम्, अरिवृन्दम्, इमम्, युद्धे, नैदाघतीक्ष्णकरदर्शम्, इन्द्रचारम्, चरन्तम्, च अदर्शत्।

चूडामणिः - कृतवीर्यो दत्तात्रेयं प्रति कथयति- (हे गुरो ! मया कृतवीर्येण), **प्रकृतयः**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजाः, **पुत्रीयिताः** = पुत्रवदाचरिताः, क्यच्प्रत्ययान्तं रूपम्, **समरान्तराले**- **समरस्य**= युद्धस्य, **अन्तरालम्** = अन्तरम्, इति समरान्तरालम्, तस्मिन्, **रिपुगेहदाहे**= युद्धकर्मणि शत्रूणां गृहदहने, शत्रुभवनेषु भस्मसात् कृतेषु सत्सु **गेहान्तरीयम्** = आत्मगोपायनाय, प्रत्याक्रमणाय वा द्वितीयगेहाश्रितं शत्रुं प्रति, **अभवम्**= भव इवाचरतीति भवतीत्यर्थे क्विप्प्रत्ययः, तस्य लङि भव इव आचरमिति- अभवमिति रूपम्, भगवान् शङ्कर-स्तपस्याकाले विघ्नमाचरन्तं कामदेवं भस्मसात्कृत्य यथा निर्देहगेहं कृतवान् तथैवाहमपि युद्धे समागतान् शत्रूनमारयमिति तात्पर्यम्, **शत्रुवृन्दम्**= रिपुसमूहः, **इमम्** = माम्, **नैदाघतीक्ष्णकरदर्शम्** - निदाघे भवः, **नैदाघः** = ग्रीष्मकालिकश्चासौ **तीक्ष्णकरः**= सूर्यः, तस्य **दर्शनम्** = प्रत्यक्षीकरणम्, इव दर्शनम् इति ग्रीष्मकालिकप्रचण्डसूर्यरूपम्, अत्र णमुल्प्रत्ययः, **अदर्शत्** = दृष्टवान् तथा च **इन्द्रचारम्**- **इन्द्रस्य** = देवतानामधिपतेः, **चारः** = सञ्चरणम् इव, **चरन्तम्**= विचरन्तम्, देवलोकाधिपतिसमानतया विचरण-शीलमित्यर्थः, **अदर्शत्** = दृष्टवान्, इदमपि णमुल्प्रत्ययान्तं रूपम् । अत्र क्यचि, णमुलि तृचि च लुप्तोपमा। (का.प्र. पूर्ववत्)।।८।।

दिव्यलक्ष्मी - हे गुरुदेव ! मैले पुत्रभावले जनताको सुरक्षा गरें । युद्धको बेलामा शस्त्र-अस्त्र र गोला-बारुदको प्रहारबाट शत्रुको राज्य अथवा घर डढाएर मैले कामदेवलाई खरानी तुल्याउने भगवान् शङ्करसमान आचरण गरें । युद्धमा शत्रुहरूले ग्रीष्मकालको सूर्यझैं प्रचण्डमुद्रामा उभिएको मलाई दानवसेनाको बीचमा निर्भय भई विचरण गर्ने देवराज इन्द्रसमान नजर गर्दथे ।।८।।

शीलं यथा सततवैनयिकेन नृणां
श्रौतो यथा श्रुतिविचारबलेन धर्मः ।
शास्त्रं यथा सदयतीर्थनिषेवणेन
क्ष्मामण्डलं समवितञ्च मया तथैव ।।९।।

– मालोपमा

अन्वयः - नृणाम्, सततवैनयिकेन, यथा, शीलम्, विचारबलेन, यथा, श्रौतः, धर्मः, सदयतीर्थनिषेवणेन, यथा, शास्त्रम्, तथा, मया, क्ष्मामण्डलम्, समवितम् ।

चूडामणिः - **नृणाम्** = मानवानां मध्ये, **सततवैनयिकेन**- विशिष्टो नयः, विनयः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विनयः सञ्जातोऽस्येति वैनयिकः, **सततम्** = निरन्तरम्, वैनयिक इति **सततवैनयिकः**= नयसम्पन्नः, तेन, निरन्तरं नम्रव्यवहारपूर्वकमाज्ञाकारिणा जनेन, **यथा** = येन रूपेण, **शीलम्** = पवित्रचरितम् (शुचौ तु चरिते शीलम्- इत्यमरः, शीलं स्वभावे सद्वृत्ते- इति विश्वः), **श्रुतिविचारबलेन** - **श्रुतेः** = वेदस्य, **विचारः** = चिन्तनमिति श्रुतिविचारः, तस्य **बलम्** = शक्तिरिति, तन, त्रयीचिन्तनशक्त्या, **श्रौतः** = वैदिकः, **धर्मः** = वेदविहितं कर्म (धर्मस्तु तद्विधिः- इत्यमरः, धरति लोकान् इति धर्मः, ध्रियते जनैरिति) **सदयतीर्थनिषेवणेन** - **सदयस्य**= सकरुणस्य, **तीर्थस्य** = गुरोः (निपानागमयो- स्तीर्थमृषिजुष्टजले गुरौ- इत्यमरः), **निषेवणेन** = सेवनेन, यथा, **शास्त्रम्**= आगमः, रक्ष्यते, **तथैव** = तेनैव प्रकारेण, **मया**= कृतवीर्येण, **क्ष्मामण्डलम्** = पृथिवीतलम्, **समवितम्**= संरक्षितम् । मालाकारतया उपमाया प्रयोगादत्र मालोपमा । उक्तञ्च काव्यप्रकाशे उपमालङ्कारप्रकरणे वृत्तौ- '**एकस्यैव बहूपमानोपादाने मालोपमा**' इति ।।९।।

दिव्यलक्ष्मी - जसरी विनयशील मानिसले शील र सदाचारको रक्षा गर्दछ, जसरी वेदको विचारशक्तिले वैदिक धर्मको संरक्षण गर्दछ, जसरी करुणाकोमल गुरुहरूका समीपमा रही निरन्तर शास्त्रको अध्ययन गर्ने विद्वान्ले शास्त्रहरूको संरक्षण गर्दछ त्यसरी नै मैले पनि पृथिवीमण्डलको रक्षा गरें ।।९।।

अस्त्येव मे विसलतेव सितापि कीर्तिः
कीर्तिर्यथा बुधजनावनदापि लक्ष्मीः।
लक्ष्मीर्यथा सुरनरस्पृहितापि भूमि-
र्भूमिर्यथा जलधिसीमतटं गताज्ञा ।।१०।।

- रशनोपमा

अन्वयः - विसलता, इव, सिता, कीर्तिः, अपि, मे, अस्ति, एव, कीर्तिः, यथा, बुधजनावनदा, लक्ष्मीः, (अस्ति, एव) लक्ष्मीः, यथा, सुरनरस्पृहिता, भूमिः, अपि, (अस्ति, एव), भूमिः, यथा, जलधिसीमतटम्, गता, आज्ञा (अस्ति, एव) ।

चूडामणिः - **विसलता** - विसस्य = कमलस्य, लता = वल्ली, **इव** = यथा, (विसिनीव), **सिता** = श्वेता, **कीर्तिः** = समज्ञा (यशः कीर्तिः समज्ञा च, इत्यमरः), **मे** = मम, **अस्ति एव** = वर्तत एव, **कीर्तिर्यथा** = सितं यश इव, **बुधजनावनदा** -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुधजनेभ्यः = पण्डितजनेभ्यः, **अवनम्**= रक्षणम्, ददातीति, बुधजनावनदा, सज्जन-विबुधजनरक्षाप्रदायिनी, **लक्ष्मीः** = श्रीरपि, अस्त्येव, **लक्ष्मीर्यथा** = बुधजनावनदायिनी श्रीरिव, **सुरनरस्पृहिता**- **सुरैः** = देवैः, **नरैः** = मानवैश्च, **स्पृहिता**= आकाङ्क्षिता इति, देवदानवाकाङ्क्षितेत्यर्थः, **भूमिः** = अवनिः, अस्त्येव, **भूमिर्यथा** = सुरनरस्पृहिता अवनिरिव, **जलधिसीमतटम्**- **जलधेः**= समुद्रस्य, **सीमा** = आघाटः, तस्य तटङ्गतेति जलधिसीमतटं गता, समुद्रसीमापर्यन्तं विस्तृतेत्यर्थः, **आज्ञा** = राजाज्ञा अपि वर्तते। रशनाकारतया परस्परं सम्बद्धानामुपमानोपमेयानां प्रयोगादत्र रशनोपमा। उदाहरणमस्य काव्यप्रकाशे उपमालङ्कारप्रकरणे दत्तं यथा- **मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता । तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम्।।१०।।**

दिव्यलक्ष्मी - कमललताझैं उज्ज्वल मेरो कीर्ति चारैतिर फैलिएको छ । विद्वान् एवं बुद्धिमान् सज्जनहरूको सेवा एवं सुरक्षामा तत्पर भएकी सेतो कीर्तिझैं चहकिलो स्वरूपले सम्पन्न भएकी राज्यलक्ष्मीद्वारा म सुहाएको छु । विद्वान्हरूको सुरक्षामा तत्पर भएकी राज्यलक्ष्मीझैं देवता र मानवहरूका लागि लोभनीय विशाल पृथिवीमण्डल पनि मेरो अधीनमा रहेको छ। मेरो अधीनमा रहेको विशाल पृथिवीमण्डलसमान दूरगामी प्रभावले सम्पन्न मेरो शासनादेश अर्थात् राजाज्ञा समुद्रका तीरहरूसम्म फैलिएको छ र सम्पूर्ण जनसमूहद्वारा सहर्ष अनुमोदित पनि छ । एतावता, म सांसारिक उपलब्धि र ऐश्वर्यको दृष्टिबाट ज्यादै भाग्यशाली छु ।।१०।।

एवं समस्तमनुभूतवतस्सुखं मे
लोलञ्च सातिशयमन्यपदाहृतञ्च ।
नैःश्रेयसन्तदितरत्सुखमाप्तुमिच्छा
तत्पूर्तये मम भवानिह वा भवान्भोः ।।११।।

- अनन्वयः

अन्वयः - एवम्, सातिशयम्, लोलम्, अन्यपदाहृतम्, च, समस्तम्, सुखम्, अनुभूतवतः, मे, तदितरत्, नैःश्रेयसम्, सुखम्, आप्तुम्, इच्छा, तत्पूर्तये, मम, इह, भोः, भवान् वा भवान् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - एवम् = अनेन प्रकारेण, **सातिशयम्** = अत्यधिकम्, **लोलम्** = चपलम्, **अन्यपदाहृतम् - अन्येभ्यः** = इतरेभ्यः, **पदेभ्यः** = स्थानेभ्यः, **आहृतम्**= प्राप्तम्, **समस्तम्** = सकलम्, **सुखम्** = आनन्दम्, **अनुभूतवतः** = कृतानुभवस्य, **मे** = मम, **तदितरत्** = तदन्यत्, **नैःश्रेयसम्** = पारमार्थिकम्, **सुखम्** = आत्मानन्दम्, **प्राप्तुम्** = लब्धुम्, **इच्छा** = आकाङ्क्षा वर्तते, **तत्पूर्तये** - तस्य, **पूर्तिः** = तदीयपूरणमिति तत्पूर्तिः, तस्यै पारमार्थिकसुखप्राप्तये इत्यर्थः, **मम** = कृतवीर्यस्य कृते, **इह** = संसारे, **भोः** = हे दत्तात्रेयमुने !, **भवान्** = त्वम्, **वा** = इव, **भवान्** = त्वम्, वर्तते, त्वत्तुल्यः संसारे अन्यः कोऽपि नास्तीति भावः । अत्र अनन्वयालङ्कारः । उक्तञ्च - **'उपमानोपमेयत्वे एकस्यैवैकवाक्यगे । अनन्वयः .... ।।'** (का.प्र., उ. १०, सू. १३६, श्लो. ९०) । अत्र निर्वेदनामकस्य सञ्चारिभावस्य व्यञ्जनम् ।।११।।

दिव्यलक्ष्मी - पुरुषार्थ र पराक्रमबाट अनेक राजाहरूमाथि विजय प्राप्त गरी हासिल गरेका पदार्थहरूको भोगबाट मैले विषयको आस्वादन गरेको छु । यसबाट म तृप्त र सन्तुष्ट हुन सकेको छैन । त्यसकारण त्योभन्दा छुट्टै प्रकृतिको आध्यात्मिक सुख प्राप्त गर्ने मेरो इच्छा छ । त्यस इच्छाको परिपूर्तिका लागि मेरा निमित्त हजुरसमान उपकार गर्ने हजुरमात्रै हुनुहुन्छ, अरू कुनै छैन ।।११।।

इत्युक्तवन्तममुमाह मुनीन्द्रवर्यो
राजँस्त्वया व्यवसितं मम चेतसा किम् ।
धन्योऽसि पार्थिवकुले पृथुवत् प्रथिम्ना
कीर्तेर्भवानिव पुरा प्रथते पृथुः सः ।।१२।।

– उपमेयोपमा

अन्वयः - मुनीन्द्रवर्यः, इति, उक्तवन्तम् अमुम्, आह, राजन् !, त्वया, मम चेतसा, व्यवसितम्, किम्, पार्थिवकुले, पृथुवत्, प्रथिम्ना, धन्यः, असि, पुरा, सः, पृथुः, कीर्तेः, भगवान्, इव, प्रथते ।

चूडामणिः - मुनीन्द्रवर्यः - मुनीनाम् = ऋषीणाम्, **इन्द्रः** = श्रेष्ठः, तेषु **वर्यः** = सर्वोत्तमः, इति सर्वोत्तमो मुनिर्दत्तात्रेयः, **इति** = पूर्वोक्तप्रकारेण, **उक्तवन्तम्** = निवेदितवन्तम्, **अमुम्** = कृतवीर्यम्, **आह** = उक्तवान्, **राजन्!** = हे भूप !, **त्वया**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवता, **मम** = दत्तात्रेयस्य, **चेतसा** = मनसा, **व्यवसितम् किम्** = सम्मन्त्रितं किमिति प्रश्नः, मदीयेन मानसेन सह सम्मन्त्र्य निश्चितं किमिति तात्पर्यम् । यतो हि मदीये मानसे यद् वर्तते तदेव त्वं वदसीति भावः । **पार्थिवकुले** – पृथिव्या ईशाः, **पार्थिवाः**= राजानः, तेषां **कुलम्** = समूह इति पार्थिवकुलम्, तस्मिन्, राजसमूहे, **पृथुवत्** = पौराणिको राजा पृथुरिव, **कीर्तेः** = यशसः, **प्रथिम्ना** = विस्तारेण, **धन्यः असि** = साधुवादयोग्योऽसि, यतो हि, **पुरा** = प्राचीनकाले, **सः** = राजा **पृथुः** = वेनपुत्रः, **भवान् इव**= कृतवीर्य इव, **प्रथते**= यशस्वी आसीत् । अत्र पुरायोगे लट् । उपमेयोपमा-लङ्कारस्योदाहरणमिदं पद्यम् । अत्र उपमेयभूतं कृतवीर्यपदम्, कविना उपमानरूपेण प्रयुक्तमिति उपमेयोपमालङ्कारः । उक्तञ्च- '**....विपर्यास उपमेयोपमा तयोः ।**' (का.प्र., उ. १०, सू. १३६, श्लो. ९०) । वस्तुत उपमानोपमेययोर्विपर्यासेन वर्णना-दत्रोपमेयोपमालङ्कारः ॥१२॥

दिव्यलक्ष्मी – यसरी आफ्नो मन खोलेर सम्पूर्ण भावना व्यक्त गर्ने राजा कृतवीर्यलाई मुनि दत्तात्रेयले भने– हे राजन् ! के तपाइँले मेरो चित्तसँग सल्लाह गर्नुभएको छ? अर्थात् तपाइँले सल्लाह गरेझैं गरी मेरै मनको कुरा खोल्नुभएको छ । राजाहरूको परम्परामा आदिराज पृथुमहाराजझैं उदारभावनाको प्रसार गर्नुभएका कारण तपाइँ धन्य हुनुभएको छ । पहिले राजा पृथु पनि संसारमा आफ्नो उज्ज्वल कीर्ति फैलाएर तपाइँ झैं चर्चित भएका थिए ॥१२॥

मन्ये भवन्तमवधीरितचारुकीर्तिं
प्रेमामृताऽम्बुधितरङ्गसदृक्कटाक्षम् ।
भूमध्यभागपरिशीलनमन्दवृत्तिं
दृष्ट्वाधुनाऽमृतरमा वृणुतेऽतिहृष्टा ॥१३॥

– हेतूत्प्रेक्षा

अन्वयः – अधुना, अमृतरमा, अवधीरितचारुकीर्तिम्, प्रेमामृताऽम्बुधितरङ्गसदृक्क-टाक्षम्, भूमध्यभागपरिशीलनमन्दवृत्तिम्, भवन्तम्, दृष्ट्वा, अतिहृष्टा, वृणुते, इति मन्ये।

चूडामणिः – **अधुना** = इदानीम्, **अमृतरमा**- **अमृतानाम्** = देवानाम्, **रमा** = लक्ष्मीः, स्वर्गलक्ष्मीरित्यर्थः, **अवधीरितचारुकीर्तिम्**- **चारुः** = मनोहरा, चासौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीर्तिरिति **चारुकीर्तिः** = मनोहरयशः, **अवधीरिता** = तिरस्कृता, चारुकीर्तिर्येन तम्, रम्यरूपायां कीर्तिरमण्यां मन्दाभिलाषमित्यर्थः, **प्रेमाम्बुधितरङ्गसदृक्कटाक्षम्**- **प्रेम्णः** = स्नेहस्य, **अम्बुधिः** = सागरः, इति प्रेमाम्बुधिः, तस्य **तरङ्गाः** = वीचयः, तैः, **सदृशाः** = समानाः, **कटाक्षाः** = अपाङ्गदर्शनाः, यस्य तम्, (कटाक्षोऽपाङ्गदर्शने-इत्यमरः, भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरित्यमरः), **भूमध्यभागपरिशीलनमन्दवृत्तिम्**- **भूमध्यभागस्य** = भारतवर्षस्य, **परिशीलने** = सेवने, **मन्दा** = सक्रियतारहिता, **वृत्तिः** = व्यापारः, यस्य तम्, **भवन्तम्** = कृतवीर्यम्, **दृष्ट्वा** = विलोक्य, **अतिहृष्टा**= अतिप्रसन्ना भूत्वा, **वृणुते** = देवलोकप्रशासनार्थं स्वीकुरुते। अन्यकामिनीजनतिरस्कारः, आत्मनि निश्छलो स्नेहव्यापारः, लौकिकप्राप्तिप्रयत्नपरिहारश्चेति गुणैरयं मयि सततं समासक्तचेता भविष्यतीति भावेन मुक्तिलक्ष्मीर्भवन्तं वृणुत इति तत्त्वम्। प्रपञ्चनिरपेक्षता हेतुः, मन्येपदं वाचकमिति हेतूत्प्रेक्षालङ्कारः । उक्तञ्च – '**सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।**' (का.प्र., उ. १०, सू. १३८, श्लो. ९१) ।।१३।।

दिव्यलक्ष्मी – संसारमा उत्तम कर्मद्वारा प्राप्त हुने कीर्तिको उपेक्षा गरी आध्यात्मिक मार्गमा अग्रसर हुन चाहने, प्रेमरूपी अमृतसागरको तरङ्गसमान जीवहरूलाई मोहनी लगाउने हेराइबाट करुणामय भावको प्रसार गर्नुहुने, भूमण्डलको बीचमा रहेको भारतवर्षको शासनकार्यमा पनि वैराग्यको अनुभव गर्दै आफ्नो प्रवृत्तिलाई मन्द गराउनुभएका तपाइँको दर्शन गरेर अमृतलक्ष्मी अर्थात् मुक्तिले पनि 'यी राजा मेरा लागि अनुकूल नायक हुनेछन्' भनी खुसी भई वरण गर्न लागेकी छन् भन्ने मलाई लागेको छ ।।१३।।

स्वोदारदाररुचिकारविहारसार-
स्फारप्रचारनिरपेक्षमवेक्ष्य नूनम् ।
सापत्न्यभावमुदिता पलितच्छलेन
त्वां मुक्तिराश्रयति सम्प्रति मौक्तकान्तिः ।।१४।।

– वस्तूत्प्रेक्षा

अन्वयः – स्वोदारदाररुचिकारविहारसारस्फारप्रचारनिरपेक्षम्, (त्वाम्), अवेक्ष्य, नूनम्, सापत्न्यभावमुदिता, पलितच्छलेन, मौक्तकान्तिः, मुक्तिः, सम्प्रति, त्वाम्, आश्रयति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - स्वोदारदाररुचिकारविहारसारस्फारप्रचारनिरपेक्षम् - स्वस्य = आत्मनः, **उदाराणाम्** = उदारहृदयानाम्, **दाराणाम्** = कलत्राणाम्, **रुचिकारः** = रुचिवर्द्धकः, यः, **विहारसारः** = विलासतत्त्वम्, तस्य, **स्फारः** = स्फीतः, यः, **प्रचारः** = विस्तारः, तस्मिन् **निरपेक्षः** = उदासीनः, इति तम्, त्वाम्, **अवेक्ष्य** = विलोक्य, **नूनम्**= निश्चयेन, **सापत्न्यभावमुदिता**- सपत्न्या इदं सापत्न्यम्, तस्य **भावः** = विचारः, तेन, **मुदिता** = प्रसन्ना, सपत्नीसुलभमोदेन सहिता अर्थान्निजासु राज्ञीष्वेष राजा उदासीनो वर्तत इति ज्ञात्वा प्रसन्ना, **पलितच्छलेन** = श्वेतकेशव्याजेन (पलितं शैलजे तापे केशपाके च कर्दमे- इति मेदिनी) । **मौक्तकान्तिः** = मुक्तासमान-सुषमासहिता, **मुक्तिः** = अपवर्गरमणी, **त्वाम्** = भवन्तम्, **आश्रयति** = आश्रिता भवति । मुक्तेराश्रयग्रहणे पलितच्छलेनेति केशशौक्ल्यरूपवस्तुन उल्लेखाद् वस्तूत्प्रेक्षा-लङ्कारः । अत्र नूनमिति पदमुत्प्रेक्षावाचकम् ।।१४।।

दिव्यलक्ष्मी - उदार हृदय भएका आफ्नी रानीहरूसँग गरिने भोगविलासको चरमानन्दलाई मनमा चिन्तन गरी त्यसलाई बढाउने कार्यमा रुचिहीन हुनुभएका तपाइँलाई देखेर मनमा सौतेनीभावको विचारबीज रहनाले खुसी भएकी आध्यात्मिक पथकी एकमात्र साध्य मुक्तिनायिकाले पनि कपालका रौंमा देखिएको मोतीसरहको सेतो कान्तिलाई आफ्नो प्रतीक बनाएर तपाइँलाई पछ्याएजस्तो लाग्छ ।।१४।।

दृष्ट्वा भवन्तमयमेव विवेकराशिः
किम्भूमिवासिविहितोऽतिहितोऽथ धर्मः ।
किं सूक्तिशुक्तिफलहारविहारवासः
संशेरतेऽखिलजना इति भूतलेऽद्य ।।१५।।

– संशयः

अन्वयः - अखिलजनाः, भवन्तम्, दृष्ट्वा, अद्य, भूतले, अयम्, एव, किम्, विवेकराशिः, असौ, किम्, भूमिवासिविहितः, अतिहितः, धर्मः, किम्, सूक्तिशुक्तिफलहारविहारवासः, इति, संशेरते ।

चूडामणिः - अखिलजनाः = सकलमानवाः, **भवन्तम्** = कृतवीर्यम्, **दृष्ट्वा** = विलोक्य, **अद्य** = सम्प्रति, **भूतले** = पृथिवीतले, **अयम् एव** = एष एव, **किम्** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किमु, **विवेकराशिः** = सद्विचारपुञ्जोऽस्ति (विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोः- इति मेदिनी), **असौ** = राजा, **किम्** = किमु, **भूमिवासिविहितः** - भूमौ वसन्तीति **भूमिवासिनः**= पृथिवीनिवासिनः, तैः, **विहितः** = कृतः, **अतिहितः**= सकललोककल्याणकारी, **धर्मः** = पुण्यपुञ्जोऽस्ति, असौ, किम्, **सूक्तिशुक्तिफलहारविहारवासः** - **सूक्तय एव**= मधुरवचनानि एव, **शुक्तिफलानि** = शम्बूकाः (शम्बूका जलशुक्तयः - इत्यमरः), तेषां **हारः** = सङ्ग्राहकः, यः, **विहारवासः** = क्रीडाभवनम्, अर्थान्मधुरवचनरूपसूक्तिफलानामाश्रयभूतोऽस्ति किम्, **इति** = इत्थम्, **संशेरते** = सन्देहं कुर्वन्ति । अत्र केवलं संशयस्योत्थापनात् संशयालङ्कारः, संशयं प्रशमय्य विकल्पप्रदर्शनाभावान्नात्र सन्देहालङ्कारः । उक्तञ्च - '**ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः** ।' (का.प्र., उ. १०, सू. १३९, श्लो. ९१)॥१५॥

दिव्यलक्ष्मी - आज पृथिवीतलमा तपाइँको दर्शन गरेर मानिसहरू के यी राजा विवेकका मूर्तिमान् खजाना हुन् ? के यी पृथिवीमा बस्ने मानिसहरूद्वारा गरिएका पुण्यका पुञ्ज हुन् ? के यी उत्तम वचनरूप सिपीका हार धारण गर्ने एकमात्र आधार हुन् ? भनी संशय गर्दछन् ॥१५॥

आलोक्य ये परिरणं शमनः किमेष
वाहद्विडस्य न च वाहनमस्य वाहः ।
किं कल्पभानुरयमेकहयः कथं स्यात्
संशिश्यिरे त इति मित्रमवन्तु च त्वाम् ॥१६॥

- सन्देहः

अन्वयः - ये, परिरणम्, त्वाम्, आलोक्य, किम्, एष, शमनः ?, अस्य वाहनम्, न च वाहद्विट्; अपि तु वाहः, किम्, कल्पभानुः ?, एकहयः, अयम्, कथम्, स्यात्, इति, शंशिश्यिरे, ते, त्वाम्, च मित्रम्, अवन्तु ।

चूडामणिः - **ये** = जनाः, **परिरणम्** = रणमध्ये, **त्वाम्** = भवन्तम्, **आलोक्य**= विलोक्य, **किम्** = किमु, **एष** = अयं कृतवीर्यः, **शमनः ?** = कृतान्तः? (कृतान्तो यमुनाभ्राता शमनो यमराड् यमः- इत्यमरः), अस्य कृतवीर्यस्य, **वाहनम्** = धोरणम्, **न च वाहद्विट्** = न महिषः, अपि. तु **अस्य** = कृतवीर्यस्य, वाहनम्, **वाहः** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घोटकोऽस्ति (वाहोऽश्वमानयोर्वृषे च- इति हेमचन्द्रः), तस्मादयं कृतवीर्यः शमनो न इति भावः, पुनरयं **किम्** = किमु, **कल्पभानुः** ? = प्रलयकालिकसूर्यः ?, (संवर्तः प्रलयः कल्पः क्षयः, कल्पान्त इत्यपि- इत्यमरः), परन्तु **अयम्** = कृतवीर्यः, **एकहयः** - रथे एको हयो यस्य सः, एकाश्ववाहनः, न तु सप्ताश्ववाहनः, अतः **कल्पभानुः** = सूर्यः, कल्पान्ते देदीप्यमानः प्रचण्डरूपः सूर्य इत्यर्थः, **कथं स्यात्**= कथं भवेत् ?, **इति** = इत्थम्, **संशिश्यिरे** = संशयं कृतवन्तः, **ते** = तादृशा जनाः, **त्वाम्** = भवन्तम्, **मित्रम्** = सखायम् अथवा सूर्यम्, **अवन्तु** = जानन्तु । संशयमुत्थाप्य प्रकारान्तरेण संशयनिवारणादत्र ससन्देहालङ्कारः ।।१६।।

दिव्यलक्ष्मी - पहिले रणभूमिमा वीरता देखाउने क्रममा तपाइँलाई अत्यन्त तेजस्वी, पराक्रमी वीरका रूपमा दर्शन गर्ने शत्रुहरूले के यी यमराज हुन् ? भन्ने शङ्का गरे । तर यमराजको वाहन त राँगो हो, यी राजा त राँगोमा सवार भएका छैनन्, अपितु घोडामा सवार भएका छन्, तसर्थ कसरी यिनलाई यमराज भन्ने ? त्यसो भए के यी राजा प्रलयकालका प्रचण्डसूर्य हुन् त ?, तर तिनका सातवटा घोडा रथमा जोतिएका हुन्छन्, यिनको त एउटामात्र घोडा छ, तसर्थ यी प्रलयकालका सूर्य पनि होइनन् भनी तिनले तर्क गर्दथे । पछिबाट आफ्ना तर्कको आफै खण्डन गरी यी के हुन् त भनी संशय प्रकट गरिरहन्थे । विलक्षण स्वरूपका र विचित्र पराक्रमका तपाइँलाई ती संशय गर्नेहरूले प्राणीमात्रका प्रकाशक हुनाले र सूर्यको अर्को नाम मित्र पनि भएकाले सूर्यझैं चहकिला मित्रका रूपमा जानून् । यही नै समाधान हुनसक्छ ।।१६।।

निर्वर्ण्य नाभिभवमाश्रितसत्यवार्तं
दक्षे सुते निहितलोकधुरं मुमुक्षुम् ।
संसेव्यमानमनिशङ्कविनायकेन
त्वां संस्मरामि ऋषभाख्यनृपं विधिज्ञ ।।१७।।

– स्मृतिः

अन्वयः - नाभिभवम्, आश्रितसत्यवार्तम्, दक्षे, सुते, निहितलोकधुरम्, मुमुक्षुम्, अनिशम्, कविनायकेन, संसेव्यमानम्, त्वाम्, निर्वर्ण्य, ऋषभाख्यनृपम्, विधिज्ञ, संस्मरामि ।

चूडामणिः - (राजपक्षे) **नाभिभवम्** - अभिभवनम् **अभिभवः** = तिरस्कारः, न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यते अभिभवो यस्य सः, नाभिभवः, तम्, अतिरस्कार्यम्, **आश्रितसत्यवार्तम्**- सत्यस्य वार्ता, **सत्यवार्ता** = यथार्थसम्भाषणम् (वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्- इत्यमरः), **आश्रिता** = अङ्गीकृता, सत्यवार्ता, येन तम्, **दक्षे** = कुशले, **सुते** = कार्तवीर्ये, **निहितलोकधुरम्**- **लोकस्य**= संसारस्य, **धूः** = भारः, **निहिता** = स्थापिता, लोकधूर्येन तम्, **मुमुक्षुम्**- मोक्तुमिक्षुः, **मुमुक्षुः** = मोक्षस्याभिलाषी, तम्, शमदमादि- साधनषट्कसम्पन्नं संसारसागरसन्तरणेच्छुकम्, **अनिशम्** = निरन्तरम्, **कविनायकेन**- कवीनां नायकः, कविनायकः, तेन, कविवर्येण, **संसेव्यमानम्** = उत्तमकाव्यप्रणयनेन स्तुतिसाहित्यविरचनेन वा स्तूयमानम्, **त्वाम्** = भवन्तम्, **निर्वर्ण्य**= वीक्ष्य (निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्- इत्यमरः), **ऋषभाख्यनृपम्** = ऋषभदेवनामकं राजानम्, **विधिम्** = ब्रह्माणम्, च, **संस्मरामि** = ध्याये ।

(**ऋषभदेवपक्षे**) भवन्तं दृष्ट्वा, **नाभिभवम्** = नाभिनामकस्य पितुः पुत्रम्, **आश्रित- सत्यवार्तम्** = सत्यसङ्कल्पमयाजीवम् (आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने- इत्यमरः), **दक्षे** = प्रशासनचतुरे, **सुते** = भरते, **निहितलोकधुरम्** = प्रत्यर्पितलोक- पालनकार्यम्, **अनिशम्**= निरन्तरम्, **कविनायकेन** = कविशिरोमणिना, **संसेव्यमानम्**= स्तूयमानम्, **ऋषभाख्यनृपम्** = प्रियव्रतवंशजातं राजानम्, **स्मरामि** = चिन्तयामि ।

(**ब्रह्मपक्षे**) भवन्तं दृष्ट्वा, निर्वर्ण्य, **नाभिभवम्** - **नाभेः** = नारायणनाभिकमलात्, **भवः** = जन्म, यस्य तम्, **आश्रितसत्यवार्तम्** = अङ्गीकृतसत्यलोकजीवनम्, **सुते**= पुत्रे, **दक्षे** = दक्षप्रजापतौ, **निहितलोकधुरम्** - प्रत्यर्पितसृष्टिसञ्चालनलोकपरिपालन- कार्यम्, **अनिशम्** = निरन्तरम्, **कविनायकेन** = शुक्राचार्येण, **संसेव्यमानम्** = स्तूयमानम्, **विधिम्** = विधातारम्, **स्मरामि** = चिन्तयामि । अत्र समानगुणराशि- सम्पन्नयोः, ऋषभदेवब्रह्मणोः स्मरणमिति स्मृत्यलङ्कारः। सभङ्गाभङ्गश्लेषश्च । उक्तञ्च- **'वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः । शिलष्यन्ति शब्दाः श्लेषोऽसावक्षरादि- भिरष्टधा।।'** (का.प्र., उ. ९, सू. १२०, श्लो. ८३)।।१७।।

दिव्यलक्ष्मी- कहिल्यै पनि पराजयको अनुभव नगरेका, सत्यमा अडेर व्यवहार गर्ने, आफ्ना उत्तम छोराको काँधमा राष्ट्रको रक्षाको अभिभारा सुम्पिएर मोक्षको चाहना गर्ने, कविहरूमा उत्तम कविनायकहरूद्वारा सेवा गरिएका तपाइँलाई देखेर म सत्यव्यवहार गर्ने, उत्तम पुत्रको काँधमा राज्यको भार राखेर मोक्षमार्गमा अग्रसर हुने,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविहरूद्वारा प्रशंसा गरिएका नाभिराजाका छोरा ऋषभदेव राजाको संझना गर्दछु। अर्को पक्षमा नारायणको नाभिकमलबाट पैदा भएका सत्यलोकमा रही सृष्टिको सञ्चालन गर्ने र दक्षप्रजापतिनामक छोरालाई सृष्टिको कार्यभार जिम्मा दिएर मोक्षको कामना गर्ने र कविनायक शुक्राचार्यद्वारा स्तुति गरिएका ब्रह्माजीलाई पनि संझिरहेको छु ।।१७।।

विद्यालतासमवलम्बविशालशाले
सुप्राज्यराज्यकमलाविमलालयेऽस्मिन् ।
स्थाने निधाय तनये सनये धरित्र्या
भारं भवान् भवहरं पदमीक्षतां द्राक् ।।१८।।

– रूपकम्

अन्वयः – भवान्, विद्यालतासमवलम्बविशालशाले, सुप्राज्यराज्यकमलाविमलालये, सनये, अस्मिन्, तनये, धरित्र्याः, भारम्, निधाय, भवहरम्, पदम्, द्राक्, ईक्षताम्, स्थाने।

चूडामणिः – **भवान्** = कृतवीर्यः, **विद्यालतासमवलम्बविशालशाले** – विद्या एव लतेति **विद्यालता** = शास्त्रवल्ली, तस्याः, **समवलम्बः** = आधारः, **विशालः**= विपुलः, **शालः** = विद्यावल्लीसमाश्रयविशालसर्जवृक्षरूपः, तस्मिन् अथवा **विद्यालतायाः** = विद्याप्रपञ्चस्य, **समवलम्बरूपा** = आधाररूपा, **विशाला** = विपुला, **शाला** = पाठशाला यस्मिन् तस्मिन्, सम्पूर्णविद्याया आश्रयभूत इत्यर्थः, **सुप्राज्यराज्यकमलाविमलालये**- **सुप्राज्यस्य**= स्फीतस्य, **राज्यस्य**= राष्ट्रस्य, **कमला**= राजलक्ष्मीः, तस्याः, **विमलः** = निर्मलः, **आलयः** = आवासस्तस्मिन्, विस्तृतराज्यलक्ष्मीनिवासभवनरूप इत्यर्थः, **सनये** = न्यायसहिते, **तनये**= पुत्रे कार्तवीर्ये, **धरित्र्याः** = पृथिव्याः, **भारम्**= धुरम्, **निधाय**= स्थापयित्वा, **भवहरम्**- **भवस्य**= जन्मनः, **हरम्** = नाशकम्, **पदम्** = स्थानम्, **द्राक्** = शीघ्रम्, **ईक्षताम्**= विलोक्यताम्, **स्थाने** = उचितमेव। अत्र रूपकम्। उक्तञ्च – '**तद् रूपकमभेदो य उपमानोपमेययोः ।**' (का.प्र., उ.१०, सू.१४०, श्लो.९२)। 'माला तु पूर्ववत्' इति तत्रैव ९३ तमे पद्ये ।।१८।।

दिव्यलक्ष्मी – विद्यारूप लतालाई आश्रय प्रदान गर्ने, विशाल शालको रूखका रूपमा, अथवा विद्यालतालाई आश्रय दिने विशाल पाठशालाकै रूपमा र ठूलो राज्यकी राज्यलक्ष्मीको प्रमुख आश्रयका रूपमा रहेका, सुयोग्य र न्यायनिरूपणमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुशल आफ्ना छोराको काँधमा पृथिवीको भार राखेर तपाइँले छिटै जन्म-मृत्युको चक्रबाट मुक्ति दिलाउने मोक्षपद प्राप्त गर्नुहुनेछ ।।१८।।

राज्याभिषेकमनुभूय तवाध्वराज्या-
सेकात्तनूभवधनञ्जयदीप्तकीलाः ।
द्विड्भूपसत्पशुवसासवपानपीनाः
पूर्णाहुतिं समभियन्तु शिरोभिरेषाम् ।।१९।।

- नानारूपकसङ्ग्रहः

अन्वयः - तव, राज्याभिषेकम्, अनुभूय, अध्वराज्यासेकात्, द्विड्भूपसत्पशुवसासवपानपीनाः, तनूभवधनञ्जयदीप्तकीलाः, एषाम्, शिरोभिः, पूर्णाहुतिम्, समभियन्तु।

चूडामणिः - तव = भवतः, (हस्तात्), **राज्याभिषेकम् - राज्ये** = राजसिंहासने, **अभिषेकः** = आरोहणमिति राज्याभिषेकः, तम्, **अनुभूय** = अनुभवं कृत्वा, **अध्वराज्याऽऽसेकात् - अध्वरे** = यज्ञे, **आज्यस्य** = घृतस्य, **आसेकः** = सेचनमिति अध्वराज्यासेकः, तस्मात्, यज्ञे घृतस्याभिषिञ्चनादित्यर्थः, **द्विड्भूपसत्पशुवसासवपानपीनाः** - द्विषश्च ते भूपाः, **द्विड्भूपाः** = शत्रुराजानः, त एव **सतः** = उत्तमाः, **पशवः** = मृगादयः, तेषाम्, या **वसा** = मेदः, सा एव **आसवः** = मद्यम्, तस्य **पानेन** = ग्रहणेन, **पीनाः** = स्थूलाः, शत्रुनृपरूपबलिपशुमेदोमदिरापानस्थूला इत्यर्थः, **तनूभवधनञ्जयदीप्तकीलाः - तनूभवस्य** = पुत्रस्य, **धनञ्जयस्य** = पराक्रमाग्नेः, **दीप्ताः** = प्रज्ज्वलिताः, **कीलाः** = ज्वालाः, पुत्रप्रतापाग्निचमत्कृतज्वाला इत्यर्थः (कीलो लेशे द्वयोः स्तम्भज्वालाकफोणिशङ्कुषु - इति मेदिनी), **एषाम्** = शत्रूणाम्, **शिरोभिः** = उत्तमाङ्गैः, **पूर्णाहुतिम्** = पूर्णाभिषेकम्, **समभियन्तु** = प्राप्नुवन्तु । अत्र द्विड्भूप-पशु-वसासवेत्यादौ रूपकम् । लक्षणं पूर्ववत् ।।१९।।

दिव्यलक्ष्मी - राज्याभिषेकको अनुभव गरी शत्रुराजाहरूसँग युद्धयज्ञमा पराक्रम देखाउँदा पराक्रमरूप घृताहुतिका कारण उत्तेजित भएका शत्रुराजारूप पशुहरूको बोसोलाई मदिरा मानेर पान गर्ने तपाइँको प्रतापाग्निको ज्वालाले शत्रुहरूका शिरहरूलाई पूर्णाहुतिका रूपमा प्राप्त गरून् भन्ने मैले चिताएको छु अर्थात् राज्याभिषेकपछि तपाइँका पराक्रमी छोराले युद्धहरूमा अजेय शत्रुहरूको पनि संहार गर्नेछन् भन्ने मैले विश्वास गरेको छु ।।१९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सज्जन्यजन्यकमलाशयनोपधानं
प्रत्यर्थिभूपतिविलासवतीजनानाम् ।
वैश्वस्त्ययागपरभारसहाऽग्र्ययूप-
स्त्वत्पुत्रबाहुरभिराजतु दीर्घकालम् ॥२०॥

– रूपकम्

अन्वयः – प्रत्यर्थिभूपतिविलासवतीजनानाम्, सज्जन्यजन्यकमलाशयनोपधानम्, वैश्वस्त्ययागपरभारसहाऽग्र्ययूपः, त्वत्पुत्रबाहुः, दीर्घकालम्, अभिराजतु ।

चूडामणिः – प्रत्यर्थिभूपतिविलासवतीजनानाम् – प्रत्यर्थिनः = शत्रवः, ते, **भूपतयः** = राजानः, इति प्रत्यर्थिभूपतयः, तेषाम्, ये, **विलासवतीजनाः** = विलासवती-रूपा ये जनाः, रमणीजनाः, तेषाम्, **सज्जन्यजन्यकमलाशयनोपधानम्– सज्जन्येषु**= उत्तमरणयज्ञेषु, **जन्या** = उत्पाद्या, या **कमला** = राजलक्ष्मीः, तस्याः, **शयनस्य** = शय्यायाः, **उपधानम्** = उपबर्हरूपः, **वैश्वस्त्ययागपरभारसहाऽग्र्ययूपः** – विश्वस्ताया भावः– **वैश्वस्त्यम्**= वैधव्यम् (विश्वस्ता विधवा समे– इत्यमरः), **तस्मै** = शत्रुरमणी-वैधव्याय, यो **यागः**= रणयज्ञः, सः, वैश्वस्त्ययागः, तस्य, **परम्** = समधिकम्, **भारम्**= धुरम्, **सहते**= मर्षयति, एतादृशश्चासौ **अग्र्यः** = प्रधानः, **यूपः** = स्तम्भरूपः, **त्वत्पुत्र-बाहुः– तव**= कृतवीर्यस्य, **पुत्रः**= तनय इति त्वत्पुत्रः, तस्य, **बाहुः**= दोर्दण्डः, **दीर्घकालम्**= चिरकालपर्यन्तम्, **अभिराजतु** = विलसतु। अत्र बाहौ यूपारोपा–द्रूपकालङ्कारः ॥२०॥

दिव्यलक्ष्मी – न्यायसङ्गत युद्धबाट प्राप्त भएकी राजलक्ष्मीलाई विश्राम प्रदान गर्ने तकियाको रूपमा देखिने तपाइँका पुत्र कार्तवीर्यको भुजा शत्रुसुन्दरीहरूलाई विधवा तुल्याउने वैधव्ययज्ञको सम्पूर्ण अभिभारा वहन गर्ने प्रधान मौलो भएर चिरकालसम्म विराजमान होस् भनी म कामना गर्दछु ॥२०॥

पीत्वा द्विजाधिपविनिःसृतमच्छवर्ण-
वाग्व्याजतोऽमृतममन्दममाद्यदाशु ।
चञ्चच्चरित्रकृतवीर्यवराधिपस्य
चेतश्चकोरशिशुरञ्चितचारुपक्षः ॥२१॥

– अपह्नुतिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - द्विजाधिपविनिःसृतम्, अच्छवर्णम्, अमृतम्, वाग्व्याजतः, अमन्दम्, पीत्वा, चञ्चच्चरित्रकृतवीर्यवराधिपस्य, अञ्चितचारुपक्षः, चकोरशिशुः, चेतः, आशु, अमाद्यत्।

चूडामणिः - द्विजाधिपविनिःसृतम् - द्विजानाम् = ब्राह्मणानाम्, **अधिपः** = स्वामी इति द्विजाधिपो दत्तात्रेयः, तस्मात्, **विनिःसृतम्** = निर्गतम्, **अच्छवर्णम्** = रमणीयाक्षर-समन्वितम्, **अमृतम्** = पीयूषम्, **वाग्व्याजतः - वाचः** = वचनस्य, **व्याजः** = कैतवम्, इति तस्मात्, वाण्या माध्यमेनेत्यर्थः, **अमन्दम्** = सावेगं सानन्दं वा, **पीत्वा** = पानं कृत्वा, **चञ्चच्चरित्रकृतवीर्यवराधिपस्य - चञ्चत्** = शोभमानम्, चरित्रम् = कर्म वा, यस्य सः, **चञ्चच्चरित्रः** = चमत्कारमयचरितः, चासौ **कृतवीर्यः**= कृतवीर्यनामा राजा, स एव **वरः** = उत्तमः, **अधिपः**= स्वामी, **तस्य** = चमत्कृतिमय-शीलसम्पन्नकृतवीर्यनरेशस्य, **अञ्चितचारुपक्षः - अञ्चितः** = अध्गीकृतः, **चारुः**= मनोहरः, **पक्षः**= पक्षतिमूलम्, **चेतश्चकोरशिशुः- चकोरस्य** = जीवञ्जीवस्य, **शिशुः**= अर्भकः, **चेत एव** = चित्तमेव, जीवञ्जीवबालक इत्यर्थः, **आशु** = शीघ्रम्, **अमाद्यत्**= हर्षितमभूत्। यथा द्विजाधिपाच्चन्द्राद् विनिःसृतं निर्मलं पीयूषं पीत्वा चकोरशिशुर्माद्यति तथैव कृतवीर्यचित्तममाद्यदित्यर्थः । अत्र वाग्व्याजतोऽमृतं पीत्वेति कथने व्याजशब्द-प्रयोगादपह्नुतिः । उक्तञ्च - **'प्रकृतं यन्निषिध्याऽन्यत् साध्यते सा त्वपह्नुतिः ।'** (का.प्र., उ. १०, सू. १४७, श्लो. ९५)॥२१॥

दिव्यलक्ष्मी - द्विजराज दत्तात्रेयको वाणीका माध्यमबाट प्रकट भएको र सुन्दर वर्णहरूले सुहाएको वचनामृत सानन्द पान गरेपछि चमत्कारपूर्ण चरित्रका धनी कृतवीर्य राजाको सुन्दर विचारद्वारा आलोकित चित्तरूपी चखेवा अत्यन्तै आनन्दित भयो ॥२१॥

त्रिशक्ति - चन्द्रमाबाट प्रवाहित हुने निर्मल चाँदनीरूप अमृतपान गरेपछि चखेवाका बच्चाहरू रमाएझैं दत्तात्रेयको मुखारविन्दबाट प्रकट भएको सुन्दर अक्षरद्वारा सुहाएको वचनामृत पान गरी राजा कृतवीर्यको मन पनि अत्यन्त आनन्दित भयो ।

आत्रेय एष धरणीसुरराज एव
दत्तो न चेदिह कथं सकलं कलेशः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्योदितं न च सुधा यदि चामृतस्य
प्राप्तिः कथं कथय तत्र च पार्थिवेऽभूत् ।।२२।।

– अपह्नुतिः

अन्वयः – एष धरणीसुरराजः, आत्रेयः, दत्तः, कलेशः, एव, यदि, तस्य, सकलम्, उदितम्, सुधा, न, चेत्, कथय, तत्र पार्थिवे, अमृतस्य, प्राप्तिः, कथम्, अभूत् ।

चूडामणिः – एषः = समक्षे विराजमानो भूत्वा उपदेशप्रदाननिरतः, **धरणीसुरराजः**- **धरण्याः** = अवन्याः, **सुराः** = ब्राह्मणाः, तेषां **राजा** = श्रेष्ठ इति, भूसुरमणिरित्यर्थः, **आत्रेयः** – अत्रेरपत्यं पुमान्, **आत्रेयः** = अत्रिनन्दनः, **दत्तः** = दत्तात्रेयः, **कलेश एव** = चन्द्रमा एव, **यदि** = चेत्, **तस्य** = दत्तात्रेयस्य, **सकलम्** = सम्पूर्णम्, कलया सहितं वा, **उदितम्** = कथनम्, **सुधा** = अमृतम्, **न चेत्** = न स्यात्, **कथय** = वद, **तत्र** = तस्मिन्, **पार्थिवे** = कृतवीर्ये, **अमृतस्य** = पीयूषस्य, **प्राप्तिः**= अवगमः, **कथम्**= केन प्रकारेण, **अभूत्** = अभवत् । अत्रिसूनुत्वेनाऽमृताधारत्वेन च दत्तात्रेयः, षोडशकलाधिपतिश्चन्द्रमा एव वर्तत इति भावः । अत्र ऋषित्वस्यापह्नवनं विधाय चन्द्रत्वसमर्थनादपह्नुतिः ।।२२।।

दिव्यलक्ष्मी – राजा कृतवीर्यलाई वाणीरूप अमृतपान गराउने द्विजराज दत्तात्रेय वास्तवमा कलाका अधिपति चन्द्रमा नै हुन् । यदि ती सकल कलायुक्त चन्द्रमा हुँदैनथे र तिनको वचन अमृत हुँदैनथ्यो भने राजा कृतवीर्यले कसरी अमृतपानको आनन्द प्राप्त गरे त ? त्यसकारण महर्षि दत्तात्रेय चन्द्रमा नै हुन् ।।२२।।

कार्तवीर्यराज्याभिषेकवर्णनम् –

श्रुत्वा गुरोर्गिरमिमां मनसोऽनुकूलां
पुत्रं जयन्तमभिषेक्तुमना महीन्द्रः ।
उत्तिष्ठति स्म सदसो विबुधानुयातः
सार्द्धं शिवैरपि मरुद्भिरसौ तले द्योः ।।२३।।

– समासोक्तिः

अन्वयः – मनसः, अनुकूलाम्, गुरोः, इमाम्, गिरम्, श्रुत्वा, जयन्तम्, पुत्रम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिषेक्तुमना, महीन्द्रः, द्योः, तले, शिवैः, मरुद्भिः, अपि, सार्धम्, विबुधानुयातः, (सन्), सदसः, उत्तिष्ठति स्म ।

चूडामणिः - मनसः = चेतसः, **अनुकूलाम्** = प्रियाम्, **गुरोः** = दत्तात्रेयस्य, **इमाम्** = पूर्वोक्ताम्, **गिरम्** = वाणीम्, **श्रुत्वा** = आकर्ण्य, **जयन्तम्** = प्रतापेन शौर्येण च सर्वत्र विजयशीलम्, **पुत्रम्** = कार्तवीर्यम्, **अभिषेक्तुमनाः** = राज्याभिषेकेण सिंहासनासीनं चिकीर्षुः, **असौ** = एष, **महीन्द्रः** = धरणीपाकशासनः, कृतवीर्यः, **द्योः** = दिवः, **तले** = नीचैः स्थिते, पृथिवीतले, **शिवैः** = मङ्गलजनकैः, **मरुद्भिः**= मारुतैः, **सार्धम्** = सह, अर्थात् शुभशकुनमये समये, **विबुधानुयातः - विबुधैः** = विद्वद्भिः, **अनुयातः** = अनुसृतः, (सन्), **सदसः** = सभायाः, **उत्तिष्ठति स्म** = उदतिष्ठत् । यथाऽत्र कृतवीर्यपरोऽर्थः प्रतिपादितस्तथैव विशेषणबलादिन्द्रपरोऽर्थोऽपि ज्ञातुं शक्यते । गुरोः, जयन्तम्, महीन्द्रः, विबुधानुयातः, शिवैः, मरुद्भिरित्यादीनि पदानीन्द्रपरकार्थबोधनेऽपि हेतुभूतानीति समासोक्तिरलङ्कारः । उक्तञ्च - '**परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः** ।' (का.प्र., उ. १०, सू. १४९, श्लो. ९६) ।।२३।।

दिव्यलक्ष्मी - गुरुका मुखबाट आफ्नो मनको अनुकूल मीठो वचन सुनेपछि पृथिवीका स्वामी राजा कृतवीर्य आफ्ना विजयी छोरा कार्तवीर्यको राज्याभिषेक सम्पन्न गर्ने उद्देश्यले विद्वान्हरूलाई अघि लगाएर पृथिवीतलमा मङ्गलमय समयको सूचना दिने मन्द-मन्द पवनका झोंक्का अनुभव गर्दै सभाबाट उठे । जयन्तनामक पुत्रको अभिषेक सम्पन्न गराउन इन्द्र महाराज देवताहरूलाई अघि लगाएर मरुद्गणका साथ स्वर्गराज्यको अभिषेक समारोहमा भाग लिन सहभागी भएझैं राजा कृतवीर्य पनि आफ्ना छोरा कार्तवीर्यको राज्याभिषेक सम्पन्न गर्न सभाबाट उठेर प्रस्थान गरेका थिए ।।२३।।

भास्वानयं समुदयन्निखिलप्रजानां
दुर्भेद्यमन्धतमसं प्रविदार्य गोभिः ।
सद्धर्मकर्मणि नियोजयितेति भूपो
निश्चित्य चेतसि गृहं प्रविवेश तुष्टः ।।२४।।

\- श्लेषः

अन्वयः - अयम्, समुदयन्, भास्वान्, निखिलप्रजानाम्, दुर्भेद्यम्, अन्धतमसम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोभिः, प्रविदार्यः, सद्धर्मकर्मणि, नियोजयिता, इति, चेतसि, निश्चित्य, तुष्टः, भूपः, गृहम्, प्रविवेश ।

चूडामणिः - (**कार्तवीर्यपक्षे**) **अयम्** = एष, **समुदयन्** = उदीयमानः, **भास्वान्**= प्रतापशाली, कार्तवीर्यार्जुनः, **निखिलप्रजानाम्** = सकलजनानाम्, **दुर्भेद्यम्** = दुःखेन विदारणीयम्, **अन्धतमसम्**= प्रगाढमज्ञानान्धकारम्, **गोभिः** = सद्विद्याभिः, **प्रविदार्य**= विदीर्णं विधाय, **सद्धर्मकर्मणि** = श्रौतधर्मानुकूले कार्ये, **नियोजयिता** = प्रवर्तयिता इति, **चेतसि** = मनसि, **निश्चित्य** = निर्णीय, **तुष्टः** = प्रसन्नः, **भूपः** = कृतवीर्यः, **गृहम्**= गेहम्, **प्रविवेश**= प्राविशत् ।

(**सूर्यपक्षे**) प्रातःकाले, **अयम्** = एषः, **समुदयन्** = उदीयमानः, **भास्वान्**= सूर्यः, **निखिलप्रजानाम्** = सकलजनानाम्, **दुर्भेद्यम्** = दुःखेन भेदनीयम्, **अन्धतमसम्**= गाढमन्धकारम्, **गोभिः** = किरणैः, **प्रविदार्य** = दारयित्वा, **सद्धर्मकर्मणि** = श्रौतधर्मानुकूलसन्ध्यावन्दनादौ, **नियोजयिता** = प्रवर्तयितेति, **चेतसि** = मनसि, **निश्चित्य** = निर्णीय, **तुष्टः** = प्रसन्नः, **भूपः** = कृतवीर्यः, सूर्योपस्थानं सूर्यप्रणामञ्च विधाय, **गृहम्** = राजभवनम्, **प्रविवेश** = प्रविष्ट इति । अत्र भास्वान्, समुदयन्, गोभिरित्यादिपदेष्वर्थद्वयं स्पष्टं प्रतिभातीति श्लेषः । उक्तञ्च - '**श्लेषः स वाक्ये एकस्मिन् यत्राऽनेकार्थता भवेत् ।**' (का.प्र., उ. १०, सू. १४८, श्लो. ९५) ।।२४।।

दिव्यलक्ष्मी - जसरी उदीयमान सूर्यले संसारका नर-नारीहरूका सामु रहेको रात्रिको कालो अन्धकारलाई किरणहरूले चिरेर प्रातःकाल प्रदान गरी तिनलाई धर्म-कर्ममा प्रवर्तित गराउँछन्, त्यसरी नै यिनले पनि आफ्नो ज्ञानको किरणबाट जनजीवनमा व्याप्त भएको अज्ञान र अशिक्षाको कालो अन्धकारलाई चिरेर सबै नरनारीहरूलाई उत्तम धर्म र कर्मका कार्यमा लगाउनेछन् भन्ने निश्चय गरी सन्तुष्ट भएका राजा कृतवीर्य पनि दरबारभित्र प्रवेश गरे ।।२४।।

राज्याभिषेकपदसंस्मृतिचुम्बिचेतो-
वृत्तेरुवाह मृदुतल्पगतस्य निद्रा ।
राज्ञो गमागमविलासवती निशायां
प्रेङ्खोलिताभिनवपार्वणदोलिकाभाम् ।।२५।।

- निदर्शना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - राज्याभिषेकपदसंस्मृतिचुम्बिचेतोवृत्तेः, मृदुतल्पगतस्य, राज्ञः, निशायाम्, गमागमविलासवती, निद्रा, प्रेङ्खोलिताभिनवपार्वणदोलिकाभाम्, उवाह ।

चूडामणिः - राज्याभिषेकपदसंस्मृतिचुम्बिचेतोवृत्तेः - राज्ये अभिषेकः, **राज्याभिषेकः**= सिंहासनारोहणम्, तस्मै, आवश्यकानाम्, **पदानाम्** = वस्तूनाम्, **संस्मृतिम्**= संस्मरणम्, **चुम्बतीति** = स्पृशतीति, **संस्मृतिचुम्बि** = स्मरणशीलम्, यत् **चेतः** = मनः, तस्य **वृत्तिः** = व्यापारः, यस्यास्तीति तस्य, **मृदुतल्पगतस्य - मृदु** = कोमलम्, **तल्पम्** = शय्याम्, **गतः** = प्राप्तः, तस्य, कोमलशय्यामाश्रितस्येत्यर्थः, **राज्ञः** = कृतवीर्यस्य, **निशायाम्** = रात्रौ, **गमागमविलासवती** - गमश्च आगमश्च इति **गमागमौ**= गतागते, **तयोर्विलासः** = क्रीडा, यस्या अस्ति, सा, आगमनगमनक्रीडामयी, **निद्रा**= स्वापः, **प्रेङ्खोलिताभिनवपार्वणदोलिकाभाम् - प्रेङ्खोलितायाः**= इतस्ततो रिङ्गमाणायाः, **अभिनवायाः** = नूतनायाः, **पार्वणदोलिकायाः**- पर्वणि भवा, **पार्वणा**= विशेषपर्वभवा, पार्वणा चासौ **दोलिकेति** = प्रेङ्खेति, तस्याः, विशेषपर्वसु अथवा बालकस्वापकाले प्रयोज्याया दोलायाः, लोके डोला इति प्रसिद्धायाः, **आभा**= कान्तिः, इव आभा यस्यास्ताम्, **उवाह** = दधार । अत्र निर्दशनालङ्कारः । साधारण-धर्मभेदेनोपमानस्योपमेयस्य च प्रयोगे निदर्शना भवति । यस्मादत्रोपमेयभूता निद्रा गमागमविलासवती वर्तते । पुनश्च उपमानभूता दोलिका प्रेङ्खोलिता वर्तते । उक्तञ्च- '.. **निदर्शना । अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः** ।।' (का.प्र., उ.१०, सू. १५०, श्लो. ९६)।।२५।।

दिव्यलक्ष्मी - रातमा कोमल शय्यामा शयन गरिरहेका र मनमा छोराको राज्याभिषेकका लागि चाहिने सरसामान एवं विधिविधानबारे चिन्तन गरिरहेका राजा कार्तवीर्यको निद्रा स्थिर हुन सकेन । ती घरिघरि निदाउँथे र घरिघरि जागिरहेका हुन्थे । विशेष अवसरहरूमा गृहस्थहरूका घरमा रहेका झुलाहरू जसरी यता र उति झुलिरहेका हुन्छन्, त्यसैगरी राजा कृतवीर्यको निद्रा पनि घरि जाने र घरि आउने गरिरहेको थियो ।।२५।।

लब्ध्वापि विस्मृतिमलं तमसोऽन्ववायो
हन्तुं क्षमोऽर्जुनभविष्णुमहोदयन्न ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्राघिष्ठतामुपगतापि नरेन्द्रचित्ते
नैवारुणन्मह इदं हि तमस्विनी सा ।।२६।।

– निदर्शना

अन्वयः – तमसः, अन्ववायः, अलम्, विस्मृतिम्, लब्ध्वापि, अर्जुनभविष्णुमहोदयम्, हन्तुम्, न क्षमः, हि, नरेन्द्रचित्ते, द्राघिष्ठताम्, उपगता, अपि सा, तमस्विनी, इदम्, महः, नैव, अरुणत् ।

चूडामणिः – **तमसः** = अज्ञानस्य, **अन्ववायः** = वंशः (सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ, वंशोऽन्ववायः सन्तानः– इत्यमरः), **अलम्** = पूर्णतया, **विस्मृतिम्** = विस्मरणम्, **लब्ध्वापि**= प्राप्यापि, **अर्जुनभविष्णुमहोदयम्**– **अर्जुनस्य** = कार्तवीर्यस्य, यो **भविष्णुमहोदयः** – **भविष्णुः** = भावी, चासौ **महोदयः** = महती समुन्नतिः, तम्, कार्तवीर्यस्य भविष्यतकालिकं समुदयम् (भूष्णुर्भविष्णुर्भविता– इत्यमरः), **हन्तुम्**= नाशयितुम्, **न क्षमः** = न समर्थः, **हि**= यतः, **नरेन्द्रचित्ते** = कृतवीर्यमनसि, **द्राघिष्ठताम्**= अतिशयेन दीर्घताम् (साधिष्ठद्राघिष्ठ–स्फेष्ठा अतिशये– इत्यमरः), **उपगता** = प्राप्ता, अपि, **सा** = पूर्वोक्ता, **तमस्विनी** = रात्रिः, (निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षणा विभावरीतमस्विन्यौ रजनी यामिनी तमी– इत्यमरः), **इदम्** = एतत्, **महः** = जाज्ज्वल्यमानं ज्ञानज्योतिः, **नैव अरुणत्**= नैव रुरोध । अत्रापि निदर्शना । लक्षणं पूर्ववत् ।।२६।।

दिव्यलक्ष्मी – अन्धकारको लामो पङ्क्तिले बिर्सेर पनि सहस्रार्जुन कार्तवीर्यको भावी उन्नतिलाई रोक्न सक्ने छैन भन्ने किसिमले राजा कृतवीर्यको आत्माको ज्योतिलाई गाढा अन्धकारमा जेलिएको रात्रिले पनि रोक्न सकेन ।।२६।।

कल्पे निदेशमधिगम्य पितुः प्रविष्टो
धीरोऽभिषेकनिलयन्नवमर्जुनोऽथ ।
सप्ताब्धिमुद्रितमहीतलराज्यलक्ष्मी-
पाणिग्रहोचितवरोत्तमवेषभूषः ।।२७।।

– कार्यनिबन्धना अप्रस्तुतप्रशंसा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - अथ, पितुः, कल्पे, निदेशम्, अधिगम्य, सप्ताब्धिमुद्रितमहीतलराज्यलक्ष्मी-पाणिग्रहोचितवरोत्तमवेषभूषः, धीरः, अर्जुनः, नवम्, अभिषेकनिलयम्, प्रविष्टः ।

चूडामणिः - अथ = अनन्तरम्, **पितुः** = कृतवीर्यस्य, **कल्पे** = राज्याभिषेकविधौ (कल्पे विकल्पे कल्पद्रौ संवर्ते ब्रह्मवासरे, शास्त्रे, न्याये, विधौ- इति हेमचन्द्रः), **निदेशम्** = निर्देशनम्, **अधिगम्य** = प्राप्य, **सप्ताब्धिमुद्रितमहीतलराज्यलक्ष्मी-पाणिग्रहोचितवरोत्तमवेषभूषः** - सप्त चामी अब्धयः **सप्ताब्धयः** = सप्तसमुद्राः (क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्तजलधयः - इति श्रीमद्-भागवते ५/१/३३), तैः, **मुद्रितस्य** = परिवेष्टितस्य, **महीतलस्य** = पृथिवीमण्डलस्य, **राज्यलक्ष्म्याः** = राज्यश्रियः, **पाणिग्रहोचितस्य** = वैवाहिकसंस्कारयोग्यस्य, **वरोत्त-मस्य** = उत्तमवरस्य, **वेषभूषा** = अलङ्करणपरिधानादिकं यस्य सः, सप्तसागर-वेष्टितपृथिवीतलराज्यश्रीविवाहसंस्कारयोग्योत्तमवरोचितशृङ्गारसज्जः, **धीरः** = गम्भीरः, **अर्जुनः** = कार्तवीर्यार्जुनः, **नवम्** = नूतनम्, **अभिषेकनिलयम्** = राज्याभिषेक-सम्पादनार्थं निर्मितो **निलयः** = भवनम्, राज्याभिषेकभवनम्, **प्रविष्टः** = प्रविवेश । अत्र कार्यनिबन्धनाऽप्रस्तुतप्रशंसा । उक्तञ्च - '**अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया।**' (का.प्र., उ. १०, सू. १५२, श्लो. ९७)।।२७।।

दिव्यलक्ष्मी - क्षारोद, इक्षुरसोद, सुरोद, घृतोद, क्षीरोद, दधिमण्डोद र शुद्धोद नामक सात सागरद्वारा घेरिएका पृथिवीतलकी राजलक्ष्मीसँग स्वयंवर गर्ने कार्यका लागि उपयोगी उत्तम अलङ्कार एवं वस्त्रको परिधानले सजिएका र धीर एवं गम्भीर स्वभावका कार्तवीर्य आफ्ना पिता कृतवीर्यबाट राज्याभिषेकको विधि सम्पन्न गर्ने कार्यमा संलग्न हुन आदेश पाएपछि नवनिर्मित अभिषेकभवनमा प्रवेश गरे ।।२७।।

तुर्यैर्नदद्भिरतिधीरममन्दभद्रैः
संस्मृष्टभूषितसपद्मकपुष्करैश्च ।
सद्योऽनुपप्लुतगतैः करिभिश्च सौध-
द्वारं समाकुलमभूदथ तत्र काले ।।२८।।

- कारणनिबन्धना अप्रस्तुतप्रशंसा

अन्वयः - अथ, तत्र काले, सौधद्वारम्, अमन्दभद्रैः, तुर्यैः, अतिधीरम्, नदद्भिः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्मृष्टभूषितसपद्मकपुष्करैः, अनुपप्लुतगतैः, करिभिः च, सद्यः, समाकुलम्, अभूत्।

चूडामणिः – अथ= अनन्तरम्, **तत्र काले** = तस्मिन् समये, **सौधद्वारम्**= राजभवन-द्वारप्रान्तम्, **अमन्दभद्रैः – अमन्दम्** = अतितेजस्वि, **भद्रम्** = कल्याणम्, येषान्ते, अमन्दभद्राः, तैः, अर्थादनल्पमङ्गलजनकैः, **तुर्यैः** = मुरजादिभिः, **नदद्भिः** = वाद्यमानैः, **संस्मृष्टभूषितसपद्मकपुष्करैः** – पद्मेन सहितानि, **सपद्मकानि** = कमलसहितानि, **पुष्कराणि** = शुण्डादण्डाः, येषान्ते, सपद्मकपुष्कराः (पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले, व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः–इत्यमरः), **संस्मृष्टाश्च** = कृतस्नानाश्च, **भूषिताश्च** = अलङ्कृताश्च, संस्पृष्टभूषिताश्च ते सपद्मकपुष्करा इति संस्मृष्टभूषित-सपद्मकपुष्कराः, तैः, स्नानादिना शोभितैः, अलङ्करणक्रियया साधितैः, कमलसहित-शुण्डादण्डधारिभिश्च, अथवा पद्मकं बिन्दुजालकमित्यर्थे गृहीते शोधितसाधितसबिन्दु-जालकपुष्करैरित्यर्थः, **अनुपप्लुतगतैः – न उपप्लुतानि** = प्लुतिरहितानि, अनुद्धतानि वा, **गतानि** = गमनानि, येषां तैः, अनुल्लङ्घितगमनैः, धीरगतिभिरित्यर्थः, **करिभिः**= हस्तिभिः, **सौधद्वारम्** = राजभवनद्वारप्रान्तम्, **सद्यः** = शीघ्रम्, **समाकुलम्** = व्याप्तम्, **अभूत्** = अभवत् । अत्र कारणनिबन्धना अप्रस्तुतप्रशंसा ।।२८।।

दिव्यलक्ष्मी – त्यसबेला राजा कृतवीर्यको दरबार परिसरमा मङ्गलमय बाजाको धीर र गम्भीर ध्वनि घन्किरहेको थियो । राम्ररी नुहाएर सिंगारिएका आफ्नो सूँढको टुप्पामा सुन्दर कमल धारण गरिरहेका र आफ्नो गम्भीर गतिले सुहाएका अनेकौं हात्तीहरू राजभवनको मूलढोकामा भरिभराउ थिए ।।२८।।

देवाङ्गनाकरलतापतिताश्च लाजा
मन्दारजाः सुमनसश्च विशुद्धवर्णाः ।
मन्दाकिनीगलितनिर्झरसन्निकाशा
भूमीपतेरधिगृहं युगपन्निपेतुः ।।२९।।

– विशेषनिबन्धना अप्रस्तुतप्रशंसा

अन्वयः – भूमीपतेः, अधिगृहम्, मन्दाकिनीगलितनिर्झरसन्निकाशाः, देवाङ्गना-करलतापतिताः, लाजाः, विशुद्धवर्णाः, मन्दारजाः, सुमनसः, च, युगपत्, निपेतुः ।

चूडामणिः – भूमीपतेः = कृतवीर्यस्य, **अधिगृहम्** = राजभवनं परितः, **मन्दाकिनी-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गलितनिर्झरसन्निकाशाः - **मन्दाकिन्याः** = स्वर्गङ्गायाः, **गलिताः** = पतिताः, ये निर्झराः = झराः, तेषां **सन्निकाशाः** = समानाः, **देवाङ्गनाकरलतापतिताः** - **देवाङ्ग-नानाम्** = स्वर्गसुन्दरीणाम्, **करलताभ्यः** = पाणिवल्लीभ्यः, **पतिताः** = च्युताः, **लाजाः** = भृष्टव्रीहयः, **विशुद्धवर्णाः** = अत्युज्ज्वलस्वरूपाः, **मन्दारजाः** = पारिजात-वृक्षोत्पन्नाः (पारिजातस्तु मन्दारे पारिभद्रे सुरद्रुमे - इति रामाश्रमी), **सुमनसः** = पुष्पाणि, **च** = अपि, **युगपत्** = एकवारमेव, **निपेतुः** = अपतन्। अत्र विशेषनिबन्धना अप्रस्तुतप्रशंसा ।।२९।।

दिव्यलक्ष्मी - आकाशगङ्गाका झरनाझैं उज्ज्वल लावा र पारिजातवृक्षका सुन्दर एवं सेता फूलसमेत देवाङ्गनाका लताजस्ता हातबाट राजभवनका वरिपरि भुइँमा बर्सिएका थिए ।।२९।।

भद्रासनं समधिरुह्य जयाभिषेकं
यातोऽर्ज्जुनस्य तुलनां झगियात्तदानीम् ।
हेमाद्रिश्रृङ्गमधिरुह्य यदा विवस्वान्
सप्तर्षिगाङ्गजलसेचनमाप्नुवीत ।।३०।।

- अतिशयोक्तिः

अन्वयः - भद्रासनम्, समधिरुह्य, जयाभिषेकम्, यातः, अर्जुनस्य, तुलनाम्, यदा, विवस्वान्, हेमाद्रिश्रृङ्गम्, अधिरुह्य, सप्तर्षिगाङ्गजलसेचनम्, आप्नुवीत, तदानीम्, झक्, इयात् ।

चूडामणिः - **भद्रासनम्** = सिंहासनम् (नृपासनं तु यद् भद्रासनं सिंहासनं तु तत्- इत्यमरः), **समधिरुह्य** = आरुह्य, **जयाभिषेकम्** = विजयाभिषेकम्, **यातः**= प्राप्तवतः, **अर्जुनस्य**= कार्तवीर्यस्य, **तुलनाम्** = समानताम्, **यदा** = यस्मिन् समये, **विवस्वान्**= सूर्यः, **हेमाद्रिश्रृङ्गम्**= सुमेरुशिखरम्, **अधिरुह्य** = आरुह्य, **सप्तर्षिगाङ्ग-जलसेचनम्**- गङ्गाया इदमिति **गाङ्गम्** = गङ्गासम्बन्धि, **जलम्** = सलिलम्, तस्य **सेचनम्** = अभिषेचनम्, **सप्तर्षिभिः** = अङ्गिरोमरीचिपुलस्त्यपुलहाऽत्रिक्रतुवशिष्ठैः कृतं भागीरथी-जलसेचनमित्यर्थः, **आप्नुवीत** = प्राप्नुयात्, **तदानीम्** = तस्मिन् समये, **झक्** = झटिति, **इयात्** = प्राप्नुयात् । अत्र अतिशयोक्तिरलङ्कारः । उक्तञ्च- **'निगीर्या-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यवसानं तु प्रकृतस्य परेण यत् । प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।। कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः । विज्ञेयाऽतिशयोक्तिः सा... ।।' (का.प्र., उ.१०, सू. १५४, श्लो. ९९-१००)।।३०।।

दिव्यलक्ष्मी – सिंहासनमा आरोहण गरेपछि विद्वान् आचार्यहरूका हातबाट कलशमा भरिएका गङ्गा आदि नदी र पवित्र कुण्डबाट ल्याइएका जलले अभिषेक गरिँदा सहस्रार्जुन कार्तवीर्यको जुन शोभा देखियो त्यसको तुलना सुमेरुपर्वतको चुचुरोमा उदाएका सूर्यमाथि सप्तर्षिहरूका हातबाट गङ्गाजलको अभिषेक गरिँदा प्रकट हुने शोभासँगमात्र गर्न सकिन्छ ।।३०।।

राजन्यशेखरमणिर्यदुतुङ्गवंश-
भ्राजिष्णुमौक्तिकफलं द्विजदेवशाखी ।
शौर्याद्यगण्यगुणरत्नसुमेरुरुर्वी-
कान्तानुकूलदयितो निरसेचि विप्रैः ।।३१।।

– अतिशयोक्तिः

अन्वयः – विप्रैः, राजन्यशेखरमणिः, यदुतुङ्गवंशभ्राजिष्णुमौक्तिकफलम्, द्विजदेवशाखी, शौर्याद्यगण्यगुणरत्नसुमेरुः, उर्वीकान्तानुकूलदयितः, (सः), निरसेचि ।

चूडामणिः – विप्रैः – विप्रन्ति पूरयन्तीति, विप्राः = ब्राह्मणाः, तैः, **राजन्यशेखरमणिः- राजन्यानाम्** = क्षत्रियाणाम्, **शेखरमणिः** = शिरोमणिः, **यदुतुङ्गवंशभ्राजिष्णु- मौक्तिकफलम्** – **यदूनाम्** = यादवानाम्, **तुङ्गः** = अत्युच्छ्रितः, **वंशः** = कुलम्, तस्मिन्, **भ्राजिष्णु** = चमत्कृतम्, **मौक्तिकफलम्** = मौक्तिकम्, यादवोच्चकुल- देदीप्यमानमुक्तामणिसमान इत्यर्थः, **द्विजदेवशाखी** – **द्विजाश्च** = ब्राह्मणाश्च, **देवाश्च**= सुराश्च इति द्विजदेवाः, त एव **शाखाः** = काण्डानि यस्य सः, सुरब्राह्मणशाखायुत इत्यर्थः, **शौर्याद्यगण्यगुणरत्नसुमेरुः** – **शौर्यादीनि**= पराक्रमादीनि, यानि, **अगण्यानि**= गणयितुमशक्यानि, **गुणरत्नानि** = उत्तमगुणा इति शौर्याद्यगण्यगुणरत्नानि, तेषां **सुमेरुः**= मेरुपर्वतः, पराक्रमदयादाक्षिण्यादिगुणरत्नविशेषाश्रयत्वात् सुमेरुकल्प इत्यर्थः, **उर्वीकान्तानुकूलदयितः** – **उर्वी एव** = पृथिवी एव, **कान्ता** = धर्मपत्नी, इति उर्वीकान्ता, तस्याः, **अनुकूलः**= दक्षिणः, **दयितः** = प्रियः, पृथिवीरूपायाः कान्ताया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुकूलः पतिरित्यर्थः, सः = कार्तवीर्यः, निरसेचि = अभिषिक्तः । अत्र कार्तवीर्य-रूपोपमेयस्य निगरणाद् निगीर्णोपमेयातिशयोक्तिः ।।३१।।

दिव्यलक्ष्मी - विद्वान् ब्राह्मणहरूले क्षत्रिय कुलका शिरोमणि, अत्यन्त उत्तम यदुको वंशवृक्षमा उत्पन्न भएका, वंशका मोतीजस्तै भई सुहाएका, देवता र ब्राह्मणरूप विशाल शाखाको आड लिएर धर्म र संस्कृतिको संरक्षण एवं संवर्धन गर्ने शौर्य, पराक्रम, दानशीलता, दया, न्याय र विवेकजस्ता गनेरै नसकिने आकर्षक गुणरूप रत्नहरूका आश्रय भएकाले सुमेरुझैं मानिएका र पृथिवीरूप पत्नीका अनुकूल एवं प्यारा पति सहस्रार्जुन कार्तवीर्यको राज्याभिषेक सम्पन्न गरे ।।३१।।

उत्तुङ्गरोहणसुश्रृङ्गगतो विवस्वान्
धीरन्नदद्भिरनरालमरालपोतैः ।
आशंसितोऽमरधुनीविमलप्रवाह-
प्रस्यन्दिवर्तुलशुचिं शिरसा बभार ।।३२।।

- अतिशयोक्तिः

अन्वयः - धीरम्, नदद्भिः, अनरालमरालपोतैः, उतुङ्गरोहणसुश्रृङ्गगतः, विवस्वान्, आशंसितः (एषः), शिरसा, अमरधुनीविमलप्रवाहप्रस्यन्दिवर्तुलशुचिम्, बभार ।

चूडामणिः - धीरम् = गम्भीरम्, **नदद्भिः** = शब्दायमानैः, **अनरालमरालपोतैः**- न अराला इति **अनरालाः** = वक्रतारहिताः सरलाः, अनरालाश्च ते **मरालपोताः** = हंसशिशवः, तैः, सरलहंसशिशुभिरित्यर्थः, **उत्तुङ्गरोहणसुश्रृङ्गगतः - उत्तुङ्गस्य**= अत्युच्छ्रितस्य, **रोहणस्य** = पर्वतस्य, **शोभनम्** = सुन्दरम्, **श्रृङ्गम्** = शिखरम्, इति उत्तुङ्गरोहणसुश्रृङ्गम्, **गतः** = प्राप्तः, **विवस्वान्** = सूर्यः, अयमस्तीति **आशंसितः**= सम्भावितः, एष कार्तवीर्यः, **शिरसा** = उत्तमाङ्गेन, **अमरधुनीविमलप्रवाहप्रस्यन्दि-वर्तुलशुचिम् - अमरधुन्याः** = स्वर्गङ्गायाः, **विमलः** = निर्मलः, **प्रवाहः** = वेगः, तस्य **प्रस्यन्दिनी** = निष्पादयित्री, **वर्तुला** = गोलाकारा, **शुचिः** = कान्तिः, इति ताम्, **बभार** = धृतवान् । अमरधुनीनिर्मलप्रवाहस्नातः सूर्य इव स राजा गङ्गादिजलैः स्नातो नितरां शुशुभे इति तात्पर्यम् । निगीर्णोपमेयातिशयोक्तिरत्रापि ।।३२।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - राज्याभिषेकको समयमा धीर–गम्भीर ध्वनि गर्ने सरल एवं स्वच्छ हृदयका रजहाँसका शिशुहरूद्वारा 'अग्लो पर्वतको चुचुरोमा बिम्बरूपमा टल्किने ती पुरुष साक्षात् सूर्य नै हुन् कि' भनी आशंसा गरिएका कार्तवीर्यार्जुनले ब्राह्मणहरूद्वारा कलशको जल खन्याई अभिषेक गरिँदा शिरमा आकाशगङ्गाको निर्मल प्रवाहमा नुहाएपछि प्रकट हुने सूर्यबिम्बसमान गोलाकार र चहकिलो कान्ति धारण गरेका थिए ।।३२।।

दत्तादिभिर्द्विजवरैरभिषेकमन्त्रैः
सिक्ताऽस्य वेदिरभिशुष्यति नैव यावत् ।
तावद् विपक्षगणलक्षसुशुष्ककक्षा-
भक्ष्यप्रतापशुचिरस्य दिशो जगाम ।।३३।।

– अतिशयोक्तिः

अन्वयः - दत्तादिभिः, द्विजवरैः, अभिषेकमन्त्रैः, सिक्ता, अस्य, वेदिः, यावत्, नैव, अभिशुष्यति, तावद्, अस्य, विपक्षगणलक्षसुशुष्ककक्षाभक्ष्यप्रतापशुचिः, दिशः, जगाम।

चूडामणिः - दत्तादिभिः = दत्तात्रेयप्रभृतिभिः, **द्विजवरैः** - जन्मना संस्कारेण चेति द्वाभ्यां जायन्त इति **द्विजाः** = ब्राह्मणाः, तेषु **वराः** = श्रेष्ठाः, तैः, **अभिषेकमन्त्रैः**- अभिषिच्यतेऽस्मिन्निति **अभिषेकः** = अभिषेचनम्, तस्य **मन्त्राः** = मनवः, राज्याभिषेक-मन्त्राः, तैः, **सिक्ता** = जलाभिषिक्ता, **वेदिः** = यज्ञवेदिः, **यावत्** = यावत्कालपर्यन्तम्, **नैव अभिशुष्यति** = नैव शुष्कतां याति, **तावत्** = तावति काले, एव, **अस्य** = जयाभिषिक्तस्य कार्तवीर्यस्य, **विपक्षगणलक्षसुशुष्ककक्षाभक्षप्रतापशुचिः** - विपक्षाणां गणः, **विपक्षगणः** = शत्रुसमूहः, तस्य **लक्षम्** = लक्षसङ्ख्या, तदेव **सुशुष्कम्** = नीरसम्, **कक्षाभक्ष्यम्** = जीर्णतृणरूपभक्षणीयम्, (कक्षा स्यादन्तरीपस्य पश्चादञ्चलपल्लवे, स्पर्शापदे ना दोर्मूलकक्षवीरुत्तृणेषु च- इति मेदिनी) तस्मिन् **प्रतापेन** = पराक्रमेण, जाता **शुचिः** = कान्तिः, **दिशः** = पूर्वादिदिशः, **जगाम** = अगमत् । अतिशयोक्तिरलङ्कारः ।।३३।।

दिव्यलक्ष्मी - राज्याभिषेकको अवसरमा दत्तात्रेय आदि उत्तम ब्रह्मर्षिहरूद्वारा मन्त्रहरू पढी अभिषेक गरिँदा भुइँमा खसेको जलबाट भिजेको अभिषेकमण्डपको वेदी सुकेर ओभानो हुन नपाउँदै शत्रुरूप सुकेको वनलाई खरानी तुल्याउन सक्ने कार्तवीर्य राजाको प्रतापको अग्नि चारैतिर फैलियो ।।३३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्षाभिषेकमधिगम्य विदीप्यतेऽर्कः
सिन्ध्वम्भसैव परिभाति च वाडवाग्निः।
विद्योतते घनरसेन हि वैद्युतोऽग्नी
राज्याभिषेकमधिगम्य बभौतमां सः ।।३४।।

- प्रतिवस्तूपमा

अन्वयः - अर्कः, वर्षाभिषेकम्, अधिगम्य, विदीप्यते, वाडवाग्निः, च, सिन्ध्वम्भसा, एव, परिभाति, हि, वैद्युतः, अग्निः, घनरसेन, विद्योतते, सः, राज्याभिषेकम्, अधिगम्य, बभौतमाम् ।

चूडामणिः - **अर्कः** = सूर्यः, **वर्षाभिषेकम्** = प्रावृषि अभिषेचनम्, **अधिगम्य**= प्राप्य, **विदीप्यते**= प्रकाशते, **वाडवाग्निः** = वडवानलः, च, **सिन्ध्वम्भसा- सिन्धाः**= सागरस्य, **अम्भः** = जलम्, तेन, सागरजलेन, एव, **परिभाति** = शोभते, **हि** = निश्चयेन, **वैद्युतः** = शाम्पेयः, **अग्निः**= अनलः, **घनरसेन** = मेघपुष्पेण अथवा वर्षाजलेन, **विद्योतते** = शोभते, **सः** = कार्तवीर्यः, **राज्याभिषेकम्** = जयाभिषेकम्, **अधिगम्य** = प्राप्य, **बभौतमाम्** = नितरां शुशुभे । अत्र प्रतिवस्तूपमालङ्कारः । उक्तञ्च - '....... **प्रतिवस्तूपमा तु सा । सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।।'** (का.प्र., उ. १०, सू. १५५, श्लो. १००-१०१)।।३४।।

दिव्यलक्ष्मी - वर्षाऋतुमा निरन्तर आकाशबाट जलको वर्षापछि सूर्य अझ तेजिला देखिएझैं महासागरको नीलो जलराशिभित्र वडवानल सुहाएझैं र बादलबाट भुइँमा खस्ने मुसलधारे पानीका साथ आकाशको बिजुली चम्किएझैं राजा कार्तवीर्य पनि राज्याभिषेकको जलधाराद्वारा अभिषेक गरिँदा अत्यन्त सुहाएका थिए ।।३४।।

भद्रासनोपरिगतं कृतवीर्यसूनुं
दृष्ट्वैव भीतिरतिदूरमगात् प्रजानाम् ।
पूर्वाचलाग्रशिखरस्थितमंशुमन्तं
सम्पश्यतां भवति नो तमसो विबाधा ।।३५।।

- दृष्टान्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - जनानाम्, भीतिः, भद्रासनोपरिगतम्, कृतवीर्यसूनुम्, दृष्ट्वा, एव, अतिदूरम्, अगात्, पूर्वाचलाग्रशिखरस्थितम्, अंशुमन्तम्, सम्पश्यताम्, तमसः, विबाधा, नो, भवति।

चूडामणिः - **जनानाम्** = प्रजानाम्, **भीतिः** = भयम्, **भद्रासनोपरिगतम्** = सिंहासनोपरि विराजमानम्, **कृतवीर्यसूनुम्** = कार्तवीर्यार्जुनम्, **दृष्ट्वा एव** = विलोक्य एव, **अतिदूरम्** = दूरतरदिशः, **अगात्** = अगच्छत्, **पूर्वाचलाग्रशिखरस्थितम्** - पूर्वस्थो यो अचलः, **पूर्वाचलः** = उदयाचलः, तस्य **अग्रम्** = प्रत्यग्रमिति पूर्वाचलाग्रम्, तस्य **शिखरे** = शृङ्गे, तिष्ठतीति, तम्, **अंशुमन्तम्** = विवस्वन्तम्, **सम्पश्यताम्** = विलोकयताम्, **तमसः** = अन्धकारस्य, **विबाधा** = व्यवधानम्, **नो भवति** = न भवति । अत्र दृष्टान्तालङ्कारः । उक्तञ्च - '**दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्।**' (का.प्र., उ. १०, सू. १५६, श्लो. १०१)॥३५॥

दिव्यलक्ष्मी- राजसिंहासनमा विराजमान कृतवीर्यका छोरा सहस्रार्जुनलाई देख्नासाथ जनताको मनमा रहेको अशान्ति र असुरक्षाको डर हरायो । उदयाचलको शिखरमा उदाइरहेका सूर्यलाई देख्ने मानिसहरूले अन्धकारको बाधा व्यहोर्नु पर्दैन ॥३५॥

वर्षन्ति तत्र विबुधाः स्म जलं सुमन्त्रैः
पूर्वं ततश्च कनकानि बहूनि तेषु ।
धाराधरा जगति तत्र च जीवनानि
तद्वैरिराजवनिताक्षिदितानि च द्राक् ॥३६॥

- दीपकम्

अन्वयः - तत्र, पूर्वम्, विबुधाः, सुमन्त्रैः, जलम्, वर्षन्ति स्म, ततः, च, तेषु, बहूनि, कनकानि (वर्षन्ति स्म), धाराधराः, जगति, तत्र, च, जीवनानि (वर्षन्ति स्म), द्राक्, तद्वैरिराजवनिताक्षिदितानि, (जीवनानि), च (वर्षन्ति स्म) ।

चूडामणिः - **तत्र** = कार्तवीर्ये, **पूर्वम्** = प्रथमम्, **विबुधाः** = विद्वांसः, **सुमन्त्रैः**= शोभनैर्वैदिकमन्त्रैः, **जलम्** = तीर्थजलम्, **वर्षन्ति स्म** = अवर्षन्, **ततश्च** = जलाभिषेकानन्तरञ्च, **तेषु**= ब्राह्मणेषु, **बहूनि** = अनेकानि, **कनकानि** = स्वर्णानि, वर्षन्ति स्म, **धाराधराः** = मेघाः, **जगति** = संसारे, **तत्र च** = कार्तवीर्ये च, **जीवनानि** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घनपुष्पाणि, वर्षन्ति स्म, **द्राक्** = द्रुतम् च, **तद्वैरिराजवनिताक्षिदितानि** - **तस्य** = कार्तवीर्यस्य, **वैरिणः** = शत्रवः, **ये राजानः** = नृपाः, तेषाम्, **वनितानाम्**= रमणीनाम्, **अक्षिभिः** = नेत्रैः, **दितानि**= भूमौ पातितानि, **जीवनानि**= अश्रूणि च, वर्षन्ति स्म। अत्र दीपकालङ्कारः । उक्तञ्च - '**सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् । सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ।।**' (का.प्र., उ. १०, सू. १५७, श्लो. १०२)।।३६।।

दिव्यलक्ष्मी - पहिले दत्तात्रेय आदि विद्वान्हरूले उत्तम मन्त्रहरूको उच्चारण गर्दै पवित्र जल बर्साएर कार्तवीर्यको अभिषेक गरे । त्यसपछि राजा कार्तवीर्यले पनि अनगिन्ती सुवर्णमुद्रा बर्साएर विद्वान्हरूमाथि सुवर्णको अभिषेक गरे । त्यस मङ्गलमय अवसरमा भावी मङ्गलको सूचना दिन बादलले पनि जल वर्षा गरे । उक्त अनेकौं प्रकारका वर्षाहरूका साथै 'कार्तवीर्यको राज्याभिषेक भएपछि युद्धमा हाम्रा पतिहरूको के गति हुने हो' भनी चिन्ता मानिरहेका कार्तवीर्यका शत्रुराजाहरूका सुन्दरीहरूका आँखाले पनि आँसुको वर्षा गरे ।।३६।।

प्राप्याभिषेकमयमार्पयत द्विजेभ्यो
गोत्राद्वयं परिदधे वसनानि सम्यक् ।
सद्धीरभूषणगणैरलमकृत स्वं
गात्रं ददर्श विमले मुकुरेऽपि वेषम् ।।३७।।

- दीपकभेदः

अन्वयः - अयम्, अभिषेकम्, प्राप्य, द्विजेभ्यः, गोत्राद्वयम्, आर्पयत, सम्यक् (गोत्राद्वयम्), वसनानि, परिदधे, स्वम्, (गोत्राद्वयम्), गात्रम्, सद्धीरभूषणगणैः, अलमकृत, विमले, मुकुरे अपि, (गोत्राद्वयम्), वेषम्, ददर्श ।

चूडामणिः - **अयम्** = एषः, **अभिषेकम्** = राज्याभिषेकम्, **प्राप्य** = लब्ध्वा, **द्विजेभ्यः** = ब्राह्मणेभ्यः, दक्षिणारूपेण, **गोत्राद्वयम्** = गोसमूहद्वयम्, **आर्पयत** = अर्पितवान्, **सम्यक्** = शोभनरीत्या, स्वयम्, **गोत्राद्वयम्** - गोत्रे अद्वयम्, इति **गोत्राद्वयम्**= निजवंशेऽद्वितीयं राजपदमेव, **वसनानि** = वस्त्राणि विधाय, **परिदधे**= धृतवान्, **स्वम्** = स्वकीयम्, **गोत्राद्वयम्** = कुले विशिष्टम्, **गात्रम्** = शरीरम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सद्धीरभूषणगणैः – **सताम्** = उत्तमानाम्, हीराणाम् = वज्राणाम्, यानि **भूषणानि**= अलङ्करणानि, **तेषां गणाः** = समूहाः, तैः, **अलमकृत**= अलङ्कृतवान्, अथवा सताम्, **धीराणाम्** = सज्जनानाम्, **भूषणगुणैः** = सौजन्यादिगुणैः, अलञ्चकारेत्यर्थः, **विमले** = निर्मले, **मुकुरे** = दर्पणे, अपि, **गोत्राद्वयम्** = पृथिव्यामद्वितीयं निजम्, **वेषम्** = परिधानालङ्करणविशिष्टं नेपथ्यम् (आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम्- इत्यमरः), **ददर्श** = दृष्टवान् । दीपकालङ्कारः ।।३७।।

दिव्यलक्ष्मी – सहस्रार्जुनले राज्याभिषेक प्राप्त गरेपछि ब्राह्मणहरूलाई दुई बथान गाई दान गरे । उनले पृथिवीमा अद्वितीय राजाको रूपमा उदाएका कारण उज्ज्वल कीर्तिलाई वस्त्रका रूपमा धारण गरे । फेरि तिनले सौन्दर्यका कारण पृथिवीमा कसैसँग तुलना गर्न नसकिने आफ्नो शरीरलाई हीरा आदि जडित अलङ्कारद्वारा सजाए अथवा सज्जनोचित गुणरत्नद्वारा अलङ्कृत तुल्याए र निर्मल दर्पणमा आफ्नो कुलमा आफूबाहेक अरूले पाउन नसकेको राजोचित वेषभूषाको राम्ररी अवलोकन गरे ।।३७।।

राज्याभिषेकमदसीयमवेत्य चित्तै-
र्नेत्रैर्वचोभिरतिनूत्नमणीखनीभिः ।
दैत्यद्रुहां हरिणशावकलोचनानां
विद्वज्जनस्य सुतरामुदलासि भूमेः ।।३८।।

– तुल्ययोगिता

अन्वयः – अदसीयम्, राज्याभिषेकम्, अवेत्य, दैत्यद्रुहाम्, चित्तैः, उदलासि, हरिण- शावकलोचनानाम्, नेत्रैः, (उदलासि), विद्वज्जनस्य, वचोभिः, (उदलासि), भूमेः, नूत्नमणीखनीभिः, सुतराम्, (उदलासि) ।

चूडामणिः – **अदसीयम्** = कार्तवीर्यार्जुनीयम्, **राज्याभिषेकम्** = सिंहासनारोहणम्, **अवेत्य** = ज्ञात्वा, **दैत्यद्रुहाम्** = देवानाम्, **चित्तैः** = मानसैः, **सुतराम्** = अत्यन्तम्, **उदलासि** = उल्लसितम्, **हरिणशावकलोचनानाम्** – **हरिणशावकानाम्** = मृगार्भ- काणाम्, **लोचनानि** = नेत्राणि, इव लोचनानि यासां तासाम्, मृगनयनीनाम्, **नेत्रैः**= नयनैः, सुतराम्, **उदलासि** = उल्लसितम्, **विद्वज्जनस्य** = बुधमण्डलस्य, **वचोभिः**= वचनैः, सुतराम्, **उदलासि** = उल्लसितम्, **भूमेः** = पृथिव्याः, **नूत्नमणीखनीभिः**-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मणीनाम् = रत्नानाम्, **खन्यः** = आकराः, इति मणीखन्यः, **नूत्नाश्च** = नवीनाश्च, ता इति नूत्नमणीखन्यः, ताभिः, सुतराम्, **उदलासि** = उल्लसितम् । तुल्ययोगिता-ऽलङ्कारः । उक्तञ्च - **'नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ।।'** (का.प्र., उ.१०, सू. २५९, श्लो. १०३)।।३८।।

दिव्यलक्ष्मी - कार्तवीर्यको विधिवत् राज्याभिषेक सम्पन्न भएको थाहा पाएर देवताहरूको चित्त आनन्दित भयो, मृगनयनी सुन्दरीहरूका आँखा चहकिला देखिए, विद्वान्हरूका वचन चमत्कारपूर्ण भए र 'अब हामीहरूको समुचित उपयोग गरिनेछ' भनी पृथिवीमा फैलिएका नयाँ नयाँ मणिमाणिक्यका खानीहरू पनि हर्षित भए ।।३८।।

आसाद्य राज्यमयमिन्दुरिवातिशीतै-
रानन्दयन् जनमनांसि करैः सदैव ।
अस्पर्शि नैव तमसा न कलङ्कलेशं
पस्पर्श सर्वशिरसि स्थितिमाप पूर्णः ।।३९।।

- व्यतिरेकः

अन्वयः - राज्यम्, आसाद्य, इन्दुः, इव, अतिशीतैः, करैः, सदा, एव, जनमनांसि, आनन्दयन्, अयम्, तमसा, न एव, अस्पर्शि, कलङ्कलेशम्, न पस्पर्श, पूर्णः (सन्), सर्वशिरसि, स्थितिम्, आप ।

चूडामणिः - **राज्यम्** = शासनाधिकारम्, **आसाद्य** = लब्ध्वा, **इन्दुः** = चन्द्रमाः, **इव** = यथा, **अतिशीतैः** = अतिशीतलताप्रदायकैः, **करैः** = राजकरैः, बलिभिरित्यर्थः, **सदा एव**= निरन्तरम्, **जनमनांसि** = प्रजामानसानि, **आनन्दयन्** = सुखयन्, **अयम्**= राजा कार्तवीर्यः, **तमसा** = अज्ञानेन, न एव, **अस्पर्शि** = स्पृष्टः, **कलङ्कलेशम्** = लेशमात्रमपि दूषणम्, **न पस्पर्श** = न स्पृष्टवान्, **पूर्णः** = निखिलगुणगणैः सम्पत्तिभिश्च परिपूर्णः, सन्, **सर्वशिरसि** = सर्वोपरि, **स्थितिम्** = स्थानम्, **आप** = प्राप । चन्द्रमा निजैः शीतलैर्गुणैर्जनानां मनांसि रञ्जयति, एष राजा अपि निजैरुदात्तैः कर्मभिर्जनमनांसि रञ्जयति, चन्द्रमा निजमण्डले लग्नेन कलङ्केन कलङ्कितो वर्तते, परन्तु एष राजा कलङ्कहीनो वर्तते । चन्द्रमाः कृष्णपक्षे क्षीणो भवति, परन्तु राजा कार्तवीर्यः सर्वदैव सद्गुणैरैश्वर्यैश्च परिपूर्णो वर्तत इत्यस्य विशेषता । अत्र कार्तवीर्यस्य गुणाधिक्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरूपणाद् व्यतिरेकालङ्कारः। उक्तञ्च- **आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा व्यतिरेकः।** (सा.द. १०/५२)॥३९॥

दिव्यलक्ष्मी - मोक्षको इच्छा गर्ने आफ्ना पिता कृतवीर्यबाट राज्य प्राप्त गरेपछि चन्द्रमाले शीतल किरण फैलाएर संसारलाई आनन्द प्रदान गरेझैं सहस्रार्जुनले पनि जनतालाई अत्यन्त आनन्दप्रदान गर्ने सजिलो करव्यवस्था बाँधेर ती सबैको मन खुसी तुल्याए । कार्तवीर्यलाई अज्ञानको अन्धकारले कहिल्यै छुन सकेन । तिनले आफूमाथि लेशमात्र पनि कलङ्क लाग्ने काम गरेनन् । सबैलाई आश्रय दिने प्यारा अभिभावक बनेर तिनले जनताको हृदयमा पूर्णरूपमा आसन जमाए ॥३९॥

त्रिशक्ति - यस पद्यमा आकाशराज्यमा चम्किएर चन्द्रमाले आफ्ना शीतल किरणद्वारा जनसमूहलाई आनन्द प्रदान गर्ने भएता पनि पूर्णिमा तिथिमा ग्रहणद्वारा ढाकिने, आफ्नो बिम्बमा सधैं कलङ्क धारण गर्ने र कृष्णपक्षमा कलाको क्षय हुँदा अपूर्ण अवस्थामा रहनुपर्ने भएकाले चन्द्रमाको गुणभन्दा सधैं एकनास रहने र निष्कलङ्क चरित्र भएका राजा कार्तवीर्यको गुण गरिमापूर्ण छ भन्ने भाव व्यक्त भएकाले उल्लेखनामक अलङ्कार सिद्ध भएको छ ।

आसन्नृपा नलभगीरथनाहुषाद्याः
पूर्वं समग्रगुणगौरवमादधानाः ।
किं ब्रूमहेऽथ नृपताविह राजमाने
तानेवमूचुरनुसद्म जनास्तदानीम् ॥४०॥

– आक्षेपः

अन्वयः - पूर्वम्, समस्तगुणगौरवम्, आदधानाः, नलभगीरथनाहुषाद्याः, नृपाः, आसन्, इह, नृपतौ, राजमाने, अथ, तान्, किम्, ब्रूमहे, एवम्, जनाः, तदानीम्, अनुसद्म, ऊचुः ।

चूडामणिः - पूर्वम् = प्राचीनसमये, **समग्रगुणगौरवम् - समग्राणाम्** = सम्पूर्णानाम्, **गुणानाम्** = दयादाक्षिण्यादीनाम्, **गौरवम्** = गुरुत्वम्, **आदधानाः** = धारयन्तः, **नलभगीरथनाहुषाद्याः** = नलभगीरथययातिप्रभृतयः, **नृपाः** = राजानः, **आसन्** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभवन्, इह = सम्प्रति पृथिव्याम्, **नृपतौ** = कार्तवीर्यनृपे, **राजमाने** = विराजमाने, **अथ** = अनन्तरम्, **तान्** = नलभगीरथनाहुषादीन्, **किम् ब्रूमहे** = किं वर्णयामः, **एवम्** = इत्थम्, **जनाः** = लोकाः, **तदानीम्** = कार्तवीर्यशासनकाले, **अनुसद्म** = प्रतिगृहम्, **ऊचुः** = प्राहुः । अत्राक्षेपालङ्कारः । उक्तञ्च – '**निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।।**' (का.प्र., उ.१०, सू. १६२, श्लो.१०५-१०६)।।४०।।

दिव्यलक्ष्मी - पहिले पृथ्वीमा गुणगौरवले सुहाएका नल, भगीरथ, ययाति आदि राजाहरू थिए । अहिले राजा सहस्रार्जुनको उपस्थितिमा ती पहिलेका राजाहरूको विषयमा के चर्चा गर्नु ? भन्दै प्रत्येक घरका मानिसहरू त्यसबेला आपसमा संवाद गरिरहेका थिए ।।४०।।

नारोपि चापममुना श्रुतिमूलचुम्बि
नास्पर्शि वैरिजनतासु भुजङ्गखड्गः ।
नाबन्धि च भ्रुकुटिकोटिरथापि तस्य
द्विड्भूमिपाः पदनता अभिषेकमात्रात् ।।४१।।

– विभावना

अन्वयः - अमुना, श्रुतिमूलचुम्बि, चापम्, न आरोपि, वैरिजनतासु, भुजङ्गखड्गः, न अस्पर्शि, भ्रूकुटिकोटिः, च, न आबन्धि, अथापि, द्विड्भूमिपाः, तस्य, अभिषेकमात्रात्, पदनताः ।

चूडामणिः - **अमुना** = कार्तवीर्येण, **श्रुतिमूलचुम्बि** – श्रुत्योर्मूले, **श्रुतिमूले** = कर्णमूले, ते **चुम्बति** = स्पृशतीति, श्रुतिमूलचुम्बि, **चापम्** = धनुः, **न आरोपि** = नारोपितम्, **वैरिजनतासु**= शत्रुजनेषु, **भुजङ्गखड्गः** = सर्परूपचन्द्रहासः, **न अस्पर्शि**= नामृष्टः, **भ्रुकुटिकोटिः** = भृकुटीपालिः, **नाबन्धि** = नाबद्धा, **अथापि** = किञ्चिद-कुर्वाणस्यापि, **तस्य** = कार्तवीर्यस्य, **अभिषेकमात्रात्** = सिंहासनारोहणमात्रेण, **द्विड्भूमिपाः** = शत्रुनृपालाः, **पदनताः** = चरणविनता जाताः। अत्र विभावनालङ्कारः। उक्तञ्च – '**क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ।।**' (का.प्र., उ. १०, सू. १६३, श्लो. १०६)।।४१।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - भर्खरै सिंहासनमा अभिषिक्त राजा कार्तवीर्यले शत्रुमाथि प्रहार गर्ने उद्देश्यले धनुको ताँदोलाई कानको फेंदसम्म खिँचेर चढाएका थिएनन्, शत्रुपक्षको संहार गर्न भनी सर्पसमान डरलाग्दो तलबार पनि छोएका थिएनन् र शत्रुलाई भयभीत तुल्याउने उद्देश्यले आँखीभौं बङ्ग्याएका पनि थिएनन् तापनि शत्रुराजाहरू कार्तवीर्यको राज्याभिषेक भयो भन्ने समाचार थाहा पाउनासाथ डराएर यिनका पाउमा आई शरणमा परेका थिए ।।४१।।

छत्रं शरच्छशिसमच्छवि तस्य मूर्ध्नि
प्रोल्लासमाप सुहृदां विननाश तापः।
आश्चर्यमस्य च बभूव भुजः समुद्रो
मित्रालये बहलरत्नखनिर्बभूव ।।४२।।

- **विशेषोक्तिः**

अन्वयः - तस्य, मूर्ध्नि, शरच्छशिसमच्छवि, छत्रम्, प्रोल्लासम्, आप, सुहृदाम्, तापः, विननाश, आश्चर्यम्, बभूव, यत्, अस्य, भुजः, समुद्रः, मित्रालये, बहलरत्नखनिः, बभूव ।

चूडामणिः - **तस्य** = कार्तवीर्यस्य, **मूर्ध्नि** = शिरसि, **शरच्छशिसमच्छवि** - **शरदि** = शरदृतौ, यः **शशी** = चन्द्रमाः, तस्य **समा** = तुल्या, **छविः** = कान्तिः, यस्य तत्, शारदेन्दुसमानकान्तीत्यर्थः, **छत्रम्** = नृपलक्ष्म (छत्रं तु नृपलक्ष्म तत्- इत्यमरः), **प्रोल्लासम्** = विस्तारम्, **आप** = प्राप, यदैव तच्छत्रं विस्तारं प्राप तदैव, **सुहृदाम्** = मित्राणाम्, **तापः** = सन्तापः, **विननाश** = विनाशमाप, तदैव, **एकम् आश्चर्यम्** = विस्मयः, **बभूव** = अभूत्, यत्, **समुद्रः** - मुद्राभिः सहितः, अर्थात् ध्वजचक्रादिचिह्नैश्चिह्नितः, अथवा समुद्रसमानः, कार्तवीर्यस्य **भुजः** = बाहुः, **मित्रालये**= मित्रगृहे, अथवा सूर्यलोके, **बहलरत्नखनिः** - **बहलानाम्** = अनेकेषाम्, **रत्नानाम्**= मणीनाम्, **खनिः** = आकरः, (खनिः स्त्रियामाकरः स्यात्- इत्यमरः), **बभूव** = अभूत् । अत्र विशेषोक्तिरलङ्कारः । उक्तञ्च - '**विशेषोक्तिरखण्डेषु कारणेषु फलावचः।**' (का.प्र., उ. १०, सू. १६४, श्लो. १०७)।।४२।।

दिव्यलक्ष्मी - राज्याभिषेकको अवसरमा कार्तवीर्यको शिरमा शरद् ऋतुको चन्द्रमाझैं चहकिलो राजछत्र चम्कियो र यिनका शिरमा राजछत्र चम्किएको देखेर मित्रहरूका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनको सन्ताप मेटियो । त्यहाँ अर्को आश्चर्य पनि भयो, त्यो के भने ध्वज, कलश, शङ्ख, चक्र आदि मुद्रासहितको तिनको बाहु आफ्ना मित्रहरूका लागि घर–घरमा ठूलो रत्नको खानी बनेको देखियो अर्थात् कार्तवीर्य राजा भएपछि यिनका मित्रहरूले राजाको कृपाबाट अतुलनीय मणिमाणिक्य एवं सम्पदा प्राप्त गरे ।।४२।।

ऊर्जोर्जितामृतकरामलतद्यशोभि-
लोकत्रये धवलितेऽप्यतिशीतिते च ।
प्रत्यर्थिभूपतिमुखानि सितानि नासन्
सन्तापमाप च विपक्षवधूटिकाहृत् ।।४३।।

– विशेषोक्तिः

अन्वयः - ऊर्जोर्जितामृतकरामलतद्यशोभिः, लोकत्रये, धवलिते, अतिशीतिते, च, अपि, प्रत्यर्थिभूपतिमुखानि, सितानि, न आसन्, विपक्षवधूटिकाहृत्, च सन्तापम्, आप ।

चूडामणिः - **ऊर्जोर्जितामृतकरामलतद्यशोभिः** - ऊर्जयतीति **ऊर्जः** = कार्तिकिकः, ऊर्जसा **ऊर्जितः** = समृद्धः, यः, **अमृतकरः** = चन्द्रमाः, तस्य, **करैः** = किरणैरिव, **अमलैः** = निर्मलैः, **तद्यशोभिः** = कार्तवीर्यकीर्तिभिः, **लोकत्रये- लोकानाम्** = भुवनानाम्, **त्रयम्** = त्रितयम्, तस्मिन्, **धवलिते** = श्वेतीकृते, **अतिशीतिते** = अतिशीतलीकृते, चापि, **प्रत्यर्थिभूपतिमुखानि** - **प्रत्यर्थिनः** = शत्रवः, **ये भूपतयः**= राजानः, तेषाम्, **मुखानि** = वदनानि, **सितानि** = श्वेतानि शुक्लानि वा, **न आसन्**= न बभूवुः, लोकत्रये धवलितेऽपि शत्रुमुखानि कृष्णान्येवासन्, पुनश्च **विपक्षवधूटिका-हृत्- विपक्षाणाम्**= शत्रूणाम्, **वधूटिकाः** = सुन्दर्यः, तासां **हृत्** = हृदयम्, **सन्तापम्**= तापम्, **आप** = प्राप । लोकत्रये अतिशीतितेऽपि शत्रुरमणीहृदयं शीतलं नैवासीद्पि तु सन्तप्तमेवासीदिति तत्त्वम् । कारणे सत्यपि कार्याभावदर्शनादत्र विशेषोक्तिः ।।४३।।

दिव्यलक्ष्मी - कार्तिकमासको शुक्लपक्षमा उदाउने चन्द्रमाका अमृतवर्षी किरणझैं निर्मल कार्तवीर्यको कीर्तिका किरणहरूले संसारलाई नै सेताम्य तुल्याए तापनि शत्रुराजाका मुखमण्डल भने सन्तापका कारण काला थिए र शत्रुसुन्दरीका मन पनि भोलि के हुने हो भन्ने चिन्ताका कारण अत्यन्त सन्तप्त थिए ।।४३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आसाद्य पित्र्यपदवीमयमच्छकीर्तिः
प्रत्यर्थिनाञ्च विदुषाञ्च मृगीदृशाञ्च ।
शौर्येण सद्वितरणेन सुचारुतन्वा
चित्ते बभौ सुरपतिस्तदगो रतीशः ।।४४।।

– यथासङ्ख्यम्

अन्वयः – अच्छकीर्तिः, अयम्, पित्र्यपदवीम्, आसाद्य, शौर्येण, प्रत्यर्थिनाम्, चित्ते, सुरपतिः, बभौ, सद्वितरणेन, विदुषाम्, चित्ते, तदगः, (बभौ), सुचारुतन्वा, मृगीदृशाम्, च, चित्ते रतीशः, (बभौ) ।

चूडामणिः – **अच्छकीर्तिः** – **अच्छा** = निर्मला, **कीर्तिः** = यशः, यस्य सः, निर्मलयशा इत्यर्थः (प्रसन्नोऽच्छ– इत्यमरः, अच्छो भल्लूके स्फटिकेऽमले– इति हैमः), **अयम्** = कार्तवीर्यः, **पित्र्यपदवीम्** – पितॄणामियं **पित्र्या** = पितृसम्बन्धिनी, या **पदवी** = सरणिः, ताम्, **आसाद्य** = प्राप्य, **शौर्येण** = पराक्रमेण, **प्रत्यर्थिनाम्** = शत्रूणाम्, **चित्ते** = मानसे, **सुरपतिः** = इन्द्रः, (इव), **बभौ** = शुशुभे, **सद्वितरणेन**- **सत्सु**= सज्जनेषु, **वितरणम्** = दानम्, तेन, **विदुषाम्** = पण्डितानाम्, चित्ते, **तदगः**= सुमेरुपर्वतः, (इव बभौ), **सुचारुतन्वा** = सुन्दरशरीरेण, अथवा नयनाभिरामस्वरूप-सौन्दर्येण, **मृगीदृशाम्** = हरिणनयनीनां सुन्दरीणाम्, **चित्ते रतीशः** = कामदेवः, (इव बभौ) । अत्र क्रमानुसारेणाधाराधेयनिरूपणाद् यथासङ्ख्यम-लङ्कारः । उक्तञ्च- **'यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयः ।'** (का.प्र., उ. १०, सू. १६५, श्लो. १०७)।।४४।।

दिव्यलक्ष्मी – उज्ज्वल कीर्तिले सुहाएका सहस्रार्जुन आफ्ना पिताको पदवी प्राप्त गरेपछि कसैसँग तुलना गर्न नसकिने पराक्रमका कारण शत्रुहरूका मनमा इन्द्रसमान बनेर सुहाए, सुपात्रहरूमा दान गर्ने प्रवृत्तिका कारण विद्वान्हरूका लागि रत्नको खजाना सुमेरुसमान बनेर सुहाए र आफ्नो आकर्षक शरीरको संरचनाका कारण सुन्दरीहरूका हृदयमा कामदेव बनेर सुहाए ।।४४।।

इत्थं पुरातननृपस्तनयाय सम्यग्
विप्रोत्कराय च समस्तजनाय दत्त्वा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यञ्चिरार्जितधनान्यपसाध्वसञ्च
दातुं स्म चित्तमभिवाञ्छति चेश्वराय ।।४५।।

- यथासङ्ख्यम्

अन्वयः - इत्थम्, पुरातननृपः, सम्यक्, तनयाय, राज्यम्, दत्त्वा, विप्रोत्कराय च, चिरार्जितधनानि, (दत्त्वा), समस्तजनाय च, अपसाध्वसम्, (दत्त्वा), ईश्वराय च, चित्तम्, दातुम्, अभिवाञ्छति स्म ।

चूडामणिः - इत्थम् = अनेन प्रकारेण, **पुरातननृपः** = चिरन्तनो भूपालः कृतवीर्यः, **सम्यक्** = समुचितरूपेण, **तनयाय** = पुत्राय कार्तवीर्याय, **राज्यम्** = राज्याधिकारम्, दत्त्वा = अर्पयित्वा, **विप्रोत्कराय- विप्राणाम्** = ब्राह्मणानाम्, **उत्करः** = पुञ्जः, इति विप्रोत्करः, **तस्मै** = ब्राह्मणपुञ्जाय (पुञ्जराशी तूत्करः कूटमस्त्रियाम् - इत्यमरः), **चिरार्जितधनानि - चिरेण** = चिरकालेन, **अर्जितानि**= स्वायत्तीकृतानि, **धनानि**= वित्तानि, दत्त्वा, **समस्तजनाय** = सकललोकाय, **अपसाध्वसम्** = निर्भयताम् (दरत्रासौ भीतिर्भीः साध्वसं भयम् - इत्यमरः), दत्त्वा, **ईश्वराय च** = परमेश्वराय च, **चित्तम्**= मनः, **दातुम्**= अर्पयितुम्, **अभिवाञ्छति स्म** = ऐच्छत् । अत्रापि पूर्ववद् यथासङ्ख्य-मलङ्कारः ।।४५।।

दिव्यलक्ष्मी - पूर्वराजा कृतवीर्यले आफ्ना छोरा कार्तवीर्यका लागि राज्य दिए, विद्वान् ब्राह्मणहरूका लागि चिरकालदेखि न्यायमार्गबाट अर्जित सम्पत्ति दिए र सबै जनतालाई अभयदान दिए । त्यसपछि आफ्नो चित्त ईश्वरका लागि अर्पण गर्ने चाहना गरे ।।४५।।

कार्तवीर्याय कृतवीर्यस्योपदेशः -

पुत्रं विनीतमपि शास्तुमनाः कदाचि-
दूचे नृपः स गुरुणाऽथ रहःप्रदेशे ।
छात्रे सुतेऽपि निपुणे प्रतिशिक्षणं यत्
तच्चापि कृत्यमुदितं मतिमद् गुरूणाम् ।।४६।।

- अर्थान्तरन्यासः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - अथ, कदाचित्, सः, नृपः, गुरुणा, (सह), रहःप्रदेशे, विनीतम्, अपि, पुत्रम्, शास्तुमनाः, ऊचे, यत्, छात्रे, सुते, अपि, प्रतिशिक्षणम्, तत्, च अपि, गुरूणाम्, मतिमत्, कृत्यम्, उदितम् ।

चूडामणिः - अथ = अनन्तरम्, **कदाचित्** = कदाचन, **सः** = पुरातनः, **नृपः** = राजा कृतवीर्यः, **गुरुणा** = दत्तात्रेयेण सह, विद्यमानः, **रहःप्रदेशे** = एकान्तस्थले, **विनीतम्** = विनयान्वितम्, जितेन्द्रियं वा, (विनीतः सुवहाश्वे स्याद् वणिज्यपि पुमांस्त्रिषु । जितेन्द्रियेऽपनीते च निभृते विनयान्विते ।। - इत्यमरः) सुशिक्षितं विनम्रं चापि, **पुत्रम्** = कार्तवीयम्, **शास्तुमनाः** = उपदेष्टुमनाः, **ऊचे** = उक्तवान्, **यत्** = यदपि, **छात्रे** = शिष्ये, **सुते अपि** = पुत्रेऽपि, **प्रतिशिक्षणम्**= पौनःपुन्येन प्रशिक्षणम्, **तच्चापि** = तदपि कार्यम्, **गुरूणाम्** = आचार्यादीनाम्, **मतिमत्** = बौद्धिकम्, **कृत्यम्** = कार्यम्, **उदितम्** = समुदीरितम् । अत्रार्थान्तरन्यासोऽलङ्कारः । उक्तञ्च - '**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते । यत् तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ।।**' (का.प्र., उ. १०, सू. १६६, श्लो. १०८)।।४६।।

दिव्यलक्ष्मी - कुनै दिन आफ्ना गुरु दत्तात्रेयका साथ एकान्तमा रहेका राजा कृतवीर्यले आफ्ना छोरा कार्तवीर्य नम्र स्वभावका भएता पनि असल नीति सिकाउने उद्देश्यले उपदेश प्रदान गरेका थिए । वास्तवमा शिक्षित, विनीत र कुशल शिष्य अथवा पुत्रलाई पुनः उपदेश प्रदान गर्ने आवश्यकता नहुँदा पनि उपदेश दिनु गुरु र मातापिताको बौद्धिक कर्तव्य मानिएको छ ।।४६।।

आसाद्य राज्यमभिरञ्जय सर्वलोका-
न्निन्दुर्यथा प्रियकरप्रसरैः समन्तात् ।
अन्वर्थता भवति राजपदस्य तस्मा-
देवंविधे न्यगदि राजकला सुधीभिः ।।४७।।

- अर्थान्तरन्यासः

अन्वयः - इन्दुः, यथा, प्रियकरप्रसरैः, समन्तात्, सर्वलोकान्, (अभिरञ्जयति, तथैव), राज्यम्, आसाद्य, त्वम्, सर्वलोकान्, अभिरञ्जय, तस्मात्, राजपदस्य, अन्वर्थता, भवति, सुधीभिः, एवंविधे, राजकला, न्यगदि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - इन्दुः = चन्द्रमाः, **यथा** = येन रूपेण, **प्रियकरप्रसरैः** - प्रियाश्च ते कराः इति **प्रियकराः** = प्रीतिदायककिरणाः, तेषां **प्रसरैः**= विस्तारैः, **समन्तात्**= परितः, **सर्वलोकान्** = सर्वजनान्, अभिरञ्जयति तथैव, **राज्यम्** = राज्याधिकारम्, **आसाद्य**= प्राप्य, त्वम्, (**प्रियकरप्रसरैः** = अत्यल्पकरग्रहणकार्यविस्तारैः), **सर्वलोकान्**= सर्वजनान्, **अभिरञ्जय** = मोदय, **तस्मात्** = जनपरिपालनात्, अथवा जनाभिरञ्जनात्, **राजपदस्य**= नृपपदस्य अथवा चन्द्रपदस्य, **अन्वर्थता**= सार्थकता, **भवति** = जायते, **सुधीभिः**= बुद्धिमद्भिः, **एवंविधे** = ईदृशे जनपरिपालनकार्ये, अभिरञ्जनकार्ये वा, **राजकला**= नृपस्य प्रवीणता, चन्द्रस्याभिरञ्जकता च, **न्यगदि** = उक्ता । अर्थान्तर- न्यासोऽलङ्कारः।।४७।।

दिव्यलक्ष्मी - हे पुत्र ! चन्द्रमाले आफ्ना कोमल किरणहरू चारैतिर फैलाएर संसारलाई आनन्द प्रदान गरेझैं तिमीले पनि राज्य प्राप्त गरेपछि सहजरूपमा जनताले तिर्न सक्ने कर लिएर सबैको मन प्रसन्न तुल्याऊ । यसबाट राजाको पद सार्थक बन्दछ । सबैलाई प्यारो लाग्ने जुनेलीलाई चन्द्रकला भनेझैं सुख–सुविधा प्रदान गरी जनताको मन जित्ने कार्यलाई बुद्धिमान्हरूले राजकला भनेका छन् ।।४७।।

यस्य प्रयाति विकृतिं प्रकृतिर्नृपस्य
तस्याचिरेण सुहृदेत्यसुहृत्पदञ्च ।
राज्यञ्च वह्निमिलिताज्यदशामुपैति
बन्धुश्च तोयरहितान्धुसबन्धुरास्ते ।।४८।।

- विरोधः

अन्वयः - यस्य, नृपस्य, प्रकृतिः, विकृतिम्, प्रयाति, तस्य, अचिरेण, सुहृत्, असुहृत्पदम्, च, एति, राज्यम् च, वह्निमिलिताज्यदशाम्, उपैति, बन्धुः च, तोयरहितान्धुसबन्धुः, आस्ते ।

चूडामणिः - यस्य नृपस्य = यस्य भूपतेः, **प्रकृतिः** = प्रजा अथवा राज्याङ्गम् (प्रधानं प्रकृतिः स्त्रियाम् - इत्यमरः, स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च - इत्यमरः), **विकृतिम्** = विकारम्, **प्रयाति** = गच्छति, **तस्य**= राज्ञः, **अचिरेण** = शीघ्रम्, **सुहृत्** = मित्रम्, **असुहृत्पदम्** = प्राण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हर्तृपदम् अथवा अमित्रपदम्, **एति**= गच्छति, **राज्यम् च** = राष्ट्रम् च, **वह्निमिलिताज्यदशाम् - वह्निना** = अग्निना, **मिलितम्** = संपृक्तम्, **आज्यम्** = घृतम्, इति वह्निमिलिताज्यम्, तस्य, **दशाम्** = अवस्थाम्, अग्निसमन्वितघृतावस्थामित्यर्थः, **उपैति**= प्राप्नोति, **बन्धुः च**= बान्धवादिकञ्च, **तोयरहितान्धुसबन्धुः- तोयरहितस्य**= निर्जलस्य, **अन्धोः** = कूपस्य, **सबन्धुः** = समानः, **आस्ते** = भवतीति । अत्र विरोधालङ्कारः । उक्तञ्च- '**विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद् वचः ।**' (का.प्र., उ.१०, सू.१६७, श्लो. १०९)।।४८।।

दिव्यलक्ष्मी - जुन राजाका जनता कुपित हुन्छन्, त्यस्ता राजाका लागि आफ्नै मित्र पनि प्राणहर्ता शत्रु बन्न सक्छन्, आफ्नो राज्य आगोमा खन्याएको घिऊ झैं दन्किन्छ र बन्धुबान्धव पनि विना पानीको कुवाजस्ता हुन आउँछन् । वस्तुतः प्रजाको विद्रोह हुँदा राजाले कतैबाट कुनै किसिमको पनि सहयोग पाउँदैनन् ।।४८।।

मन्वाद्युदीरितपथेन सदा धरित्री-
पातो नृपस्य पुरतो गिरयोऽपि नीचाः ।
भूमण्डलं लघुतरं परिभाति सिन्धु-
र्गाधो वियन्नच महन्मरुदल्पवीर्यः ।।४९।।

– विरोधः

अन्वयः - सदा, मन्वाद्युदीरितपथेन, धरित्रीपातः, नृपस्य, पुरतः, गिरयः, अपि, नीचाः (भवन्ति), भूमण्डलम्, लघुतरम्, परिभाति, सिन्धुः, गाधः (परिभाति), वियत्, न च महत् (परिभाति), मरुत्, अल्पवीर्यः (परिभाति) ।

चूडामणिः - सदा = सर्वदा, **मन्वाद्युदीरितपथेन - मन्वादिभिः** = मनुप्रभृतिभिर्धर्मशास्त्रज्ञैः, **उदीरितः** = प्रोक्तः, **पथः** = मार्गः, इति मन्वाद्युदीरितपथः (बाटः पथश्च मार्गश्च - इति त्रिकाण्डशेषः), तेन, **धरित्रीपातः** = धरित्रीं रक्षतः, **नृपस्य**= राज्ञः, **पुरतः** = अग्रे, **गिरयः अपि** = पर्वता अपि, **नीचाः** = क्षुद्रा लघ्वाकारा वा, भवन्ति, **भूमण्डलम्- भुवः** = पृथिव्याः, **मण्डलम्** = चक्रवालम्, (चक्रवालं तु मण्डलम्- इत्यमरः), **लघुतरम्**= अत्यन्तमेव स्वल्पाकारम्, **परिभाति** = दृश्यते, **सिन्धुः** = समुद्रः, **गाधः** = तलस्पर्श-योग्यः, निमज्जनोमज्जनयोग्यो वा, परिभाति, **वियत्**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आकाशम्, **न च महत्** = स्वल्पाकारम्, परिभाति, **मरुत्** = पवनः, **अल्पवीर्यः** = पराक्रमहीनः, गतिहीनो वा, परिभाति । अत्र विरोधालङ्कारः । गिरीणां नीचत्वम्, समुद्रस्य गाधत्वम्, भूमण्डलस्य लघुत्वम्, वियतः सङ्कीर्णत्वम्, मरुतोऽल्पवीर्यत्वमिति सर्वमेव विरुद्धमिति विरोधः, परन्तु शास्त्रसम्मतं धरणीपालनं कुर्वतोऽर्जुनस्य समक्ष इति कथनात् तत्परिहारः ।।४९।।

दिव्यलक्ष्मी - मनु आदि स्मृतिकार र नीतिकारद्वारा निर्देशित पद्धतिबाट पृथिवीको पालन गर्ने राजाका सामु पर्वत पनि पुड्का देखिन्छन्, पृथिवीमण्डल वामन आकारको देखिन्छ, अगाध समुद्र सजिलै तर्न सकिने जस्तो प्रतीत हुन्छ, आकाश साँघुरो देखिन्छ र हावा पनि थोरै शक्ति भएको र गतिहीन देखिन्छ । त्यसकारण तिमीले शास्त्रसम्मत र लोकसम्मत विधिबाट जनताको परिपालन र राष्ट्रको रक्षा गर्नुपर्दछ ।।४९।।

पृथ्वादिभिः पृथुयशोभिरियं धरित्री
जानामि सम्यगविता भवदादिभिश्च।
रक्षिष्यते विधिवदेव तथापि शिक्षा-
कृत्ये नियोजयति मां गुरुता त्वदीया ।।५०।।

- भाविकम्

अन्वयः - पृथुयशोभिः, पृथ्वादिभिः, इयम्, धरित्री, सम्यक्, अविता, भवदादिभिः च, विधिवत् एव, रक्षिष्यते, जानामि, तथापि, त्वदीया, गुरुता, माम्, शिक्षाकृत्ये, नियोजयति।

चूडामणिः - **पृथुयशोभिः** - **पृथूनि** = महान्ति, **यशांसि** = कीर्तयः, येषान्तैः, **पृथ्वादिभिः** = पृथुप्रभृतिभिर्नृपैः, **विधिवत्** = विधिपूर्वकम्, **इयम्** = एषा, **धरित्री**= पृथिवी, **सम्यक्** = समुचितरूपेण, **अविता** = रक्षिता, उक्तञ्च - सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् । गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः ।। मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरञ्जयन् प्रजाः । राजेत्यधान्नामधेयं सोमराज इवापरः ।। (श्रीमद्भागवते ४/२२/५४-५६), **भवदादिभिः च** = भवत्प्रभृतिभिरागामिभी राजभिश्च, **रक्षिष्यते**= पालयिष्यते, इति **जानामि** = अवैमि, **तथापि** = इति ज्ञात्वापि, **त्वदीया** = भवदीया, **गुरुता** = पितृता, भवतः पिता अहमस्मीति मयि भवत्सम्बन्धी यो गुरुभावः, सः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आचार्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वसुरस्त्राता मातामहपितामहौ ।।
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
मातामही मातुलानी माता मातुश्च सोदराः ।।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ।। इति । (देवलस्मृतौ)

माम् = कृतवीर्यम्, **शिक्षाकृत्ये** - **शिक्षायाः** = उपदेशप्रदानस्य, **कृत्ये** = कार्ये, **नियोजयति** = प्रवर्तयति । भूतभविष्यसम्बद्धविषयसाक्षात्कारादत्र भाविकालङ्कारः। उक्तञ्च - **'प्रत्यक्षा इव यद् भावा क्रियन्ते भूतभाविनः । तद् भाविकं ...... ।।'** (का.प्र., उ. १०, सू. १७४, श्लो. ११३)।।५०।।

दिव्यलक्ष्मी - पहिले मनु आदि यशस्वी राजाहरूले पृथिवीको राम्ररी पालन गरेका थिए र भविष्यमा पनि तिमी र तिमीजस्ता धेरै राजाहरूले पृथिवीको परिपालन गर्नेछन् भन्ने कुरा मैले बुझेको छु । तापनि म तिम्रो पिता अथवा गुरु हुनुले नै मलाई फेरि पनि तिमीलाई उपदेश दिने कार्यतर्फ अभिप्रेरित गरेको छ ।।५०।।

लक्ष्मीर्निसर्गतरला विषमस्वभावा
सर्वान् विहाय किल निर्जरसः समुत्कान् ।
कञ्चित्पुराणपुरुषं वृणुतेऽनपेक्षं
हित्वा पुरा त्रिभुवनं भुवनोदरस्था ।।५१।।

- काव्यलिङ्गम्

अन्वयः - पुरा, त्रिभुवनम्, हित्वा, भुवनोदरस्था, विषमस्वभावा, निसर्गतरला, लक्ष्मीः, सर्वान्, समुत्कान्, निर्जरसः, विहाय, कञ्चित्, अनपेक्षम्, पुराणपुरुषम्, वृणुते, किल ।

चूडामणिः - **पुरा** = प्राचीनसमये, **त्रिभुवनम्** = त्रिलोकीम्, **हित्वा** = परित्यज्य, **भुवनोदरस्था**- **भुवनस्य**= जलस्य अथवा महासागरस्य, **उदरे** = आभ्यन्तरे, तिष्ठतीति **भुवनोदरस्था**= सागरजलान्तर्गता, **विषमस्वभावा** - **विषमः** = प्रतिकूलः, **स्वभावः**= प्रकृतिः, यस्याः **सा** = विपरीतप्रकृतिः, **निसर्गतरला**- **निसर्गेण** = प्रकृत्या, **तरला**= चपला, (स्वरूपञ्च स्वभावश्च निसर्गश्च- इत्यमरः, चलनं कम्पनं कम्प्रं चलं लोलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चलाचलम्, चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ॥- इत्यमरः), अर्थात् स्वभावेना-त्यन्तमेव चञ्चलेत्यर्थः, **लक्ष्मीः** = श्रीः, **सर्वान्** = सकलान्, **समुत्कान्** = उत्कण्ठितान्, **निर्जरसः** = देवान्, **विहाय** = हित्वा, **कञ्चित्** = कमपि, **अनपेक्षम् - न विद्यते** अपेक्षा = इच्छा यस्य तम्, अपेक्षारहितम्, उदासीनस्वभावमित्यर्थः, **पुराणपुरुषम्**= भगवन्तं नारायणम्, **वृणुते** = वरणं चकार, **किल** = निश्चयेन । उक्तञ्च - ततश्चाविरभूत् साक्षाच्छ्रीरमा भगवत्परा । रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामनी यथा ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः । रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ (श्रीमद्भागवते ८/८/८-९, २३) अत्र पुरायोगे वर्तमानक्रिया । विषमस्वभावत्वात् समुत्कण्ठितमनसो देवान् विहाय निरपेक्षस्य पुराणपुरुषस्य वरणमिति काव्यलिङ्गम् । ..... **काव्यलिङ्गं हेतोर्वाक्यपदार्थता** (का.प्र., उ. १०, सू. १७५, श्लो. ११३) ॥५१॥

दिव्यलक्ष्मी - प्रियपुत्र ! लक्ष्मी स्वभावैले चञ्चल हुन्छिन् र विषमस्वभावकी पनि। पौराणिक कथाअनुसार पहिले समुद्रमा विराजमान लक्ष्मीले आफूलाई वरण गर्न चाहने सबै देवताहरूलाई छोडेर निरपेक्ष स्वभावका पुराणपुरुष भगवान् नारायणलाई वरण गरेकी थिइन् । त्यसकारण लक्ष्मीको स्वभावबाट परिचित भई उनको संरक्षण गर्नुपर्दछ ॥५१॥

तस्याश्च मित्रमुदितं कनकं सखाय-
मुन्मत्तमाहुरदसीयमतीव धूर्तम् ।
तत्सङ्गतः स्वयमचेतनमेव मत्त-
मुन्मादकं भवति सङ्गकृतां जनानाम् ॥५२॥

- पर्यायोक्तिः

अन्वयः - तस्याः, च, मित्रम्, कनकम्, उदितम्, अदसीयम्, अतीव धूर्तम्, सखायम्, उन्मत्तम्, आहुः, स्वयम्, अचेतनम्, तत्सङ्गतः, एव, मत्तम् (कनकम्), सङ्गकृताम्, जनानाम्, उन्मादकम्, भवति ।

चूडामणिः - **तस्याः च**= लक्ष्म्याश्च, **मित्रम्**= सुहृद्, **कनकम्** = स्वर्णम् (स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्- इत्यमरः), **उदितम्** = उक्तम्, **अदसीयम्** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुवर्णसम्बद्धं सौवर्णं वा, **अतीव धूर्तम्** = अत्यन्तमेव कितवम्, **सखायम्** = मित्रम्, **उन्मत्तम्** = धत्तूरम्, **आहुः** = कथयन्ति, (उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः- इत्यमरः), धत्तूरस्यापि नाम कनकं वर्तते । तस्मात् कनकापरनामा धत्तूरः कनकापरनाम्नः सुवर्णस्य नामसाम्यात्, गुणसाम्याच्च मित्रमिति भावः । **स्वयम्** = आत्मना, **अचेतनम्** = जडम्, सुवर्णवाचकम्, कनकम्, **तत्सङ्गत एव** = नामसाम्याद् गुणसाम्याच्च जायमानाद् धत्तूरसम्बन्धादेव, **मत्तम्** = मदमत्तम्, **सङ्गकृताम्** = स्वसङ्गिनाम्, **जनानाम्** = प्राणिनाम्, **उन्मादकम्** = विक्षेपदायकं भवति । वस्तुत उन्मत्तधूर्तादीनि धत्तूरनामानि सन्ति, यानि च तदीयगुणव्यञ्जकानि । धत्तूरस्य गुणाः कनकाभिधे सुवर्णे, सुवर्णस्य गुणाः कनकाह्वये धत्तूरेऽपि सङ्क्रान्ताः। 'नामसाम्यादहो यस्य धत्तूरोऽपि मदप्रदः' इति विदग्धमुखमण्डनोक्तिरपि अत्र सङ्गच्छते। एतादृशो गम्योऽर्थ उत्तरार्धेन वाच्यतया प्रस्तुत इति पर्यायोक्तमलङ्कारः । उक्तञ्च - **पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते** (सा.द. १०/६०) । **पर्यायोक्तं विना वाच्यवाचकत्वे वचस्तु यत्** । (का.प्र., उ. १०, सू. १७६, श्लो. ११४)।।५२।।

त्रिशक्तिः - मिथोमित्रयोः कनकयोर्गुणाः कनकप्रियायां लक्ष्म्यामपि प्रवृत्ताः सन्ति। लक्ष्मीः स्वयमपि चपला वर्तते, कनकगुणसङ्क्रमेण सा विविधदोषदूषिता सम्पद्यते। अतो हे पुत्र ! त्वया राजलक्ष्मीप्रयोगविधौ सावधानेन भाव्यमिति भावः । लक्ष्म्या मित्रं कनकमस्ति। कनकस्य मित्रं च कनकापरनामा धत्तूरो भवति । स च धत्तूर उन्मत्तो धूर्तश्चापि कथ्यत इति कथनेन कनके धत्तूरस्य गुणानां संक्रमणं भवति । अतो यत्र कनकबाहुल्यं तत्रोन्मत्तता धूर्तता च भवतीति गम्योऽर्थः ।

दिव्यलक्ष्मी - कनक अर्थात् सुवर्णलाई लक्ष्मीको मित्र मानिएको छ । सुन र धतुरो दुवैको नाम कोशशास्त्रमा कनक रहेको छ । यो नामसाम्यले गर्दा यी दुबै मित्र मानिएका छन् । तर, सुनको मित्र मानिएको धतुरोलाई कोशमा उन्मत्त र धूर्त पनि भनिन्छ । यसै शाब्दिक अर्थबोधका आधारमा धतुरोलाई पागल र बदमास पनि भनिन्छ । नामबाट गुणको पनि अभिव्यक्ति हुने हुँदा धतुराको सेवन गर्ने मानिस पागल र बदमास हुन्छ। सुवर्ण र धतुरो दुबैको नाम 'कनक' हुनाले सुनको अर्थ बुझाउने कनक पनि आफ्नो सङ्गत गर्ने मानिसहरूका लागि उन्मादक बन्न सक्दछ । धतुरोजस्तो मित्रसँग नामसाम्य र गुणसाम्य हुनुले अचेतन भएता पनि सुन आफूसँग सङ्गत गर्ने नरनारीहरूका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लागि उन्मादक बन्दछ । तसर्थ तिमीले राजलक्ष्मीको सेवन गर्दा सावधान भएझैं कनक अर्थात् सुवर्णको सेवन गर्दा पनि सावधान हुनु पर्दछ ।।५२।।

तस्मात् प्रभूतकनकेन विधाय मेरुं
सत्तारसाम्बरमणिं सहचन्द्ररश्मिम् ।
सर्वज्ञमेत्य विबुधं वितर त्वमस्मै
नोन्मादयत्यमुमिदं श्रुतशक्तिमन्तम् ।।५३।।

- उदात्तम्

अन्वयः - तस्मात्, प्रभूतकनकेन, सत्तारसाम्बरमणिम्, सहचन्द्ररश्मिम्, मेरुम्, विधाय, त्वम्, सत्तारसाम्बरमणिम्, सहचन्द्ररश्मिम्, सर्वज्ञम्, विबुधम्, एत्य, तस्मै वितर, इदम्, अमुम्, श्रुतशक्तिमन्तम्, न उन्मादयति ।

चूडामणिः - **तस्मात्** = कनकस्य उन्मादहेतुत्वात्, **प्रभूतकनकेन** = न्यायार्जितेन प्रचुरेण सुवर्णेन, **सत्तारसाम्बरमणिम्** - **सन्** = विद्यमानः, **तारः** = मौक्तिकम्, यस्मिन् सः, सत्तारः, **अम्बरमणिना** = लक्षणया सूर्यकान्तमणिना सह वर्तत इति साम्बरमणिः, सत्तारश्चासौ साम्बरमणिः, सत्तारसाम्बरमणिः, **तम्** = मौक्तिकसूर्यकान्त-मणिदेदीप्यमानम्, अथवा **अम्बरमणिना** = सूर्येण सह वर्तत इति साम्बरमणिः, सत्यः = विद्यमानाः, **ताराः** = नक्षत्राणि, यस्मिन् सः, सत्तारः, सत्तारश्चासौ साम्बरमणि-रिति, सत्तारसाम्बरमणिः, **तम्** = तारकासहितेन सूर्येण शोभायमानम्, **सहचन्द्ररश्मिम्-चन्द्ररश्मिभिः** = इन्दुकिरणैर्लक्षणया चन्द्रकान्तोपलैः, सह वर्तत इति सहचन्द्ररश्मिः, तम्, चन्द्रकान्तोपलरञ्जितम्, **मेरुम्** = सुमेरुम्, **विधाय** = निर्माय, **सत्तारसाम्बर-मणिम्** - **सद्** = विद्यमानः, **तारः** = ओङ्कारः, यस्मिन् सः, सत्तारः, **अम्बरमणिना**= हृदयाकाशमणिना अथवा आत्मतत्त्वेन, सह वर्तत इति साम्बरमणिः, तम्, ओङ्कारवाच्येनात्मना देदीप्यमानम्, **सहचन्द्ररश्मिम्**- चन्द्ररश्मिना सह वर्तत इति सहचन्द्ररश्मिः, तम्, सहस्रारचक्रभेदनानन्तरं प्राप्तव्येन सच्चिदानन्दमयेन चन्द्राधारितेन पीयूषेण सन्तृप्तम्, **सर्वज्ञम्** = त्रिकालदर्शिनम्, **विबुधम्** = विद्वांसम्, **एत्य** = प्राप्य, अथवा **सत्तारसाम्बरमणिम्** = ओङ्कारमयेनात्मज्योतिषा, भासमानम्, **सहचन्द्र-रश्मिम्** = चन्द्रभालम्, **सर्वज्ञम्** = शिवम्, एत्य, अथवा **सत्तारसाम्बरमणिम्** -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सती = वर्तमाना, **तारा** = बौद्धानामाराध्या तारानाम्नी देवी अर्थाद् वज्रयोगिनी (अधराम्नायसारासौ व्याख्याता वज्रयोगिनी – इति मेरुतन्त्रम्) यस्मिन् स सत्तारः, **साम्बरमणिः**= ज्ञानमयेन अम्बरमणिना सूर्येण भासत इति सत्तारसाम्बरमणिः, तम्, **सहचन्द्ररश्मिम्** = इन्दुकिरणशीतलैः, उपदेशामृतैः सह वर्तत इति सहचन्द्ररश्मिः, तम्, **सर्वज्ञम्** = भगवन्तं बुद्धमेत्य, त्वम् **अस्मै** = विबुधाय, भालचन्द्राय अथवा सर्वज्ञाय, **वितर** = देहि, **इदम्** = कनकम्, **अमुम्** = विद्वांसम्, अथवा भालचन्द्रम्, अथवा बुद्धम्, **न उन्मादयति** = उन्मत्तं न कारयति । उदात्तगुणवर्णनादत्रोदात्तमलङ्कारः। **'लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते'** इति साहित्यदर्पणानुसारेण अत्र महतां चरितं प्रस्तुतमस्ति । तस्मादुदात्तमलङ्कारः । उक्तञ्च मम्मटेनापि– **'उदात्तं वस्तुनः सम्पन्महतां चोपलक्षणम्'** इति । (का.प्र., उ. १०, सू. १७७–१७८, श्लो. ११)।।५३।।

दिव्यलक्ष्मी – तिमीले न्यायको बाटोबाट सुन र धन अर्जित गरेर सुनको सुमेरु नै खडा गर । तिमीले स्वयं खडा गरेको सुनको सुमेरु उत्तम ज्ञानी विद्वान्हरूलाई समर्पण गर, यसबाट विद्याको संरक्षण हुनेछ । अथवा तिमीले तारा, सूर्य र चन्द्रमालाई धारण गर्ने र संसारलाई प्रकाशित गर्ने अन्तर्यामी भगवान् शङ्करको शरणमा परेर आफूले खडा गरेको सुवर्णको सुमेरु वितरण गर । यसबाट भगवान् शङ्कर प्रसन्न हुनुहुनेछ । अथवा तिमीले वज्रयोगिनी तारानामकी देवीका साथ विराजमान भगवान् बुद्धलाई यो सुनको सुमेरु अर्पण गर, यसबाट संसारमा शान्ति कायम गर्न सहयोग पुग्नेछ। यसरी जसले भगवान् शिव, भगवान् बुद्ध र सदाचारी शास्त्रज्ञ विद्वान्लाई स्वर्णसम्पदा प्रदान गर्दछन् तिनलाई सुवर्णले कहिल्यै पनि उन्मत्त बनाउन सक्दैन।।५३।।

कन्दर्पदर्पशमनी नवरूपसम्पत्
कान्तानुरागनिपुणञ्च वयोऽपि राज्यम् ।
सामन्तमौलिमणिरञ्जितपादपीठं
नोन्मादयन्तु तव वत्स ! कदापि चेतः ।।५४।।

– समुच्चयः

अन्वयः – वत्स !, कन्दर्पदर्पशमनी, नवरूपसम्पत्, कान्तानुरागनिपुणम्, वयः, सामन्तमौलिमणिरञ्जितपादपीठम्, राज्यम्, च, तव, चेतः, कदापि, न उन्मादयन्तु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - **वत्स !** = पुत्र !, **कन्दर्पदर्पशमनी** - **कन्दर्पस्य** = कामदेवस्य, दर्पम् = गर्वम्, शमयति = नाशयति, इति माराहङ्कारविदारिणीत्यर्थः, **नवरूपसम्पत्**- **रूपस्य**= स्वरूपस्य, **सम्पद्**= सम्पत्तिरिति रूपसम्पद्, **नवा** = नूतना, चासौ रूपसम्पद्, नूतनस्वरूपसौन्दर्यसम्पत्तिरित्यर्थः, **कान्तानुरागनिपुणम्** - काम्यते स्म इति **कान्ता**= कामिनी, तस्याम् **अनुरागः** = प्रेम, इति कान्तानुरागः, तस्मिन् **निपुणम्** = चतुरम्, प्रियाप्रीतिप्रवीण-मित्यर्थः, **वयः** = आयुः, **सामन्तमौलिमणिरञ्जितपादपीठम्** - **सामन्तानाम्** = स्वाधीनवर्तिनां लघुभूपतीनाम्, **मौलयः** = शिरांसीति तत्र, ये **मणयः**= सामन्तशिरोभूषणानि रत्नानि, तैः, **रञ्जितम्**= बहुरङ्गतामापादितम्, **पादपीठम्** = चरणपीठं यस्मिन् तत्, अधीनवर्तिभूपतिगणशिरोमणिघृष्टचरणपीठविराजितमित्यर्थः, **राज्यम्**= राष्ट्रञ्च, **कदापि** = कस्मिन् अपि समये, **तव** = भवतः, **चेतः** = चित्तञ्चेमानि तत्त्वानि, **न उन्मादयन्तु** = सविकारं न कारयन्तु। चित्तस्योन्मादने कारणभूतानां तत्त्वानां राशीकरणेनाथवा समुच्चयेन निरूपणादत्र समुच्चयालङ्कारः । उक्तञ्च - **समुच्चयोऽस्मिन् सति कार्यस्य साधके । खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत् । गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये।।** (सा.द. १०/ ८४-८५) एकस्मिन् विषये कार्यसाधके सत्यपि खलेकपोतन्यायेन अपरे विषयाः, यदि तस्यैव कार्यस्य साधकाः स्युस्तदा समुच्चयालङ्कारो भवति । द्वयोर्गुणयोर्द्वयोः क्रिययोर्वा गुणैः क्रियाभिः सह सम्बन्धे सत्यपि भवति समुच्चयालङ्कारः। कन्दर्प- दर्पशमनी नवरूपसम्पदिति एकोऽपि विषयः चित्तस्योन्मादने समर्थः । इह तु कान्ता- नुरागनिपुणं वयः, सामन्तमौलिमणिरञ्जितपादपीठं राज्यं चेति विषयावपि तत्कार्यसाधकौ समुद्दिष्टौ । एकस्य स्थाने समुच्चयानां विन्यासात् समुच्चयालङ्कारः। उक्तञ्च मम्मटेनापि- **तत् सिद्धिहेतावेकस्मिन् यत्राऽन्यत् तत्करं भवेत् । समुच्चयोऽसौ .....** । (का.प्र., उ. १०, सू. १७९, श्लो. ११५)।।५४।।

दिव्यलक्ष्मी - हे वत्स ! कामदेवको सुन्दरतालाई पनि मन्द तुल्याउने अत्यन्त आकर्षक स्वरूप-सौन्दर्य, आफ्नी प्रियतमासँग गहिरो अनुराग व्यक्त गर्न सफल यौवन र सामन्तका शिरमा सुहाएका मणिद्वारा घर्षण गरिएको चरणपीठले सुहाएको राज्याधिकार यी सबै कुराले तिम्रो चित्तमा कहिल्यै पनि उन्माद उत्पन्न नगराऊन् । उक्त सबै विषयको सदुपयोग गरेर तिमीले जनताको संरक्षण गर्नु पर्दछ ।।५४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्कोचजीवनकरः सचिवोपजापी
कर्णेजपो निरपराधजनोपतापी ।
भूदेवमत्सरपरो मनुजा इमे ते
राज्यस्य विप्लवकरा न वसन्तु राज्ये ।।५५।।

– समुच्चयः

अन्वयः – उत्कोचजीवनकरः, सचिवोपजापी, कर्णेजपः, निरपराधजनोपतापी, भूदेवमत्सरपरः, इमे राज्यस्य विप्लवकराः, मनुजाः, ते राज्ये, न वसन्तु ।

चूडामणिः – **उत्कोचजीवनकरः** – **जीवनम्** = जीविकां करोतीति जीवनकरः, **उत्कोचेन** = अनधिकृतरूपेण प्राप्तेन धनेन वस्तुना वा जीवनवृत्तिविधायक इति, **सचिवोपजापी** – **उपजपनम्** = उपजापः, उपजपतीति **उपजापी** = मिथ्यावार्ताहरः, **सचिवानाम्** = अमात्यानाम्, उपजापी इति, अमात्यभेदकारक इत्यर्थः (भेदो द्वैधे विशेषे स्यात्, उपजापे विदारणे– इति विश्वमेदिन्यौ), **कर्णेजपः** = सूचकः, (कर्णेजपः सूचकः स्यात् – इत्यमरः), **निरपराधजनोपतापी**– निर्गतोऽपराधो येषां ते, **निरपराधाः**= निर्दोषाः, ये **जनाः** = लोकाः, तान्, **उपतापयति** = सन्तापयतीति, निर्दोषजनसन्तापक इत्यर्थः, **भूदेवमत्सरपरः**– **भुवः**= पृथिव्याः, **देवाः** = सुराः, इति **भूदेवाः** = ब्राह्मणाः, तेषु **मत्सरः** = मात्सर्यम्, क्रोधो द्वेषो वा, तत्र **परः** = संलग्न इति भूदेवमत्सरपरः, विप्रद्वेषपरायण इत्यर्थः, **इमे** = उपर्युक्ताः, दोषदूषिताः, **राज्यस्य** = राष्ट्रस्य, **विप्लवकराः**= विनाशकाः, **मनुजाः** = मानवाः, **ते** = तव, **राज्ये** = राष्ट्रे, **न वसन्तु** = न तिष्ठन्तु इति मदीयं शिक्षाकृत्यम् । अत्रापि विप्लवकराणां तत्त्वानां राशीकरणेन समुच्चयेन वा उल्लेखात् समुच्चयालङ्कारः ।।५५।।

दिव्यलक्ष्मी – राजकाजमा घुस लिएर काम गर्ने नीच मानिस, स्वार्थसिद्धिका लागि सचिव अथवा मन्त्रीहरूका छेउमा गई भए–नभएका कुरा लगाउने धूर्त मानिस, अरूका कानमा खुसु–खुसु कुरा गर्ने क्षुद्र मानिस, कुनै अपराध नगरेका निर्दोष मानिसहरूलाई पीडा दिने अपराधी मानिस र विद्वान् एवं बुद्धिमान्हरूसँग द्वेष गर्ने पापी मानिसले राज्यमा उपद्रव मच्चाउँछन् । यसर्थ यस्ता मानिसहरूलाई तिमीले राज्यमा बस्न दिनु हुँदैन ।।५५।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हस्तं विहाय तव खड्गलतां प्रयातु
त्वन्मुष्टिबन्धनमुपैतु मनः प्रहाय ।
बाणेषुपक्षपतनोत्थरयश्च लोकं
त्यक्त्वा युगातिसरणं श्रयतां भुजौ ते ।।५६।।

- पर्यायः

अन्वयः - तव, मनः, हस्तम्, विहाय, खड्गलताम्, प्रयातु, (ताम्), प्रहाय, त्वन्मुष्टिबन्धनम्, उपैतु, बाणेषुपक्षपतनोत्थरयः, च, युगातिसरणम्, लोकम्, विहाय, ते, भुजौ, श्रयताम् ।

चूडामणिः - हे वत्स ! शस्त्रसाधनाकर्मणि, **तव** = भवतः, **मनः** = चित्तम्, हस्तकौशलसाफल्यानन्तरं **हस्तम्** = पाणिम्, **विहाय** = परित्यज्य, खड्गसञ्चालन-कौशलमधिगन्तुम्, **खड्लताम्** = चन्द्रहासवल्लीम्, **प्रयातु** = गच्छतु, तत्र सफलता-मधिगत्य, सखड्गहस्तमुष्टिबन्धनदार्ढ्याय, **त्वन्मुष्टिबन्धनम्** - तव मुष्टिरिति त्वन्मुष्टिः= तव सङ्ग्राहः, (मुष्टिबन्धस्तु सङ्ग्राहः- इत्यमरः), तस्य **बन्धनम्**= निगडः, बध्नातीति बन्धनमिति व्युत्पत्तिः, तत्, **उपैतु** = प्राप्नोतु, एतेन त्वं खड्गप्रहारकर्मणि परमनिपुणो धनुःप्रहारकौशलार्जनविधावपि सफलो भविष्यसीति तत्त्वम्, **बाणेषुपक्षपतनोत्थरयः**-वणन्ति इति **बाणाः** = शब्दाः, तादृशा बाणाः येषु ते, सशब्दाः, (अर्श आदिभ्योऽजिति अच्प्रत्ययः), **इषवः** = शराः, सशब्दबाणानां **पक्षे**= लक्ष्ये, **पतनेन**= प्रहारेण, **उत्थः** = समुत्पन्नः, यो **रयः** = वेगः, सः, **युगातिसरणम्** - **युगस्य** = समयस्य, **अतिसरणम्**= अनुसरणशीलम्, **लोकम्**= जन-समाजम्, **विहाय** = त्यक्त्वा, **ते**= तव, **भुजौ** = बाहू, **श्रयताम्** = आश्रयताम्, अथवा **युगम्** = यानाङ्गभूतं तिर्यक्काष्ठ-मनुसरतीति, **युगातिसरणम्** = युगकाष्ठानुसारिणम्, मांसलदर्शनं वा, **लोकम्** = जनसमूहम्, त्यक्त्वा तव बाहू श्रयतामित्यर्थः । वस्तुतः सशब्दबाणप्रहारकार्ये पक्षपतनाज्जायमानो वेगः क्षिप्रगामी भवति, तद्गता क्षिप्रता प्रभावकारिता च ते भुजौ प्राप्नोतु, त्वदीयौ भुजौ सवेगशस्त्रसञ्चालनकलानिपुणौ स्याताम्, सामान्यलोकस्तु स्थूलदृष्ट्या विलोकयति, स्थूलमेव लक्ष्यं प्राप्तुं केन्द्रितो भवति, स युगकाष्ठसमानां स्थूलाकृतिं बहु मन्यते, तादृशीं स्थूलदृष्टिं परित्यज्य त्वं सूक्ष्मस्य शक्तिमतो वेगस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साधनायां सफलो भवेत्याशयः कृतवीर्यस्य । अत्र पर्यायेण वस्तूनामुपस्थापनात् पर्यायोऽलङ्कारः । उक्तञ्च दर्पणकारेण – **क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्। भवति क्रियते वा चेत् तदा पर्याय इष्यते ।।** (सा.द. १०/८०) एतदनुसारेणात्र एकं वस्त्वनेकस्मिन् क्रियते, अनेकानि च वस्तून्येकस्मिन् यदि क्रियन्ते, तदा पर्यायो भवति इति ज्ञायते । हस्तं विहाय इति पद्ये मनसो हस्ते, खड्गे, मुष्टिबन्धने चेति अनेकेषु सम्बन्धनात् पर्यायः । उक्तञ्च मम्मटेन – **एकं क्रमेणाऽनेकस्मिन् पर्यायः** ..... । (का.प्र., उ. १०, सू. १८१, श्लो. ११६)।।५६।।

दिव्यलक्ष्मी – हे पुत्र ! स्थूलबाट सूक्ष्मतर्फ अग्रसर हुनु बुद्धिमान्को कर्तव्य हो । तिमीले राष्ट्रको रक्षाका लागि शस्त्रकुशलता प्राप्त गर्न सर्वप्रथम हस्तकौशल अर्जित गर्नुपर्दछ । त्यसपछि हस्तकौशलभन्दा सूक्ष्म मानिएको तलबार चलाउने कलामा कुशलता प्राप्त गर्नुपर्दछ । तलबार चलाउन कुशलता प्राप्त गरेपछि तिम्रो मन त्योभन्दा पनि सूक्ष्म आफ्नो मुठ्ठीलाई कसिलो बनाएर हातमा राखेको तलबारद्वारा शत्रुलाई प्रहार गर्ने कलामा कुशल बन्नुपर्दछ । यसरी शस्त्रप्रहारमा कुशलता प्राप्त गरेपछि तिम्रो मन धनुसञ्चालनमा केन्द्रित हुनुपर्दछ । बाण तिम्रो धनुबाट छुटेर लक्ष्यमा पुग्दा उत्पन्न हुने जुन वेग हो त्यो सूक्ष्म र प्रभावकारी शक्तिको परिचायक हो । त्यो वेग र प्रभावकारिता मोटो विचार भएका मानिसहरूको स्थूल बुद्धिलाई चिरेर तिम्रा दुई भुजामा आई चिरस्थायी बनेर रहोस् भन्ने मेरो कामना छ । लौकिक मानिसहरू देखिने कुरामा पराक्रम देखाउँदामात्र प्रभावित हुन्छन् । तर तिमीले देखिने कुराहरूमा भन्दा नदेखिने तर प्रभावकारी विषयहरूमा कुशल भई राष्ट्रको सञ्चालन गर्नुपर्दछ भन्ने मेरो उपदेश हो ।।५६।।

पादे मिलत्यभिहतोऽपि पुरः क्षणेन
वक्षःस्थलं समधिरोहति वातवेगात् ।
लब्ध्वा मुखव्यतिकरं विदधात्ययत्ना-
न्मूर्ध्नि स्थितिं खलजनोऽयनरेणुकल्पः ।।५७।।

– पर्यायः

अन्वयः – अयनरेणुकल्पः, खलजनः, पुरः, अभिहतः, अपि, क्षणेन, पादे, मिलति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वातवेगात्, वक्षःस्थलम्, समधिरोहति, मुखव्यतिकरम्, लब्ध्वा, अयत्नात्, मूर्ध्नि, स्थितिम्, विदधाति ।

चूडामणिः - **अयनरेणुकल्पः** - **अयनस्य** = मार्गस्य, **रेणोः** = धूलेः, **कल्पः**= समान इति, अयनरेणुकल्पः, मार्गधूलिसमान इत्यर्थः (रेणुर्द्वयो स्त्रियां धूलिः पांसुर्ना न द्वयो रजः, अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः- इत्यमरः), **खलजनः** - खलः= दुष्टश्चासौ **जनः** = नरः, इति, दुर्जन इत्यर्थः (पिशुनो दुर्जनः खलः- इत्यमरः), पुरः= अग्रे, **अभिहतः अपि**= ताडितः अपि, **क्षणेन** = अचिरेण, **पादे**= चरणे, मिलति = सम्पृक्तो भवति, **वातवेगात्** = मारुतरयात्, **वक्षःस्थलम्** = उरःस्थलम्, समधिरोहति = आरोहति, **मुखव्यतिकरम्** - **मुखस्य** = आननस्य, **व्यतिकरः** = सम्पर्कः, व्यतिषङ्गो वा, इति मुखव्यतिकरः, तम्, (मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणाख्ययोः- इति हैमः, अथ व्यतिकरो पुंसि व्यसनव्यतिषङ्गयोः - इति मेदिनी), लब्ध्वा = प्राप्य, **अयत्नात्** = सरलतया, **मूर्ध्नि** = शिरसि, **स्थितिम्** = अवस्थानम्, विदधाति = करोति । पादे, मुखे, शिरसि च क्रमेण रेणोर्गतिवर्णनात् पर्यायः ।।५७।।

त्रिशक्तिः - मार्गरेणुस्ताडितोऽपि पादे मिलति, वातवेगाद् वक्षसि प्राप्नोति, ततो मुखे स्थानं लब्ध्वा शिरसि स्थितिं विदधाति तथैव खलजनः पूर्वं तिरस्कृतोऽपि चरणे निपतति, ततः सज्जनस्य हृदये स्थानमाप्नोति, मौखिकसंवादेन सज्जनं विश्वस्तं कारयति, तदनन्तरं सज्जनस्य शिरसि समारुह्य तं वशवर्तिनं विधाय स्वकार्यं साधयति।

दिव्यलक्ष्मी - बाटाको धूलो र दुर्जन दुबैको प्रकृति एकसमान हुन्छ । खुट्टाले हिर्काएको धूलो उडेर छातीमा पुग्छ, छातीबाट मुखमा पुग्छ र मुखबाट शिरमा पुग्छ। त्यसैगरी दुर्जन तिरस्कृत हुँदा पनि लाजै नमानेर खुट्टामा पर्न आउँछ, अनेकथरिका मीठा वचन बोलेर त्यसले प्रभावित बनाउँछ र सज्जन पुरुषको मनमा पनि स्थान पाउँछ । सज्जनको मनमा स्थान बनाएपछि पटक-पटक सम्पर्क गरेर सज्जनसँग आफ्ना सुख-दुःख बताउँदै संवाद गरिरहन्छ । यसरी पटक-पटक सम्पर्क गरेपछि सज्जनलाई त्यसले आफ्नो अधीनमा ल्याउँछ । यसकारण दुर्जनहरूको यो स्वभाव बुझेर तिमी तिनीहरूबाट जोगिनु पर्दछ ।।५७।।

यस्मादुदग्रचरितानुगुणं सुशीलं
धत्से भविष्यति ततः पिशुनान्वयस्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नो पक्षता त्वयि विवेकविशुद्धचित्ते
साध्यस्य किन्तु कथनीयमिदं ब्रवीमि ।।५८।।

– अनुमानम्

अन्वयः – यस्मात्, त्वम्, उदग्रचरितानुगुणम्, सुशीलम्, धत्से, (तस्मात्), विवेकविशुद्धचित्ते, त्वयि, पिशुनान्वयस्य, पक्षता, नो भविष्यति, किन्तु, इदम्, साध्यस्य, विषये, कथनीयम्, ब्रवीमि ।

चूडामणिः – **यस्मात्** = यतः, **त्वम्** = कार्तवीर्यः, **उदग्रचरितानुगुणम्** – गुण्यते इति **गुणः** = दयादाक्षिण्यादिविषयः, गुणमनु इति **अनुगुणम्** = दयादाक्षिण्याद्यनुकूलम्, **उदग्रस्य** = अत्युत्तमस्य चरित्रस्य अनुगुणमिति उदग्रचरितानुगुणम्, समुन्नतचरित्रानुकूलमित्यर्थः, **सुशीलम्** = सुस्वभावम्, (शुचौ तु चरिते शीलम् – इत्यमरः) **धत्से** = कलयसि, **ततः** = तस्मात्, **विवेकविशुद्धचित्ते** – **विवेकेन** = सदसद्विचारेण, **विशुद्धम्** = निर्मलम्, **चित्तम्** = मानसम्, यस्य तस्मिन्, (विवेकः स्याद् जलद्रोण्यां पृथग्भावविचारयोः– इति मेदिनी), **त्वयि** = कार्तवीर्ये, **पिशुनान्वयस्य** – **पिशुनानाम्**= खलानाम्, **अन्वयः** = वंश इति पिशुनान्वयः, तस्य, **पक्षता** = पक्षधर्मिता, आश्रयता वा, **नो**= नैव, **भविष्यति** = भविता, यथा हि– पर्वतो वह्निमान् इति वाक्ये साध्यस्य वह्नेः पक्षः पर्वतो भवति, अतः पर्वते वह्नेः पक्षतेव त्वयि खलानां **पक्षता** = आश्रयता, न भविष्यतीति कृतवीर्यस्य दृढोक्तिः, **किन्तु** = तथापि, **साध्यस्य**= राज्ञां लक्ष्यस्य विषये, **इदम्** = एतत्, **कथनीयम्** = अवश्यवक्तव्यम्, शिक्षाकृत्यम्, यद् अस्ति तत्, **इदम्** = अग्रे प्रतिपाद्यम्, **ब्रवीमि**= कथयामि । वत्स! त्वं महापुरुषसुलभसुशीलतासम्पन्नोऽसि, शास्त्राधीतिजन्यविवेकशुभ्रमस्ति तावकीनं चित्तम्। एतादृशेन त्वया दुर्जनपक्षपातो न हि विधातुं शक्य इति मदीयानुमितिः । तथापि पिता पुत्रमुपदिशतीति लोकसामान्येन यत् कर्तव्यतया कथनीयं तत् कथयामीति भावः । उदग्रचरितानुगुणशीलसद्भावाद् दुर्जनानां त्वमाश्रयो न भविष्यसीत्यनुमानादत्रानुमानालङ्कारः । उक्तञ्च – **अनुमानं तदुक्तं यत् साध्य-साधनयोर्वचः** । (का.प्र., उ. १०, सू. १८३, श्लो. ११६)।।५८।।

दिव्यलक्ष्मी – बाबु ! तिमी उत्तम चरित्र, अनुकूल एवं सुन्दर शीलस्वभावका पनि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घनी छौ । यसकारण तिमीले कहिल्यै पनि सङ्गत गर्न नहुने मानिसहरूको सङ्गत गर्ने छैनौ । तिमीले विवेकद्वारा आफ्नो चित्त शुद्ध बनाउनेछौ र तिम्रा समीपमा दुष्टको जमातले आश्रय पाउने छैनन् । यद्यपि यी सबै कुरा तिमी आफै जान्दछौ तापनि पिताको नाताले म तिमीलाई शिक्षा प्रदान गरिरहेको छु ।।५८।।

दुर्भेद्यमन्त्रमभिरञ्जितसर्वलोकं
चारेक्षणावगतमित्रविरोधिरीतिम् ।
स्थाने मुदाशयकुशेशयमोचितं त्वां
लक्ष्मीर्न मुञ्चति पुरा चपला चलाऽपि ।।५९।।

– परिकरः

अन्वयः - पुरा, चपला, चला, अपि, लक्ष्मीः, दुर्भेद्यमन्त्रम्, अभिरञ्जितसर्वलोकम्, चारेक्षणावगतमित्रविरोधिरीतिम्, मुदाशयकुशेशयमोचितम्, त्वाम्, न मुञ्चति ।

चूडामणिः - **पुरा** = प्राचीनसमये, **चपला** = चञ्चला, **चला** = अस्थिरा, अपि लक्ष्मीः = राजलक्ष्मीः, **दुर्भेद्यमन्त्रम्** - **दुर्भेद्यः** = अभेदनीयः, **मन्त्रः** = मन्त्रणा, यस्य तम्, **अभिरञ्जितसर्वलोकम्** - **अभिरञ्जिताः** = सहर्षं सुरक्षिताः, **सर्वे** = सम्पूर्णाः, **लोकाः** = जनाः, येन तम्, **चारेक्षणावगतमित्रविरोधिरीतिम्** - **चाराणाम्**= दूतानाम्, **ईक्षणैः** = विलोकनैः, **अवगता**= ज्ञाता, **मित्राणाम्** = सुहृदाम्, **विरोधिनाम्**= शत्रूणाञ्च, **रीतिः** = पद्धतिः, येन तम्, **मुदाशयकुशेशयमोचितम्** - **मुदः** = प्रसन्नतायाः, हर्षस्य वा, **आशयः** = आधार इति मुदाशयः, मुदाशयस्य **कुशेशयस्य** = कमलस्य या **मा** = लक्ष्मीः, तस्याः, **उचितः** = योग्य इति तम्, (कुशे, जले शेते इति, । अधिकरणे शेते (३/२/१५) इत्यच्प्रत्ययः । शयवास० (६/३/१८) इत्यलुक्), **त्वाम्** = भवन्तम्, **न मुञ्चति** = न अमुञ्चत्, इति **स्थाने** = उचितमेव । अर्थाद् भवान् नारायणस्वरूपोऽस्ति भवतोऽनेकेऽवताराः पृथिव्यां जाताः । तेषु तेष्ववतारेषु भगवती लक्ष्मीः कदापि भवन्तं नामुञ्चत् । अत एवास्मिन् सहस्रार्जुनावतारेऽपि सा लक्ष्मीर्भवतोऽनुकूला सम्पत्स्यत इति मदीया प्रतीतिरस्ति । अत्र साकूतैर्विशेषणैः कार्तवीर्यस्य लक्ष्मीनिवासयोग्यता व्यज्यत इति परिकरोऽलङ्कारः । उक्तञ्च - **विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः**। (का.प्र., उ. १०, सू. १८४, श्लो. ११७)।।५९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - वत्स ! नारायणरूप तिम्रा अनेक अवतारहरू पहिले भए । तिमीले कैयौं पटक राजाको रूप लिएर संसारको लालनपालन गरेका थियौ । ती-ती अवतारहरूमा तिमीले आफ्ना उत्तम कार्यबाट सबै जनतालाई खुसी तुल्याएका थियौ । आफ्ना विश्वासपात्र दूतहरूको निरीक्षणका माध्यमबाट मित्र र शत्रुहरूका चलखेल बुझेका थियौ । तिमी सबैलाई हर्ष प्रदान गर्ने सुन्दर कमलपुष्पमा विराजमान वैकुण्ठलक्ष्मीका उपयुक्त स्वामी भएकाले अस्थिर एवं चञ्चल स्वभावकी राजलक्ष्मीले पनि तिमीलाई कहिल्यै छाडिनन् । तिमीले पृथु आदि राजाले राजपदमा रही निर्वाह गरेको राजधर्मलाई अङ्गीकार गरेर प्रजापालन गर्‍यौ भने अहिले पनि राजलक्ष्मीले तिमीलाई छाड्ने छैनन् भन्ने कुरामा म विश्वस्त छु ।।५९।।

आकार्यजन्म तव न स्फुटतां प्रयातु
मन्त्रः प्रयाति यदि तत्पुरतो मृषोक्त्या ।
आमूलमेव सकलं समलीकयेथा-
स्त्रिश्रीप्रयुक्तिरहिते विहिता यथा स्यात् ।।६०।।

- सूक्ष्मम्

अन्वयः - तव, मन्त्रः, आकार्यजन्म, स्फुटताम्, न, प्रयातु, यदि, प्रयाति, तत्, पुरतः, मृषोक्त्या, आमूलम्, एव, सकलम्, समलीकयेथाः, अहिते, त्रिश्रीप्रयुक्तिः, विहिता, स्यात् ।

चूडामणिः - तव = भवतः, **मन्त्रः** = गुह्यवादः (वेदभेदे गुह्यवादे मन्त्रः- इत्यमरः) अथवा राजनीतिकी मन्त्रणा, **आकार्यजन्म** = यावत् कार्यं न सिद्ध्यति तावत्, **स्फुटताम्** = सर्ववेद्यताम्, **न प्रयातु** = न गच्छतु, **यदि** = चेत्, कथङ्कारमपि, **प्रयाति** = स्फुटतां गच्छति, तदा, **तत्पुरतः** = श्रोतृजनसमक्षे, **मृषोक्त्या** = मिथ्या-कथनेन, **आमूलम् एव** = मूलाद् आरभ्य एव, **सकलम्** = सम्पूर्णम्, **समलीकयेथाः**= असत्यं कारय, **यथा** = येन, सत्यस्यासत्यत्वविधानेन, **अहिते** = शत्रौ, **त्रिश्रीप्रयुक्तिः**- तिसृणाम् = त्रिसङ्ख्याकानाम्, **श्रियाम्** = शक्तीनाम्, प्रभूत्साहमन्त्रशक्तीनामित्यर्थः, अथवा शौर्ययत्नकीर्तीनामिति केचन, **प्रयुक्तिः** = प्रयोगः, **विहिता** = कृता, **स्यात्**= भवेत् ।।६०।। अत्र सूक्ष्मालङ्कारः । उक्तञ्च मम्मटेन - **कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थो-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यस्मै प्रकाश्यते । धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते ।। (का.प्र., उ. १०, सू. १९०, श्लो. १२१-१२२) अत्र पद्ये मन्त्रगोपनस्य महत्तायाः परिचायनाय तिसृणां श्रियां शत्रौ प्रयोगे साफल्यरूपं लक्ष्यं निर्दिष्टम् । तल्लक्ष्यमधिगन्तुमसत्याश्रयणमपि न्याय्यमिति तथ्यं सूक्ष्मालङ्कारस्य विषयः ।।६०।।

त्रिशक्तिः - यावत् कार्यसिद्धिर्न भवति तावद् राज्ञा मन्त्रो गोपनीयः । यदि मन्त्रणा सर्ववेद्या जायते तदा राज्ञो महती हानिः । प्रमादवशान्मन्त्रस्य स्फुटतायां सत्यां चातुर्यमाकलय्य मिथ्याश्रयेण पूर्वं यदुक्तं तत्सर्वमसत्यमिति श्रोतृणां समक्षे प्रतिपादनीयम्। एतेन राज्ञां प्रभुमन्त्रोत्साहशक्तीनां प्रयोगाः सफलाः सम्पद्यन्त इति भावः।

दिव्यलक्ष्मी - राजकीय गोप्य मन्त्रणालाई मन्त्र भनिन्छ । यस्तै गोप्य मन्त्रणा गर्ने मानिसहरूलाई मन्त्री भनिन्छ । मन्त्रीले गर्ने मन्त्रणा जहिले पनि गोपनीय हुनुपर्दछ। यदि गोप्यमन्त्रणा असावधानीका कारण सर्वसाधारणको बीचमा चर्चाको विषय बन्यो भने शासनकार्य राम्ररी चल्न सक्दैन र राजाले ठूलो हानि-नोक्सानी व्यहोर्नुपर्दछ। त्यसकारण मन्त्रणा बाहिर फैलिँदा जनतामा नराम्रो असर नपरोस् भनी जुन मानिसले गोप्यमन्त्रणा थाहा पाएका छन् तिनका समक्षमा गई 'तिमीले थाहा पाएको गोप्य कुरा असत्य हो र परिहासमा फैलिएको कुरा हो' भनेर सत्यलाई पनि असत्य सावित गर्नुपर्दछ । गोप्य मन्त्रणा थाहा पाउने मानिसहरूलाई चतुरतापूर्वक तिमीले थाहा पाएको कुरा सत्य होइन भन्ने विश्वास दिलाउनु पर्दछ । यसबाट मात्र शत्रुमाथि प्रयोग गरिएका प्रभुशक्ति, उत्साहशक्ति र मन्त्रशक्तिका कार्य सफल हुनेछन् ।।६०।।

दौत्ये नियुक्तमधिसाधितकार्यमार्यं
प्रत्यागतं सदसि नानुनियोजयेथाः ।
हस्ते क्रिया हनुमदाकृतिमस्य तावद्
रेखाकृतामितरबोधनिरोधनाय ।।६१।।

- सूक्ष्मम्

अन्वयः - दौत्ये, नियुक्तम्, अधिसाधितकार्यम्, प्रत्यागतम्, आर्यम्, सदसि, न, अनुनियोजयेथाः, तावत्, इतरबोधनिरोधनाय, अस्य, हस्ते, रेखाकृताम्, हनुमदाकृतिम्, क्रियाः।

चूडामणिः - त्वम्, **दौत्ये** = दूतस्य कर्म दौत्यम्, **तस्मिन्** = संवादहरणकर्मणि,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नियुक्तम् = प्रयुक्तम्, सन्देशहारकपदे नियोजितमित्यर्थः, **अधिसाधिकतकार्यम्**- **अधि** = समन्तात्, **साधितम्** = सफलितम्, **कार्यम्** = कर्म येन तम्, **प्रत्यागतम्**= कार्यं समाप्य राजसमीपे समागतम्, **आर्यम्** = श्रेष्ठजनम्, सन्देशवाहकमिति तात्पर्यम्, **सदसि** = राजसभायाम्, **न** = नैव, **नियोजयेथाः** = प्रत्यावर्तनानन्तरं तत्कालमेव मन्त्रणाया गोप्यतायै तं जनं पुनर्न नियोजय, **तावत्** = सर्वप्रथमम्, **इतरबोधनिरोधनाय**- **इतरेषाम्** = अन्येषां जनानाम्, **बोधस्य** = दूतसाधितकार्यज्ञानस्य, **निरोधनाय** = अवरोधाय, **अस्य** = दूतस्य, **हस्ते**= भुजायाम्, **रेखाकृताम्** = तूलिकया रेखिताम्, **हनुमदाकृतिम्**- **हनुमतः** = अञ्जनीनन्दनस्य, **आकृतिः**= आकारः, ताम्, हनुमदाकार-मित्यर्थः, **क्रियाः** = सम्पादय । अत्र सूक्ष्मोऽलङ्कारः ।।६१।।

त्रिशक्तिः – वस्तुतश्चारकार्यं साधयित्वा स्वसमीपं प्राप्तो गूढपुरुषः कदापि राजसभायां न प्रवेष्टव्यः, अन्यथा मन्त्रः प्रकाशितः स्यात् । चारेणायं मन्त्रो गोपनीय इति सङ्केतनाय त्वया तस्य हस्ते दूतशिरोमणेः श्रीहनुमतो रेखात्मिका आकृतिर्निर्मेया । यतो हि प्रथमदूतेन हनुमता यथा श्रीरामस्यादेशवाक्येषु निहिता मन्त्रा गोपितास्तथैव त्वयापि मन्त्रो गोपनीय इति सन्देशस्तस्मै देयः । अथवा यथोत्तुङ्गहनुयुतो भवति हनुमान् तथैव त्वयापि अवरुद्धोष्ठेन भाव्यमिति पद्यगतं सूक्ष्मं तात्पर्यम् ।

दिव्यलक्ष्मी - राजकीय गुप्तचरको कार्यमा नियुक्त भएका पदाधिकारीलाई अनुसन्धानमा खटाएपछि जब ती पदाधिकारी कार्य सम्पन्न गरेर राजाको समक्षमा आउँछन् त्यसबेला तिनलाई राजसभामा प्रवेश गराउनु हुँदैन । यसरी प्रवेश गराउँदा राजसभामा रहेका अरू मानिसहरूले गोप्यमन्त्रणा थाहा पाउन सक्छन् । त्यस्ता दूतलाई मुखले केही नभनी तिनको हातमा हनुमान्को रेखात्मक आकृति बनाएर जसरी हनुमान्जीको मुखको च्यूँडो उठेको छ त्यसैगरी तिमीले पनि आफ्नो मुख बन्द गर्नुपर्छ तर गोप्य कुरा प्रकाशित गर्न हुँदैन भन्ने रहस्यको बोध गराउनुपर्दछ ।।६१।।

कार्यं किमत्र भवतो जनरञ्जनं द्राग्
ध्येयं किमस्ति मधुसूदनपादपद्मम् ।
सेव्यं किमुज्ज्वलमतिद्विजवर्यवृन्दं
हेयं किमैहिकसुखोत्सुकमर्त्ययूथम् ।।६२।।

– परिसङ्ख्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - अत्र भवतः, किं कार्यम् ?, द्राग्, जनरञ्जनम् (न त्वन्यत्), किं ध्येयम् अस्ति ?, मधुसूदनपादपद्मम् एव (न त्वन्यत्), किं सेव्यम् अस्ति ? उज्ज्वल-मतिद्विजवर्यवृन्दम् एव (न त्वन्यत्), किं हेयम् अस्ति ?, ऐहिकसुखोत्सुकमर्त्ययूथम् एव (न त्वन्यत्) ।

चूडामणिः - **अत्र** = संसारे, **भवतः** = कार्तवीर्यस्य, **किं कार्यम्** = किं कर्तव्यम्, इति प्रश्नस्योत्तरमस्ति, **द्राग्** = शीघ्रमेव, **जनरञ्जनम्** = प्रजापालनम्, कर्तव्यम्, न त्वन्यत्, भवतः, **किं ध्येयम्** = किं ध्यानयोग्यम्, अस्ति, अस्य प्रश्नस्योत्तरमस्ति, **मधुसूदनपादपद्मम् - मधुसूदनस्य** = नारायणस्य, **पादरूपम्** = चरणरूपम्, **पद्मम्**= कमलमेव ध्येयमित्येव, न त्वन्यत्, **किं सेव्यम्** = किं सेवनीयम्, अस्ति, अस्योत्तरमस्ति, **उज्ज्वलमतिद्विजवर्यवृन्दम्- उज्ज्वला** = निर्मला, **मतिः** = बुद्धिः, येषान्ते, **द्विजेषु**= ब्राह्मणेषु, **वर्याः** = श्रेष्ठाः द्विजवर्याः, तेषां **वृन्दम्** = यूथमिति, निर्मलप्रज्ञविप्रवरयूथमेव सेव्यं न त्वन्यदिति, भवतः, **किं हेयम्** = किं त्याज्यम्, इति प्रश्नस्योत्तरमाह - **ऐहिकसुखोत्सुकमर्त्ययूथम्** - इह भवम्, **ऐहिकम्** = सांसारिकम्, ऐहिकञ्चासौ सुखम् = भोगसुखम्, तस्मिन् **उत्सुकाः**= उत्कण्ठिताः, **ये मर्त्याः** = नराः, तेषाम्, यूथम्= वृन्दम्, एव हेयम्, न त्वन्यदित्यर्थः, लौकिकभोगानन्दोत्कनरवृन्दस्य सङ्गतिर्न कर्तव्येति भावः । अत्र परिसङ्ख्यालङ्कारः। उक्तञ्च मम्मटेन - **किञ्चित् पृष्टमपृष्टं च कथितं यत् प्रकल्पते । तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता ।।** (का.प्र., उ.१०, सू. १८६, श्लो. ११८) प्रश्नपूर्वकमथवा विनैव प्रश्नं कथिताद् वस्तुनोऽन्यस्य यदि व्यावृत्तिर्भवति तदा परिसङ्ख्यालङ्कारः । उक्तपद्ये प्रश्नपूर्वकं कथिताद् वस्तुनो जनरञ्जनं विहाय अन्यन्नास्ति कर्तव्यमिति शैल्या ध्येयसेव्यहेयवस्तूनां निर्वचनं कृतम्। इत्थमेवालङ्कारसर्वस्वकारो वदति -

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः,
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयञ्च करुणा,
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ।।

दिव्यलक्ष्मी - हे पुत्र! तिमीले गर्नुपर्ने प्रमुख कार्य जनतालाई खुसी तुल्याउनु नै हो।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिमीले ध्यान गर्नुपर्ने मुख्य विषय नारायणको चरणारविन्दको ध्यान नै हो । तिमीले सेवा गर्नुपर्ने महिमामय विषय उज्ज्वल बुद्धि भएका उत्तम विद्वान्हरू नै हुन्। तिमीले त्याग गर्नुपर्ने मुख्य विषय संसारको प्रपञ्चमा फंसेका, सुख-दुःखमा आसक्त, लोभी र पापी मानिसहरूको समुदाय नै हो ।।६२।।

किं भूषणं नरपतेर्न मणिर्यशोऽच्छं
कः शात्रवो विषयलोलुपता न बाह्यः।
मित्रं किमुज्ज्वलमतिर्न तु बान्धवादि
किं वित्तमार्यचरितं न तु हीरकादि ।।६३।।

– परिसङ्ख्या

अन्वयः – नरपतेः, किं भूषणम्, न मणिः (भूषणम्, अपि तु), अच्छम्, यशः (एव नरपतेः, भूषणम्), कः शात्रवः ?, न बाह्यः (शात्रवः, अपि तु), विषयलोलुपता एव (नरपतेः, शात्रवः), किं मित्रम् ?, न बान्धवादि (मित्रम्, अपि तु), उज्ज्वलमतिः (एव नरपतेः, मित्रम्), किं वित्तम् ?, न तु हीरकादि (वित्तम्, अपि तु), आर्यचरितम् एव (नरपतेः, वित्तम्) ।

चूडामणिः – **नरपतेः** = राज्ञः, **किं भूषणम्** = किमलङ्करणम्, **न मणिः** = न रत्नम्, भूषणम्, अपि तु, **अच्छम्** = निर्मलम्, **यशः** = कीर्तिरिव, भूषणम्, **कः शात्रवः?** = किन्नामा शत्रुः, (द्विट्विपक्षाहितामित्रदस्युशात्रवशत्रवः– इत्यमरः), **न बाह्यः** = न बहिर्भवः कश्चन जनः शत्रुरपि तु, **विषयलोलुपता**– **विषयेषु** = भोग्यपदार्थेषु, **लोलुपः** = लुब्ध इति विषयलोलुपः, तस्य भावः, विषयलोलुपता, भौतिकभोग्यविषयलुब्धतेत्यर्थः (समौ लोलुपलोलुभौ– इत्यमरः), नरपतेः, **किं मित्रम् ?**= कः सखाः ?, **न बान्धवादि** = न बन्धुजनः, अपि तु, **उज्ज्वलमतिः** – **उज्ज्वला** = निर्मला, **मतिः** = बुद्धिः, यस्य सः, तादृशो जन एव मित्रमित्यर्थः, नरपतेः, **किं वित्तम् ?** = किं धनम् ?, **न तु हीरकादि** = हीरकादिधातुजातं न वित्तम्, अपि तु, **आर्यचरितम्** - **आर्यम्** = पूज्यम्, **चरितम्** = चरित्रम्, उत्तमजनसुलभचरित्रम् एव **वित्तम्** = धनम्, भवतीत्यर्थः । अत्र परिसङ्ख्यालङ्कारः । अत्रापि प्रश्नपूर्वकं कथिताद् वस्तुनो यशो विहाय नान्यद् भूषणमिति शैल्या अन्यवस्तुव्यवच्छेदो विधीयत इति परिसङ्ख्या । अस्योदाहरणतया काव्यदीपिकाकारेण सङ्गृहीतं पद्यं यथा –

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किं भूषणं सुदृढमत्र यशो न रत्नम्
किं कार्यमार्यचरितं सुकृतं न दुष्टम् ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रम्
जानाति कस्त्वदपरः सदसद्विवेकम् ।।

दिव्यलक्ष्मी - राजाको गहना भनेको मणि होइन त्यो त निर्मल कीर्ति हो । राजाको शत्रु भनेको बाहिरी शत्रु होइन अपितु विषयप्रतिको आसक्ति हो । राजाका मित्र बन्धुबान्धव होइनन् अपितु निर्मल बुद्धि भएका विद्वान् हुन् । राजाको धन हीरा-मणिको समुदाय होइन अपितु आफ्नै उत्तम चरित्र हो ।।६३।।

साहित्यशास्त्रविदुषि व्यभिचारिदृष्टि-
र्वृत्त्यर्थविग्रहगिरः खलु शब्दशास्त्रे ।
दुःशासनान्वितसभा ननु भारतादौ
सद्राज्ञि शासति विपक्षकथाऽपि तर्के ।।६४।।

- परिसङ्ख्या

अन्वयः - सद्राज्ञि, शासति, व्यभिचारिदृष्टिः, साहित्यशास्त्रविदुषि (एव, न तु जनतासु), वृत्त्यर्थविग्रहगिरः, शब्दशास्त्रे (एव), खलु, (न जनतासु), ननु दुःशासनान्वितसभा, भारतादौ, (एव न जनतासु), विपक्षकथा, अपि, तर्के (एव न जनतासु) ।

चूडामणिः - कृतवीर्यः कार्तवीर्यमुपदिशन् कथयति - हे वत्स ! **सद्राज्ञि** = उत्तमनरपाले, **शासति** = शासनं कुर्वाणे सति, **व्यभिचारिदृष्टिः** - व्यभिचरन्तीति **व्यभिचारिणः** = निर्वेदावेगश्रममदजडताप्रभृतयस्त्रयस्त्रिंशत् सञ्चारिभावाः, तेषु, **दृष्टिः**= दर्शनम्, अथात् सञ्चारिभावेषु दृष्टिपातः काव्याध्ययनसमीक्षणादौ, **साहित्यशास्त्रविदुषि**-शब्दार्थयोः सौन्दर्यदृष्ट्या परस्परप्रतिस्पर्धी सहभावो यस्मिन् तत् **साहित्यम्** = काव्यशास्त्रम्, काव्यं वा, **साहित्य-शास्त्रस्य** = काव्यशास्त्रस्य, **विदुषि** = पण्डिते एव, न जनतासु, कस्यापि जनस्य न परनारीषु कामुकतया दृष्टिपात इत्यर्थः, **वृत्त्यर्थ-विग्रहगिरः** - विगृह्यतेऽनेनेति **विग्रहः**= कलहोऽथवा व्याकरणशास्त्रस्य व्युत्पत्तिप्रक्रिया, तस्य गिरः = वचनानि, **शब्दशास्त्रे एव** = व्याकरणशास्त्रे एव भवन्ति, **वृत्त्यर्थे** = जीविकार्थे कलहवचनानि न जनतासु, श्रूयन्ते, (विस्तारो विग्रहो व्यासः - इत्यमरः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कलहविग्रहौ- इत्यमरः), यतो हि सूत्रस्यार्थापनविधौ व्याकरणशास्त्रमधीयाना जना विग्रहगिरं समासविग्रहादिकं कृत्वा सत्यमर्थं व्युत्पादयन्ति, एषा प्रक्रिया उत्तमभूपतीनां शासनकाले प्रचलति, परन्तु, तेषां शासनकाले जीविकायै कलहवचनानि जनतासु क्वापि न भवन्तीति भावः। ननु = निश्चयेन, **दुःशासनान्वितसभा - दुःशासनेन** = दुःशासननामकेन महाभारतस्य पात्रेण, धृतराष्ट्रस्य पुत्रेण, **अन्विता** = युक्ता, **सभा**= परिषद्, **भारतादौ** = महाभारतादिपवित्रग्रन्थेषु एव लभ्यते। परन्तु जनतासु **दुःशासनेन**= दुष्टशासनेन, **अन्विता** = युक्ता, **सभा** = समितिः, न भवति, **विपक्षकथा- विपक्षस्य**= साध्याभाववतो जलाशयादेः, **कथा** = चर्चा, **अपि** = केवलम्, **तर्के** = तर्कशास्त्र एव प्रचलति, न तु जनतासु **विपक्षकथा**= शत्रुपक्षचर्चा भवति। अत्राप्रश्नतः कथिताद् वस्तुनोऽन्यव्यवच्छेद इति परिसङ्ख्यालङ्कारः।।६४।।

दिव्यलक्ष्मी - उत्तम राजाको शासनकालमा साहित्यशास्त्रको अध्ययन गरेका विद्वान्हरूको मात्र सञ्चारिभावको अर्थमा प्रयुक्त हुने निर्वेद, आवेग, श्रम, मद आदि ३३ प्रकारका व्यभिचारिभावमा दृष्टि रहेको हुन्छ। तर जनताको हृदयमा भने परपुरुष वा परस्त्रीसँग सम्पर्क गर्ने भावनाको अर्थमा प्रयुक्त हुने व्यभिचारिभाव हुँदैन। व्याकरणशास्त्रमा पदको अर्थ लगाउने प्रसङ्गमा व्युत्पत्तिका लागि विग्रह गर्ने प्रचलन रहेको हुन्छ। विग्रहशब्दको अर्थ झगडा पनि हुने हुनाले त्यस्तो विग्रह उत्तम राजाको शासनकालमा हुँदैन। यसैगरी धृतराष्ट्रको छोरा दुःशासननामक खलपात्र उपस्थित भएको सभाको चर्चा महाभारत आदि प्राचीन ग्रन्थमा मात्र पाइन्छ तर उत्तम राजाको शासनकालमा नराम्रो शासन गर्ने राजा एवं सामन्तहरूको सभा हुनै पाउँदैन। यसैगरी उत्तम राजाको शासनकालमा तर्कशास्त्रको अध्ययन गर्दा पक्ष, सपक्ष र विपक्षको निर्वचन गर्ने सन्दर्भमा जहाँ साध्यको उपस्थिति हुँदैन त्यो विपक्ष हो भन्ने गरिन्छ। तर, व्यवहारमा कुनै पनि विपक्ष अर्थात् शत्रुपक्षको चर्चा नै हुन पाउँदैन किनकि उत्तम राजासँग शत्रुता गर्ने व्यक्ति नै हुँदैनन्।।६४।।

शास्त्रेण यान्ति विनयं विनयेन वित्तं
वित्तेन सद्वितरणं सुयशश्च तेन।
लोकत्रयं सुयशसा सुखमक्षयञ्च
लोकत्रयेण नरनाथचरित्रपालाः।।६५।।

- कारणमाला

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - नरनाथचरित्रपालाः, शास्त्रेण, विनयम्, विनयेन, वित्तम्, वित्तेन, सद्वितरणम्, तेन, सुयशः, सुयशसा, लोकत्रयम्, लोकत्रयेण, अक्षयम्, सुखम्, यान्ति ।

चूडामणिः - **नरनाथचरित्रपालाः - नराणाम्** = जनानाम्, **नाथाः** = स्वामिनः, इति नरनाथाः, तेषां **चरित्राणि** = चरितानि, पालयन्तीति **पालाः** = रक्षका इति उत्तमभूपालानुकूलगुणगरिमवन्तो जनाः, **शास्त्रेण** = आगमाध्ययनेन, **विनयम्** = नम्रताम्, यान्ति, **विनयेन** = नम्रतया, **वित्तम्** = धनम्, प्राप्नुवन्ति, **वित्तेन** = धनेन, **सद्वितरणम् - सद्भ्यः** = सज्जनेभ्यः, **वितरणम्** = दानम्, कुर्वन्ति, **तेन** = सद्वितरणेन, **सुयशः** = उत्तमकीर्तिम्, लभन्ते, **सुयशसा** = सुकीर्त्या, **लोकत्रयम्- लोकानाम्** = स्वर्गमर्त्यपातालानाम्, **त्रयम्** = त्रितयम्, लभन्ते, **लोकत्रयेण** = स्वर्ग-मर्त्य-पातालेषु प्रसिद्ध्या, **अक्षयम्** = अविनाशि, **सुखम्** = सौख्यम्, **यान्ति**= प्राप्नुवन्ति । अत्र कारणमालालङ्कारः । उक्तञ्च- **यथोत्तरं चेत् पूर्वस्य पूर्वस्याऽर्थस्य हेतुता । तदा कारणमाला स्यात्** ....।। (का.प्र., उ. १०, सू. १८७, श्लो. ११९) उक्त पद्ये विनयं प्रति शास्त्रम्, वित्तं प्रति विनयः, सद्वितरणं प्रति वित्तम्, सुयशः प्रति सद्वितरणम्, लोकत्रयं प्रति सुयशः, अक्षयं सुखं प्रति लोकत्रयञ्च कारणतां यान्तीति कारणमालालङ्कारः ।।६५।।

दिव्यलक्ष्मी - उत्तम राजाको चरित्र अङ्गीकार गरी शासन गर्ने राजाहरू शास्त्रको अध्ययन गरेर विनयशील बन्दछन् । तिनले विनयबाट उत्तम धन प्राप्त गर्दछन् । प्राप्त उत्तम धनलाई उत्तम पात्रमा दान गर्दछन्। उत्तम पात्रमा गरिने दानबाट तिनीहरूले उत्तम यश प्राप्त गर्दछन् । प्राप्त गरेको उत्तम यशबाट तिनीहरूले तीनै लोकलाई आफ्नो अधीनमा तुल्याउँछन् र त्यसबाट अविनाशी सुख प्राप्त गर्दछन् ।६५।।

यद् भूमिपः प्रकृतिमण्डलमानियुङ्क्ते
धर्मायने तदपि तत्र प्रवर्तमानम् ।
तत्षाष्ठभागफलभागितया वृणीते
भूमीपतिं युगमिदं घनवार्द्धिकल्पम् ।।६६।।

- अन्योन्यम्

अन्वयः - यत्, भूमिपः, प्रकृतिमण्डलम्, धर्मायने, आनियुङ्क्ते, तदपि, तत्र, प्रवर्तमानम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्षाष्ठभागफलभागितया, भूमीपतिम्, वृणीते, इदम्, युगम्, घनवार्द्धिकल्पम् (भवति)।

चूडामणिः - यत् = यस्मात्, **भूमिपः** - **भूमिम्**= पृथिवीम्, **पातीति** = पालयतीति, राजा इत्यर्थः, **प्रकृतिमण्डलम् - प्रकृतीनाम्** = राज्याङ्गानाम्, **मण्डलम्** = समूह इति, सपौरश्रेणीकं स्वाम्यमात्यादिसप्ताङ्गं राज्यम्। (उक्तञ्च - स्वाम्यमात्यसुहृत्कोश-राष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।।- इत्यमरः), **धर्मायने- धर्मस्य** = सुकृतस्य, **अयनम्** = मार्गः, इति धर्मायनम्, तस्मिन्, धर्ममार्गे, **आनियुङ्क्ते** = प्रवर्तयति, **तदपि** = प्रकृतिमण्डलमपि, **तत्र** = धर्ममार्गे, **प्रवर्तमानम्**= क्रियाशीलम्, **तत्षाष्ठभागफलभागितया** = धर्मार्जितधनस्य षष्ठांशफलभोक्तृतया, षष्ठो भाग इति षष्ठभागः, षष्ठभागस्येदं फलमिति षाष्ठभागफलम्, तद् भजते इति तत्षाष्ठभागफलभाग्, तस्य भावः, तत्षाष्ठभागफलभागिता, तया, **भूमीपतिम्** = राजानम्, **वृणीते** = वृणोति, **इदम्** = एतत्, **युगम्** = राजप्रजायुगलम्, **घनवार्द्धिकल्पम्- घनश्च** = मेघश्च, **वार्द्धिश्च** = समुद्रश्चेति घनवार्द्धी, तयोः **कल्पम्** = समानम्, इति **घनवार्द्धिकल्पम्**= मेघपारावारसमानं भवति। अत्रान्योन्यालङ्कारः। उक्तञ्च मम्मटेन- '..... **क्रियया तु परस्परम्। वस्तुनोर्जनने-ऽन्योन्यम्** .... । (का.प्र., उ. १०, सू. १८८, श्लो. ११९-१२०) परस्परं द्वयोरेकक्रियायाः सम्पादकत्वेऽन्योऽन्यं भवति। अस्मिन् पद्ये भूमिपः प्रजां धर्ममार्गे प्रवर्तयति, प्रजा च तस्य षष्ठभागं फलं तस्मै अर्पयतीत्यन्योऽन्यम् ।।६६।।

त्रिशक्तिः - यथा मेघो जलवर्षणेन समुद्रं पुष्णाति, समुद्रश्च सूर्यकिरणमाध्यमेन निजं जलं मेघाय प्रयच्छति, वस्तुतो सामुद्रिकं जलमेव सूर्यकिरणमाध्यमेन वाष्पीभूय मेघरूपे परिणमते, तथैव राज्ञा धर्माचरणायाभिप्रेरिता प्रजा धर्मपूर्वकं स्वस्वक्रियां सम्पाद्य धर्मफलं राज्ञे समर्पयति । राजा च प्रजारक्षणेन धर्मरक्षणं विदधातीति प्रकृतिभूपतियुगं मेघसमुद्रयुगमिव परस्परसहयोगि भूत्वा धर्माचरणं कुरुते इति भावः।

दिव्यलक्ष्मी - उत्तम राजाले जनतालाई धर्मानुकूल पथमा रही धर्म, अर्थ, काम र मोक्षनामक पुरुषार्थको सम्पादनमा अग्रसर गराउँछन् र तिनीहरूको यस क्रियाकलापबाट जनता पनि धर्मानुकूल मार्गमा अग्रसर भई कर्तव्यशील बन्दछन्। जनताले त्यसरी धर्मपूर्वक अर्जित गरेको सम्पत्तिबाट राजाले छैठौं भाग करका रूपमा लिएर राष्ट्रको संरक्षण गर्दछन्। जनता र राजाको यो जोडी बादल र समुद्रको जोडीजस्तै हो।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बादलले जल बर्साएर समुद्रलाई परिपूर्ण तुल्याउँछन् भने समुद्रले पनि जल दिएर वाष्पीकरणको माध्यमबाट बादलको निर्माणमा सहयोग पुऱ्याउँछन् ।।६६।।

भूमीभुजां किमिह कार्यमिहार्यसङ्गः
सेव्यं किमङ्घ्रियुगलञ्जगदीश्वरस्य ।
प्रेक्ष्यं किमाश्रितवनीयकभोजनादि
रक्ष्यं किमिन्दुकरनिर्मलकीर्तिवृन्दम् ।।६७।।

- उत्तरम्

अन्वयः - इह, भूमीभुजाम्, किम्, कार्यम् ?, (इह तेषाम्), आर्यसङ्गः, (एव, कार्यमस्ति), (इह भूमीभुजाम्), किं सेव्यम् ?, (इह तेषाम्), जगदीश्वरस्य अङ्घ्रियुगलम्, (सेव्यम्), (इह भूमीभुजाम्), किं प्रेक्ष्यम् ? (इह भूमीभुजाम्), आश्रितवनीयकभोजनादि (प्रेक्ष्यम्), (इह भूमीभुजाम्), किं रक्ष्यम् ?, (इह तेषाम्) इन्दुकरनिर्मलकीर्तिवृन्दम्, (एव रक्ष्यम्) ।

चूडामणिः - इह = संसारे, **भूमीभुजाम्** - **भूमीम्** = पृथिवीम्, **भुञ्जते इति** = पालयन्तीति, भूमीभुजः, तेषाम्, **किम्** = किमु, **कार्यम्** = कर्तव्यम्, तेषाम्, इह, आर्यसङ्गः - **आर्याणाम्** = सज्जनानाम्, **सङ्गः** = सङ्गतिः, एव, कार्यमस्ति, इह भूमीभुजाम्, **किं सेव्यम्** = किं सेवनीयम्, इह तेषाम्, **जगदीश्वरस्य** - **जगताम्** = भुवनानाम्, **ईश्वरः** = स्वामी इति, जगदीश्वरः, तस्य, **अङ्घ्रियुगलम्** = चरणयुगमेव, सेव्यम्, इह भूमीभुजाम्, **किं प्रेक्ष्यम्** = किं प्रेक्षणीयम्, इह भूमीभुजाम्, **आश्रित-वनीयकभोजनादि** - **आश्रितानाम्** = निजाश्रयस्थितानाम्, **वनीयकानाम्**- वननं वनिः = याच्ञा, वनिमिच्छन्तीति वनीयकाः, तेषां याचकानाम्, (वनु याचने, सर्वधातुभ्य इन् (उ. ४/११८) वनिः, वनिमिच्छतीत्यर्थे सुप आत्मन क्यच् (पा.सु. ३/१/८), वनिः, ण्वुल्, वनीयकः), **भोजनादि** = अशनपानादिकम्, प्रेक्ष्यम्, इह भूमीभुजाम्, **किं रक्ष्यम्**= किं रक्षणीयम्, **इन्दुकरनिर्मलकीर्तिवृन्दम्** - **इन्दोः** = चन्द्रस्य, **कराः**= किरणाः, इतीन्दुकराः, ते इव **निर्मलाः** = स्वच्छाः, इति इन्दुकरनिर्मलाः, **कीर्तयः**= यशांसि, इति इन्दुकरनिर्मलकीर्तयः, तासां **वृन्दम्**= यूथम्, एव भूमोभुजां रक्ष्यम्। अत्रोत्तरालङ्कारः। उक्तञ्च मम्मटेन - ...... **उत्तरश्रुतिमात्रतः । प्रश्नस्योन्नयनं यत्र**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रियते तत्र वा सति ।। असकृद् यदसम्भाव्यमुत्तरं स्यात् तदुत्तरम्। (का.प्र., उ.१०, सू.१८९, श्लो.१२०-१२१) उत्तरात् प्रश्नस्य ऊहे अथवा प्रश्ने सति असम्भाव्ये उत्तरे प्रदीयमाने उत्तरालङ्कारो भवति । भूमीभुजामित्यादि प्रश्ने सति असम्भाव्यानि सूक्ष्मबुद्धिगम्यान्युत्तराणि निहितानीत्युत्तरालङ्कारः ।।६७।।

दिव्यलक्ष्मी - हे वत्स ! राजाहरूले यहाँ के गर्नुपर्छ ? भन्ने प्रश्नको उत्तर राजाहरूले उत्तमपुरुषको सङ्गति गर्नुपर्छ भन्ने नै हो । राजाहरूले कसको सेवा गर्नुपर्छ भन्ने प्रश्नको उत्तर उत्तमपुरुषको सेवा गर्नुपर्छ र दुःखीहरूको सद्भावनापूर्वक संरक्षण गर्नुपर्छ भन्ने हो । राजाले कसको राम्ररी हेरचाह गर्नुपर्छ भन्ने प्रश्नको राम्रो उत्तर - आफ्ना आश्रित, याचक र शरणागतहरूको हेरचाह गर्नुपर्छ भन्ने नै हो । कुन विषयलाई राम्ररी जोगाउनुपर्छ भन्ने प्रश्नमा चन्द्रमाका किरणझैं उज्ज्वल कर्मद्वारा संसारमा फैलिएको कीर्तिको रक्षा गर्नुपर्दछ भन्नु नै उत्तम उत्तर हो ।।६७।।

प्राप्तेऽभिषेणनदिने गमनस्य वेलां
ज्ञातुं समर्पयति कैरवपद्मगुच्छौ ।
सेनाधिपे निभृतमन्त्रगणा महीशाः
सङ्कोच्य पद्मनिकरं कथयन्ति युक्त्या ।।६८।।

- सूक्ष्मम्

अन्वयः - अभिषेणनदिने, प्राप्ते, सेनाधिपे, गमनस्य, वेलाम्, ज्ञातुम्, कैरवपद्मगुच्छौ, समर्पयति, (सति), निभृतमन्त्रगणाः, महीशाः, पद्मनिकरम्, सङ्कोच्य, युक्त्या, कथयन्ति।

चूडामणिः - **अभिषेणनदिने** - **अभिषेणनस्य** = युद्धाय प्रस्थानस्य, **दिनम्** = दिवस इति अभिषेणनदिनम्, तस्मिन् (यत्सेनयाऽभिगमनमरौ तदभिषेणनम्- इत्यमरः), **प्राप्ते** = आगते, **सेनाधिपे** = सेनापतौ, **गमनस्य** = प्रस्थानस्य, **वेलाम्** = समयम्, **ज्ञातुम्** = अवगन्तुम्, **कैरवपद्मगुच्छौ**- **कैरवम् च** = श्वेतकमलम् च, **पद्मम् च**= रक्तकमलम् च, इति कैरवपद्मे, तयोः, **गुच्छौ** = स्तवकौ, इति कैरवपद्मगुच्छौ, **समर्पयति** = ददाने सति, **निभृतमन्त्रगणाः**- **मन्त्राणाम्** = गुह्यवादानाम्, **गणाः**= समूहाः, इति मन्त्रगणाः, **निभृताः** = गोपिताः, मन्त्रगणा यैस्ते, **महीशाः** = राजानः, **पद्मनिकरम्** = कमलसमूहम्, **सङ्कोच्य** = सङ्कुचितं विधाय, **युक्त्या**= उपायभङ्ग्या,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूर्यास्तसमय एव प्रस्थानमुचितमिति, **कथयन्ति**= निर्दिशन्ति । अत्र पद्मनिकरसङ्कोच-रूपेण सङ्केतेन संलक्षितस्यार्थस्य प्रकाशनमिति सूक्ष्मम् ।।६८।।

त्रिशक्तिः - विजयाभियानदिवसे समागते प्रस्थानवेलां सङ्केतेन ज्ञातुं यदा सेनाधिपः कमलकैरवगुच्छौ राज्ञे समर्पयति, तदा मन्त्रगोपनकलानिपुणो नृपतिः पद्मसङ्कोचनेन सूर्यास्तसमयादनन्तरमेव प्रस्थानवेलेति सङ्केतयतीति भावः ।

दिव्यलक्ष्मी - हे वत्स ! सेनाका साथ शत्रुमाथि चढाइ गर्न जाने दिन आएपछि कतिबेला साइत गर्ने भन्ने कुरा थाहा पाउन सेनापतिले राजासमक्ष आई सेतो कमल र रातो कमलका गुच्छा टक्र्याएर जिज्ञासा प्रकट गर्दछन् । आफ्नो मन्त्रणालाई गोप्य राख्न कुशल राजाहरूले पनि कमललाई चपक्क अँठ्याएर सूर्य अस्ताएपछि साइत गर्नुपर्छ भन्ने कुरा युक्तिपूर्वक बताउँछन् ।।६८।।

त्रिशक्ति - कमलका पात चपक्क अँठ्याउनुको अर्थ सूर्य अस्ताएपछि कमल ओइलाउँछन्, त्यतिबेलामात्र साइत गर्न उपयुक्त छ भन्ने कुरा देखाउनु हो ।

भाग्यञ्जनिर्नृपकुले विमले ततोऽपि
राज्याप्तिरप्रतिहतं वचनं ततोऽपि ।
तस्माच्च भूमितलपालनमाप्तधर्मं
तस्मात्पयोधितनयाधवपादभक्तिः ।।६९।।

- सारम्

अन्वयः - विमले, नृपकुले, जनिः, भाग्यम्, ततः, अपि, राज्याप्तिः (भाग्यम्), ततः, अपि, अप्रतिहतम्, वचनम् (भाग्यम्), तस्मात्, च, आप्तधर्मम्, भूमितलपालनम् (भाग्यम्), तस्मात्, पयोधितनयाधवपादभक्तिः (भाग्यम्) ।

चूडामणिः - **विमले** - विगतं मलं यस्मात् तत्, **विमलम्** = निष्पापम्, तस्मिन्, **नृपकुले**- **नृपाणाम्** = राज्ञाम्, **कुलम्** - कूयते इति कुलम्, अथवा **कुम्** = भूमिम् लातीति कुलम्, अथवा कौ लीयते इति **कुलम्** = गोत्रम् (कुलं जनपदे गोत्रे सजातीयगणेऽपि च । भवने च तनौ क्लीबं कण्टकार्यौषधौ कृती ।। इति मेदिनी), तस्मिन्, **जनिः**= उत्पत्तिः (जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः - इत्यमरः), **भाग्यम्**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भागधेयम् (भागधेयं मतं भाग्ये भागप्रत्यययोः पुमान्- इति रामाश्रमी), **ततः अपि**= तस्मादपि, **राज्याप्तिः- राज्यस्य**= राजकीयशासनस्य, **आप्तिः** = प्राप्तिः, भाग्यम्, **ततः अपि** = तस्मादपि, **अप्रतिहतम्** = सर्वैरेव शिरसा सम्मानितम्, **वचनम्** = राजाज्ञा, भाग्यम्, **तस्मात् च** = ततश्च, **आप्तधर्मम्- आप्तः** = प्राप्तः, **धर्मः** = सुकृतम्, येन तत्, **भूमितलपालनम्- भूम्याः** = पृथिव्याः, **तलस्य** = मण्डलस्य, **पालनम्** = संरक्षणम्, भाग्यम्, **तस्मात्**= ततः, **पयोधितनयाधवपादभक्तिः - पयोधेः** = समुद्रस्य, **तनया** = लक्ष्मीः, इति पयोधितनया, तस्याः, **धवः** = स्वामी इति **पयोधितनयाधवः** = नारायणः, तस्य **पादयोः** = चरणयोः, **भक्तिः** = श्रद्धा, भाग्यं भवति । अत्र सारालङ्कारः । उक्तञ्च मम्मटेन - **'उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः'**। (का.प्र., उ. १०, सू. १९१, श्लो. १२२) वस्तूनामुत्तरोत्तरमुत्कर्ष-वर्णने सारालङ्कारो भवति ।।६९।।

त्रिशक्तिः - अत्र नृपकुले जनिर्भाग्यम्, ततो राज्याप्तिर्भाग्यम्, ततोऽप्रतिहतं वचनं भाग्यम्, तस्माद् धर्मानुसारेण राज्यपालनं भाग्यम्, तस्माच्च हरिचरणकमलभक्तिर्भाग्य-मिति उत्तरोत्तरभाग्यस्योत्कर्षवर्णनादत्र सारालङ्कारः । सारालङ्कारमाध्यमेन मानव-जीवनस्य परमलक्ष्यनिरूपणञ्चापि कविनाऽत्र विहितम् ।

दिव्यलक्ष्मी - निर्मल राजकुलमा जन्म लिनु भाग्यको कुरा हो । राजाको कुलमा जन्मिएर शासनसत्तामा अधिकार पाउनु त्यो अझ ठूलो भाग्यको कुरा हो । राज्यसञ्चालनको क्रममा आफ्नो हुकुमलाई जनताले अभिरुचिपूर्वक पालन गर्नु त्योभन्दा पनि ठूलो भाग्यको कुरा हो । धर्मपूर्वक शासन गर्नु त्योभन्दा पनि ठूलो भाग्यको कुरा हो । धर्मपूर्वक शासन गर्दै लक्ष्मीका स्वामी नारायणका चरणकमलमा भक्ति लाग्नु सर्वोत्तम सौभाग्यको कुरा हो ।।६९।।

छत्रं सुराजशिरसि स्फुरतीन्दुकल्प-
श्छित्रं समस्तजनतापविनष्टिरस्मात् ।
प्रत्यर्थिभूपतिगृहे तृणजातमेवं
संरोहयत्यपि सुभूपप्रतापवह्निः ।।७०।।

- असङ्गतिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - सुराजशिरसि, इन्दुकल्पम्, छत्रम्, स्फुरति, अस्मात्, समस्तजनतापविनष्टिः, भवति, चित्रम्, एवम्, सुभूपप्रतापवह्निः, प्रत्यर्थिभूपतिगृहे, तृणजातम्, संरोहयति, अपि ।

चूडामणिः - उत्तमनृपस्य महिमानं प्रकाशयन् कृतवीर्यः कार्तवीर्यमुपदिशति - **सुराजशिरसि** - शोभनो राजा इति सुराजः = उत्तमभूपतिः, तस्य **शिरः** = उत्तमाङ्गम्, तस्मिन् सुभूपतिशीर्षे, **इन्दुकल्पम्**- **इन्दोः** = चन्द्रस्य, **कल्पम्** = समानम्, चन्द्राकारमित्यर्थः, **छत्रम्** = आतपत्रम्, नृपलक्ष्म वा (राज्ञस्तु नृपलक्ष्म यत् - इत्यमरः), **स्फुरति** = चमत्करोति, **अस्मात्** = राजशिरसि वर्तमानात्, छत्रात्, **समस्तजनतापविनष्टिः** - **समस्तजनानाम्** = सकलप्रजानाम्, **तापः** = सन्ताप इति समस्तजनतापः, तस्य **विनष्टिः** = विनाशः, भवतीति, **चित्रम्** = आश्चर्यम्, **एवम्** = अनेन प्रकारेण, **सुभूपप्रतापवह्निः**- शोभनः, **भूपः** = राजा इति सुभूपः, तस्य यः **प्रतापः** = प्रभावः, तस्य **वह्निः** = अग्निः, प्रतापानलो वा, **प्रत्यर्थिभूपतिगृहे** - **प्रत्यर्थिनः** = विरोधिनः, **भूपतयः** = राजानः, तेषां **गृहम्** = भवनम्, तस्मिन्, **तृणजातम्** = घासाद्यङ्कुरम्, **संरोहयति** = जनयति, **अपि** = एतदपि महच्चित्रमित्यर्थः । वह्निः प्रज्वालयति इति तु स्वाभाविकं परमत्र वह्निः तृणजातं संरोहयतीति कथनं नितान्तमेवासङ्गतिपूर्णम् । तथैव राजशिरसि वर्तमानं कारणरूपं छत्रं जनहृदये तापविनाशरूपं कार्यमिति भिन्नदेशता। अत्राप्यसङ्गतिरेव । यत्र कार्यकारणयोर्भिन्नदेशस्थयोः सतोरसङ्गतिरनुभूयते तत्रायमलङ्कारो भवति । उक्तञ्च मम्मटेन - **भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः । युगपद् धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ।।** (का.प्र., उ. १०, सू. १९२, श्लो. १२३)।।७०।।

दिव्यलक्ष्मी - 'उज्ज्वल चन्द्रमाको मण्डलसमान राजच्छत्र (छाता) प्रतापी राजाका शिरमा सुहाउँदा समस्त जनताको ताप शान्ति हुन्छ । यसै गरी राजाको प्रतापाग्निले शत्रु राजाको घरमा झारपात उमार्ने काम गर्दछ ।' ।।७०।।

त्रिशक्ति - छाताबाट ताप शान्ति हुनु र आगोबाट झारपात उम्रिनु सङ्गतिपूर्ण कुरा होइनन् । तर उज्ज्वल राजाले छाता धारण गरेपछि अब हाम्रा दुःखहरू निवारण हुनेछन् भन्ने विश्वासले जनताको तापशान्ति हुने हुँदा अर्थसङ्गत हुन आउँछ । यसैगरी राजाको पराक्रमबाट शत्रुहरू दरबार छाडेर भाग्छन् र शत्रुका दरबार भग्नावशेषमा परिणत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हुन्छन् । त्यसपछि त्यहाँ झारपात उम्रिनुसिवाय केही हुँदैन भन्ने अर्थबोध गरेपछि उक्त भनाइ सङ्गतिपूर्ण हुन आउँछ ।

क्वेदं कलेवरमनित्यममेध्यपूर्णं
क्वाकल्पमुज्वलयशः स्थितिमत्पवित्रम्।
धन्या नृपाः समधिगत्य धराधिपत्यं
तत्तादृशेन वपुषा परिशीलयन्ति ।।७१।।

– विषमम्

अन्वयः - इदम्, अमेध्यपूर्णम्, अनित्यम्, कलेवरम्, क्व ?, पवित्रम्, आकल्पम्, स्थितिमत्, उज्ज्वलयशः, क्व ?, धराधिपत्यम्, समधिगत्य, धन्याः, नृपाः, तादृशेन, वपुषा, तत्, परिशीलयन्ति ।

चूडामणिः - **इदम्** = एतदस्माभिर्ध्रियमाणम्, **अमेध्यपूर्णम्** - मेधनार्हं **मेध्यम्**= पवित्रम्, न मेध्यमिति अमेध्यम्, तेन **पूर्णम्** = भरितमिति, **अमेध्यपूर्णम्** = अपवित्रपदार्थभरितम् (पूतं पवित्रं मेध्यञ्च- इत्यमरः), **अनित्यम्** = विनश्वरम्, **कलेवरम्** - **कले** = शुक्रे, मधुराव्यक्तध्वनौ वा, **वरम्** = श्रेष्ठमिति **कलेवरम्** = शरीरम् (अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् । गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।। इत्यमरः), **क्व**= कुत्र, **पवित्रम्**= मेध्यम्, **आकल्पम्**- **आ** = समन्तात्, **कल्पम्** = प्रलयकालपर्यन्तं यद्वा कल्पकल्पपर्यन्तमित्यर्थः, **स्थितिमत्** = स्थायि, **उज्ज्वलयशः** - **उच्चैर्ज्वलति** = प्रकाशते इति **उज्ज्वलम्** = ज्योतिर्मयम्, उज्ज्वलं चासौ **यशः** = कीर्तिः, दीप्तिमती कीर्तिरित्यर्थः, **क्व** = कुत्र, अनयोर्महदन्तरमस्तीति भावः, **धराधिपत्यम्** - ध्रियतेऽनयेति **धरा** = पृथिवी, तस्या **आधिपत्यम्** = स्वामित्वम्, **समधिगत्य** = लब्ध्वा, **धन्याः** = धनं लब्धार इति धनसम्पत्परिपूर्णाः, पुण्यवन्त इत्यर्थः, **नृपाः** = राजानः, **तादृशेन** = अमेध्येन विनश्वरेण च, **वपुषा** = शरीरेण, **तत्** = आकल्पं स्थितिमत् पवित्रं यशः, **परिशीलयन्ति**= अन्विष्यन्ति । अत्र विषमालङ्कारः । उक्तञ्च मम्मटेन - **क्वचिद् यदतिवैषम्यान् न श्लेषो घटनामियात्। कर्तुः क्रियाफलावाप्तिर्नैवाऽनर्थश्च यद् भवेत् ।। गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये । क्रमेण च विरुद्धे यत् स एष विषमो मतः ।।** (का.प्र., उ. १०, सू.

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१९५, श्लो. १२५-१२६) यदि कार्यकारणयोर्गुणाः क्रियाश्च परस्परविरुद्धाः स्युः, आरब्धं कार्यं विफलं स्यात्, विरूपयोः सङ्घटना च भवेत् तदा विषमालङ्कारो भवति। क्वेदमित्यत्रामेध्येनानित्येन च शरीरेणाकल्पं स्थितिमतः पवित्रस्य यशस उपलब्धिरिति कथनाद् गुणक्रिययोः परस्परविरोधहेतोर्विषमालङ्कारः ।।७१।।

दिव्यलक्ष्मी - अपवित्र मल-मूत्रादिले भरिएको र विनाश हुने शरीरको मूल्य नै के छ र? कल्प-कल्पसम्म रहने पवित्र र उज्ज्वल कीर्ति कहाँ र त्यो विनाशी शरीर कहाँ? दुबैमा जमिन र आकाशको फरक देखिन्छ । तर, पराक्रमी र धर्मात्मा राजाहरूले शासनको बागडोर आफ्नो हातमा लिएर त्यस्तो अपवित्र र विनाशी शरीरको माध्यमबाट पनि कल्प-कल्पसम्म रहने पवित्र कीर्ति प्राप्त गर्दछन् ।।७१।।

ब्रह्माण्डमण्डलमवैमि ततो विशालं
यद्भूभुजां नयदयोदितशौर्यभाजाम्।
पारेपरार्द्धगणनानि परार्द्धवृत्ता-
न्यासादयन्ति गतसङ्कटवासमत्र ।।७२।।

- अधिकम्

अन्वयः - यत्, अत्र, नयदयोदितशौर्यभाजाम्, भूभुजाम्, पारेपरार्धगणनानि, परार्द्ध-वृत्तानि, गतसङ्कटवासम्, आसादयन्ति, ततः, ब्रह्माण्डमण्डलम्, विशालम्, अवैमि।

चूडामणिः - यत्= यतः, **अत्र**= ब्रह्माण्डमण्डले, **नयदयोदितशौर्यभाजाम्- नयश्च**= न्यायश्च, **दया च**= करुणा च इति नयदये, ताभ्याम्, **उदितम्** = प्रकाशितम्, **शौर्यम्**= पराक्रमम्, **भजन्ते** = सेवन्ते इति, नयदयोदितशौर्यभाजः, तेषाम्, **भूभुजाम्**= राज्ञाम्, **पारेपरार्धगणनानि**- परस्मिन् भवमिति **परार्धम्** = १००००००००००००००००० इति सङ्ख्याङ्कितोऽन्तिमः कालपरिणामः (परार्धाग्रप्राग्र- इत्यमरः), परार्धस्य पारमिति, पारेपरार्धम् (पारे मध्ये षष्ठ्या वा इति सूत्रेण समासः), **पारेपरार्धम्** = परार्धादपि पारे वर्तमानमनन्तकालं यावत् प्राप्तानि, **गणनानि** = परिसङ्ख्यानानि, येषां तानि, **परार्धवृत्तानि**= उत्तमचरित्राणि, **गतसङ्कटवासम्**- गतं सङ्कटं यस्मात् सः, **गतसङ्कटः**= विपत्तिरहितः, **वासः** = आवासः, यस्मिन् कर्मणि यथा स्यात्तथा इति **गतसङ्कटवासम्**= विगतसंबाधनिवासम् (सङ्कटं ना तु सम्बाध- इत्यमरः, वासः कुटी द्वयोः शाला

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समा- इत्यमरः), **आसादयन्ति** = स्थापयन्ति, **ततः** = एतस्मात् कारणादेव, अहम्, **ब्रह्माण्डमण्डलम्** = विश्वपरिवेषम्, **विशालम्** = विपुलम्, **अवैमि** = जानामि। उत्तमभूपतीनां पारेपरार्धानि मूल्यवन्ति वृत्तानि मातुं समर्थत्वादेव ब्रह्माण्डमण्डलं विशालमिति ज्ञायते । अत्राधिकालङ्कारः । उक्तञ्च मम्मटेन - **महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् । आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ।।** (का.प्र., उ. १०, सू. १९६, श्लो. १२७) अर्थादाधाराधेययोरेकतरस्याधिक्येऽधिकालङ्कारो भवतीत्यर्थः । अत्र पद्ये ब्रह्माण्डमण्डलस्य राजगुणेभ्य आधिक्यं चमत्कृत्या निरूपितमित्यधिकम् ।।७२।।

दिव्यलक्ष्मी - न्याय र दयासहित शूरताले सुहाएका राजाहरूका अत्युत्तम चरित्रबाट निष्पन्न कीर्तिहरू परार्द्ध संख्या १००००००००००००००००० भन्दामाथि अनन्तकालव्यापी बनेर रहेका हुन्छन् । अनन्त राजाहरूका अनन्त अनुकरणीय चरित्र धारण गर्ने ब्रह्माण्डमा तिनीहरूका ती चरित्र र चरित्रजन्य कीर्तिहरू कुनै बाधा नभईकन अटाउने हुनाले यो ब्रह्माण्डलाई विशाल मान्नुपर्दछ ।।७२।।

शूराद् बिभेत्युपहसत्यपि भीरुकञ्च
नास्तेऽतिदातरि न तुष्यति बद्धमुष्टौ ।
नानारतं भजति च त्यजति प्रहृष्टा
मुग्धाङ्गनेव नरनाथरमापि वत्स ।।७३।।

- स्वभावोक्तिः

अन्वयः - वत्स !, मुग्धाङ्गना, इव, नरनाथरमा, अपि, शूरात्, बिभेति, भीरुकम्, च, उपहसति, अतिदातरि, न, आस्ते, बद्धमुष्टौ, न, तुष्यति, न, अनारतम्, भजति, (नानारतं भजति), प्रहृष्टा, त्यजति, च ।

चूडामणिः - (राजलक्ष्मीपक्षः) - वत्स - वसति हृदये इति वत्सः, तत्सम्बुद्धौ हे **वत्स !** = पुत्र !, **मुग्धाङ्गना** = सद्योलब्धयौवना षोडशी, (प्रथमावतीर्णयौवनविकारा रतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।।- सा.द. ३/५८), **इव**= यथा, **नरनाथरमा- नराणाम्**= मनुष्याणाम्, **नाथाः**= स्वामिनः, तेषां **रमा**= राजलक्ष्मीः, अपि, **शूरात्** = शूरजनात्, **बिभेति** = त्रस्यति, **भीरुकम् च** = कातरं च, **उपहसति**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिहसति, **अतिदातरि** = समधिकोदारस्वभावे जने, **न आस्ते** = न तिष्ठति, **बद्धमुष्टौ**- बद्धा = सङ्कुचिता, **मुष्टिः** = सङ्ग्राहः, येन **तस्मिन्** = कृपणहृदये जने, **न तुष्यति** = न प्रसीदति, **अनारतम्** = निरन्तरम्, **न भजति** = कमपि जनं निरन्तरं न सेवते मुग्धात्वात्, अथवा मुग्धापक्षे **नानारतम्** = नानाविधं रतिक्रीडाकौशलम्, भजति = अङ्गीकरोति, **प्रहृष्टा** = प्रसन्ना सत्यपि मुग्धात्वात्, **त्यजति च** = समधिक-प्रीतिमन्तं जनमपि परिहरति।

(मुग्धापक्षः) - मुग्धाङ्गना = षोडशी, **शूरजनात्** = बलिष्ठात्, **बिभेति** = त्रस्यति, **भीरुकम्** = कातरस्वभावम्, **उपहसति** = असौ केलिकलानभिज्ञ इति परिहसति, **अतिदातरि** = अत्यधिकदानशीले जने पश्चादयं निर्धनो भूत्वा भोगप्रदानेऽसमर्थो भविष्यतीति धिया, **न तिष्ठति** = न सीदति, **बद्धमुष्टौ** = धने सत्यपि स्वभावेन कृपणे जने नायमिच्छां पूरयितुं समर्थ इति, **न तुष्यति** = तोषं न भजते, **नानारतम्**= बहुविधां कामकेलिम्, **भजति** = सेवते, अथवा **अनारतम्** = निरन्तरम्, **न भजति**= कमपि जनं न सेवते। राजलक्ष्मीर्मुग्धानायिका च समानस्वभावे भवतः। उपर्युक्तपद्ये नरनाथरमाया मुग्धाङ्गनायाश्च चेष्टाविशेषाणां यथावद्वर्णनात् स्वभावोक्तिः। उक्तञ्च मम्मटेन- **स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्।** (का.प्र., उ. १०, सू. १६९, श्लो. ११०)।७३।।

दिव्यलक्ष्मी - (राजलक्ष्मीपक्ष) - हे वत्स ! मुग्धा स्वभावकी सुन्दरीझैं राजलक्ष्मी अत्यन्त ठूला शूरवीरसँग डराउँछिन् र कायर मानिसको उपहास गर्छिन्। मन खोलेर धेरै दान गर्ने मानिससँग रहन सक्दिनन् र दान गर्ने कुरामा मुठी कस्ने कन्जुससँग पनि बस्न रुचाउँदिनन्। यी सर्वदा एउटै शासकको अधीनमा पनि रहन सक्दिनन्। यी खुसी भएकी छन् र मसँग सधैं बस्छिन् भन्न पनि हुँदैन। खुसी हुँदाहुँदै पनि यिनले एक्कासि छाडिदिन्छिन्।

(मुग्धापक्ष) - मुग्धा नायिका राजलक्ष्मीझैं चञ्चल स्वभावकी हुन्छिन्। आफू भर्खर १६-१७ को उमेरकी भएकाले बडेबडे वीरहरूसँग डराउँछिन्। कातर पुरुषको उपहास गर्छिन्। निरन्तर दान गर्ने ठूलो दातासँग रहन सक्दिनन् र छुच्चो मानिस पनि यिनको प्यारो बन्न सक्दैन। आफ्ना प्यारासँग भागविलास गर्दा अनेकौं आसन स्वीकार गरी प्याराको चित्त प्रसन्न तुल्याउन सक्छिन्। अथवा कुनै कुराको अभाव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नहुँदा खुसीराजी रहँदारहँदै पनि यिनले चञ्चल स्वभावका कारण बहकिएर आफ्ना प्रियतमको परित्याग गर्न पनि सक्छिन् । तसर्थ राजलक्ष्मीको स्वभाव र मुग्धा नायिकाको स्वभाव समान हुन्छ ।।७३।।

त्रिशक्ति - राजलक्ष्मी र मुग्धाङ्गनाको स्वभाव एक किसिमको र विचित्र हुन्छ । राजलक्ष्मी शूरवीरहरूसँग डराउँछिन् र मुग्धाङ्गना पनि । भीरु स्वभावका मानिसलाई राजलक्ष्मीले हाँसेर गिज्याउँछिन् र मुग्धाङ्गनाले पनि सङ्कोच एवं भयले ग्रस्त युवकको उपहास गर्छिन् । धेरै दान गरेर आफूलाई रित्याउने मानिसहरूलाई मुग्धाङ्गनाले रुचाउँदिनन् र राजलक्ष्मीले पनि ।

तस्मादिमां प्रमदसेव्यसुमध्यदेशां
जङ्गाललाटकरजाङ्कवतीं रसेन ।
नाकृष्टकुन्तलमनाश्रितचोलभेदं
नाच्छिन्नकाञ्चि शनकैर्दययोपभुङ्क्ष्व ।।७४।।

- विनोक्तिः

अन्वयः - तस्मात्, प्रमदसेव्यसुमध्यदेशाम्, जङ्गाललाटकरजाङ्कवतीम्, इमाम्, नाकृष्टकुन्तलम्, अनाश्रितचोलभेदम्, नाच्छिन्नकाञ्चि, शनकैः, दयया, रसेन, उपभुङ्क्ष्व।

चूडामणिः - (राजलक्ष्मीपक्षः) - तस्मात् = मुग्धासमानस्वभावत्वात्, **प्रमदसेव्यसुमध्यदेशाम् - प्रमदैः** = उत्कृष्टमदैः, भोगविलासचतुरैर्वा, **सेव्यः** = सेवनीयः, **सुमध्यदेशः** = सुन्दरमध्यभागो यस्यास्ताम्, सहर्षराजजनसेवनीयसुन्दरमध्यप्रदेशामित्यर्थः, **जङ्गाललाटकरजाङ्कवतीम्- जङ्गालस्य** = विशालस्य, **लाटस्य** = लाटदेशस्य, **करजैः** = षष्ठभागसमुत्पन्नैः, **अङ्कैः** = वैभवचिह्नैः, युक्तेति जङ्गाललाटकरजाङ्कवती, **ताम्** = विशाललाटदेशकरप्राप्तवैभवमयभोगविलाससम्पन्नाम्, **इमाम्**= राजलक्ष्मीम्, **नाकृष्टकुन्तलम् - नाकृष्टः** = नाक्रान्तः, **कुन्तलः** = कुन्तलाख्यं राष्ट्रम्, यस्मिन् कर्मणि यथा स्यात्तथा, **अनाश्रितचोलभेदम्**- न आश्रित इति **अनाश्रितः**= नाधृतः, **चोलस्य** = चोलराष्ट्रस्य, **भेदः** = उपजापः, यस्मिन् कर्मणि यथा स्यात्तथा, **नाच्छिन्नकाञ्चि** - न आच्छिन्ना इति **नाच्छिन्ना** = न त्रुटिता, **काञ्ची** = शिवकाञ्ची, विष्णुकाञ्ची वा, यस्मिन् कर्मणि यथा स्यात्तथा, **शनकैः**= शनैःशनैः, **दयया**= करुणया,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रसेन = प्रजानुरागेण, **उपभुङ्क्ष्व** = उपभोगं कुरु ।

(**प्रमदापक्षः**)- **तस्मात्**= तेन हेतुना, **प्रमदसेव्यसुमध्यदेशाम्** = तरुणजनास्वादनीय-चित्ताह्लादकनितम्बजघनादिमध्यभागाम्, **जङ्घाललाटकरजाङ्कवतीम्** - **जङ्घयोः** = ऊर्वोः, **ललाटे** = मस्तके, **करजानाम्** = नखानाम्, **अङ्काः** = चिह्नानि, **यस्यास्ताम्**= ऊरुनिटिलगतकामकेलिसमुद्भूतनखचिह्नवतीम्, **इमाम्** = कामपि सौन्दर्यवतीं प्रमदाम्, **नाकृष्टकुन्तलम्**- **न आकृष्टाः** = न निष्ठुरतापूर्वकं कृष्टाः, **कुन्तलाः** = कचाः, यस्मिन् कर्मणि यथा स्यात्तथा, **अनाश्रितचोलभेदम्** - न आश्रित इति **अनाश्रितः**= असम्भृतः, **चोलभेदः**= कञ्चुकविदारणम्, यस्मिन् कर्मणि यथा स्यात्तथा, **नाच्छिन्न-काञ्चि** - **न आच्छिन्ना**= न त्रुटिता, **काञ्ची** = रशना, यस्मिन् कर्मणि यथा स्यात्तथा, शनकैः = शनैःशनैः, **दयया** = करुणया, **रसेन** = आनन्देन, **उपभुङ्क्ष्व** = उपभोगं कुरु । अत्र पद्ये 'नाकृष्टकुन्तलम्' इत्यादौ विनार्थस्य प्रयोगाद् विनोक्तिरलङ्कारः । यत्रैकेन विना द्वितीयः साधुरथवाऽसाधुर्न भवति, शोभनत्वे च तस्य पर्यवसानं तत्र विनोक्तिर्भवति । विनाशब्दस्य प्रयोगाभावेऽपि विनार्थविवक्षायां विनोक्तिरेव । अत्र विनाशब्दस्य प्रयोगाभावेऽपि विनार्थस्य विवक्षायाः कारणाद् विनोक्तिरलङ्कारः । नाकृष्टकुन्तलम्, अनाश्रितचोलभेदम्, नाच्छिन्नकाञ्चिपदेषु विनाप्रयोगं विनाऽपि विनार्थस्य बोधः । उक्तञ्च - **विनोक्तिः सा विनाऽन्येन यत्राऽन्यः सन्न नेतरः** । (का.प्र., उ. १०, सू. १७२, श्लो. ११२) अत्र सभङ्गश्लेषश्च ।।७४।।

दिव्यलक्ष्मी - (राजलक्ष्मीपक्ष) - राजलक्ष्मीको चञ्चल स्वभावलाई बुझेर आफ्नो अधीनमा रहेका अनुशासित र प्रसन्न स्वभावका सहयोगीहरूद्वारा अलङ्कृत मध्य भूभागले सुहाएकी, विशाल लाटदेशका राजाहरूबाट प्राप्त करका कारण कोश समृद्ध हुनाले ऐश्वर्यवती राजलक्ष्मीलाई कुन्तलदेशमाथि आक्रमण नगरीकन चोलदेशको शासनप्रणालीमा फुट पैदा नगरीकन काञ्चीदेशमा कुनै किसिमको हानि-नोक्सानी नपुऱ्याईकन तिमीले दयाका साथ उपभोग गर ।

(**प्रमदापक्ष**) - तिमीले भोगविलासमा निपुण पुरुषलाई मनपर्ने मसिनो कम्मर भएकी, तिघ्रा र निधारमा आफ्ना प्रियतमका नङहरूको प्रहारबाट लागेको घाउले राम्री देखिने षोडशीको कन्दनी नचुडालीकन, केशका रौं नतानीकन, छातीको चोली नच्यातीकन दया गर्दै आनन्दपूर्वक उपभोग गर ।।७४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामेन सार्द्धमुपयोजय धर्ममार्गं
शौर्यं भजस्व घृणया सह वित्तराशिम् ।
धर्मेण साकमभिवाञ्छ विहाय सर्व-
मन्ते रमस्व निरपायविमुक्तिवध्वा ।।७५।।

– सहोक्तिः

अन्वयः – (वत्स ! त्वम्) कामेन, सार्द्धम्, धर्ममार्गम्, उपयोजय, घृणया, सह, शौर्यम्, भजस्व, धर्मेण, साकम्, वित्तराशिम्, अभिवाञ्छ, अन्ते, सर्वम्, विहाय, निरपायविमुक्तिवध्वा, रमस्व ।

चूडामणिः – वत्स ! त्वम्, **कामेन** = कामभोगेन, **सार्द्धम्** = साकम्, **धर्ममार्गम्**= सुकृतसरणिम्, **उपयोजय** = आकलय, **घृणया** = दयया (जुगुप्साकरुणे घृणे- इत्यमरः), **सह**= साकम्, **शौर्यम्** = शूरताम्, **भजस्व** = सेवस्व, **धर्मेण** = सुकृतेन, **साकम्** = सह, **वित्तराशिम्** = अर्थपुञ्जम्, **अभिवाञ्छ** = कामयस्व, **अन्ते** = जीवनस्यान्तिमभागे, **सर्वम्** = निखिलं प्रपञ्चजातम्, **विहाय** = त्यक्त्वा, **निरपाय-विमुक्तिवध्वा** – **विमुक्तिः** = मोक्षः, एव **वधूः** = सुन्दरीति विमुक्तिवधूः, **निरपाया**= अनपायिनी अर्थादविनाशिनी चासौ विमुक्तिवधूरिति निरपायविमुक्तिवधूः, तया,, अविनश्वरमुक्तिसुन्दर्या सह, **रमस्व** = रमणं कुरु । अस्मिन् पद्ये कविना धर्मार्थकाम-मोक्षाभिधपुरुषार्थानुयायिनी सनातनसंस्कृतिर्निरूपिता । अत्र सह – साकमित्यादीनां पदानां प्रयोगात् सहोक्तिरलङ्कारः । उक्तञ्च मम्मटेन– **सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्** । (का.प्र., उ. १०, सू. १७१, श्लो. १११)।।७५।।

दिव्यलक्ष्मी – हे वत्स ! तिमीले कामनामक पुरुषार्थको साधना गर्दा धर्मनामक पुरुषार्थलाई समन्वित गराऊ। हृदयमा दयाभाव सँगालेर वीरता प्रदर्शन गर । धर्मपूर्वक सम्पत्ति र द्रव्य आर्जन गरेर अर्थनामक पुरुषार्थ सिद्ध गर्दै अन्तमा सम्पूर्ण प्रपञ्चलाई अनासक्तिपूर्वक छाडी मोक्षनामक पुरुषार्थ सिद्ध गरी अविनाशी मुक्तिसुन्दरीका साथ रमण गर ।।७५।।

प्रालेयपर्वतगुहासु गृहीतरल्लो
रोमाञ्चकञ्चुकितकम्पितगात्रयष्टिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वद्वैरिभूपतिगणः पिदधातु भीतिं
त्वत्कारणामिह तपस्विजनच्छलेन ।।७६।।

- मीलितम्

अन्वयः - इह, प्रालेयपर्वतगुहासु, गृहीतरल्लः, रोमाञ्चकञ्चुकितकम्पितगात्रयष्टिः, त्वद्वैरिभूपतिगणः, तपस्विजनच्छलेन, त्वत्कारणाम्, भीतिम्, पिदधातु ।

चूडामणिः - **इह** = तव राज्ये, **प्रालेयपर्वतगुहासु** - प्रलीयन्ते पदार्था यस्मिन् सः, **प्रलयः** = नीहारः, तस्य भावः, प्रालेयः, प्रालेयश्चासौ पर्वतः, **प्रालेयपर्वतः** = हिमालयः, तस्य **गुहाः**= गह्वराणि, इति प्रालेयपर्वतगुहाः, तासु, हिमालयदरीषु इत्यर्थः, **गृहीतरल्लः** - **गृहीतः** = अङ्गीकृतः, **रल्लः** = कम्बलः, येन **सः** = विधृतकम्बलः, (समौ रल्लककम्बलौ- इत्यमरः), **रोमाञ्चकञ्चुकितकम्पितगात्रयष्टिः** - **रोमाञ्चेन**= रोमहर्षेण, **कञ्चुकिता** = कम्पिता, **गात्रयष्टिः** = शरीरलता, येन सः, रोमहर्षकञ्चुक-वस्त्राच्छादितवेपमानकलेवरदण्डः, **त्वद्वैरिभूपतिगणः** - **तव** = भवतः, **वैरिणः**= शत्रवः, त्वद्वैरिणो ये **भूपतयः** = राजानः, तेषां **गणः** = समूह इति, त्वदरातिराजसमूह इत्यर्थः, **तपस्विजनच्छलेन**- तपस्यतीति **तपस्वी**= तपोनिरतः, तपस्वी चासौ **जनः**= नर इति तपस्विजनः, तस्य, **छलेन** = कपटेन, मुनिजनव्याजेनेत्यर्थः, **त्वत्कारणाम्**= त्वत्कारणभूताम्, **भीतिम्** = भयम्, **पिदधातु** = आच्छादयतु । तव राज्ये त्वया पराजिता भीताश्च शत्रवो हिमाद्रिदरीषु तपस्विरूपेण स्थित्वा जीवनरक्षां कुर्वन्तु इति कृतवीर्यस्याशयः । अत्र मीलितालङ्कारः। उक्तञ्च मम्मटेन - **समेन लक्ष्मणा वस्तु वस्तुना यन् निगूह्यते । निजेनाऽऽगन्तुना वाऽपि तन्मीलितमिति स्मृतम् ।।** (का.प्र., उ. १०, सू. १९८, श्लो. १२९) अर्थात्, समानलक्षणेन वस्तुना कस्यापि वस्तुनो गुप्तौ जातायां मीलितं भवति । उक्तपद्ये - तपस्विजनच्छलेन भीतिपिधानं वर्णितमिति मीलितम् ।।७६।।

दिव्यलक्ष्मी - शत्रुराजाहरू तिम्रो अपूर्व वीरताका कारण थर्थर शरीर कँपाउँदै जाडो छल्न कम्बल ओढेर हिमालयको शरणमा पुगून् । यसरी तपस्वीको जस्तै स्वरूप बनाएका ती शत्रुराजाहरूले 'अब म तपस्वीजस्तै देखिएको छु, त्यस कारण कार्तवीर्यले तपस्वी ठानी ममाथि प्रहार गर्ने छैनन्' भनी तिमीबाट हुने डरलाई मनभित्र लुकाउन सकून् ।।७६।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन्वती क्षितिरियं भवता सुराज्ञा
भूत्वा बिभर्तु गिरिशृङ्गसमानसौधान्।
राजन्तु तत्र गतभीतिसमस्तवर्णा-
स्तेष्वासतामनुदिनं सुकृतादिचर्चाः ।।७७।।

– एकावली

अन्वयः – इयम्, क्षितिः, सुराज्ञा, भवता, राजन्वती, भूत्वा, गिरिशृङ्गसमानसौधान्, बिभर्तु, तत्र, गतभीतिसमस्तवर्णाः, राजन्तु, तेषु, अनुदिनम्, सुकृतादिचर्चाः, आसताम्।

चूडामणिः – **इयम्** = एषा, **क्षितिः** = अवनिः, **सुराज्ञा** = सुभूपेन, **भवता** = कार्तवीर्येण, **राजन्वती** – शोभनो राजा यस्यां सा, सुराजवती (सुराज्ञि देशे राजन्वान्-इत्यमरः) अर्थात् उत्तममहीपतिसमलङ्कृता, **भूत्वा** = सम्भूय, **गिरिशृङ्गसमानसौधान्**- **गिरीणाम्** = पर्वतानाम्, **शृङ्गाणि** = शिखराणीति गिरिशिखराणि, तैः **समानाः** = तुल्याः, **सौधाः** = राजभवनानीति गिरिशृङ्गसमानसौधास्तान्, **बिभर्तु** = धारयतु, **तत्र** = सौधेषु, **गतभीतिसमस्तवर्णाः** – **गताः** = प्रयाताः, **भीतयः** = बिभीषिकाः, येषान्ते गतभीतयः, ते, **समस्ताः** = सम्पूर्णाः, **वर्णाः** = ब्राह्मणादिवर्णाः, **राजन्तु**= विराजन्तु, **तेषु**= वर्णेषु, **अनुदिनम्** = प्रतिदिनम्, **सुकृतादिचर्चाः** – **सुकृतादीनाम्**= धर्मार्थकाममोक्षाभिधानां पुरुषार्थानाम्, **चर्चाः** = कीर्तनानि, **आसताम्** = भवन्तु। अत्रैकावल्यङ्कारः । उक्तञ्च मम्मटेन – **स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम्। विशेषणतया यत्र वस्तु सैकावली द्विधा ।।** (का.प्र., उ.१०, सू. १९९, श्लो. १३०)।।७७।।

दिव्यलक्ष्मी – तिमीजस्ता असल राजाले शासन गरेका कारण यी पृथिवी पनि 'असल राजाद्वारा राम्ररी शासन गरिएकी' भन्ने अर्थ बुझाउने '**राजन्वती**' उपाधिले सुहाउँदै पर्वतजस्ता अग्लाअग्ला राजभवन धारण गरी झकिझकाउ भएर रहून्। ती ती भवनहरूमा सबै वर्ण र जातिका मानिसहरू निर्भय भई निवास गरून्। ती अग्ला एवं भव्य भवनमा निवास गर्ने मानिसहरूमा निरन्तर धर्म आदि पुरुषार्थको चर्चा चलिरहोस् ।।७७।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वत्स्वातिवृष्टिजनितोपनिषत्समज्ञा
मुक्तीकरोतु विशदातिशयात् प्रवालान् ।
कृत्स्नं शिवं रचयतां स्फुरितादभेदाद्
वर्णोत्करे विकिरतामतिशुद्धमात्रम् ।।७८।।

- सामान्यम्

अन्वयः - त्वत्स्वातिवृष्टिजनिता, उपनिषत्समज्ञा, विशदातिशयात्, प्रवालान्, मुक्तीकरोतु, अभेदात्, स्फुरितात्, कृत्स्नम्, शिवम्, रचयताम्, वर्णोत्करे, अतिशुद्धमात्रम्, विकिरताम्।

चूडामणिः - त्वत्स्वातिवृष्टिजनिता – सुशोभनमततीति स्वातिः, त्वद्रूपः स्वातिरिति- त्वत्स्वातिः = त्वद्रूपं स्वातिनक्षत्रम्, तस्मिन् **वृष्टिः** = वर्षणम्, तया **जनिता** = उत्पादिता, अर्थात् स्वातिरूपात् त्वत्तः प्रादुर्भूता, **उपनिषत्समज्ञा** – उपनिषीदति श्रेयो यस्यां सा, **उपनिषत्** = वेदान्तशास्त्रम्, (भवेदुपनिषद्धर्मे वेदान्ते बीजने तथा- इति रामाश्रमी), तस्याः **समज्ञा - समैः** = सर्वैर्ज्ञायते इति **समज्ञा** = कीर्तिः (यशः कीर्तिः समज्ञा च- इत्यमरः), **विशदातिशयात्** - **विशदस्य** = निर्मलतायाः, **अतिशयः** = आधिक्यम्, इति विशदातिशयः, तस्मात्, **प्रवालान्** - प्रकृष्टाश्चते बालास्तान्, अज्ञान्, **मुक्तीकरोतु**- ज्ञानदानेन मुक्तिमार्गानुयायिनो विदधातु, अथवा **प्रवालानाम्** = विद्रुमाणाम्, मौक्तिकरूपे परिणमनमिव **प्रवालान्** = अज्ञान्, मुक्तिजन्यपरमानन्दभोगिरूपे परिणमयतु, उपनिषत्समज्ञा सा, **अभेदात्**= भेदराहित्यात्, **स्फुरितात्**= स्फुरणात्, **कृत्स्नम्** = सकलं जगत्, **शिवम्** = कल्याणमयम्, **रचयताम्**= कारयतु, **वर्णोत्करे- वर्णेषु** = ब्राह्मणादिवर्णेषु, **उत्करः** = श्रेष्ठ इति तस्मिन्, परमात्मस्वरूपबोधप्रयत्नशीले, चातुर्वर्ण्यमध्ये सर्वश्रेष्ठे, **अतिशुद्धमात्रम्**= अत्यन्तमेव विशिष्टं ब्रह्मबोधरूपं स्फुरितम्, **विकिरताम्** = ददातु । अत्र सामान्यालङ्कारः। उक्तञ्च मम्मटेन - **प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया । ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम्** ।। (का.प्र., उ. १०, सू. २०३, श्लो. १३३) सदृशैर्गुणैः प्रकृतस्यान्यतादात्म्यवर्णने सामान्यं नामालङ्कारः । अत्रोपनिषत्समज्ञायाः साहाय्येन प्रवालानां मुक्तीकरणाद् ब्रह्मरूपसामान्यं वर्णितम् ।।७८।।

दिव्यलक्ष्मी - स्वातिनक्षत्रमा हुने वर्षाका थोपाहरू सिपीमा पर्दा ती सिपीहरू मोतीको रूपमा परिणत भएझैं स्वातिनक्षत्रसमान जनताको भाग्यलाई उत्तम भाग्यमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिणत गर्ने सामर्थ्य भएका तिमीजस्ता राजाद्वारा गरिएका कल्याणकारी कार्यहरूबाट पुण्यपुञ्ज तयार हुनेछ। त्यसबाट प्राप्त हुने कीर्तिले आफ्नो उज्ज्वलताद्वारा शास्त्र नजान्ने मानिसलाई पनि मुगामणि मोतीका रूपमा परिणत भएझैं गौरवपूर्ण तुल्याई मुक्तिमार्गको पथिक तुल्याउने छ । सबै जनतामा समानरूपले व्यवहार गरी सबैको समानरूपमा उन्नति गराउँदा तिम्रा कल्याणकारी कार्यक्रमले सबैको मङ्गल गर्ने छन्। तिम्रो विशुद्ध अध्यात्मभावना फैलिँदा ती सबै खुसी हुनेछन्।।७८।।

त्रिशक्ति - उक्त सामान्य अर्थका साथै ध्वन्यमान अर्थ पनि रहेको छ - तिम्रो कल्याणकारी राज्यव्यवस्थामा वेदान्तशास्त्रको प्रभावकारी अध्ययन-अध्यापन चलोस्। यसबाट अज्ञानी पुरुषहरूले मुक्तिमार्ग पछ्याउने अवसर पाऊन् । वेदान्त आदि शास्त्रको प्रचार-प्रसारबाट जगत्को मङ्गल होस् र ब्रह्मसाधकहरूले विशुद्ध ब्रह्मतत्त्वको बोध गर्न पाऊन् ।

त्वद्वैरिभूपतियशस्तमसा तमिस्रा-
मुच्चावचाध्वसदसत्परिभानहीनाम् ।
भूमीमिमां तव समुद्रभुजोत्थकीर्ति-
व्रातेन्दुरुज्ज्वलयतु स्फुटतद्विशेषाम् ।।७९।।

- तद्गुणः

अन्वयः - तव, समुद्रभुजोत्थकीर्तिव्रातेन्दुः, त्वद्वैरिभूपतियशस्तमसा, तमिस्राम्, उच्चावचाध्वसदसत्परिभानहीनाम्, इमाम्, भूमिम्, स्फुटतद्विशेषाम् (विधाय), उज्ज्वलयतु।

चूडामणिः - **तव** = भवतः, **समुद्रभुजोत्थकीर्तिव्रातेन्दुः** - **समुद्रः** = सागरः, एव **भुजः** = बाहुः, पारावाररूपबाहुः, तस्माद् **उत्थानाम्** = प्रकटितानाम्, **कीर्तीनाम्** = यशसाम्, **व्रातः** = समूहः, एव **इन्दुः** = चन्द्रमाः, त्वत्सागरबाहुजनितकीर्तिचन्द्र इत्यर्थः, **त्वद्वैरिभूपतियशस्तमसा** - तव **वैरिणः** = शत्रव इति त्वद्वैरिणः, ये **भूपतयः** = नृपतयः, तेषां यश **एव** = कीर्तिरिव, **तमः** = अन्धकार इति, तेन, **तमिस्राम्** - तमो बहुलमस्त्यस्यामिति **तमिस्रा**= अन्धकाराच्छन्ना, ताम्, **उच्चावचाध्वसदसत्परिभानहीनाम्**- **उदक् च**= अवाक् चेति, **उच्चावचम्** = विषमम्, तेन **अध्वना** = मार्गेण, **सदसतोः** = विद्यमानाविद्यमानयोः, **परिभानेन** = ज्ञानेन, **हीना** = रहिता, ताम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैकविधमार्गहेतुना वस्तुसत्यासत्यपरिज्ञानरहिताम्, **इमाम्** = एताम्, **भूमिम्** = अवनिम्, **स्फुटतद्विशेषाम्**- तस्या विशेषः, तद्विशेषः, **स्फुटः** = स्पष्टः, **तद्विशेषः** = यशोविशेषः, यस्याः, ताम्, समुद्रजन्मनश्चन्द्रमसः किरणेभ्योऽपि चमत्कृताम्, विधाय, **उज्ज्वलयतु**= दीपयतु । अत्र तद्गुणालङ्कारः। उक्तञ्च- **स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् । वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ।।** (का.प्र., उ. १०, सू. २०५, श्लो. १३६)।।७९।।

दिव्यलक्ष्मी - बाबु ! शत्रुराजाहरूको यशको कालो दागबाट अन्धकारमा डुबेको, उँचनीच मार्गमा चल्ने अनेक धर्म वा सम्प्रदायका थरिथरिका सिद्धान्त फैलिएका कारण सत्य र असत्यको पहिचान गराउने विवेकवान् पुरुषहरू नहुनाले अन्धकाराच्छन्न पृथिवीतलमा तिम्रो बाहुरूप समुद्रबाट उदाएको कीर्तिरूप चन्द्रमाले ती सबै अन्धकारलाई समाप्त पारी चहकिलो प्रकाश फैलाओस् ।।७९।।

अर्कोपलस्य पयसा स्नपनेऽपि मष्या
श्वैत्यं यथा तव नरेन्द्रधुराधरस्य ।
सङ्गे मुहुः सदसतोरपि न व्यपैतु
स्वच्छान्तराविरतखेलनचिद्विलासः ।।८०।।

- अतद्गुणः

अन्वयः - मष्या, अर्कोपलस्य, पयसा, स्नपने अपि, श्वैत्यम्, यथा (न भवति, तथैव), नरेन्द्रधुराधरस्य, तव, मुहु, सदसतोः, सङ्गे अपि, स्वच्छान्तराविरतखेलन-चिद्विलासः, न, व्यपैतु ।

चूडामणिः - **अर्कोपलस्य** = सूर्यकान्तमणेः, **पयसा** = जलेन, **स्नपने अपि** = स्नानसम्पादने अपि, **यथा** = येन प्रकारेण, **मष्याः** = मलिनाम्बुनः (मलिनाम्बु मषी मसी- इति हैमः), **श्वैत्यम्** = धवलिमा, न भवति, तथैव, **नरेन्द्रधुराधरस्य** - नरेन्द्राणाम् = राज्ञाम्, **धुराम्** = राज्यभारम्, **धरति** = धारयति इति, तस्य, महीपतीन्द्र-यानमुखधारिणः, अथवा महीपतीन्द्रधूर्वहस्य (धूः स्त्री क्लीबे यानमुखम्- इत्यमरः), **तव** = भवतः, **मुहुः** = पुनः, **सदसतोः** = सज्जनदुर्जनयोः, **सङ्गे अपि** = सम्पर्केऽपि, **स्वच्छान्तराविरतखेलनचिद्विलासः** - **स्वच्छेन** = निर्मलेन, **आन्तरेण**= अन्तरात्मना,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अविरतम् = अनारतम्, **खेलने** = क्रीडने, **चितः**= प्रज्ञायाः, **विलासः** = लीला (प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः, अन्तरमन्तरात्मनि, विलासो हावभेदे स्याल्लीलायामपि, क्रीडा खेला च कूर्दनम् - इत्यमरः), **न व्यपैतु**= न गच्छतु। अत्रातद्गुणालङ्कारः। उक्तञ्च मम्मटेन - **तद्रूपाऽननुहारश्चेदस्य तत् स्यादतद्गुणः।** (का.प्र., उ. १०, सू. २०६, श्लो. १३७)। यथाऽर्कोपलजलस्नानेनापि मषी कृष्णैव भवति तथैव सतामसताञ्च सम्पर्केऽपि तटस्थस्तवान्तरात्मा चिद्विलास-सन्तृप्तः स्यादिति भावः ॥८०॥

दिव्यलक्ष्मी - सूर्यकान्त मणि पग्लिँदा बग्ने पानीले नुहाइदिंदा पनि मसीको कालोपन जस्ताको त्यस्तै रहेझैं राजकाज गर्दा सत्य र असत्यका अनुयायीहरूको बीचमा रहनुपरे तापनि तिम्रो निर्मल आत्मासँग निरन्तर क्रीडा गर्ने चैतन्यको विलास सर्वदा चलिरहोस् ॥८०॥

निष्पक्षपातमविता जनकोऽथ मित्रं
त्यक्त्वा निजोपकृतिकाममिहोपकर्तृ ।
एतत्परोभयजगत्सुखदानबन्धु-
र्दत्तोऽसि पुत्र ! जगते गुरुदत्तदत्तः ॥८१॥

- विशेषः

अन्वयः - हे पुत्र ! अथ, इह, निष्पक्षपातम्, अविता, जनकः, निजोपकृतिकामम्, त्यक्त्वा, उपकर्तृ, मित्रम्, एतत्परोभयजगत्सुखदानबन्धुः, गुरुदत्तदत्तः (त्वं मया), जगते, दत्तः, असि ।

चूडामणिः - **हे पुत्र !** = वत्स !, **अथ** = अनन्तरम्, **इह** = संसारे, **निष्पक्षपातम्**= पङ्क्तिभेदं विना, **अविता** = रक्षकः, **जनकः** = पिता भवति, **निजोपकृतिकामम्** - **निजायाः** = स्वस्याः, **उपकृतेः** = उपकारस्य, **कामः** = कामना, तम्, **त्यक्त्वा** = विहाय, **उपकर्तृ** = जनानामुपकारकम्, **मित्रम्** = सुहृद् भवति, **एतत्परोभयजगत्सुखदानबन्धुः** - **एतत्परः** = पितृमित्राभ्यामपि विशिष्टः, **उभयजगतोः** = इहलोकपरलोकयोः, **सुखस्य** = आनन्दस्य, **दानेन** = प्रदानेन, **बन्धुः** = बान्धवः, **गुरुदत्तदत्तः**- **गुरुणा** = आचार्येण, **दत्तेन** = दत्तात्रेयेन, **दत्तः** = मह्यं पुत्ररूपेण समर्पितस्त्वं मया,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगते= संसाराय, दत्तः= अर्पितः, असि = भवसि । अत्र विशेषालङ्कारः । उक्तञ्च- यदाधेयमनाधारमेकं चानेकगोचरम् । किञ्चित् प्रकुर्वतः कार्यमशक्यस्येतरस्य वा ।। कार्यस्य करणं दैवाद् विशेषस्त्रिविधः स्मृतः ।। (सा.द. १०/७३-७४)।।८१।।

दिव्यलक्ष्मी - सबै सन्तानमा पक्षपातरहित भई समानरूपमा सबैको रक्षा गर्ने पिताको आफ्नै किसिमको महत्त्व छ । कसैले आफ्नो उपकार गरोस् भन्ने चाहना नराखी उपकार गर्ने मित्रको छुट्टै महत्त्व हुन्छ । यी दुबैभन्दा पनि माथि उठेर इहलोक र परलोक दुबैमा सबैलाई अपूर्व आनन्द प्रदान गर्ने सबैका परमबन्धु तिमी छौ। तिमीलाई मैले आचार्य दत्तात्रेयको कृपाबाट प्राप्त गरेको हुँ र अहिले विश्वशान्ति र लोककल्याणका लागि तिमीलाई संसारको हातमा सुम्पिदिएको छु ।।८१।।

आकल्पमाश्रितजगत्त्रितयप्रकाशे
कीर्त्या त्रिलोचनहसे तव कीर्तिपूरे ।
अभ्युद्गते त्रिनयनोत्थमकल्पकल्पं
ज्योतिर्विभातु पुनरुक्ततरं विधातुः ।।८२।।

\- प्रतीपम्

अन्वयः - कीर्त्या, आकल्पम्, आश्रितजगत्त्रितयप्रकाशे, त्रिलोचनहसे, तव, कीर्तिपूरे, अभ्युद्गते, विधातुः, त्रिनयनोत्थम्, आकल्पकल्पम्, ज्योतिः, पुनरुक्ततरम्, विभातु।

चूडामणिः - **कीर्त्या** = यशसा (कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि च- इति रामाश्रमी), **आकल्पम् - कल्पम्** = ब्रह्मणो दिनमभिव्याप्य, संवर्तपर्यन्तम्, अथवा ब्रह्मणो दिनपर्यन्तम् (कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने- इति मेदिनी), **आश्रितजगत्त्रितयप्रकाशे**- जगतां त्रितयम्, **जगत्त्रितयम्** = त्रिभुवनम्, **आश्रितम्**= स्वस्मिन् आधृतम्, तज्जगत्त्रितयम्, **प्रकाशयति** = भासयतीति तस्मिन्, **त्रिलोचनहसे**- **त्रीणि** = त्रिसङ्ख्याकानि, **लोचनानि** = नयनानि, यस्य सः, **त्रिलोचनः** = कैलासेश्वरः, तस्य **हसः** = उपहासकृदिति त्रिलोचनहसः, तस्मिन्, विश्वमभिव्याप्य स्फीतिमाप्ते शङ्कराट्टहाससमानगौरे, **तव** = भवतः, **कीर्तिपूरे** - **कीर्त्याः** = यशसः, **पूरः** = जलप्रवाह इति कीर्तिपूरः, तस्मिन् (पूरो जलप्रवाहे स्याद् व्रणसंश्रुद्धिखाद्ययोः-इति मेदिनी), **अभ्युद्गते** = आविर्भूते, **विधातुः** = परमात्मनः सदाशिवस्य, **त्रिनयनोत्थम्**-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रीणि **नयनानि** = लोचनानि इति त्रिलोचनानि, तेभ्यः, **उत्थम्** = प्रकाशितमिति त्रिनयनोत्थम्, **अकल्पकल्म्** - कल्पते स्वक्रियायै समर्थो भवतीति कल्पः, ब्रह्मणो दिनम्, जगतां चेष्टासम्पादकं सृष्टिरूपम्, पुनः कल्पते - विरुद्धलक्षणया स्वक्रियायै असमर्थो भवतीति ब्रह्मणो रात्रिरूपः, जगतां चेष्टाराहित्यसम्पादकः प्रलयरूपः कालभेदः, कल्पश्च कल्पश्चेति कल्पौ, यस्य प्रसारे कल्पकल्पौ प्रतिबन्धकौ न भवतस्तत्, कालमर्यादाहीनमर्थात् अनन्तकालव्यापकम् । उक्तञ्च वाचस्पत्ये- कल्पते - समर्थो भवति स्वक्रियायै, विरुद्धलक्षणया स्वक्रियायै असमर्थो भवति वाऽत्र, क्लृपुसामर्थ्ये विरुद्धलक्षणया असामर्थ्ये वा आधारे घञ्, कल्पयति सृष्टिं विनाशं वाऽत्र क्लृप्, णिच्, आधारे अच्, ब्रह्मणो रात्रिरूपे जगतां चेष्टासम्पादके प्रलये, तस्य दिनरूपे जगतां चेष्टासम्पादके च कालभेदे, **ज्योतिः**= प्रकाशः, **पुनरुक्ततरम्** = पौनःपुन्येन कथितमिव, **विभातु** = शोभताम् । अत्र प्रतीपालङ्कारः । उक्तञ्च मम्मटेन - **आक्षेप उपमानस्य प्रतीपमुपमेयता । तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ।।** (का.प्र., उ.१०, सू.२०२, श्लो.१३२) । प्रसिद्धस्योपमानस्य उपमेयत्वकल्पनेऽथवा तस्य निष्फलत्वद्योतने प्रतीपं भवति । अत्र त्रिनयननयनत्रयोत्थस्याकल्पकल्पस्य अर्थात् अनन्तकालव्यापकस्य ज्योतिषो निष्फलत्वाभिधानात् प्रतीपम् ।।८२।।

दिव्यलक्ष्मी - सत्य, त्रेता, द्वापर र कलियुगको एक चौकडीबाट निष्पन्न हुने कल्पकाल पर्यन्त अर्थात् चार युगसम्म स्वर्ग, मर्त्य र पाताललाई आफ्नो विस्तारद्वारा ज्योतिर्मय तुल्याउने र शिवजीको सेतो अट्टहासलाई पनि मलिन तुल्याउने तिम्रो कीर्तिको मूल प्रवाह फैलिएपछि भगवान् शिवका तीन आँखाबाट प्रकाशित भई अनुपम सामर्थ्यले सुहाएको दिव्यज्योति पनि अर्थहीन प्रतीत हुनेछ ।।८२।।

रूपं वयोऽप्यभिनवं प्रभुतापि वित्त-
मुन्मादयन्ति जनिभाजमिति प्रसिद्धम् ।
शास्त्रावगाहनविशुद्धविवेकभाज-
स्तान्येव ते विनयवृद्धिकराणि सन्तु ।।८३।।

- व्याघातः

अन्वयः - रूपम्, अभिनवम्, वयः, अपि, प्रभुता, वित्तम्, अपि, जनिभाजम्, उन्मादयन्ति, इति, प्रसिद्धम् (अस्ति), शास्त्रावगाहनविशुद्धविवेकभाजः, ते, तानि,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव, विनयवृद्धिकराणि, सन्तु ।

चूडामणिः - **रूपम्** = अङ्गसङ्घटनाभिव्यक्तं स्वरूपसौन्दर्यम्, **अभिनवम्** = नूतनम्, वयः = यौवनम्, **अपि** = च, **प्रभुता** = राजकीयं सामाजिकं पारिवारिकं वा ऐश्वर्यम्, **वित्तम्** = प्रचुरं धनम्, अपि, **जनिभाजम्- जनिम्** = जन्म, **भजते** = प्राप्नोतीति जनिभाक्, तम्, मनुष्यम्, **उन्मादयन्ति** = उन्मत्तं कारयन्ति, इति **प्रसिद्धम्**= इत्यपि लोके प्रथितमस्ति, **शास्त्रावगाहनविशुद्धविवेकभाजः- शास्त्राणाम्**= निगमागमानाम्, **अवगाहनेन**= विलोडनेन, **विशुद्धम्**= निर्मलम्, **विवेकम्** = विचारसामर्थ्यम्, **भजते** = अङ्गीकरोतीति तस्य, श्रुतिस्मृतिपुराणाद्यध्ययनमनननिर्मल-विचारसम्पन्नस्य, **ते** = तव, **तानि एव** = रूपवयःप्रभुत्ववित्तान्येव, **विनयवृद्धिकराणि**- विनयस्य = नम्रतायाः, **वृद्धिम्** = समुन्नयनम्, **कुर्वन्ति इति** = विदधति इति, तादृशानि, **सन्तु** = भवन्तु । उक्तञ्च नीतिशास्त्रे- यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता। एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।। अत्र व्याघातालङ्कारः। उक्तञ्च मम्मटेन- **यद् यथा साधितं केनाऽप्यपरेण तदन्यथा । तथैव तद् विधीयेत स व्याघात इति स्मृतः ।।** (का.प्र., उ. १०, सू. २०७, श्लो. १३८-१३९) अर्थात् केनापि यथासाधितं वस्तु अन्यो यद्यन्यथा कुर्यात् तेनैवोपायेन तदा व्याघातो भवति अथवा कश्चन सौकर्येण यदि किमप्यन्यथा कुर्यात् तत्रापि व्याघातः । अस्मिन् पद्ये रूपवयः-प्रभुतावित्तादीनामुन्मादकानां विनयाधिक्येनान्यथाकरणाद् व्याघातः ।।८३।।

दिव्यलक्ष्मी - मानिसलाई सुन्दर रूप, नयाँ जवानी; सम्प्रभुता र धनले अभिमानी तुल्याउँछन् भन्ने कुरा काव्य र शास्त्रहरूमा प्रसिद्ध छ। निरन्तर शास्त्रको अभ्यासमा गहिरिएर निर्मल बनेको चिन्तनशक्तिद्वारा सुहाएका तिम्रा निमित्त सुन्दर स्वरूप, नव यौवन, राज्यको सम्प्रभुता र धनसम्पत्ति यी चारै विषय विनय बढाउने साधन बनेर रहून् ।।८३।।

षाड्गुण्यगुण्यनृपकार्यधरस्य कस्ते
वस्ते यशो हरिहयोऽरिहयोगविच्च ।
शक्तो न भूरितरवारिविवर्षणेन
जेतुं परं कलुषयिष्यति वाहिनीन्ते ।।८४।।

– प्रत्यनीकम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - षाड्गुण्यगुण्यनृपकार्यधरस्य, ते, यशः, कः वस्ते ?, हरिहयः च, भूरितरवारिविवर्षणेन, जेतुम्, न शक्तः, परम्, ते, वाहिनीम्, कलुषयिष्यति, अरिहयोगविद्, च (भूरितरवारिविवर्षणेन, जेतुम्, न शक्तः, परं ते वाहिनीम्, कलुषयिष्यति)।

चूडामणिः - षाड्गुण्यगुण्यनृपकार्यधरस्य - षण्णाम् = षट्सङ्ख्याकानाम्, **गुणानाम्** = सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाणाम्, भावः, षाड्गुण्यम्, (सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणाः - इत्यमरः), तेन **गुण्यम्** = द्विगुणीकरणीयम्, **नृपकार्यम्** = राजकार्यम्, **धरति** = धारयति इति षाड्गुण्यगुण्यनृपकार्यधरः, तस्य, **ते** = तव, **यशः** = कीर्तिम्, **कः** = को जनः ?, **वस्ते** ?= आच्छादयति ? आदादिकात् वसधातोर्लटि रूपम् ।

पक्षान्तरे- अरिहयोगविद् - अरिम् = शत्रून्, **हन्तीति** = मारयतीति, अरिहः, अरिहश्चासौ **योगः** = उपायः, अरिहयोगः, तं **वेत्तीति** = जानातीति, अरिहयोगविद्, शत्रुविनाशोपायविज्ञो वीरपुरुषः (योगः संनहनोपायध्यानसङ्गतियुक्तिषु- इत्यमरः) अरिह इत्यत्र हन्तेष्टक् इति टक्प्रत्ययः, **भूरितरवारिविवर्षणेन - भूरीणाम्** = अनेकेषाम्, **तरवारीणाम्** = खड्गानाम्, (निस्त्रिंशः करबालः खड्गः कौक्षेयकः कृपाणः स्यात्। रिष्टिरसिचन्द्रहासौर्तरवारिर्मण्डलाग्रञ्च ।।- इति हलायुधः), **वर्षणम्** = वृष्टिः, तेन स भवन्तम्, **जेतुम्** = स्वायत्तीकर्तुम्, **न शक्तः** = असमर्थः, **परम्** = किन्तु, **ते** = तव, **वाहिनीम्** = सेनाम्, **कलुषयिष्यति** = रक्तदिग्धाङ्गां सम्पादयिष्यति ।

हरिहयः= इन्द्रः, **हरिः** = पीतकौशेयप्रभः, **हयः** = अश्वः, यस्य सः (**त्वक्केशबालरोमाणि सुवर्णाभानि यस्य तु । हरिः स वर्णतोऽश्वस्तु पीतकौशेयसत्प्रभः।।** - इति शालिहोत्रम्), **भूरितरवारिविवर्षणेन - भूरितराणाम्** = बहूनाम्, **वारीणाम्**= जलानाम्, **विवर्षणम्** = वृष्टिः, तेन अर्थात् अधिकतरजलवर्षणेन, त्वाम्, **जेतुम्** = स्वायत्तीकर्तुम्, **न शक्तः** = न समर्थः, **परम्** = किन्तु स केवलं युद्धकाले वर्षाभिः, **ते**= तव, **वाहिनीम्** = नर्मदानाम्नी नदीम्, **कलुषयिष्यति** = आविलां विधास्यति न तु तव कीर्तिमाच्छादयिष्यति । अत्र प्रत्यनीकालङ्कारः । उक्तञ्च मम्मटेन - **प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया । या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ।।** (का.प्र., उ.१०, सू.१९७, श्लो. १२८) प्रधानशत्रोस्तिरस्कारे असमर्थेन राज्ञा शत्रुपक्षीयस्य कस्यचन यदि तिरस्कारः क्रियते, तेन तिरस्कारेण शत्रोरेवोत्कर्षवृद्धिश्चेत् प्रत्यनीकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवति । अस्मिन् पद्ये त्वां जेतुमसमर्थो जनः, केवलं तव वाहिनीं कलुषयिष्यतीति कथनाद् वाहिनीकलुषीकरणे शत्रुपक्षीयसैनिकशरीरनिर्गतो रक्तधाराप्रवाहः कारणमिति तवैवोत्कर्ष इत्याशयाभिव्यक्त्या प्रत्यनीकम् ।।८४।।

त्रिशक्तिः - उक्तपद्ये षाड्गुण्यशब्दस्य प्रयोगो वर्तते । तेषां षड्गुणानां सङ्क्षिप्तः परिचयो दीयते- **सन्धिः** = स्वर्णादिदानद्वारा परेषां प्रीत्युत्पादनान्मित्रीकरणं सन्धिः, विग्रहः = परमण्डले दाहलुण्ठनच्छेदादिकं विग्रहः, **यानम्** - उपचितशक्तेः कृतमूल-राष्ट्ररक्षकस्य शत्रोरवस्कन्दनाय यात्रा यानम्, एतदपि विगृह्ययानम्, सन्धाययानम्, सम्भूययानम्, प्रसङ्गयानम्, उपेक्ष्ययानञ्चेति पञ्चविधं भवति । **आसनम्** - 'नाहमिदानीं योद्धुं समर्थः' इति कालादिप्रतीक्षया विजिगीषोर्दुर्गादीन् वर्धयतः स्थितिरासनम् । एतदपि पञ्चविधम्- विगृह्यासनम्, सन्धायासनम्, सम्भूयासनम्, प्रसङ्गासनम्, उपेक्षा-सनञ्चेति, **द्वैधम्** = बलिनोर्वैरिणोर्मध्ये काकाक्षिवदलक्षितस्योभयत्र वाचा समर्पण-मित्येकम्, बलिना सह सन्धिः, अबलेन सह विग्रह इत्यपरम्, शत्रोर्मूलप्रकृतिभिः सन्धाय शत्रुणा विग्रह इति तृतीयम्, शत्रुणैव वा सन्धिविग्रहसमुदायहेतोर्दुर्गाश्रयस्य व्यापार इति चतुर्थम्, **आश्रयः** - बलवता अरिणा उच्छिद्यमानस्य हीनशक्तेर्यद् बलवद्धर्मादिसमाश्रयणं तदाश्रयः- इति षड् गुणाः) ।

दिव्यलक्ष्मी - सन्धि, विग्रह, यान, आसन, द्वैधीभाव र समाश्रयको प्रयोग गरी विकसित र लक्ष्यानुगत राजकार्यमा लागिरहने तिम्रो यशलाई कसले ढाक्न सक्छ ? किनकि शत्रुसंहारक **हरिहय** अर्थात् इन्द्र, **भूरितरवारिविवर्षणेन**- धेरै पानी बर्साएर तिम्रो यश ढाक्न समर्थ हुने छैनन् तर पानीको भलले नर्मदा नदीलाई धमिल्याउने काम भने गर्नेछ । यसैगरी शत्रुसंहार गर्ने कलामा निपुण कुनै वीर शत्रु राजाले युद्धको मैदानमा अनेकौं तरबारद्वारा प्रहार गरेर तिम्रो सेनालाई घाइते तुल्याए पनि तिमीमाथि विजय प्राप्त गर्न सक्ने छैन ।।८४।।

त्रिशक्ति - राजनीतिका सन्धि, विग्रह, यान, आसन, द्वैधीभाव एवं समाश्रय नामक ६ गुण मानिएका छन् । **सन्धि** - मेलमिलाप, **विग्रह** - युद्ध, यान - शक्तिशाली शत्रुको अभिमान घटाउन गरिने युद्धयात्रा, **आसन** - म यतिबेला युद्ध गर्न असमर्थ छु । शक्ति बढाएपछि मात्र युद्ध गर्न उचित हुनेछ भनी प्रतीक्षा गर्नु, **द्वैधीभाव** - दुई बलिया शत्रुहरूको बीचमा रहेको स्थितिमा आफ्नो सुरक्षाका लागि दुबैसँग सम्बन्ध

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कायम गर्नु, **समाश्रय** - बलियो शत्रुद्वारा लखेटिँदा आफ्नो रक्षाका लागि अर्को बलवान् राजाको आश्रय लिनु यी ६ गुणको समुदायलाई षाड्गुण्य भनिन्छ।

एकेन पाणिकमलेन विकासभाजा
सन्दानितां कुरु जनालिमहो सुलुब्धाम् ।
एकेन संहिततरेण शमेन सौख्यात्
त्वं निर्जयान्तरगकाममुखादिशत्रून् ।।८५।।

– परिवृत्तिः

अन्वयः - त्वम्, विकासभाजा, एकेन, पाणिकमलेन, सुलुब्धाम्, जनालिम्, सन्दानिताम्, कुरु, अहो, एकेन, संहिततरेण, शमेन, सौख्यात्, त्वम्, अन्तरगकाममुखादिशत्रून्, निर्जय।

चूडामणिः - **त्वम्** = भवान्, **विकासभाजा** - **विकासम्** = समुदयम्, **भजते** = सेवते इति विकासभाक्, तस्मात्, **एकेन** = एकसङ्ख्यकेन, **पाणिकमलेन** - **पाणिरेव**= कर एव, **कमलम्** = पद्मम्, इति पाणिकमलम्, तेन, **सुलुब्धाम्** = स्नेहातिरेकात् परितो भ्रमन्तीम्, अत्यन्तमेव लोलुपामित्यर्थः, **जनालिम्** = जनपङ्क्तिम्, **सन्दानिताम्**= बद्धाम् (बद्धे सन्दानितं मूत-(मूर्ण)मुद्दितं संदितं सितम् - इत्यमरः), **कुरु** = विधेहि, **अहो** = आश्चर्यम्, **एकेन** = एकसङ्ख्यकेन, **संहिततरेण**= साधनाधिक्यादत्यन्तमेव सन्निधिं गतेन, **शमेन** = शमथुना, **सौख्यात्** - **सुखस्य** = आनन्दस्य, भावः सौख्यम्, तेन, त्वम्, **अन्तरगकाममुखादिशत्रून्** - **अन्तरम्** = आभ्यन्तरम्, **गच्छन्ति** = यान्तीति, अन्तरगाः, **काममुखादयः**- **कामः** = अभिलाषः, **मुखः** = प्रमुखः, येषु, ते, कामक्रोधलोभमोहप्रभृतयः, **शत्रवः**= रिपवः, तान्, **निर्जय** = जय। अत्र परिवृत्तिरलङ्कारः। उक्तञ्च मम्मटेन - **परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः** । (का.प्र., उ. १०, सू. १७३, श्लो. ११२) यत्र समन्यूनाधिकैर्विनिमयो निर्दिश्यते तत्र परिवृत्तिः। एकेन पाणिकमलेन इति पद्ये एकेन करकमलेन जनालिवशीकरणविधौ स्वयं विकास-कमलादानम्, जनपक्षाच्च तदीयहृदयप्राप्तिरिति विनिमयः । पुनश्चकेन शमप्रदानेन शत्रुभ्यो विजयप्राप्तिश्चापि विनिमय एव ।।८५।।

दिव्यलक्ष्मी - हे बाबु ! तिमीले आफूप्रति लोभिएका भमराजस्ता जनतालाई राष्ट्रको विकासका लागि पुरुषार्थ गर्ने आफ्ना हातरूपी कमलभित्र थुनेर राख। जति जति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिमी आफ्नो बाहुबलद्वारा जनकल्याण र राष्ट्रविकासका कार्य गर्दै जाने छौ त्यति त्यति भमराले कमलको फूल नछोडेझैं जनताले तिमीलाई छाड्ने छैनन्। वास्तवमा जनतालाई मन्त्रमुग्ध तुल्याउने एकमात्र उपाय जनताका निमित्त विकास र निर्माणका कार्य सम्पन्न गर्नु नै हो। जनताको कल्याणमा समर्पित शासकले आफ्नो व्यक्तित्व निर्माणका साथै आध्यात्मिक चैतन्य प्राप्त गर्ने दिशामा पनि लाग्नुपर्दछ। तिमीले नित्य भित्री शान्ति प्राप्त गर्न विवेकपूर्वक चिन्तन गरिराख। निरन्तर शान्तिप्राप्तिका लागि गरिने सत्प्रयासबाट तिमीले गम्भीर आत्मशान्ति पाउनेछौ । त्यसै शान्तितत्त्वबाट तिमीले आफ्नो स्वभावमा रहेका काम, क्रोध, लोभ, मोह, मद र मात्सर्य नामले चिनिने छवटा शत्रुलाई एकैचोटि परास्त गर्ने छौ ।।८५।।

एवं प्रजावनविधौ सततोत्थितस्य
स्यात्ते यशश्चटुलचञ्चुपुटैश्चकोरैः ।
चन्द्रभ्रमेण विबुधैरमृतप्रतीत्या
लेह्यं स्तनन्धयजनैरपि दुग्धबुद्ध्या।।८६।।

– भ्रान्तिमान्

अन्वयः - एवम्, प्रजावनविधौ, सततोत्थितस्य, ते, यशः, चटुलचञ्चुपुटैः, चकोरैः, चन्द्रभ्रमेण, लेह्यम्, विबुधैः, अमृतप्रतीत्या, (लेह्यम्) स्तनन्धयजनैः, अपि, दुग्धबुद्ध्या, (लेह्यम्), स्यात् ।

चूडामणिः - **एवम्** = अनेन प्रकारेण, **प्रजावनविधौ - प्रजानाम्** = जनानाम्, **अवनम्** = रक्षणम्, इति प्रजावनम्, तस्य **विधिः** = कल्पः, प्रजावनविधिः, तस्मिन्, **सततोत्थितस्य - सततम्** = निरन्तम्, **उत्थितः** = जागृतः, इति तस्य, **ते** = तव, **यशः** = कीर्तिः, **चटुलचञ्चुपुटैः - चटुलानि** = चपलानि, **चञ्चुपुटानि** = त्रोटयः, येषान्तैः, **चकोरैः** = चक्रवाकैः (कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः:- इत्यमरः), **चन्द्रभ्रमेण - चन्द्रस्य** = इन्दोः, **भ्रमः** = भ्रान्तिः, इति चन्द्रभ्रमः, तेन, **लेह्यम्** = आस्वाद्यम्, **विबुधैः** = देवैः, **अमृतप्रतीत्या- अमृतस्य** = पीयूषस्य, **प्रतीतिः** = संविद्, तया, पीयूषसंविदा, लेह्यम्, **स्तनन्धयजनैः - स्तनम्** = दुग्धम्, **धयन्ति** = पिबन्ति, इति **स्तनन्धयाः** = बालकाः, तैरपि, **दुग्धबुद्ध्या - दुग्धस्य** = पयसः, **बुद्धिः** = मतिरिति दुग्धबुद्धिः, तया, लेह्यम्, **स्यात्**= भवेत्। अत्र भ्रान्तिमानलङ्कारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उक्तञ्च मम्मटेन - ... भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने ।। (का.प्र., उ. १०, सू. २०१, श्लो. १३१) सादृश्यहेतोरेकस्मिन् वस्तुनि अपरवस्तुनो निश्चयात्मकं प्रतिभाजनितं मिथ्याज्ञानं भ्रान्तिर्भवति । अस्मिन् पद्ये कार्तवीर्यस्य यशो निजेन धवलिम्ना चकोराणां कृते चन्द्ररूपं देवानां कृते अमृतरूपम्, बालकानां कृते दुग्धरूपं सम्भावितमिति भ्रान्तिमानलङ्कारः ।।८६।।

दिव्यलक्ष्मी - विकास र निर्माणका कार्य गरी जनताको रक्षामा निरन्तर जागरूक रहने तिम्रो चारैतिर फैलिएको कीर्तिलाई चञ्चल चञ्चल मुखको चुच्चाले सुहाएका चखेवाहरूले चन्द्रमाको चन्द्रिका मानेर पान गरून्, देवताहरूले अमृत मानेर पान गरून् र दूधमुखे बालकहरूले दूध मानेर पान गरून्।।८६।।

लब्ध्वा वराहवपुषं पुरुषं पुराणं
सौकर्यसाधितनिजोद्धरणं धरित्री ।
गङ्गेव धूर्जटिकपर्दमहीनबन्धुं
ज्योत्स्नेव चन्द्रमनुरूपमलं विभातु ।।८७।।

– समम्

अन्वयः - गङ्गा, अहीनबन्धुम्, धूर्जटिकपर्दम्, इव, ज्योत्स्ना, अनुरूपम्, चन्द्रम्, इव, धरित्री, सौकर्यसाधितनिजोद्धरणम्, वराहवपुषम्, पुराणम्, पुरुषम्, लब्ध्वा, अलम्, विभातु ।

चूडामणिः - **गङ्गा** = भागीरथी, **अहीनबन्धुम्** - **अहीनाम्** = नागानाम्, **ईनः** = स्वामी, शेषनागः, **बन्धुः** = स्वजनः (सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः- इत्यमरः), यस्य तम्, शेषनागस्वजनम्, **धूर्जटिकपर्दम्** - **धूर्जटेः** - **धूः** = भारभूता, **जटिः** = जटा, यस्य सः, **धूर्जटिः** = भगवान् शङ्करः, तस्य, **कपर्दः** = जटाजूटः, इति धूर्जटिकपर्दः, तम्, **इव** = यथा, (तथेति राज्ञाभिहितं सर्वलोकहितः शिवः । दधारावहितो गङ्गां पादपूतजलां हरेः ।। - श्रीमद्भागवते ९।९।९) **ज्योत्स्ना**= चन्द्रिका, (चन्द्रिका कौमुदी ज्योत्स्ना- इत्यमरः), **अनुरूपम्** = अनुकूलम्, **चन्द्रम्** = चन्द्रमसम्, **इव** = यथा, **धरित्री** = पृथिवी, **सौकर्यसाधितनिजोद्धरणम्**- **सौकर्येण**- सुखेन **क्रियते** = सम्पाद्यते इति सुकरः, तस्य भावः सौकर्यम्, तेन, **साधितम्** = विहितम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निजोद्धरणम् = स्वकीयोद्धरणम्, येन तम्, **वराहवपुषम्** - **वराहस्य** = शूकरस्य, वपुरिव = शरीरमिव, **वपुः** = शरीरं यस्य तम्, शूकररूपधारिणमित्यर्थः, **पुराणम्**= प्राचीनम्, **पुरुषम्** = नारायणरूपं भवन्तम्, **लब्ध्वा** = पतिरूपेण प्राप्य, **अलम्**= अत्यन्तम्, **विभातु**= महीयताम् । (**स्वद्रंष्ट्रयोद्धृत्य महीं निमग्नां, स उत्थित संरुरुचे रसायाः** । श्रीमद्भागवते - ३।१३।३१, **द्रंष्ट्राग्रकोट्या भगवँस्त्वया धृता । विराजते भूधर ! भूः सभूधरा** ।। श्रीमद्भागवते- ३।१३।४०) । हे पुत्र! भवान् भगवतो नारायणस्य चक्रावताररूपो वर्तते । भवतैव वराहावतारे पृथिवी समुद्धृता । इदानीं भवान् मम पुत्ररूपेणात्र समवतीर्णः । भवन्तं पतिं प्राप्य धरित्री प्रसन्ना भविष्यति । अत्र समालङ्कारः । उक्तञ्च मम्मटेन - **समं योग्यतया योगो यदि सम्भावितः क्वचित्** ।। (का.प्र., उ. १०, सू. १९४, श्लो. १२४) अत्र पद्ये यथा गङ्गा धूर्जटिकपर्दं प्राप्य ज्योत्स्ना च चन्द्रं प्राप्य विभाति तथैव धरित्री पुराणपुरुषं भवन्तं प्राप्य विभात्विति योग्यवस्तुश्लाघाकारणात् समालङ्कारः ।।८७।।

दिव्यलक्ष्मी - अघि पृथिवीले आफूलाई पातालबाट उद्धार गरी माथि ल्याउने वराहरूपधारी पुराणपुरुष उद्धारक प्रभु भगवान् नारायणका रूपमा दर्शन पाएझैं अहिले पनि सजिलैसँग आफ्नो उद्धार गर्ने पुराणपुरुष भगवान् वराहका अवतार तिमीलाई प्राप्त गरेर यी पृथिवी शेषनागले सुहाएको शिवजटामा बास गर्न पाउँदा गङ्गा नदी सुहाएझैं र चाँदनी आफूजस्तै सौन्दर्यका धाम चन्द्रमालाई प्राप्त गरेर सुहाएझैं सुहाउन् ।।८७।।

त्वामेकवीरमभिवीक्ष्य समीकभूमौ
प्रत्यर्थिभूमिपतयो दिवमुत्पतन्तः ।
एकैकशः समधिगम्य च पञ्चभावं
प्रेष्टां धरामसुहरामपि सन्त्यजन्तु ।।८८।।

- व्याजस्तुतिः

अन्वयः - प्रत्यर्थिभूमिपतयः, समीकभूमौ, एकवीरम्, त्वाम्, अभिवीक्ष्य, दिवमुत्पतन्तः, एकैकशः, पञ्चभावम्, च, समधिगम्य, असुहराम् अपि, प्रेष्टाम्, धराम्, सन्त्यजन्तु ।

चूडामणिः - **प्रत्यर्थिभूमिपतयः** - प्रतिकूलमर्थयितुं शीला इति **प्रत्यर्थिनः**= विरोधिनः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यर्थिनश्च ते **भूमिपतयः** = राजानः, **समीकभूमौ**= युद्धभूमौ, (मृधमास्कन्दनं सङ्ख्यं समीकं सम्परायकम्- इत्यमरः), **एकवीरम्** - **एकः** = अद्वितीयः, चासौ **वीरः** = शूरः, इति एकवीरः, तम्, **त्वाम्** = भवन्तम्, **अभिवीक्ष्य** = विलोक्य भयात्, **दिवमुत्पतन्तः** - **दिवम्** = आकाशम्, **उत्पतन्तः**= उड्डयनशीलाः, **एकैकशः**- एकमेकं कृत्वा, **पञ्चभावम्** = पञ्चत्वमथवा मृत्युम्, च, **समधिगम्य** = लब्ध्वा, **असुहराम् अपि** = प्राणहारिणीमपि, **प्रेष्ठाम्** = प्रियाम्, **धराम्** = अवनीम्, **सन्त्यजन्तु**= मुञ्चन्तु । अत्र व्याजस्तुतिरलङ्कारः । उक्तञ्च मम्मटेन – व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।। (का.प्र.,उ. १०, सू. १७०, श्लो. १११) स्तुतिनिन्दाभ्यां वाच्याभ्यां निन्दास्तुत्योः प्रतीयमानतायां व्याजस्तुतिर्भवति। अत्र पद्ये राजस्तुत्या शत्रुनिन्दावगम इति व्याजस्तुतिः ।।८८।।

दिव्यलक्ष्मी - युद्धको मैदानमा अद्वितीय वीरता प्रदर्शन गर्ने तिम्रो स्वरूप देखेर डरले आकाशमा उफ्रिरहेका र एकएक गरी पञ्चत्व अर्थात् मृत्युमा प्राप्त भएका ती शत्रुहरूले आफ्नो प्राणहरण भए तापनि जन्मभूमिका नाताले अत्यन्त प्यारो लाग्ने पृथिवीलाई विवशतापूर्वक परित्याग गरून् ।।८८।।

ये दुर्हृदञ्च सुहृदं युगपन्निपात्य
विप्रादिवर्णमुपसर्गवशान्निपात्य ।
शब्दप्रपञ्चरसिका इह साधयन्ति
मा स्म प्रभुर्जगति तादृशसाधुतायै ।।८९।।

– व्याजस्तुतिः

अन्वयः - ये, शब्दप्रपञ्चरसिकाः, सुहृदम्, दुर्हृदम् च, युगपत्, निपात्य, उपसर्गवशात्, विप्रादिवर्णम्, निपात्य, साधयन्ति, जगति, तादृशसाधुतायै,(त्वम्), प्रभुः, मा स्म (भव)।

चूडामणिः - **ये** = विख्याताः, **शब्दप्रपञ्चरसिकाः** - **शब्दानाम्** = वाचकानां पदानां वा, **प्रपञ्चः** = विस्तारः, तस्मिन्, **रसिकाः** = शब्दसाधुत्वसमीक्षापूर्वकं व्युत्पत्तिकर्मणि रुचिमन्तो वैयाकरणाः, **सुहृदम्** = मित्रवाचकं सुहृच्छब्दम्, **दुर्हृदम्**= शत्रुवाचकं दुर्हृच्छब्दञ्च, **युगपत्** = एकवारमेव, **निपात्य** = 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति सूत्रेण निपातनं विधाय सुष्ठु हृदयं यस्य स इत्यर्थे हृदयस्य स्थाने हृदादेशेन तथैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुष्टं हृदयं यस्य स इत्यर्थे हृदयस्य स्थाने हृदादेशेन च, सुहृद्दुर्हृत्पदे, **उपसर्गवशात्**= उपसर्गसंज्ञकशब्दयोगतः, **विप्रादिवर्णम्** = विप्रादिशब्दम्, **निपात्य** = विपूर्वकात् प्रापूर्तौ इति धातोः विप्रशब्दस्य निपातं विधाय, 'आतश्चोपसर्गे कः' इति सूत्रेण कप्रत्ययं कृत्वा विप्रशब्दञ्च, **साधयन्ति** = सिद्धं कुर्वन्ति, एतद् वैयाकरणानां शास्त्रीयं क्रीडनम्, परम्, **जगति** = लोके, त्वम्, **तादृशसाधुतायै**– व्याकरणरीत्या सुहृद्दुर्हृदोरपि गुणदोष-विवेकं विना निपातनाय, **उपसर्गवशात्** = उत्पातवशात्, **विप्रादिवर्णानाम्**= ब्राह्मणादि-वर्णानाम्, निपातनाय **प्रभुः** = समर्थः, **मा स्म भव** = न स्याः । अत्र वैयाकरणानां निन्दया तेषामेव वैशिष्ट्यप्रकाशनान्निन्दया स्तुतिरूपा व्याजोक्तिः।।८९।।

दिव्यलक्ष्मी – व्याकरणशास्त्रको नियममा रुचि राख्ने वैयाकरणहरूले **'सुहृद्दुर्हृदौ मित्रामित्रयोः'** यस पाणिनीयसूत्रका आधारमा शत्रुवाचक दुर्हृद्शब्द र मित्रवाचक सुहृद्शब्दलाई निपातद्वारा एकै चोटि सिद्ध गर्दछन् र सुरूमा वि उपसर्ग रहेको 'प्रा पूर्तौ' धातुबाट निपातद्वारा विप्रशब्द बनाएर 'आतश्चोपसर्गे कः' सूत्रद्वारा क प्रत्यय गरी विप्रशब्दको सिद्धि गर्दछन्। तर हे बाबु ! वैयाकरणहरूले झैं तिमीले पनि शत्रुलाई ढलाउँदा मित्रलाई पनि ढलाउने काम गर्ने छैनौ र उपद्रवद्वारा ब्राह्मण, क्षत्रिय आदि वर्णाश्रम परम्पराभित्रका मानिसलाई समाप्त गर्ने काम पनि गर्ने छैनौ ।।८९।।

आसाद्य पश्चिमवयः प्रविहाय राज्यं
मौनाश्रमं श्रयितुमेव समुत्सुकोऽस्मि।
राज्यं ममेदमनुरूपतयाग्रहीर्यत्
तन्मे मनोरथतरुः फलितोऽद्य दिष्ट्या ।।९०।।

– समाधिः

अन्वयः – (अहम्) पश्चिमवयः, आसाद्य, राज्यम्, प्रविहाय, मौनाश्रमम्, श्रयितुम्, एव, समुत्सुकः, अस्मि, (त्वम्), मम, इदम्, राज्यम्, यत्, अनुरूपतया, अग्रहीः, तत्, दिष्ट्या, अद्य, मे, मनोरथतरुः, फलितः ।

चूडामणिः – अहं कृतवीर्यः, **पश्चिमवयः** = अन्तिमावस्थाम्, **आसाद्य** = प्राप्य, **राज्यम्** = राष्ट्राधिकारम्, **प्रविहाय** = परित्यज्य, **मौनाश्रमम्** – **मुनेः** = ऋषेरयम्, मौनः, मौनश्चासौ **आश्रमः** = आवास इति मौनाश्रमः, तम्, **श्रयितुम्** = सेवितुम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव = हि, **समुत्सुकः** = उत्कण्ठितः, **अस्मि** = भवामि, त्वम्, **मम** = कृतवीर्यस्य, **इदम्**= एतत्, **राज्यम्** = राज्यशासनम्, **यत्**= यस्मात्, **अनुरूपतया**= आनुकूल्येन, **अग्रहीः** = गृहीतवान्, **तत्** = तस्मात्, **दिष्ट्या** = भाग्येन, **अद्य** = अधुना, **मे** = मम, **मनोरथतरुः**- **मनसः** = चित्तस्य, **रथः** = स्यन्दनम्, एव **तरुः** = वृक्षः, अर्थान्मनोभिलाषवृक्षः, **फलितः** = फलवान् जातः । अत्र समाधिरलङ्कारः। उक्तञ्च मम्मटेन- **समाधिः सुकरं कार्यं कारणान्तरयोगतः।** (का.प्र., उ.१०, सू. १९३, श्लो. १२४) दैवात् प्राप्तेन वस्तुना प्रस्तुतकार्ये सुकरे सति समाधिर्भवति । प्रस्तुतपद्ये मौनाश्रमं श्रयितुकामस्य कृतवीर्यस्य राज्यत्यागकार्यं कार्तवीर्यस्य सहर्षं राज्यग्रहणेन सुकरं जातमिति समाधिः ।।९०।।

दिव्यलक्ष्मी - वत्स ! जीवनको उत्तरार्धमा प्रवेश गरेपछि राजपाट परित्याग गरी मुनिको आश्रममा गई बस्न म अत्यन्त उत्सुक भएको छु। तिमीले मेरो राज्यभार मेरो अनुकूल हुने गरी सजिलै स्वीकार गरेको हुँदा मेरो मनोरथरूपी वृक्ष फलीभूत भएको छ।।९०।।

संवर्तवर्द्धितपयःपटगुण्ठनाप्त-
क्षोणीसमुद्वहनसौख्यजडोरुकाण्डः ।
प्रालेयशैत्यमिषवारितधातृतर्को
भव्यन्तनोतु गिरिराजवपुःकिटिस्ते ।।९१।।

– व्याजोक्तिः

अन्वयः - संवर्तवर्द्धितपयःपटगुण्ठनाप्तक्षोणीसमुद्वहनसौख्यजडोरुकाण्डः, प्रालेय-शैत्यमिषवारितधातृतर्कः, गिरिराजवपुःकिटिः, ते, भव्यम्, तनोतु ।

चूडामणिः - संवर्तवर्द्धितपयःपटगुण्ठनाप्तक्षोणीसमुद्वहनसौख्यजडोरुकाण्डः- **संवर्तेन**= प्रलयेन, (संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि- इत्यमरः) **वर्धितैः**= वृद्धिमाप्तैः, **पयोभिः** = जलैः, पटस्य गुण्ठनम् - **पटगुण्ठनम्**= वस्त्र-प्रावरणम्, **आप्तायाः** = प्राप्तायाः, **क्षोण्याः** = पृथिव्याः, **समुद्वहनेन** = धारणेन, यत् **सौख्यम्**= आनन्दः, तेन **जडौ** = निश्चलौ, **ऊरुकाण्डौ** = सक्थिस्तम्भौ, यस्य सः, **प्रालेयशैत्य-मिषवारितधातृतर्कः**- **प्रालेयस्य** = तुषारस्य, **शैत्यम्** = जाड्यम्, तस्य, तुषारजाड्यस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका च - इत्यमरः), **मिषेण**= व्याजेन, **वारितः** = निवारितः, **धार्तृतर्कः** = ब्रह्मवितर्को येन सः, हिमजनितशैत्येन जडोरुकाण्डोऽहं न तु क्षोणीसुन्दरीसमुद्वहनसौख्येनेति कथनेन निवारितविधिवितर्क इति तात्पर्यम्, **गिरिराजवपुःकिटिः** - **गिरीणाम्** = पर्वतानाम्, **राजा** = नृप इति गिरिराजः, तस्य **वपुः** = शरीरम्, इव वपुः शरीरं यस्य, तादृशः, **किटिः** = हिमालयाकारो वराहः (वराहः सूकरो घृष्टिः कोलः पोत्री किरः किटिः। दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि- इत्यमरः), **ते** = तव, **भव्यम्** = कल्याणम्, **तनोतु** = विस्तारयतु। अत्र व्याजोक्तिरलङ्कारः। उक्तञ्च मम्मटेन - **व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्।।** (का.प्र., उ.१०, सू.१८५, श्लो. ११७) प्रकटस्य वस्तुनः केनापि व्याजेन गोपनं व्याजोक्तिः । अस्मिन् पद्ये क्षोणीसमुद्वहनजनितानन्दजडस्यापि वराहस्य भगवतः शीतवशाज्जडोऽहं न तु क्षोणीसुन्दरीवहनेनेति प्रकटितरोमाञ्चादिगोपनं जातमिति व्याजोक्तिः ।।९१।।

दिव्यलक्ष्मी - युगान्तमा वृद्धिमा प्राप्त हुने जलराशिलाई नै उत्तरीय बनाई धारण गर्ने आफ्नी प्रियतमा पृथिवीलाई अँगालो मारेर उठाउँदा प्राप्त हुने आनन्दका कारण वराह भगवान्का दुबै तिघ्राहरूले आफूलाई जड बनाएर आनन्दको अनुभूति गरिरहेका थिए। भगवान् वराहको यस्तो अवस्था देखेर ब्रह्माजीले परमेश्वर नारायणका अवतार भएर पनि यी किन कामातुर देखिए भनी शङ्का गर्दा 'मेरा तिघ्रा पृथिवी नायिकाको स्पर्शका कारण आनन्दजड भएका होइनन् अपितु हिउँझैं चिसो जल स्पर्श गरेका कारण जड भएका हुन्' भन्दै जसले सृष्टिकर्ता ब्रह्माजीको वितर्कका सामु आफ्नो कमजोरी लुकाउने प्रयास गरेका थिए ती हिमालयको आकारका भगवान् वराहले तिम्रो कल्याण गरून्।।९१।।

जानामि तं पुरुषमेव भवन्तमद्धा
जानामि तं गुरुगिरा न भवं भवन्तम् ।
संसारसिन्धुतरणे तरणीभवन्तं
तत्क्षम्यतां प्रमुखतो मुखरोऽभवन्ते ।।९२।।

- यमकानुप्रासयोः संसृष्टिः

अन्वयः - अद्धा, गुरुगिरा, (अहम्), न भवम्, न भवन्तम्, संसारसिन्धुतरणे,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तरणीभवन्तम्, भवन्तम्, तम्, पुरुषम्, एव, जानामि, ते, प्रमुखतः, मुखरः, अभवम्, तत्, क्षम्यताम् ।

चूडामणिः - अद्धा = वस्तुतः, (तत्त्वे त्वद्धाञ्जसाद्वयम्- इत्यमरः), **गुरुगिरा - गुरोः** = आचार्यस्य, **गीः** = वाणी इति, तया, दत्तात्रेयवाण्या इत्यर्थः, अहम्, **न भवम्** = न जातम्, **न भवन्तम्** = नोत्पद्यमानम्, **संसारसिन्धुतरणे- संसरतीति** = प्रसर्पतीति, **संसारः**= जगत्, स एव **सिन्धुः** = सागरः, तस्य **तरणम्** = पारणम्, इति तस्मिन्, **तरणीभवन्तम्** - तरन्ति अनया इति **तरणिः** = नौः, (स्त्रियां नौस्तरणिस्तरिः- इत्यमरः), अतरणिस्तरणिर्यथा सम्पद्यते तथा भवतीति तरणीभवन्, तम्, संसारसागरतरणे नौकायमानमित्यर्थः, **भवन्तम्** = त्वाम्, कार्तवीर्यम्, **तम्** = अनादिरूपम्, **पुरुषमेव**= नारायणमेव, **जानामि** = वेद्मि, यदहम्, **ते** = तव, **प्रमुखतः** = सम्मुखतः, **मुखरः**= वाचालः, **अभवम्** = अभूवम्, **तत्** = तस्मिन् विषये, **क्षम्यताम्** = क्षमा विधीयताम्। अत्र यमकानुप्रासयोः संसृष्टिः । उक्तञ्च मम्मटेन - **सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः** । (का.प्र., उ. १०, सू. २०८, श्लो. १३९) । अत्र पद्ये तृतीयचरणे न भवम्, भवन्तमित्यत्र भवं भवमितिरूपं स्वतन्त्रतया यमकम्, अन्यचरणेषु चानुप्रासोल्लास इति संसृष्टिः ।।९२।।

दिव्यलक्ष्मी - वास्तवमा मेरा गुरुदेव दत्तात्रेय ऋषिको कृपापूर्ण उपदेशबाट मैले पृथिवीको उद्धार गर्ने ती भगवान् वराह नै तिमी हौ भन्ने विश्वास गरेको छु । तिमी अजन्मा पुरुष हौ भन्ने पनि जानेको छु तर आज संसारी नाताले तिम्रो पिता भएको कारण मुखर बनेर तिमीलाई उपदेश गर्दैछु यसमा तिमीले मलाई क्षमा दिनेछौ ।।९२।।

कृतवीर्यस्य तपोवनप्रस्थानवर्णनम् -

इति मुदितमुदारं व्याहरन् तं तनूजं
मनुजपतिमतीवाश्लिष्य विश्लेषमेषः ।
उदितरुदितपौरस्फारनेत्राम्बुबिन्दु-
प्रचुरविमलमुक्तावृष्टमार्गः समैषीत् ।।९३।।

- रूपकानुप्रासयोः संसृष्टिः

अन्वयः - इति, मुदितम्, उदारम्, व्याहरन्, मनुजपतिम्, तम्, तनूजम्, अतीव, आश्लिष्य,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदितरुदितपौरस्फारनेत्राम्बुबिन्दुप्रचुरविमलमुक्तावृष्टमार्गः, एष, विश्लेषम्, समैषीत् ।

चूडामणिः - **इति** = इत्थम्, **मुदितम्** = मोदयुतम्, **उदारम्** = सरलं वचनम्, व्याहरन् = उच्चारयन्, **मनुजपतिम्** = जननाथम्, **तम्** = लब्धराज्यम्, **तनूजम्** = पुत्रम्, कार्तवीर्यम्, **अतीव** = अत्यन्तमेव, **आश्लिष्य** = आलिङ्ग्य, **उदितरुदितपौरस्फारनेत्राम्बुबिन्दुप्रचुरविमलमुक्तावृष्टमार्गः** - **उदितानि**= समुत्पन्नानि, **रुदितानि**= रोदनानि येषान्ते उदितरुदिताः, ये **पौराः**= पुरवासिनः, तेषाम् **स्फारेभ्यः** = विकसितेभ्यः, **नेत्रेभ्यः** = नयनेभ्यः, **निर्गताः** = निःसृताः, **अम्बुबिन्दवः** = वाष्पकणिकाः, त एव **प्रचुराः** = समधिकाः, **विमलाः** = निर्मलाः, **मुक्ताः** = मौक्तिकानि, ताभिः **वृष्टः** = अभिषिक्तः, **मार्गः**= पन्थाः, यस्य सः, राजविरहवेदनाक्रन्दनशीलपुरवासिजनस्फीतनयननीरपृषत्करूपप्रचुरमौक्तिकाच्छादितपथः, **एषः** = कृतवीर्यः, **विश्लेषम्** = वियोगम्, **समैषीत्** = आप । अत्र रूपकानुप्रासयोः संसृष्टिः । पूर्वार्धेऽनुप्रासः, चतुर्थचरणे च रूपकमिति तयोः संसृष्टिः । मालिनीवृत्तम् । तल्लक्षणं यथा- ननमयययुतेयं मालिनी भोगिलोकैः, इति ।।९३।।

दिव्यलक्ष्मी - राजा कृतवीर्यले खुला हृदयले खुसी हुँदै आफ्ना छोरा कार्तवीर्यलाई यसरी उपदेश दिएपछि राम्ररी आलिङ्गन गरे। अर्कोतर्फ हाम्रा वृद्ध राजा अब हामीसँग विदा लिई तपस्या गर्न तपोवनतर्फ जानेछन् भन्ने कुरा थाहा पाएका नगरवासी नरनारीहरूको चर्को रुवावासी सुनियो । तिनका आँखाबाट खस्ने सेता मोतीका दानासमान आंसुका थोपाहरूको वर्षाबाट भिजेको बाटो अँगाली राजा कृतवीर्य आफ्ना छोरा कार्तवीर्यसँग विदावादी भई तपोवनतर्फ जाने निश्चयका साथ आफ्नो निवासतर्फ प्रस्थान गरे।।९३।।

जनकविधुरमायं सायमासाद्य सद्योऽ-
न्तरितजनपतत्रिस्फीतकोलाहलाढ्यम्।
नयनदलनिमीलारुद्धतारालिबालं
नृपतिवदनपद्मं सञ्चुकोचाचिरेण ।।९४।।

- एकपदानुप्रवेशेनानुप्रास-रूपकयोः सङ्करः

अन्वयः - सद्यः, अन्तरितजनपतत्रिस्फीतकोलाहलाढ्यम्, जनकविधुरमायम्, सायम्, आसाद्य, नयनदलनिमीलारुद्धतारालिबालम्, नृपतिवदनपद्मम्, अचिरेण, सञ्चुकोच।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - सद्यः = शीघ्रम्, **अन्तरितजनपतत्त्रिस्फीतकोलाहलाढ्यम् - अन्तरितानाम्**= स्वस्वगृहाभ्यन्तरं गतानाम्, जना एव पतत्रयस्तेषाम्, **जनपतत्त्रिणाम्**= जनपक्षिणाम्, **स्फीतेन** = स्फारेण, **कोलाहलेन** = कलकलेन, **आढ्यम्** = सम्पन्नम्, **जनकविधुरमायम्- जनकेन**= पित्रा, **विधुरा** = वियुक्ता, **माया** = लक्ष्मीः, यस्मिन् तत्, पितृवियुक्तः = राजलक्ष्मीमालिन्ययुतम्, **सायम्** = सायङ्कालम्, **आसाद्य** = प्राप्य, **नयनदलनिमीलारुद्धतारालिबालम् - नयनयोः** = नेत्रयोः, **दले** = प्रान्ते, इति, तयोः, नेत्रप्रान्तयोः, **निमीलया** = निमीलनेन, **रुद्धः** = अवरुद्धः, **अलिः** = भ्रमरः, स एव **बालः** = शिशुः, तारा एव अलिबालः, **तारालिबालः** = कनीनिकारूपो भ्रमरशिशुः, यस्मिन् तन्नयनदलाभ्यन्तरगतकनीनिकारूपभ्रमरशिशुसहितम्, **नृपतिवदनपद्मम्- नृपतेः** = कार्तवीर्यस्य, **वदनम्** = मुखमण्डलमेव, **पद्मम्** = कमलम्, **अचिरेण**= शीघ्रमेव, **सञ्चुकोच** = सङ्कोचं दधार। अत्र तृतीयचरणे- नयनदलनिमीलारुद्धतारालिबालमित्यत्र एकपदानुप्रवेशेनानुप्रासरूपकयोः सङ्करः । उक्तञ्च - **अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः । एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ।। स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम् । व्यवस्थितं च तेनाऽसौ त्रिरूपः परिकीर्तितः।।** (का.प्र., उ. १०, सू. २०९-२१२, श्लो. १३९-१४०)।।९४।।

दिव्यलक्ष्मी - पिता कृतवीर्यको वियोगका कारण साह्रै नरमाइलो र आहारा खोज्न गएका चराहरूद्वारा आआफ्ना गुँडमा फर्किंदा गरिने कोलाहलझैं दरबारको काम सकेर आआफ्ना घर जान लागेका कर्मचारी, आफन्त र नगरवासीको कोलाहलले भरिएको र पिता कृतवीर्यको विरहका कारण निकै नरमाइलो साँझ परेपछि पिताको शोकमा डुबेका राजा कार्तवीर्यका दुबै आँखा जोडिँदा आँखाको नानीका रूपमा रहेको बालक भमरो परेलीका रूपमा रहेका पत्रभित्र थुनिएकाले कार्तवीर्यको मुखरूप कमल छिटै सङ्कुचित भई कोपिलाको आकारमा बदलियो ।।९४।।

जनकविरहवह्निज्वालजालावलीढं
क्षितिपतिमुखपद्मन्नेत्रपद्मान्तरालात् ।
अविरलतरलाम्भोबिन्दुवृन्दं विमुञ्चद्
विधृतवहलवातन्निर्ववौ नैव चित्रम् ।।९५।।

- रूपक-विभावना-विशेषोक्तीनामङ्गाऽङ्गिभावेन सङ्करः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - जनकविरहवह्निज्वालजालावलीढम्, नेत्रपत्रान्तरालात्, अविरलतरलाम्भोबिन्दुवृन्दम्, विमुञ्चत्, क्षितिपतिमुखपद्मम्, विधृतवहलवातम्, नैव, निर्ववौ, चित्रम्।

चूडामणिः - **जनकविरहवह्निज्वालज्वालावलीढम्** - **जनकस्य** = पितुः कृतवीर्यस्य, विरहरूपः = वियोगरूपः, यः, **वह्निः** = अग्निः, तस्य **ज्वालानाम्** = कीलानाम्, जालैः = आनायैः, **अवलीढम्** = गृहीतम्, **नेत्रपद्मान्तरालात्** - **नेत्रपद्मयोः** = नयनारविन्दयोः, **अन्तरालम्** = आभ्यन्तरम्, तस्मात्, **अविरलतरलाम्भोबिन्दुवृन्दम्**- **अविरलम्** = निरन्तरम्, **तरलानाम्** = चपलानाम्, अम्भसां बिन्दव इति, तेषाम्, **अम्भोबिन्दूनाम्** = जलपृषत्कानाम्, **वृन्दम्** = यूथम्, **विमुञ्चत्** = प्रवाहयत्, **क्षितिपतिमुखपद्मम्** - **क्षितिपतेः** = कार्तवीर्यस्य, मुखमेव पद्ममिति, **मुखपद्मम्**= आननारविन्दम्, **विधृतवहलवातम्** - **विधृतः** = धृतः, **वहलः** = सघनः, **वातः** = मारुतः, येन तत्, सम्भृतघनमारुतमित्यर्थः, अपि, **नैव निर्ववौ** = श्वासोच्छ्वासं न प्रवाहयामास (वा गतिगन्धनयोरिति धातो रूपम्), **चित्रम्**= आश्चर्यम् । प्रथमचरणे विरहवह्निरित्यत्र रूपकम्, वह्निज्वालावलीढत्वेऽपि नेत्रजलप्रवाह इति विभावना । विधृतवातत्वेऽपि वातप्रवाहाभाव इति विशेषोक्तिरित्येषां सङ्करः । पुनश्चात्र विभावनारूपकेऽङ्गभूते विशेषोक्तिरङ्गिभूतेत्यङ्गाङ्गिभावसङ्करः ।।९५।।

दिव्यलक्ष्मी - पिता कृतवीर्यका विरहाग्नि ज्वालाको जालमा परी पिल्सिएको र दुई आँखाका परेलीबाट चञ्चल चञ्चल आँसुका दाना निरन्तर बगाइरहने राजा कार्तवीर्यको मुखकमल गहिरो श्वास-प्रश्वासको प्रक्रियामा संलग्न भएता पनि निष्पन्द अवस्थामा रहेको देखियो ।।९५।।

व्यवसितमिति पैत्रं निष्प्रतीकारमारा-
दवसितविषयाशं भूमिजानिर्विचिन्त्य ।
विगलितनयनाम्बुक्षालनेनानुमेने
जनकपदपयोजारण्यवासप्रयाणम् ।।९६।।

- काव्यलिङ्ग-समाधि-पर्यायोक्ति-रूपकोपमानां सन्देहसङ्करः

अन्वयः - भूमिजानिः, अवसितविषयाशम्, आरात्, निष्प्रतीकारम्, पैत्रम्, व्यवसितम्, विचिन्त्य, विगलितनयनाम्बुक्षालनेन, जनकपदपयोजारण्यवासप्रयाणम्, अनुमेने ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः – स्वप्रयाणं संश्राव्य जनके स्वालयं गते सति राजभवनं प्रति यातः, **भूमिजानिः** – **भूमिः** = पृथिवी, **जाया** = पत्नी यस्य सः, कार्तवीर्यार्जुनः, **अवसित-विषयाशम्** – **अवसिता** = समाप्ता, **विषयाशा** = विषयभोगाभिलाषः, यस्मात् तत्, भोगाशाशून्यमित्यर्थः, **आरात्** = समन्ततः, **निष्प्रतीकारम्** – **निर्गतः** = उन्मूलितः, **प्रतीकारः** = वैरनिर्यातनम्, अथवा प्रतिशोधः, येन तत्, **पैत्रम्** = पितुरिदं पैत्रम्, अर्थात् कृतवीर्यसम्बन्धि, **व्यवसितम्** = गृहत्यागकृत्यम्, **विचिन्त्य** = चिन्तयित्वा, स द्रुतहृदयोऽभूत्, तस्य नेत्रयुग्मात् नीराणि प्रवाहितानि, तदा सः, **विगलितनयनाम्बु-क्षालनेन**- **विगलितैः** = प्रवाहितैः, **नयनाम्बुभिः** = नयननीरैः, **क्षालनेन** = स्नानेन, **जनकपदपयोजारण्यवासप्रयाणम्** – **जनकपदपयोजस्य** = पितृचरणकमलस्य, **अरण्यवासप्रयाणम्** = वनवासाय प्रस्थानम्, **अनुमेने** = अनुमितवान् । अत्र पितु-र्विषयपराङ्मुखता, स्वस्य च पितृविरहहेतुनिःसृतो नयननीरप्रवाह इति हेतुद्वयेन प्रतीयमानं पितुः प्रयाणरूपं व्यङ्ग्यं चतुर्थचरणे 'जनकपदपयोजारण्यवासप्रयाणमनुमेने' इति कथनेन वाच्यतां प्राप्तमित्यत्र पर्यायोक्तिरलङ्कारः । अत्र चतुर्थचरणे पदपयोजमित्यत्र रूपकम्, 'पयोजे इव पदे' इति विग्रहे लुप्तोपमा, नयनाम्बुक्षालनकर्मणा पितुर्वनवास-रूपकार्यस्य पुष्टिरिति कार्यलिङ्गम्, दैवादागतेन नयननीरपातरूपेण वस्तुना सौकर्येण पितृप्रयाणरूपार्थबोधात् समाधिश्चेत्यत्र काव्यलिङ्ग–समाधि–पर्यायोक्ति–रूपकोपमानां सन्देहसङ्करः ।।९६।।

दिव्यलक्ष्मी – आफ्ना पिता कृतवीर्यको भोगवासनारहित भित्र एवं बाहिर दुबैतिरबाट प्रतिशोध, द्वेष आदि विकारले शून्य गृहत्याग र तपोवन प्रयाणका सम्बन्धमा बारम्बार चिन्तन गरी प्रेमका कारण आँखाबाट बगेका आँसुले नुहाएपछि राजा कार्तवीर्यले अब पिताश्री आफ्नो आवासबाट तपोवनतर्फ जान लाग्नुभयो भन्ने अनुमान गरे।।९६।।

अथ कनकतनूजो न्यस्य भार्यां तनूजे
गुरुपदमनुयास्यन् मौनमाधाय वेषम् ।
मितहितवचनेनाश्वासयन् पुत्रपौरान्
तपसि विहितकामो मन्दिरात् संप्रतस्थे ।।९७।।

– माधुर्यगुणः

अन्वयः – अथ, तपसि, विहितकामः, कनकतनूजः, भार्याम्, तनूजे, न्यस्य, गुरुपदम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुयास्यन्, मौनम्, वेषम्, आधाय, मितहितवचनेन, पुत्रपौरान्, आश्वासयन्, मन्दिरात्, संप्रतस्थे ।

चूडामणिः - अथ = तदनन्तरम्, रात्रिव्यत्ययानन्तरमित्यर्थः, **तपसि** = तपस्यायाम्, **विहितकामः** - **विहितः**= कृतः, **कामः** = अभिलाषः, येन सः, तपस्यायां कृताभिलाष इत्यर्थः, **कनकतनूजः** = कनकनामकस्य पितुः पुत्रोऽथवा कृतवीर्यः, **भार्याम्** = पत्नीम्, **तनूजे** = पुत्रे कार्तवीर्यार्जुने, **न्यस्य** = संरक्षणाय स्थापयित्वा, **गुरुपदम्** - **गुरु** = विशिष्टम्, **पदम्** = स्थानम्, अथवा पितृपरम्परासेवितं तपोवनमर्थाद् दत्तात्रेयाभिधसद्गुरुचरणारविन्दशरणम्, **अनुयास्यन्** = अनुगमिष्यन्, **मौनम्** = मुनिसमुचितम्, **वेषम्** = वेषभूषाम्, **आधाय**= धृत्वा, **मितहितवचनेन** - **मितञ्च** = परिमितञ्च, **हितञ्च** = कल्याणकारि च, **वचनम्** = वच इति, तेन कल्याणकारिसूत्रात्मकवाक्येन, **पुत्रपौरान्** = पुत्रम्, पुरवासिजनाँश्च, **आश्वासयन्**= सान्त्वयन्, **मन्दिरात्** = राजभवनात्, **सम्प्रतस्थे** = प्रस्थितवान् । अत्र करुणरसानुकूलस्य मधुरवर्णसमूहस्य संयोजनेन कविना माधुर्याख्यो गुणः प्रकाशितः । उक्तञ्च मम्मटेन - **आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् । करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।।** (का.प्र.,उ. ८,सू. ९१-९२, श्लो. ६७-६८) अत्र राज्ञो गृहत्यागकारणात् करुणो रसोऽभिव्यक्तः। इष्टनाशादनिष्टाप्तिरूपोऽयं करुणः । 'मौनं वेषमाधाय तपसि विहितकामः मन्दिरात् संप्रतस्थे' इति कथनेन विषयाभिलाषनिवृत्तचेतसः, तपःकामस्य कृतवीर्यस्यात्मप्राप्तिकामाया अन्तरङ्गायाः स्थितेश्चित्रणात् शान्तोऽपि रसः । करुणशान्तावुभावेव माधुर्यप्रतिष्ठाहेतुभूतौ । पद्येऽस्मिन् पञ्चमाक्षरयोर्नकारमकारयोः प्राचुर्यम्, अल्पवृत्तिः, मधुरा रचना, टठडढवर्णानामभावश्चेति माधुर्याख्यो गुणः । उक्तञ्च - **मूर्ध्नि वर्गान्त्यवर्णेण युक्ताष्टठडढान् विना । रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ।। अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।** (सा.द. ८/३)।।९७।।

दिव्यलक्ष्मी - त्यो रात बिताएपछि मुनिको वेष धारण गरी आफ्ना पूर्वजहरूले अँगालेको आश्रममर्यादा अनुसरण गरेर तपोवनतर्फ जान लागेका कृतवीर्यले आफ्नी धर्मपत्नीलाई छोराको जिम्मा लगाई आफ्ना छोरा एवं नगरवासीहरूलाई सङ्क्षिप्त तर कल्याणकारी वचनद्वारा आश्वस्त तुल्याउँदै आफ्नो आवासबाट तपोवनतर्फ प्रस्थान गरे ।।९७।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहमुनिरयमेत्याश्वाश्रमं स्त्रस्तवानै-
विरचिततनुवृत्तिः पर्णशालानिवासी ।
प्रणवजपनियामो भेददृष्ट्या विहीनो
यमनियमतपोभिर्यापयामास कालम् ।।९८।।

– प्रसादगुणः

अन्वयः - सहमुनिः, अयम्, आशु, आश्रमम्, एत्य, स्त्रस्तवानैः, विरचिततनुवृत्तिः, पर्णशालानिवासी, प्रणवजपनियामः, भेददृष्ट्या, विहीनः, यमनियमतपोभिः, कालम्, यापयामास ।

चूडामणिः - सहमुनिः = मुनिजनसहितः, **अयम्** = एष कृतवीर्यः, **आशु** = शीघ्रम्, **आश्रमम्** = मुनिपर्णशालाम्, **एत्य** = आगत्य, **स्त्रस्तवानैः - स्त्रस्तानि** = भूमौ पतितानि, **वानानि** = शुष्कफलानीति स्त्रस्तवानानि तैः, स्वयं पतितैः शुष्कफलैरित्यर्थः (शुष्के वानम्- इत्यमरः, वानं शुष्कफले - इति मेदिनी), **विरचिततनुवृत्तिः- तनोः** = शरीरस्य, **वृत्तिः** = व्यवहारो भोजनादिकम्, इति तनुवृत्तिः, **विरचिता** = तनुवृत्तिर्येन सः, कृतशरीरपोषण इत्यर्थः, **पर्णशालानिवासी**- निवसतीति निवासी निवासकर्ता इत्यर्थः, **पर्णशालायाः** = उटजस्य, निवासी इति **पर्णशालानिवासी** =पत्रनिर्मितकुटिरनिवासी, **प्रणवजपनियामः - प्रणवस्य** = ओङ्कारस्य, **जपः** = जाप इति प्रणवजपः, तस्मिन् **नियामः** = संयमो यस्य सः, ओङ्कारजपसंयमः, **भेददृष्ट्या विहीनः** = अभेददृष्टिसम्पन्नः, **यमनियमतपोभिः- यमाश्च** = अहिंसादयश्च, **नियमाश्च** = स्वाध्यायस्यश्च, **तपांसि** = नियमादिपरिपालन-व्रतानि चेति यमनियमतपांसि तैः, अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहैर्यमैः, शौचसन्तोष-तपःस्वाध्यायेश्वरप्रणिधानाभिधैर्नियमैः, नियमस्थितितनुसंयमकृच्छ्रसाधनादिभि-स्तपोभिश्च, (अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसन्तोषतपःस्वाध्यायेश्वर-प्रणिधानानि नियमाः - पातञ्जलयोगसूत्रम्), **कालम्** = समयम्, **यापयामास** = यापितवान् । अत्र प्रसादगुणः । उक्तञ्च - **शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः । व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।।** (का.प्र., उ. ८, सू. ९५, श्लो. ६९-७०) । सहमुनि ० इत्यादिपद्ये श्रुतिमात्रतोऽर्थबोधकशब्दानां सद्भावात् प्रसादगुणः । उक्तञ्च विश्वनाथेनाऽपि - **चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।**

Jayatu Sanskritam, Kathmandu; Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स प्रसादः समस्तेषु रसेषु रचनासु च । शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः। (सा.द. ८/७-८)।।९८।।

दिव्यलक्ष्मी - राजा कृतवीर्यले मुनिहरूको आश्रममा पुगेपछि पर्णशालामा निवास गरे। त्यसपछि रूखबाट आफै खसेका सुकेका फल खाएर आफ्नो शरीरको रक्षा गर्दै ओङ्कारको जपमा आफूलाई लगाए । भेददृष्टि नभएका ती राजाले अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य एवं अपरिग्रहजस्ता यम, शौच, सन्तोष, तपस्या, स्वाध्याय र ईश्वरप्रणिधानजस्ता नियमको पालन र तपोमय ईश्वरीय आराधनाद्वारा समययापन गरिरहेका थिए ।।९८।।

उटजविपुलसौधः शान्तिराज्ञीविहारी
शमदमसचिवाढ्यः कामकोपादिशत्रून्।
द्रुततरमभिभूय प्राप्तयोगाग्रभूमि-
र्व्यहरदतुलसौख्ये भूमिजानिः पुराणः ।।९९।।

– प्रसादगुणः

अन्वयः - उटजविपुलसौधः, शान्तिराज्ञीविहारी, शमदमसचिवाढ्यः, कामकोपादिशत्रून्, द्रुततरम्, अभिभूय, प्राप्तयोगाग्रभूमिः, पुराणः, भूमिजानिः, अतुलसौख्ये, व्यहरत् ।

चूडामणिः - उटजविपुलसौधः- उटजम् = पर्णशाला एव, **विपुलम्** = महत्, **सौधम्** = राजभवनम्, यस्य सः, राजकीयं भवनं परित्यज्य पर्णशालारूपराजभवन-निवासी, **शान्तिराज्ञीविहारी- शान्तिः** = आत्मशान्तिः, एव, **राज्ञी** = राजमहिषी, तया **विहरतीति** = केलिं करोतीति, आत्मशान्तिराजमहिषीकेलिनिरतः, **शमदम-सचिवाढ्यः** - शमश्च दमश्चेति **शमदमौ**= शमथदमथौ, शमदमाभ्यां **सचिवाभ्याम्** = अमात्याभ्याम्, **आढ्यः** = सम्पन्न इति, शमथदमथाभिधाभ्याममात्याभ्यां सह विराजमानः, **कामकोपादिशत्रून्** - कामश्च कोपश्च, **कामकोपौ** = कन्दर्पक्रोधौ, कामकोपौ आदौ येषान्ते कामकोपादयः, त एव **शत्रवः** = रिपवः, तान्, कामक्रोध-लोभमोहमदमात्सर्याभिधशात्रवानित्यर्थः, **द्रुततरम्** = अतिशीघ्रम्, **अभिभूय** = पराजित्य, **प्राप्तयोगाग्रभूमिः - योगस्य** = यमनियमासनप्राणायामप्रत्याहारध्यान-धारणासमाधिरूपस्य अष्टाङ्गयोगस्य, **अग्रभूमिः** = चरमा स्थितिः इति योगाग्रभूमिः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राप्ता = अधिकृता, योगाग्रभूमिर्येन सः, अधिकृताष्टाङ्गयोगलभ्यचरमस्थितिः, **पुराणः**- प्राचीनः अर्थात् कार्तवीर्यादग्रिमः, **भूमिजानिः** - **भूमिः** = पृथिवी, **जाया** = पत्नी यस्य सः, **भूमिजानिः** = राजा कृतवीर्यः, **अतुलसौख्ये** = अनुपमानन्दराज्ये, **व्यहरत्** = विहरति स्म । अस्मिन् पद्येऽपि पूर्ववत् श्रुतिमात्रतोऽर्थबोधकानां पदानां सद्भावात् प्रसादगुणः । रूपकालङ्कारश्च ।।९९।।

दिव्यलक्ष्मी - प्रपञ्चमय पृथिवीराज्यको सत्ता छोरालाई सुम्पिएर तपोवनमा पुगेका राजा कृतवीर्य पर्णशालारूप दरबारमा विराजमान भई शान्तिरूपी महारानीका साथ आनन्दपूर्वक विहार गर्दै शम, दम आदि मन्त्रीहरूको उपस्थितिका कारण निर्विघ्न अवस्थामा रहेको अध्यात्मराज्यमा शासन गरेर काम, क्रोध, लोभ, मोह, मद र मात्सर्यजस्ता शत्रुहरूलाई तीव्र गतिमा परास्त गरी अतुलनीय आनन्दमा रमाइरहेका थिए ।।९९।।

कृतवीर्यस्य सुशासनम् -

> **गते ताते कञ्चिद्दिवसगणमुद्विग्नहृदय-**
> **स्ततो राज्यासक्तिक्षपितपितृविश्लेषभवशुक्।**
> **स चक्रे स्वे चक्रे नवनवजनानन्दमनिशं**
> **तदात्वे चायत्यामपि सफलयोगैर्नरपतिः ।।१००।।**

– माधुर्यौजःप्रसादानां साङ्कर्यम्

अन्वयः - ताते, गते, कञ्चिद्, दिवसगणम्, उद्विग्नहृदयः, ततः, राज्यासक्तिक्षपितपितृ-विश्लेषभवशुक्, सः, नरपतिः, तदात्वे, आयत्याम्, अपि, च, सफलयोगैः, स्वे, चक्रे, अनिशम्, नवनवजनानन्दम्, चक्रे ।

चूडामणिः - **ताते** = पितरि कृतवीर्ये, **गते** = वनं प्रस्थिते, **कञ्चिद्** = कञ्चन, दिवसानां गणस्तम्, **दिवसगणम्** = दिनसमूहम्, **उद्विग्नहृदयः**- **उद्विग्नम्** = खिन्नम्, **हृदयम्**= मानसम् यस्य सः, खिन्नमानसो जात इत्यर्थः, **ततः** = तदनन्तरम्, **राज्यासक्तिक्षपितपितृविश्लेषभवशुक्** - राज्ये आसक्तिस्तया, **राज्यासक्त्या** = राष्ट्रजनतानुरागेण, **क्षपिता** = विस्मृता, **पितृविश्लेषभवा**= जनकवियोगजन्या, **शुक्**= चिन्ता, येन सः, राज्यप्रीतिविस्मृतजनकवियोगजनितशोक इत्यर्थः, **स नरपतिः** = स कार्तवीर्यार्जुनः, **स्वे** = निजे, **चक्रे** = राज्यमण्डले, **तदात्वे** = तदानीम्, **आयत्याम्**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि च = उत्तरकाले अपि च (तत्कालस्तु तदात्वे स्यादुत्तरः काल आयतिः- इत्यमरः) **सफलयोगैः - सफलैः** = सिद्धैः, **योगैः** = सामदानदण्डभेदाख्यैर्भौतिकैः प्रयोगैः, आध्यात्मिकैर्ध्यानाद्यष्टाङ्गयोगैरपि, **अनिशम्** = निरन्तरम्, **नवनवजनानन्दम्**- नवो नवः = नूतनो नूतनः, **जनानाम्** = लोकानाम्, **आनन्दः**= सौख्यम् इति नूतननूतनलोकसौख्यमित्यर्थः, **चक्रे** = चकार। अत्र प्रथमचरणे प्रसादगुणः, द्वितीयचरणे ओजोगुणः, तृतीयचरणे माधुर्यगुणः, चतुर्थचरणे च प्रसादगुण इति गुणसाङ्कर्यमनुप्रासालङ्कारश्च ।।१००।।

दिव्यलक्ष्मी - आफ्ना पूज्य पिताको तपोवन प्रस्थानपछि केही दिन उद्विग्न मानसिकतामा रहेका कार्तवीर्यले क्रमशः राज्य र जनताप्रति अनुराग बढाउँदै जाँदा आफ्ना पिताको विरहको शोक बिर्सिंदै गए। तिनले त्यस बेला र त्यसपछिको आफ्नो दीर्घशासनकालमा भौतिक कल्याणकारी उपाय र आध्यात्मिक योगद्वारा निरन्तर जनताको हित गर्दै नयाँ नयाँ आनन्द प्रदान गर्ने कार्य गरेका थिए ।।१००।।

कर्णाभ्यर्णविकृष्टसृष्टगरलज्वालाज्वलत्कुण्डलि-
व्यात्ताभीषणतुण्डतुल्यविनमत्प्रोद्दण्डकोदण्डतः ।
क्षिप्रक्षिप्तविपक्षपक्षविलसत्क्षोणीन्द्रलक्षात्रसल्-
लक्ष्यालक्ष्यविलक्षलक्षनिकरः क्षेमं दधौ क्ष्मापतिः ।।१०१।।

- ओजोगुणः

अन्वयः - कर्णाभ्यर्णविकृष्टसृष्टगरलज्वालाज्वलत्कुण्डलिव्यात्ताभीषणतुण्डतुल्यविनमत्प्रोद्दण्डकोदण्डतः, क्षिप्रक्षिप्तविपक्षपक्षविलसत्क्षोणीन्द्रलक्षात्रसल्लक्ष्यालक्ष्यविलक्षलक्षनिकरः, क्ष्मापतिः, क्षेमम्, दधौ ।

चूडामणिः - **कर्णाभ्यर्णविकृष्टसृष्टगरलज्वालाज्वलत्कुण्डलिव्यात्ताभीषणतुण्डतुल्यविनमत्प्रोद्दण्डकोदण्डतः** - **कर्णाभ्यर्णे** = कर्णान्तिके, **विकृष्टात्** = आकर्षणात्, **सृष्टाभिः** = रचिताभिः, **गरलज्वालाभिः** = विषज्वालाभिः, **ज्वलतः**= प्रज्वलतः, **कुण्डलिनः** = नागराजस्य, **व्यात्तेन** = विजृम्भितेन, **आभीषणेन** = भीतिप्रदेन, **तुण्डेन** = मुखेन, **तुल्यात्** = समानात्, **विनमतः** = नितान्तमेव नम्रात्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रोदण्डात् = प्रचण्डात्, **कोदण्डतः** = चापात्, **क्षिप्रक्षिप्तविपक्षपक्षविलसत्क्षोणीन्द्र-लक्षात्रसल्लक्ष्यालक्ष्यविलक्षलक्षनिकरः** - **क्षिप्रम्** = शीघ्रम्, **क्षिप्तायाः** =प्रहतायाः, **विपक्षपक्षाणाम्** = शत्रुपक्षस्थानाम्, विले सीदन्तीति तेषाम्, **विलसताम्** = मूषक-रूपाणाम्, क्षोण्या इन्द्रास्तेषामिति, **क्षोणीन्द्राणाम्** = पृथिवीपतीनाम्, **लक्षायाः** = लक्षसङ्ख्यायाः, **अत्रसन्तः** = निर्भीकाः, **लक्ष्याः** = कदाचिद् द्रष्टुं शक्याः, **अलक्ष्याः**= कदाचिदतिजवाद् द्रष्टुमशक्याः, **विपक्षाः** - **वीनाम्** = पक्षिणाम्, **पक्षाः** = पक्षतयः, येषु ते **विपक्षाः** = बाणाः, तेषाम् **लक्षाणाम्** = लक्षसङ्ख्यकानाम्, **निकराः** = समूहाः, यस्यासौ, **क्ष्मापतिः**= पृथिवीपतिः, चक्रावताररूपः, श्रीमान् कार्तवीर्य इत्यर्थः, **क्षेमम्** = कल्याणम्, **दधौ** = धृतवान् । चक्रावताररूपः कार्तवीर्यः कल्याणमूर्तिर्भूत्वा जनरक्षां कृतवानित्यर्थः । अस्मिन् पद्ये प्रतिपादिता रचना ओजो-गुणानुकूलेति ओजोगुणः। उक्तञ्च मम्मटेन- **दीप्त्याऽऽत्मविस्तृतेर्हेतुरोजो वीररसस्थिति । बीभत्स-रौद्ररसयोस्तस्याऽऽधिक्यं क्रमेण च।।** (का.प्र., उ. ८, सू.९३-९४, श्लो.६८-६९)। व्यञ्जकवर्णाः - उक्तञ्च विश्वनाथेन - **वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ। उपर्यधो द्वयोः वा च सरेफाष्टठडढैः सह । शकारश्च षकारश्च तस्य व्यञ्जकतां गतौ । तथा समासो बहुलो घटनौद्धत्यशालिनी** । अत्रानुप्रासालङ्कारश्च।१०१।।

दिव्यलक्ष्मी - राजा कार्तवीर्यद्वारा ताँदोलाई आफ्ना कानका नजिकै पुऱ्याएर चम्किलो, विशाल र डरलाग्दो मुखबाट विषवमन गर्ने सर्पजस्तो धनुष उचाली लाखौंको संख्यामा रहेका शत्रुहरूमाथि तीव्र गतिमा प्रहार गरिएका बाणहरू कतिबेला देखिने र कतिबेला नदेखिने हुन्थे । यसरी जनताको कल्याणका लागि वीरतापूर्वक धनु सञ्चालन गर्ने राजा कार्तवीर्यले जनताको सार्वकालिक सुख र हितका लागि कार्य सम्पन्न गर ।।१०१।।

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोरयमष्टमः समगमत् सिद्धान्तवादानुजे
काव्ये श्रीकृतवीर्यसूनुचरिते सर्गः कृतेः सत्कृतौ ।।१०२।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतिश्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्येऽर्जुनराज्याभिषेक-कृतवीर्यतपोवनगमनवर्णनमर्थालङ्कारप्रदर्शनन्नामाष्टमः सर्गः ।

इत्यष्टमः सर्गः।

अन्वयः - श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये, श्रीभवदत्तपण्डितवरः, जातः, तत्प्रिया, श्रीभार्गवी (आसीत्), तत्सूनोः, कृतेः, सत्कृतौ, सिद्धान्तवादानुजे, श्रीकृतवीर्य-सूनुचरिते, अयम्, अष्टमः, सर्गः, समगमत् ।

चूडामणिः - **श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये** - **श्रीमति** = ऐश्वर्य-सम्पन्ने, **कूर्मधराधरेन्द्रे** = कूर्माचले, **वसतिः** = निवासः, यस्य तस्मिन्, **प्रख्याते** = प्रसिद्धे, **पन्तान्वये** = पन्तवंशे, **श्रीभवदत्तपण्डितवरः** = श्रीयुतो भवदत्तनामको विद्वान्, **जातः** = उत्पन्नः, **तत्प्रिया** = तस्य अर्धाङ्गिनी, **श्रीभार्गवी**= श्रीयुता भार्गवी-नाम्नी आसीत्, **तत्सूनोः** = भार्गवीभवदत्तपुत्रस्य, **कृतेः** = सुकृतिदत्तपन्तस्य, **सत्कृतौ**= उत्तमकृतिरूपेण विराजमाने, **सिद्धान्तवादानुजे** = सिद्धान्तवादनामकग्रन्थरचनानन्तरं विरचिते, **श्रीकृतवीर्यसूनुचरिते** = कार्तवीर्योदयमहाकाव्ये, **अयम्** = एषः, **अष्टमः**= वसुसङ्ख्यासम्मितः, **सर्गः** = उल्लासः, **समगमत्** = सम्पूर्णतामगच्छत् ।।१०२।।

पार्वतीपरमेश्वरकल्पयोर्दिव्यलक्ष्मीचूडामणिढकालेतिपुण्याभिधानयोर्जननी-जनकयोः कनिष्ठसूनुना पाल्पाजनुषा ढकालोपाह्वेन प्राध्यापकपदभाजा विद्यावारिधिपदवीकेन वेणीमाधवशर्मणा प्रणीता महाकविसुकृति-दत्तविरचितश्रीकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमसर्गाश्रिता चूडामणिनाम्नी संस्कृतटीका सम्पूर्णतां गता ।

दिव्यलक्ष्मी - समृद्धि र ऐश्वर्यले परिपूर्ण कुमाउँप्रदेशमा निवास गर्ने आफ्नो विद्वत्ता एवं बुद्धिवैभवका कारण संसारमा प्रख्यात भएका पन्तहरूको वंशमा **भवदत्त पन्त**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नामक विद्वान् पैदा भए। तिनकी पतिव्रता धर्मपत्नीको नाम भार्गवी थियो । भवदत्त पन्त र भार्गवी पन्तका सुपुत्र कवि सुकृतिदत्त पन्तद्वारा सिद्धान्तवादनामक ग्रन्थको प्रणयन गरिएपछि रचिएको कार्तवीर्योदयमहाकाव्यको अष्टम सर्ग पूरा भयो ॥१०२॥

पार्वती एवं परमेश्वरसमान वन्दनीय माताश्री दिव्यलक्ष्मी एवं पिता श्रीचूडामणि ढकालका कनिष्ठपुत्र पाल्यानिवासी प्राध्यापक डा. वेणीमाधव ढकाल-द्वारा कार्तवीर्योदय महाकाव्यको सहस्त्रार्जुनको राज्याभिषेक, कृतवीर्यको तपोवनगमन र अर्थालङ्कारप्रदर्शन-शीर्षकान्वित अष्टमसर्गको दिव्यलक्ष्मीनामक नेपाली टीका पूर्ण गरियो ।

ॐ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

महाकविसुकृतिदत्तपन्तप्रणीतश्रीकार्तवीर्योदयमहाकाव्यान्तर्गताष्टमनवमसर्गद्वयाधृतः

श्रीकार्तवीर्योदयमकरन्दः

{ चूडामणिनाम्न्या संस्कृतटीकया, दिव्यलक्ष्मीरित्यभिधानया नेपालीटीकया, त्रिशक्तिसंज्ञया टिप्पण्या च समलङ्कृतष्टीकाग्रन्थः }

नवमसर्गः

मकरन्दकारः

प्रा.डा. वेणीमाधवढकालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुकृतिकीर्तिरूपा कार्तवीर्योदयनाम्नी कृतिः

श्रीकालिदासभवभूतिमुरारिमाघ-
श्रीहर्षभारविमुखाः कवयोऽधुनापि ।
तिष्ठन्ति कीर्तिवपुषेति ममैष यत्नः
तिष्ठामि कल्पममुना वपुषेह विज्ञाः ।।

- महाकविः सुकृतिः (कार्त० १७/३२)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

कार्तवीर्योदयमहाकाव्यम्

नवमसर्गः

कुण्डलीश्वरमञ्जीरमणिशिञ्जितरञ्जितम् ।
विघ्नव्यूहं गञ्जयतान्तारिणीपदपङ्कजम् ।।१।।

अन्वयः - कुण्डलीश्वरमञ्जीरमणिशिञ्जितरञ्जितम्, तारिणीपदपङ्कजम्, विघ्नव्यूहम्, गञ्जयताम् ।

चूडामणिः - **कुण्डलीश्वरमञ्जीरमणिसिञ्जितरञ्जितम्** - कुण्डलानि येषां सन्तीति कुण्डलिनः = सर्पाः, तेषाम्, **ईश्वरः** = अधीश इति **कुण्डलीश्वरः** = शेषनागः, स एव मञ्जीरः= नूपुर इति शेषनागरूपनूपुर इत्यर्थः, (पादाङ्गुष्ठं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् - इत्यमरः), तस्य **मणीनाम्** = रत्नादीनाम्, **शिञ्जितेन** = ध्वनिना (भूषणानाञ्च शिञ्जितम्, निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि- इत्यमरः), **रञ्जितम्**= निनादितम्, **तारिणीपदपङ्कजम्** - **तारिण्याः** = दशमहाविद्यास्वेकतमायाः तारायाः, पदम् एव = चरणम् एव, **पङ्कजम्** = कमलम्, इति श्रीताराचरणकमलमित्यर्थः, विघ्नव्यूहम्- **विघ्नानाम्** = अन्तरायाणाम्, **व्यूहः** = समूहः, इति विघ्नव्यूहः तम्, अन्तरायसमूहम्, **गञ्जयताम्** = नाशयताम् । अत्र मञ्जीरे कुण्डलीश्वरस्य, पदे च पङ्कजस्यारोपाद् रूपकम्। यस्याः चरणकमले स्वयं भगवाननन्तो मञ्जीररूपेण शोभते सा भगवती तारा सर्वैश्वर्यसम्पन्ना वर्तत इति तात्पर्यविद्योतनादत्रोदात्तालङ्कारः। पद्येऽस्मिन् कवेर्भगवत्यां तारायामप्रतिमो भक्तिभावो व्यज्यते ।।१।।

दिव्यलक्ष्मी - भगवान् शेषनागको मुकुटमा रहेका मणिहरूको झङ्कारबाट झङ्कृत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भगवती ताराका चरणकमलहरूले मेरा सम्पूर्ण विघ्न निरस्त गरून् ।।१।।

कार्तवीर्यसन्निधौ वैदर्भदूतागमनम् -

अथ तातनिदेशभाविताम‌वनीं साधु नृपस्य रक्षतः ।
पुरतो ददृशे विदर्भभूपतिदूतः प्रियभूतवाडवः ।।२।।

अन्वयः - अथ, तातनिदेशभाविताम्, अवनीम्, साधु, रक्षतः, नृपस्य, पुरतः, विदर्भभूपतिदूतः, प्रियभूतवाडवः, ददृशे ।

चूडामणिः - अथ = पितुर्निर्गमनान्तरम्, अथवा राज्ये योगक्षेमविधानानन्तरम्, **तातनिदेशभाविताम् - तातस्य** = कृतवीर्यस्य, **निदेशेन** = निर्देशनेन, **भाविताम्**= प्राप्ताम् (अववादस्तु निर्देशो निदेशः शासनं च सः । शिष्टिश्चाज्ञा च - इत्यमरः, लब्धं प्राप्तं विन्नं भावितमासादितञ्च भूतञ्च- इत्यमरः), **अवनीम्** = पृथिवीम् (गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही - इत्यमरः), **साधु** = शोभनम्, **रक्षतः** = पालयतः, **नृपस्य** = कार्तवीर्यस्य, **पुरतः** = अग्रे, **विदर्भपतिदूतः** - पातीति **पतिः**= स्वामी, **विदर्भस्य** = विदर्भदेशस्य पतिरिति विदर्भदेशाधीश्वरो भोजराजः, तस्य, **दूतः** = सन्देशहरः (स्यात् सन्देशहरो दूतः - इत्यमरः), **प्रियभूतवाडवः** - सन्देशहरत्वात् प्रियो भूत इति **प्रियभूतः** = प्रीतिपात्रम्, स चासौ **वाडवः** = ब्राह्मणः (द्विजात्यग्रजन्मभूदेववाडवाः- इत्यमरः) **ददृशे** = दृष्टः। अत्र वियोगिनीवृत्तम्। इतः प्रारभ्य १०५ तमपद्यपर्यन्तमेतदेव वृत्तम् । अत्र तकारदकारनकाराणां पौनःपुन्येनावर्तनादनुप्रासः ।।२।।

दिव्यलक्ष्मी - आफ्ना पिता कृतवीर्य तपोवनमा गएपछि राज्यको शासनभार जिम्मा लिएका राजा कार्तवीर्य सहस्रार्जुनले जनताको योगक्षेम मिलाएर आफ्नो पिताको आज्ञाबाट प्राप्त राज्यको राम्ररी रक्षा गरिरहेका थिए । एक दिन तिनका सामु विदर्भनरेशका दूत प्यारा ब्राह्मण आइपुगे ।।२।।

प्रणिपत्य रहोजुषस्ततो निजवाक्यश्रवणोत्कचेतसः ।
पुरतो नृपतेः स आददे वचनं सद्रचनं विनीतधीः ।।३।।

अन्वयः - ततः, विनीतधीः, सः, प्रणिपत्य, रहोजुषः, निजवाक्यश्रवणोत्कचेतसः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृपतेः, पुरतः, सद्रचनम्, वचनम्, आददे ।

चूडामणिः - ततः = नृपतिसमीपगमनान्तरम्, **विनीतधीः- विनीता**= नम्रा, **धीः**= बुद्धिः, यस्य सः, नम्रबुद्धिरित्यर्थः, **सः** = दूतरूपो ब्राह्मणः, **प्रणिपत्य** = विनम्रीभूय, रहोजुषः = एकान्तसेविनः, **निजवाक्यश्रवणोत्कचेतसः - निजस्य** = स्वस्य, वाक्यस्य = वचनस्य, **श्रवणे** = आकर्णने, **उत्कम्** = उत्कण्ठितम् (उत्क उन्मना-इत्यमरः), **चेतः** = चित्तम् यस्य तस्य, **नृपतेः** = माहिष्मतीपतेः कार्तवीर्यस्य, पुरतः = अग्रे, **सद्रचनम् - सती** = स्वरवर्णमात्रादीनां समुचितसन्निवेशेन ललिता, रचना= वाक्यरचना यस्य तत्, स्वरवर्णमात्रासमुचितसन्निवेशमधुरसङ्घटनमित्यर्थः, **वचनम्**= वचः, आददे = उच्चारयामास । अत्र वचनं सद्रचनमित्यत्रानुप्रासालङ्कारः ।।३।।

दिव्यलक्ष्मी - विनम्र बुद्धिले सम्पन्न ती विदर्भनरेशका ब्राह्मणदूतले एकान्तमा रही आफ्ना कुरा सुन्न उत्कण्ठित भएका राजा कार्तवीर्यका सामु गई नमस्कार गरेर मधुर एवं कोमल वचन उच्चारण गर्दै भने।।३।।

विदर्भदेशवर्णनम् -

जयतीह विदर्भसञ्ज्ञया प्रथितन्नाकतलं स्वलङ्कृतम् ।
विबुधैर्गुरुशिक्षितैर्भृतं विलसन्निर्जरसुन्दरीश्रितम् ।।४।।

वसुभिर्बहुभिर्विचित्रितं धृतसन्तानपरम्परागमम् ।
प्रसरद्वृषकर्मपालितं धनदाभास्वरभासुरं सदा ।।५।। (युग्मम्)

अन्वयः - इह, गुरुशिक्षितैः, विबुधैः, विलसन्निर्जरसुन्दरीश्रितम्, स्वलङ्कृतम्, विदर्भ-सञ्ज्ञया, प्रथितम्, नाकतलम्, जयति। बहुभिः, वसुभिः, विचित्रितम्, धृतसन्तानपरम्परा-गमम्, प्रसरद्वृषकर्मपालितम्, सदा, धनदाभास्वरभासुरम् (विदर्भसंज्ञया प्रथितं नाकतलं जयति)।

चूडामणिः - इह = भारतवर्षे, **गुरुशिक्षितैः - गुरुभिः** = सदाचार्यैः, **शिक्षिताः**= लब्धशिक्षाः, तैः, अथवा **गुरुणा** = बृहस्पतिना, **शिक्षिताः** = सुपाठिताः, इति तैः, विबुधैः = देवैः, (अमरा निर्जरा देवाः त्रिदशा विबुधाः सुराः - इत्यमरः), **विल-सन्निर्जरसुन्दरीश्रितम् - विलसन्तीभिः** = स्वलङ्कृताभिः, **निर्जरसुन्दरीभिः** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रमणीयाभिः, युवतिभिः, **श्रितम्** = आश्रितम्, अथवा, **विलसन्तीभिः** = सौन्दर्यसारभूताभिः, **निर्जरसुन्दरीभिः** = अप्सरोभिः, श्रितम्, **स्वलङ्कृतम्** = भौतिकभव्यतया, पारमार्थिकक्रियाकलापैः, उत्सवपर्वभिश्च विभूषितम्, **विदर्भसञ्ज्ञया** = विदर्भाभिधानेन, **प्रथितम्** = प्रसिद्धम्, **नाकतलम्** = स्वर्गतलम्, **जयति** = सर्वोत्कृष्टतया विराजते। अत्र पूर्वार्धे रूपकम्, उत्तरार्धे च श्लेषः ।

बहुभिः = अनेकैः, **वसुभिः** = देवभेदैः, **विचित्रितम्** = आश्चर्यजनकम् अथवा **बहुभिः** = असंख्यैः, **वसुभिः** = धनैः, **विचित्रितम्** = चित्रविचित्रशोभामयम्, **धृतसन्तानपरम्परागमम्** - **धृतः** = गृहीतः, सन्तानस्य परम्परा तया, **सन्तानपरम्परया** = सन्ततिपारम्पर्येण, **आगमः** = शास्त्रम्, येन तत्, अथवा **धृतः** = स्वीकृतः, वंशपरम्परया, **आगमः** = देवानाम् आगमनम् येन तत् (आगमः शास्त्र आगतौ - इति मेदिनी), **प्रसरद्वृषकर्मपालितम्** - **प्रसरता** = स्फीतिमाप्तेन, **वृषकर्मणा** = धार्मिकक्रियाकलापेन, **पालितम्** = संरक्षितम्, अथवा **प्रसरता** = व्याप्तेन, **वृषकर्मणा**= बलीवर्दाधृतकृषिकर्मणा, **पालितम्** = पोषितम् (वृषो धर्मे बलीवर्दे - इति मेदिनी), **सदा** = सर्वदा, **धनदाभास्वरभासुरम्** - **धनदेन** = कुबेरेण, **आभास्वरैश्च**= आभास्वरनामकदेवयोनिविशेषैश्च, **भासुरम्** = चमत्कृतम्, अथवा **धनद इव** = कुबेर इव, **आभास्वराः** = चमत्कृताः, श्रेष्ठिवर्यास्तैः, **भासुरम्** = विद्योतमानम्, कुण्डिनं नगरमस्तीति तत्त्वम् । अत्र श्लेषालङ्कारः ।।४-५।।

दिव्यलक्ष्मी - हे नरेश ! आफ्ना आदर्श आचार्यहरूबाट राम्ररी शिक्षा पाएका विद्वान्हरूको जमघट भइरहने, नित्यनवीन यौवन र सौन्दर्यले सुहाएका सुन्दरीहरूले खचाखच भरिएको अथवा अलङ्कृत अप्सराहरूद्वारा सुहाएको, ध्वजापताका, समृद्धि, संस्कृति र संस्कारले सम्पन्न स्वर्ग नै अहिले भारतवर्षमा विदर्भदेशका नामबाट प्रसिद्ध भई सबैको आकर्षणकेन्द्रका रूपमा रहेको छ ।

जुन देश अनेक प्रकारका धनराशि अथवा वसुसंज्ञक देवताहरू रहनाले विचित्र सौन्दर्यको धाम बनेर रहेको छ, वंशपरम्परादेखि नै जहाँ वेद आदि शास्त्रहरूको अध्ययन र अनुशीलन गरिन्छ अथवा जहाँ परम्परागतरूपमा नै नित्य देवताहरूको आगमन भइरहन्छ, जो सम्पूर्ण भूभागमा फैलिएको वैदिक सनातन धर्मद्वारा सुरक्षित छ अथवा जो देशभरि नै फैलिएको कृषिकार्यद्वारा सुरक्षित छ र जो कुबेर एवं देवयोनिमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गनिने आभास्वरहरूद्वारा प्रदत्त वैभवका कारण समृद्धिले चहकिलो देखिन्छ, अथवा जो कुबेरसमान धनी मानिसहरूको बसोबासका कारण चहकिलो छ त्यो धर्तीको स्वर्ग अहिले विदर्भनामबाट भारतवर्षमा सर्वोत्कृष्ट भएर रहेको छ ।।४-५।।

विदर्भराजधान्याः **कुण्डिननगर्या वर्णनम् -**

नगरं खलु तत्र कुण्डिनं धरणीमण्डलमण्डनायितम् ।
विजयप्रभवं महोत्सवं दधदेतन्न किलामरावती ।।६।।

अन्वयः - तत्र, धरणीमण्डलमण्डनायितम्, कुण्डिनम्, नगरम्, खलु, विजयप्रभवम्, महोत्सवम्, दधत्, एतत्, किल, अमरावती, न ? ।

चूडामणिः - तत्र = विदर्भदेशे, **धरणीमण्डलमण्डनायितम् - धरणीमण्डलस्य**= अवनीचक्रवालस्य, मण्डनमिव आचरितमिति, **मण्डनायितम्** = अलङ्कारायमाणम्, **कुण्डिनम्** = कुण्डिननामकम्, **नगरम्** = पुरम् (अस्ति), (श्रीहर्षेणापि नैषधचरिते कुण्डिनगरस्य क्षितिमण्डलमण्डनत्वं प्रत्यपादि । यथा - क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ । नै.च. ३।६४), **खलु** = निश्चयेन, **विजयप्रभवम् - विजयात्** = शत्रुजयात्, **प्रभवति** = उत्पद्यते इति, शत्रुराज्यस्वायत्तीकरणजन्यम्, **महोत्सवम्** = महत्पर्व, **दधत्** = धारयत्, **एतत्** = इदम्, **किल** = निश्चयेन, **अमरावती** = स्वर्गराजधानी, **न** = नास्ति किमु ?। यथा हि अमरावत्यां त्रिदशा नित्यं दानवान् विजित्य विजयोत्सवं कुर्वन्ति तथैव कुण्डिनपुरेऽपि शत्रून् विजित्य वीरा महोत्सवं कुर्वन्तीति भावः । समासगा वाचकलुप्तोपमा, उत्प्रेक्षा च ।।६।।

दिव्यलक्ष्मी - त्यसै विदर्भ देशमा पृथिवीमण्डलको गहनाजस्तो कुण्डिननामक नगर रहेको छ । प्रतिदिन राज्यका शत्रुहरूमाथि विजय प्राप्त गरेको उपलक्ष्यमा मनाइने विजयोत्सवको रौनकले भरिएको यो नगर के स्वर्गको राजधानी अमरावती नै होइन त ? ।।६।।

प्रियवासवतोषिताप्सरोगणप्रत्यग्रविलासमन्दिरम् ।
अमृताशनतुष्टमानसैर्गुरुसेवानिरतैर्बुधैर्युतम् ।।७।।

अन्वयः - प्रियवासवतोषिताप्सरोगणप्रत्यग्रविलासमन्दिरम्, अमृताशनतुष्टमानसैः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुरुसेवानिरतैः, बुधैः, युतम् (कुण्डिनं नगरमस्तीति शेषः)।

चूडामणिः - प्रियवासवतोषिताप्सरोगणप्रत्यग्रविलासमन्दिरम् - प्रियः = प्रीतिपूर्णः, **वासवः** = इन्द्रः, येषान्ते **प्रियवासवाः** = देवाः, तैः **तोषितस्य** = आनन्दितस्य, **अप्सरोगणस्य**= देवाङ्गनासमूहस्य, **प्रत्यग्रविलासमन्दिरम्- प्रत्यग्राणि**= नूतनानि, **विलासार्थम्** = विहारार्थम्, **मन्दिराणि** = भवनानि इति तानि, केलिभवनानि, यस्मिन् तत् अथवा **वासोः** = नारायणस्य, इमे भक्ता इति **वासवाः** = नारायणभक्ताः, **प्रियाः** = वल्लभाः, येषान्ते **प्रियवासवाः** = सज्जनाः, तैः, **तोषिताः** = सन्तोषिताः, **अप्सरसः- अद्भ्यः**= संसारसमुद्रान्तर्गतवासनारूपजलेभ्यः, **सरन्ति**= पारं गच्छन्तीति, तेषाम्, **अप्सरसाम्** = संसारसागराद्, पारं गच्छताम्, भक्तानाम्, **गणाः** = समूहाः, तेषाम्, **प्रत्यग्राणि** = नूतनानि, **विलासमन्दिराणि** = लीलाभवनानि यस्मिन् तत् (विलासो हावभेदे स्याल्लीलायामपि पुंस्ययम्- इति रामाश्रमी), **अमृताशनतुष्ट-मानसैः**- अमृतस्याशनमिति, **अमृताशनम्** = पीयूषपानम्, तेन, **तुष्टानि** = प्रसन्नानि, **मानसानि** = मनांसि येषान्तैः, अथवा **अमृताशनेन** = यज्ञशेषभोजनेन, **तुष्टानि** = सन्तुष्टानि, **मानसानि** = मनांसि, येषान्तैः, **गुरुसेवानिरतैः - गुरूणाम्** = आचार्याणाम्, **सेवा** = सेवनम्, तत्र **निरतैः** = संलग्नैः, **बुधैः** = पण्डितैः, अथवा **गुरुसेवानिरतैः**= देवगुरोर्बृहस्पतेः सत्कारप्रवणैः, **बुधैः** = देवैः, **युतम्** = सम्पन्नम्, कुण्डिनं नगरमस्ति। अत्र श्लेषालङ्कारः ।।७।।

दिव्यलक्ष्मी - जसरी अमरावती आफ्ना प्यारा इन्द्रद्वारा सन्तुष्ट र तृप्त भएका अप्सराहरूका उत्तम विलास मन्दिरले सुहाएको छ, त्यसैगरी कुण्डिन नगरी पनि समृद्धिशाली युवाहरूबाट ऐश्वर्य र भोगका साधन प्राप्त गर्ने अप्सराझैं राम्रा युवतीहरूका आकर्षक विलासभवनले सुहाएको छ । अथवा कुण्डिन नगरी भगवान्का भक्तहरूको सत्कारबाट सन्तुष्ट भएका संसारसागर तर्ने इच्छाले अध्यात्ममार्गमा लागेका परमेश्वरका भक्त र ज्ञानी पुरुषहरूको साधनाका लागि तयार गरिएका नयाँ–नयाँ आश्रमहरूले सुहाएको छ र यज्ञमा शेष रहेको प्रसाद भोजन गर्दै आचार्यहरूको सेवामा तत्पर रहने विद्वान्हरूले भरिभराउ छ । अथवा प्यारा इन्द्रद्वारा सन्तुष्ट तुल्याइएका नयाँ-नयाँ विलासभवनले सजिएका, अमृतपान गरी सन्तुष्ट भएका देवगुरु बृहस्पतिको सेवामा निरन्तर तल्लीन रहने देवताहरूको आवासभूमि अमरावतीझैं यो कुण्डिननगरी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पनि परमेश्वरभक्तका लीलाभवन र यज्ञशेष भोजन गर्ने एवं आचार्यको सेवामा रमाउने देवताजस्ता विद्वान्हरूले सुहाएको छ ।।७।।

प्रियनन्दनखेलनोत्सुकैरपि रम्भोरुतले विहारिभिः ।
हरिणीनयनातितोषितैर्विलसद्भिर्बहुनिर्जरैः श्रितम् ।।८।।

(६-८ विशेषकम्)

अन्वयः - प्रियनन्दनखेलनोत्सुकैः, रम्भोरुतले, विहारिभिः, हरिणीनयनातितोषितैः, विलसद्भिः, बहुनिर्जरैः, श्रितम्, (कुण्डिनं नगरमस्तीति शेषः)।

चूडामणिः - **प्रथमः पक्षः - प्रियनन्दनखेलनोत्सुकैः** - प्रियश्चासौ नन्दन इति प्रियनन्दनः = प्रीतिदायकपुत्रः, तस्य, **खेलने** = क्रीडायाम्, **उत्सुकैः** = कृतकौतुकैः, पुत्रक्रीडादर्शनलालसैरित्यर्थः, **रम्भोरुतले** = विस्तृते कदलीमण्डपे, **विहारिभिः** = केलिनिरतैः, **हरिणीनयनातितोषितैः** - **हरिण्याः** = मृग्याः, **नयने** = लोचने इव लोचने = नयने, यासां ताभिः, सुन्दरीभिः, **अतितोषितैः** = अत्यन्तमेव सन्तोषितैः, मृगनयनीसुन्दरीकृतसेवासन्तृप्तैरित्यर्थः, **बहु** = अत्यन्तम्, **विलसद्भिः** = शोभायमानैः, निर्जरैः = तरुणजनैः, **श्रितम्** = आश्रितम्, कुण्डिनं नगरमस्ति । अत्र पुत्रक्रीडादर्शन-लालसैरपि रम्भोरुतलेविहारिभिरित्यादौ विरोधाभासः, श्लेषश्च ।

द्वितीयः पक्ष - प्रियं चासौ नन्दनम् **प्रियनन्दनम्** = प्रीतिदायकं स्वर्गोद्यानम्, तत्र खेलने = क्रीडायाम्, **उत्सुकैः** = उत्कण्ठितैरपि, **रम्भोरुतले** = स्वर्वेश्यायाः रम्भाया जङ्घातले, **विहारिभिः** = विहरणशीलैः, **हरिणीनयनातितोषितैः** = हरिणीनाम्न्या अप्सरसो नयनक्रीडया अत्यन्तमेव सन्तर्पितैः, **विलसद्भिः** = पवित्रगुहानिवासिभिरथवा शोभामयैः, बहुनिर्जरैः= अनेकसुरैः, **श्रितम्**= आश्रितं नाकतलमिव कुण्डिनं नाम नगरमस्ति ।।८।।

दिव्यलक्ष्मी - प्यारो नन्दन उद्यानमा गई क्रीडा गर्न उत्सुक, रम्भा नामकी अप्सराको जङ्घामुनि रहेर कामकेलि गर्न रुचाउने हरिणी नामकी अप्सराको कटाक्ष पाएर अत्यन्त पुलकित भएका, उत्तम गहना र वस्त्र धारण गरी सुहाएका अनेकौं देवताहरूको आश्रयस्थलका रूपमा जसरी अमरावती रहेको छ त्यसरी नै यो कुण्डिननगरी पनि प्यारा छोराको बालक्रीडा हेर्न उत्सुक, उद्यानमा गई केराका पङ्क्तिको विस्तृत छहारीमा रमाउँदै विहार गर्न र मृगनयनी सुन्दरीहरूको सौन्दर्यबाट सन्तुष्ट बनेका गहना एवं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्त्रहरूद्वारा अलङ्कृत विलासी युवाहरूले सुहाएको छ। अथवा भगवान्का भक्तहरूको सेवा गर्ने र पवित्र गुफामा रही ईश्वरको आराधना गर्ने साधकहरूले भरिएको छ।।८।।

कुण्डिननगरीस्थितरमणीजनवर्णनम् -

कथमप्सरसोऽत्र न स्त्रियो यददोवीक्षणलालसो जनः ।
अनिमेषपदं प्रयात्यलन्नहि पश्यन्द्विभुजञ्चतुर्भुजः ।।९।।

अन्वयः - अत्र, स्त्रियः, अप्सरसः, कथम्, न, यद्, अदोवीक्षणलालसः, चतुर्भुजः, जनः, द्विभुजम्, नहि पश्यन्, अलम्, अनिमेषपदम्, प्रयाति ।

चूडामणिः - अत्र = कुण्डिननगरे, **स्त्रियः** = या नार्यो युवत्यो वा सन्ति ताः, **अप्सरसः** = देवाङ्गनाः, **कथम्** = किमु, **न** = न सन्ति ?, अर्थात् सन्त्येव, **यद्** = यस्माद्, **अदोवीक्षणलालसः**- **अमीषाम्** = कुण्डिनसुन्दरीणाम्, **वीक्षणे** = नयनगोचरीकरणे, **लालसा** = इच्छा, यस्यास्तीति सः, कुण्डिननगरीवास्तव्यसुन्दरीजनदर्शनेच्छुकः, **चतुर्भुजः** = विभावानुभावव्यभिचारिभावस्थायिभावात्मकभुजचतुष्टयाभिव्यक्तरसाप्लुतः, **जनः** = रसिकलोकः, अथवा **चतुर्भुजः** = धर्मार्थकाममोक्षाभिधान् चतुरः पुरुषार्थान्, **भुनक्ति**= अनुभवतीति चतुर्भुजः, **जनः** = ज्ञानी पुरुषः, अथवा चतुर्भुजान्वितदेवचिन्तनेनात्मानं चतुर्भुजं मन्यमानो जनः, **द्विभुजम्** = आलम्बनोद्दीपनरूपभुजद्वयात्मकं विभावम्, अथवाऽर्थकामाभिधपुरुषार्थरूपयोर्द्वयोर्भुजयोर्भोक्तारं जनम्, अथवा बाहुद्वयसहितं मानवस्वरूपम्, **नहि पश्यन्** = न विलोकयन्, अथवा तिरस्कुर्वन्, **अलम्** = पूर्णतया, **अनिमेषपदम्**= निर्निमेषावस्थामथवा देवपदम्, **प्रयाति**= गच्छति। अत्र अपह्नुतिनामालङ्कारः, तत्रत्यानां स्त्रीणां स्त्रीत्वनिवारणपूर्वकमप्सरस्त्वाधानात्।।९।।

दिव्यलक्ष्मी - वास्तवमा कुण्डिननगरीका सुन्दरीहरू अप्सरा नै हुन् । किनकि ती सुन्दरीहरूको सौन्दर्य पिउन चाहने मानिस साहित्यशास्त्रमा वर्णन गरिने विभाव र अनुभावमा मात्र सीमित नभई विभाव, अनुभाव, व्यभिचारिभाव र स्थायिभावबाट अभिव्यक्त हुने रसको अनुभूति गर्दै देवभावमा प्राप्त हुन्छ । अथवा कुण्डिननगरीका सुन्दरीहरू देवाङ्गना भएकाले तिनका आत्माको दिव्यसौन्दर्य अनुभव गर्न चाहने साधक धर्म, अर्थ, काम र मोक्षनामक पुरुषार्थहरूको सिद्धिमा तत्पर हुन्छ र त्यसले आफूलाई अर्थ र कामनामक पुरुषार्थहरूको मात्र साधनाबाट आफूलाई माथि उठाई देवभावमा परिणत गराउँछ ।।९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदमूः समवैमि नाकिनां रमणीजिष्णुरसोर्मिविभ्रमाः ।
यदमूषु रसावलम्बनं नपुनर्नाकसदां प्रियास्वहो ।।१०।।

अन्वयः - तत्, अमूः, नाकिनाम्, रमणीजिष्णुरसोर्मिविभ्रमाः, समवैमि, यद्, अमूषु, रसावलम्बनम्, न, पुनः, अहो, नाकसदाम्, प्रियासु (रसावलम्बनम्)।

चूडामणिः - **तत्** = कुण्डिनसुन्दरीणां देवसुन्दरीतुल्यत्वात् अहम्, **अमूः** = कुण्डिन-युवतीः, **नाकिनाम्** = स्वर्लोकवासिनाम् देवानाम्, **रमणीजिष्णुरसोर्मिविभ्रमाः**- **रमणीः** = रमणयोग्याः, **जिष्णुरसोर्मिविभ्रमाः** - जिष्णुश्चासौ रसः- **जिष्णुरसः** = सर्वविजयी शृङ्गाररसः, तस्य, **ऊर्मिभिः** = तरङ्गैः, **विभ्रमः** = विलासः, यासान्ताः, सर्वतोविजयिशृङ्गाररसतरङ्गविलासाः, **समवैमि** = जानामि, **यद्** = यस्माद्, **अमूषु**= कुण्डिनसुन्दरीषु, **रसावलम्बनम्**- तासां पाञ्चभौतिककलेवरमयत्वात्, **रसस्य** = शृङ्गारादिरसप्रपञ्चस्य, आस्वादस्य, मधुराम्लादिषड्रससमूहस्य, वीर्यस्य, धातुजातस्य, विशिष्टगुणसमुदायस्य, रागस्य, ब्रह्मरसस्य च **आलम्बनम्** = आधारः, भवति (रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः ।। देहधातुप्रभेदे च पारदस्वादयोः पुमान् - इति हैमः), **पुनः** = भूयः, **नाकसदाम्** = देवानाम्, **प्रियासु** = देवाङ्गनासु, **न** = नैव रसावलम्बनम्, यतो हि तासां तैजसशरीरत्वात् पार्थिवगुणवतीनां कुण्डिन-सुन्दरीणामिव तत्र न रसानुभूतिसामग्री। तस्मात् कुण्डिनसुन्दर्योऽप्सरसामपि श्रेष्ठाः । देवाङ्गनाभ्यः कुण्डिनसुन्दरीणां श्रेष्ठत्वापादनादत्र व्यतिरेकालङ्कारः ।।१०।।

दिव्यलक्ष्मी - मैले कुण्डिननगरीका सुन्दरीहरूलाई अप्सराहरूका रसमय हाव, भाव र विलासमाथि विजय प्राप्त गर्ने सौभाग्यशाली युवती हुन् भन्ने बुझेको छु । किनभने कुण्डिननगरीका सुन्दरीहरू रसका स्वस्थ आलम्बन हुन् । अथवा भूस्वर्ग कुण्डिननगरीमा रही रसको अनुभूति गर्ने सौभाग्य पाएका सुन्दरी हुन्। परन्तु स्वर्गका सुन्दरीहरूका लागि रसानुभूति गर्ने आलम्बन अथवा पृथिवीरूप ठोस आधार नहुँदा तिनले पूर्ण आनन्दानुभूति गर्ने अवसर पाउँदैनन् ।।१०।।

विहरन्त्ववलम्बनोज्झिते पथि नार्यो द्युसदां रसा न च ।
अवलम्ब्य रसान्निताान्ततो विहरन्त्योऽत्र जयन्ति योषितः ।।११।।

(९-११ त्र्यर्थद्वयम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - द्युसदाम्, नार्यः, अवलम्बनोज्झिते, पथि, विहरन्तु, (परन्तु तत्र) रसाः, न, च, अत्र, नितान्ततः, रसाम्, अवलम्ब्य, विहरन्त्यः, योषितः, जयन्ति, अथवा रसान्, (रसां वा) अवलम्ब्य, विहरन्त्यः, योषितः, जयन्ति ।

चूडामणिः - द्युसदाम् = दिविषदाम्, **नार्यः** = अप्सरसः, **अवलम्बनोज्झिते** - **अवलम्बनेन** = आधारेण, **उज्झिते** = परित्यक्ते, अर्थात् निराधारे, **पथि** = आकाशमार्गे, **विहरन्तु** = विहारं कुर्वन्तु अथवा गतागतं कुर्वन्तु, परन्तु तत्र, **रसाः** - रसशब्देन ज्ञायमानाः, शृङ्गारादयः अथवा रागादयः अथवाऽऽआस्वादाः, अथवा रसोपकरणानि अथवा धातवः, अथवा पञ्चमहाभूतप्रकृतिसम्पन्ना पृथिवी, **तत्र न च**= नैव भवितुमर्हन्ति, **अत्र** = कुण्डिननगरे, **नितान्ततः** = समग्रतया, **रसाम्** = पृथिवीम्, **अवलम्ब्य** = आधारीकृत्य, **विहरन्त्यः** = विलासं कुर्वत्यः, **योषितः** = सुन्दर्यः, **जयन्ति** =सर्वोत्कर्षेण वर्तन्ते, अथवा **रसान्** = शृङ्गारादीन्, अवलम्ब्य, विहरन्त्यः, योषितो जयन्तीत्यर्थः। अत्र व्यतिरेकाङ्कारः ।।११।।

दिव्यलक्ष्मी - आधारहीन स्वर्गीय आकाशमा देवाङ्गनाहरू विहार गरून् तर, त्यस किसिमको विहारमा रसको अनुभूतिले परिपाक पाउन सक्दैन। परन्तु पृथिवीको आधारमा रही रसानुभूति गर्दै आफ्ना प्याराहरूका साथ विहार गर्ने कुण्डिननगरीका युवतीहरू स्वर्गका सुन्दरीहरूभन्दा रमणीय र भाग्यशाली पनि छन् ।।११।।

हरिणी नयनेन निर्जिता मुखपद्मेन जितेन्दुमत्यपि ।
चरणे निहिता मदालसा गतिरासाञ्च मतिः कलावती ।।१२।।

विधुतोरुयुगैरदम्भतो लघुरम्भाकरसङ्गतिः कृता ।
कमलाकृतिचित्ररेखिका कतमा तत्तुलनाङ्गताप्सराः ।।१३।।

(युग्मम्)

अन्वयः - आसाम्, नयनेन, हरिणी, निर्जिता, मुखपद्मेन, इन्दुमती, अपि, जिता, मदालसा, चरणे, निहिता, आसाम्, मदालसा, गतिः, कलावती, मतिः, च, चरणे, निहिता । ऊरुयुगैः, रम्भा, अदम्भतः, लघु, विधुता, कमलाकृतिचित्ररेखिका, करसङ्गतिः, कृता, कतमा, अप्सराः, तत्तुलनाम्, गता ।

चूडामणिः - आसाम् = कुण्डिननगरीस्थसुन्दरीणाम्, **नयनेन** = लोचनेन, **हरिणी**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरिणीनाम्नी स्वर्वेश्या अथवा मृगी, **निर्जिता** = पराजिता, **मुखपद्मेन** = आननकमलेन, **इन्दुमती अपि** = इन्दुमती नाम्नी देवाङ्गनाऽपि पराजिता अथवा चन्द्रकलाऽपि, जिता = निर्जितेत्यर्थः, **मदालसा** = एतन्नाम्नी देवसुन्दरी, यौवनमदसालसा काचन रमणी वा, **चरणे** =पदे, **निहिता** = स्थापिता, अर्थात् सौन्दर्येणाधरीकृता, **आसाम्**= कुण्डिनसुन्दरीणाम्, **मदालसा** = मदमत्ता, **गतिः** = गमनम्, **कलावती** = शिल्पचातुर्य-सम्पन्ना, **मतिः** = बुद्धिः, च, (चरणे निहिता) पराजिता । **ऊरुयुगैः** कुण्डिनसुन्दरीणां जङ्घायुगलैः, **रम्भा** = रम्भानाम्नी स्वर्वेश्या, **अदम्भतः** = गर्वहरणात् सहजतया, लघु = क्षिप्रम्, **विधुता** = तिरस्कृता, निजस्योरुयुगलस्य क्षीणतया पराजयानुभवेन कुण्ठितेत्यर्थः । **कमलाकृतिचित्ररेखिका** - **कमलायाः** = लक्ष्म्याः, **आकृतिः** = आकारः, इव आकृतिः, यस्याः सा कमलाकृतिः, कमलाकृतिश्चासौ चित्ररेखिकेति, लक्ष्मीसमाकारा चित्ररेखानाम्नी स्वर्वेश्या, **करसङ्गतिः** = पाणितलचित्रितरेखातुल्या, कृता= विहिता, अर्थात् कुण्डिननगरीसुन्दरीगणशोभासमक्षे चित्राङ्कितकमलारूपसमाना जातेत्यर्थः, अत एव **कतमा**= का नाम, **अप्सराः** = देवाङ्गना, **तत्तुलनाम्** = कुण्डिननगरीविद्योतमानसुन्दरीगणसादृश्यम्, **गता** = प्राप्ता, अर्थान्न कापि स्वर्वेश्या तत्तुलनां न प्राप्तेत्यर्थः। व्यतिरेकालङ्कारः ।।१२-१३।।

दिव्यलक्ष्मी - कुण्डिननगरीका सुन्दरीहरूले आफ्ना सुन्दर नयनयुगलको शोभाबाट हरिणीनामकी अप्सरालाई पराजित गरेका छन्, आफ्ना मुखारविन्दबाट इन्दुमती अप्सराको अनुहारको सौन्दर्यलाई निस्तेज तुल्याएका छन्। यिनीहरूले अप्सराहरूको विलासपूर्ण गति र कलात्मक बुद्धिकौशललाई आफ्ना खुट्टाले कुल्चिदिएका छन्। तसर्थ स्वर्गका सुन्दरीहरूभन्दा कुण्डिननगरीका सुन्दरीहरू सबै पक्षबाट अगाडि रहेको कुरा प्रमाणित हुन्छ । कुण्डिननगरका सुन्दरीहरूका दुई तिघ्राको आकर्षक सुन्दरता देखेर डराएकी र हतप्रभ भएकी रम्भा अप्सरा तुरुन्त आफ्नो लाज जोगाउन काँप्दै पलायन गरेकी थिइन् । लक्ष्मीझैं देखिने चित्ररेखा नामकी अप्सरा पनि कुण्डिननगरीका सुन्दरीहरूका हातको रेखामा चित्रित भएकी लक्ष्मीजस्ती देखिइन् । चित्ररेखाजस्ती सर्वोत्तम अप्सरा त यसरी पराजित भइन् भने स्वर्गमा रहने अरू कुनै पनि अप्सराले कुण्डिननगरीका सुन्दरीहरूको बराबरी गर्न सक्दैनन् ।।१२-१३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतिकाशिशिरोरुहोत्करा मधुरा गीर्भिरनर्घ्यकाञ्चयः ।
प्रमदाः शुभमध्यवेदयो न कथन्तीर्थभुवो नु सन्तु ताः ।।१४।।

अन्वयः – अतिकाशिशिरोरुहोत्कराः, गीर्भिः, मधुराः, अनर्घ्यकाञ्चयः, शुभमध्यवेदयः, ताः, प्रमदाः, कथम्, नु, तीर्थभुवः, न, सन्तु ।

चूडामणिः – (प्रथमपक्षः) – अतिकाशिशिरोरुहोत्कराः – अत्यन्तम् = अधिकम्, एव, **काशन्ते**= प्रकाशन्ते इति अतिकाशिनः, शिरसि = मस्तके, रुहन्ति = जायन्ते, इति **शिरोरुहाः** = केशाः, तेषाम् **उत्करः**= समूहः, यासु ताः, अतिसुन्दरकेशकलाप-मण्डिताः, **गीर्भिः** = वचोभिः, **मधुराः**= अत्यन्तमेव आह्लादिकाः, **अनर्घ्यकाञ्चयः**- न विद्यते **अर्घ्यम्** = मूल्यमिति, अनर्घ्याः = बहुमूल्याः, काञ्चयः यासां ताः, बहुमूल्य-रशनान्विताः, **शुभमध्यवेदयः – शुभाः** = मङ्गलमय्यः, **मध्यवेदयः** = कटिभूमयः, **ताः** = कुण्डिननगरीवास्तव्याः, **प्रमदाः**= सुन्दर्यः, **कथं नु** = कथङ्कारम्, **तीर्थभुवः**= यौवनपरिचायकरजोभूमयः, न भवन्तु? अर्थाद् भवन्त्येव, सकलगुणग्रामालङ्कृताः सौन्दर्यशास्त्रीयलक्षणालङ्कृताश्च कुण्डिननगरनिवासिन्यो युवत्यः कामविलासेच्छा-सूचकपुष्परजसा सहिताः सन्तीति भावः ।

(द्वितीयपक्षः) – अतिकाशिशिरोरुहोत्कराः – शिरोरुहाणाम् = मस्तिष्कजन्य-विचाराणाम्, **उत्करः** = समूहः इति शिरोरुहोत्करः, काशीमतिक्रम्य विद्योतमानः मस्तिष्कजन्यः पवित्रविचारो यासान्ताः कुण्डिनगरीसुन्दर्यः, **गीर्भिः** = श्रीकृष्ण-श्रीरामेतिकीर्तनवचनैः, **मधुराः** = मधुपुरीनामकतीर्थसमानाः, **अनर्घ्यकाञ्चयः** = लोकपावनशिवविष्णुकाञ्चीरूपाः, **शुभमध्यवेदयः** = भारतस्य मङ्गलमयनाभिस्थान-वर्तिमहाकालेश्वरस्वरूपाः, **प्रमदाः** = सत्त्वगुणभूषिताः, कुण्डिननगरीवास्तव्याः सुन्दर्यः, **तीर्थभुवः** = पवित्रतीर्थभूमिरूपाः (तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च । अवतारर्षि-जुष्टाम्बुपात्रोपाध्यायमन्त्रिषु- इति मेदिनी), **कथं न भवन्तु** = भवन्त्येवेत्यर्थः ।।१४।।

दिव्यलक्ष्मी – काँसभन्दा पनि राम्रा र चिल्ला केशले सुंहाएका, मीठा वचन बोलेर सबैलाई वशमा ल्याउन सक्ने, मूल्यवान् कन्धनी लगाएका कुण्डिननगरीका सुन्दरीहरू आफ्ना सुन्दर गुणस्वभाव एवं यौवनका कारण भोगविलासको सूचना दिने रजोदर्शनका आधार किन नबनून् ? अथवा काशीमा बसी गङ्गास्नान र विश्वनाथको दर्शन गरेर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्तम विचार अँगाल्ने तपस्वी वा तपस्विनीहरूको विचारलाई आफ्नो पवित्र विचारद्वारा मन्द तुल्याउने, हरे राम हरे कृष्णजस्ता कीर्तनका बोलद्वारा मथुराजस्तै मङ्गलमय बनेका, महत्त्वपूर्ण तीर्थ शिवकाञ्ची र विष्णुकाञ्चीजस्तै आस्थाका मुहान बनेर रहेका कुण्डिननगरींका सत्त्वगुणका स्वामिनी सुन्दरीहरू तीर्थभूमि नै हुन् ॥१४॥

यदधिष्ठितसुन्दरीगणं प्रसिसृक्षुः पुरतो विशेषतः ।
शतशोऽप्सरसो विधाय तद् दृढमभ्यासमुपादधे विधिः ॥१५॥

अन्वयः - विधिः, यदधिष्ठितसुन्दरीगणम्, पुरतः, विशेषतः, प्रसिसृक्षुः, शतशः, अप्सरसः, विधाय, तद्, दृढम्, अभ्यासम्, उपादधे ।

चूडामणिः - विधिः = ब्रह्मा, यदधिष्ठितसुन्दरीगणम्- **यस्यामधिष्ठितः** = वर्तमान इति यदधिष्ठितः, **सुन्दरीणाम्** = रूपवतीनाम्, **गणः** = समूह इति तम्, कुण्डिननगरी-वर्तमानसुन्दरीसमूहम्, **पुरतः** = अग्रे, **विशेषतः** = विशेषरूपेण, **प्रसिसृक्षुः**- प्रकर्षतया स्रष्टुमिच्छतीति, उत्तमनिर्माणस्य निर्माणे इच्छुकः, **शतशः** = शताधिकाः, **अप्सरसः**= देवसुन्दरीः, **विधाय** = निर्माय, **तद्** = तस्मात्, कुण्डिनसुन्दरीस्वरूपनिर्माणात्मकम्, दृढम् = कठोरम्, **अभ्यासम्** = अनुशीलनम्, **उपादधे** = कृतवान् । विधिरप्सरोगण-निर्माणाभ्यासजन्यतीव्रतमकौशलमुपादानीकृत्याप्सरोगणविशिष्टसौन्दर्यसम्पन्नं कुण्डिन-नगरीसुन्दरीगणं रचितवानिति भावः । असम्बन्धे सम्बन्धरूपाऽतिशयोक्तिः॥१५॥

दिव्यलक्ष्मी - कुण्डिननगरीका सुन्दरीहरूको आकर्षक स्वरूपरचना गर्ने मनसाय लिएर ब्रह्माजीले सर्वप्रथम अभ्यासमूर्तिका रूपमा सैकडौं अप्सराहरूको निर्माण गरेका थिए । त्यस निर्माणक्रममा ब्रह्माजीले धेरै दिनसम्म कठोर अभ्यास गरे । अप्सराहरूको निर्माणकार्यमा अभ्यस्त भएका ब्रह्माजीले निर्माणकलामा प्रवीणता प्राप्त गरेपछि मात्र कुण्डिननगरीमा रहेका सुन्दरीहरूको निर्माण गरेका हुन् ॥१५॥

यदतीवसमुन्नतालयोपरिगा वायुचला पताकिका ।
वसुधामपहाय गाङ्गतां मुहुराह्वास्त किलामरावतीम् ॥१६॥

अन्वयः - यदतीवसमुन्नतालयोपरिगा, वायुचला, पताकिका, वसुधाम्, अपहाय, गाम्, गताम्, अमरावतीम्, मुहुः, आह्वास्त, किल ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - यदतीवसमुन्नतालयोपरिगा - यस्य = कुण्डिननगरस्य, **अतीवसमुन्नतानाम्** = अत्यन्तमेव उच्चानाम्, **आलयानाम्** = गृहाणाम्, **उपरिगा** = उपरिभागे स्थापिता, **वायुचला** = पवनचञ्चला, **पताकिका** = वैजयन्ती, **वसुधाम्**= सकलैश्वर्यसम्पन्नाम् वसुमतीम्, **अपहाय** = तिरस्कृत्य, **गाम्** = स्वर्गम् (गौः स्वर्गे च वलीवर्दे- इति मेदिनी) **गताम्**= प्राप्ताम्, **अमरावतीम्** = इन्द्रराजधानीम्, **मुहुः**= पुनःपुनः, **आह्वास्त**= आह्वयति स्म। अत्रातिशयोक्तिः । पृथ्वी सर्वैश्वर्यसम्पन्ना वर्तते, यत्र कुण्डिननगरसमानानि देवलोकादधिकरम्याणि स्थानानि सन्ति, त्वं व्यर्थमेव स्वर्गं गतासि, अत्रैवागच्छेति पताका अमरावतीं पृथिव्यामवतरणाय आह्वयतीति कवेराकूतम्। एतेन कुण्डिननगर्या रमणीयता अमरावत्या उच्चतरा वर्तत इति ज्ञायते ।।१६।।

दिव्यलक्ष्मी - कुण्डिननगरीका अग्लाअग्ला भवनहरूमाथि हावाको गतिका साथ फर्फराइरहेको राष्ट्रिय ध्वजाले पृथिवी छाडेर स्वर्गमा पुगेको अमरावती नगरीलाई स्वर्गभन्दा पृथिवी नै राम्रो भएको हुँदा तिमी पृथिवीमै फर्क भन्ने आह्वान गरिरहेजस्तो लाग्छ ।।१६।।

निशि चन्दिरचारुरोचिषा द्विगुणीभूतसुधाकरैश्च यत् ।
विहसच्छतसौधदम्भतः परिहासन्तनुते हरेः पुरः ।।१७।।

अन्वयः - निशि, चन्दिरचारुरोचिषा, द्विगुणीभूतसुधाकरैः, च, यत्, विहसच्छतसौधदम्भतः, हरेः, पुरः, परिहासम्, तनुते ।

चूडामणिः - निशि =रात्रौ, **चन्दिरचारुरोचिषा - चन्दिरस्य** = चन्द्रस्य, **चारुणा**= सुन्दरेण, **रोचिषा** = तेजसा (चन्दिरोऽनेकपे चन्द्रे - इति मेदिनी), **द्विगुणीभूतसुधाकरैः**- द्वाभ्यां **गुणीभूताः** = समेधिताः, **सुधायाः** = पीयूषस्य, **आकराः** = खनयः, येषु तैः, अथवा द्वाभ्यां **गुणीभूतानाम्** = द्विगुणसङ्ख्यायां समेधितानाम्, **सुधानाम्** = श्वेतेष्टकाचूर्णानाम्, **आकराः** = खनीभूता गेहा येषु तैः, अथवा **द्विगुणीभूतः** = द्विगुणसङ्ख्यायाम्, समेधितः, **सुधाकरः**= चन्द्रः, येषु तैः, **यत्** = कुण्डिननगरम्, **विहसच्छतसौधदम्भतः - विहसताम्** = सुधाधवलानाम्, **शतसौधानाम्** = शतसङ्ख्यकभवनानाम्, **दम्भः** = व्याजः, तस्मात्, सुधाधवलशताधिकभवनव्याजेनाथवा सुधाधवलगृहेषु शताधिकरूपेण प्रतिबिम्बितस्य चन्द्रस्य व्याजेन, **हरेः**= इन्द्रस्य,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरः = समक्षे, **परिहासम्** = उपहासम्, **तनुते** = विस्तारयति, **किल** = निश्चयेन । पूर्ववदतिशयोक्तिः ॥१७॥

दिव्यलक्ष्मी - रातको समयमा चन्द्रमाको सम्मोहक चाँदनी फैलिँदा कुण्डिननगरीका चुनले लिपिएका घरहरू अझ चम्किन्छन् र चुनको प्रकाश दुई गुणा चहकिलो बन्दछ । अथवा कुण्डिननगरीका घरहरूमा चन्द्रमाको बिम्ब टल्किनाले ती घर अनेकौं चन्द्रमाले सुहाउँदा हाँसिरहेझैं देखिन्छन् । यिनै हाँसिरहेका सैकडौं घरहरूको तीखो हाँसोको माध्यमबाट कुण्डिननगरीले इन्द्रका सामु अमरावतीनगरीका भवनहरूको उपहास गरेझैं लाग्छ ॥१७॥

यदगारगचन्द्रशालिका रचिता चन्द्रशिलाभिरुन्नता ।
निशि चन्द्रकराभिमर्शतो वहतेऽम्भोऽलघु चन्द्रशीतलम् ॥१८॥

अन्वयः - चन्द्रशिलाभिः, उन्नता, रचिता, यदगारगचन्द्रशालिका, निशि, चन्द्रकराभिमर्शतः, अलघु, चन्द्रशीतलम्, अम्भः, वहते ।

चूडामणिः - **चन्द्रशिलाभिः** = चन्द्रकान्तमणिभिः, **उन्नता** = अत्युच्चा, **रचिता**= निर्मिता, **यदगारगचन्द्रशालिका** - **यदगारेषु** = यद्गृहेषु गच्छतीति **यदगारगा** = कुण्डिननगरभवनोपरिवर्तिनी, **चन्द्रशालिका** = चन्द्रकिरणसेवनाय स्थापिता चन्द्रशाला, **निशि** = रात्रौ, **चन्द्रकराभिमर्शतः** - **चन्द्रस्य** = इन्दोः, **कराः** = किरणाः, इति चन्द्रकराः, तेषाम्, **अभिमर्शः** = स्पर्शः, तस्मात्, **अलघु** = महत्, **चन्द्रशीतलम्**= इन्दुवत् शीतगुणयुतम्, **अम्भः** = जलम्, **वहते** = धारयति । अत्रातिशयोक्तिरलङ्कारः। कुण्डिननगरीस्थितानि सौधानि चन्द्रकान्तमणिमण्डितानि सन्ति । जनानां समृद्धिसम्पन्नत्वात् कुण्डिननगरं स्वर्गसम्भवसौविध्यसम्पन्नं वर्तत इति भावः ॥१८॥

दिव्यलक्ष्मी - कुण्डिननगरीका अग्ला-अग्ला भवनहरूमाथि चन्द्रकान्तमणिका शिलाहरूबाट तयार गरिएका चन्द्रशालाहरूले रातको समयमा आफूमाथि चन्द्रमाका किरणहरू परेपछि चन्द्रमाझैं शीतल जल प्रवाहित गर्दछन् ॥१८॥

विधुकान्तशिलातिशीलितालयसाहस्रविनिर्गताम्बुभिः ।
निशि यत्र सतामवग्रहप्रभवा भीतिरुदेति नो मनाक् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - यत्र, निशि, विधुकान्तशिलातिशीलितालयसाहस्रविनिर्गताम्बुभिः, सताम्, अवग्रहप्रभवा, भीतिः, मनाक्, नो, उदेति ।

चूडामणिः - यत्र = कुण्डिनपुरे, **निशि** = रात्रौ, **विधुकान्तशिलातिशीलितालयसाहस्रविनिर्गताम्बुभिः- विधुकान्तस्य** = चन्द्रकान्तमणेः, **शिलाभिः** = उपलैः, **अतिशीतितात्** = अतिशीतलात्, **आलयसाहस्रात्**- सहस्राणां भावः **साहस्रम्** = सहस्रसङ्ख्या, **आलयानाम्** = गृहाणाम्, साहस्रात् **विर्निगतैः** = निःसृतैः, **अम्बुभिः**= जलैरिति, चन्द्रकान्तमणिपाषाणशीतलगृहसहस्रनिःसृतजलैः, हेतुभिः, **सताम्** = सज्जनानाम्, **अवग्रहप्रभवा - अवग्रहात्** = वृष्टिघातात्, **प्रभवति** = उत्पद्यते इति, वृष्टिघातजातेत्यर्थः, **भीतिः**= भीषिका, **मनाक्**= स्वल्पमपि, **नो उदेति** = न जायते। चन्द्रकान्तमणिनिर्मितगृहसाहस्रसमुत्पन्नस्थूलजलधाराभिः कुण्डिननगरे वृष्टिः शाश्वतीव विभाव्यते रात्राविति भावः । अत्रापि पूर्ववदतिशयोक्तिरलङ्कारः ॥१९॥

दिव्यलक्ष्मी - चन्द्रमा उदाएका रातको समयमा चन्द्रकान्तमणिको शिला पग्लिनाले चिसाएका कुण्डिननगरीका हजारौं घरहरूबाट शीतल जलको मूल फुटिरहने हुँदा त्यहाँ कहिल्यै पनि खडेरी पर्ला कि भन्ने डर कत्ति पनि हुँदैन ॥१९॥

शुचिमासविजृम्भिते रवेः शुचिसादृश्यविगाहितेजसि ।
शुचिना विधुकान्तवर्त्मना व्रजतां यत्र पदन्न शोचति ॥२०॥

अन्वयः- यत्र, शुचिमासविजृम्भिते, रवेः, शुचिसादृश्यविगाहितेजसि, शुचिना, विधुकान्तवर्त्मना, व्रजताम्, पदम्, न शोचति ।

चूडामणिः - यत्र = कुण्डिननगरे, **शुचिमासविजृम्भिते - शुचिमासस्य** = ज्येष्ठमासस्य अथवा आषाढमासस्य अथवा ग्रीष्मर्तोः (शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु- इत्यमरः), **विजृम्भितम्** = विस्फारितम्, इति तस्मिन्, **रवेः** = सूर्यस्य, **शुचिसादृश्यविगाहितेजसि - शुचेः** = अग्नेः, **सादृश्यम्** = तुल्यताम्, **विगाहते** = कलयति, इति तस्मिन्, **तेजसि** = रश्मिजाले, प्रकाशमाने, **शुचिना** = श्वेतवर्णेन, **विधुकान्तवर्त्मना - विधुकान्तस्य**= चन्द्रकान्तमणेः, **वर्त्म** = मार्गः, तेन, चन्द्रकान्तमणिमयमार्गेणेत्यर्थः, **व्रजताम्** = गच्छतां जनानाम्, **पदम्** = चरणम्, **न शोचति** = नैव सन्तप्तं भवति । प्रचण्डतेजो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मयग्रीष्मर्तावपि कुण्डिनपुरे चन्द्रकान्तमणिकुट्टिमयुतवर्त्मसु चरणप्रक्षेपात् पथिकानां सन्तापजन्यो बाधाभाव इत्यर्थः । अत्रातिशयोक्तिरलङ्कारः ।।२०।।

दिव्यलक्ष्मी - कुण्डिननगरीमा ग्रीष्मऋतुको आगमन भएपछि सूर्यले चारैतिर अग्निझैं ताता किरण फैलाउँदा गर्मीबाट जोगिन सेतो रङ्गका चन्द्रकान्तमणिको शिला राखी तयार गरिएका राजपथहरूबाट यातायात गर्ने बटुवाहरूको पाइतालाले कुनै किसिमको तातो बेहोर्नुपर्दैन ।।२०।।

दिननाथदृषद्विभाविते यदगारे वसतां सदान्तरे ।
दिवसे सहसा विनिर्मिता सहसा शीतकथा विनश्यति ।।२१।।

अन्वयः - दिननाथदृषद्विभाविते, यदगारे, सदा, आन्तरे, वसताम्, दिवसे, सहसा, विनिर्मिता, शीतकथा, सहसा, विनश्यति ।

चूडामणिः - **दिननाथदृषद्विभाविते - दिननाथस्य** = सूर्यस्य, **दृषदा** = उपलेन, सूर्यकान्तमणिना इत्यर्थः, **विभाविते** = निर्मिते, **यदगारे** = कुण्डिननगरीभवने, सदा = सर्वदा, **आन्तरे** = आभ्यन्तरभागे, **वसताम्** = निवसतां, जनानाम्, **दिवसे**= दिने, **सहसा** = हेमन्तर्तुना अथवा मार्गशीर्षमासेन (सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः - इति मेदिनी), **विनिर्मिता** = उत्पादिता, **शीतकथा** = शैत्यव्यथा, सहसा = अकस्मात्, **विनश्यति** = पलायते । कुण्डिननगरे गृहेषु सूर्यकान्तमणिसद्भावात् शीतप्रभवा बाधाऽपि न भवतीति भावः । अत्रापि अतिशयोक्तिरलङ्कारः ।।२१।।

दिव्यलक्ष्मी - सूर्यकान्तमणिबाट बनेका कुण्डिननगरीका घरहरूमा बस्ने मानिसहरूका मनमा दिउँसोमा पनि हेमन्तऋतुको कारणबाट पैदा हुने चिसोको डर हुँदैन।।२१।।

विदर्भदेशीयराजभवनवर्णनम् -

यदधिष्ठितराजमन्दिरं वरमभ्रंलिहमर्वतां रवेः ।
पथि विश्रमदं हरेः पदे तनुतेऽनूरुकशातिशातनम् ।।२२।।

अन्वयः - वरम्, अभ्रंलिहम्, रवेः, अर्वताम्, पथि, विश्रमदम्, यदधिष्ठितराजमन्दिरम्, हरेः, पदे, अनूरुकशातिशातनम्, तनुते ।

चूडामणिः - **वरम्**= उत्तमम्, **अभ्रंलिहम्**= गगनस्पर्शि, **रवेः**= सूर्यस्य, **अर्वताम्**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अश्वानाम्, **पथि** = मार्गे, **विश्रमदम्** = विश्रामदायकम्, **यदधिष्ठितराजमन्दिरम्** - **यस्मिन्नधिष्ठितम्** = कुण्डिननगरे वर्तमानम्, **राजमन्दिरम्** = नृपभवनम्, कुण्डिननगरस्थराजभवनमित्यर्थः, **हरेः** = विष्णोः, **पदे** = आकाशे, (वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी - इत्यमरः), **अनूरुकशातिशातनम्** - **अनूरोः** = सूर्यसारथेः (सूर्यसूतोऽरुणोऽनूरुः- इत्यमरः), **कशायाः** = अश्वताडन्याः, **अतिशातनम्** = अतिसौख्यम्, (स्यादानन्दथुरानन्दशर्मशातसुखानि च - इत्यमरः) **तनुते** = विस्तारयति, विश्रान्तानां घोटकानां ताडनाभावात् कशाया अपि सौख्यमिति भावः । अथवा **अनूरोः**= सूर्यसारथेः, **कशया** = अश्वताडन्या, विश्रान्तानामत एव सालसानाम्, घोटकानामुपरि, **अतिशातनम्** = अतिशयप्रहारेण पीडाम्, **तनुते** = विस्तारयतीति । अत्राप्यतिशयोक्तिरलङ्कारः ।।२२।।

दिव्यलक्ष्मी - कला र शृङ्गार दुबै दृष्टिबाट उत्तम आफ्नो उँचाइबाट आकाश छुने र आकाशमा यात्रा गर्ने सूर्यका सातवटा घोडाहरूलाई आकाशमार्गमा विश्राम दिने कुण्डिननगरीमा रहेको राजदरबारले सूर्यका सारथि अरुणको घोडा हाँक्ने छडीलाई केही समयका लागि विश्राम दिएर घोडाहरूलाई आनन्द प्रदान गर्दछ । अथवा सूर्यका सारथि अरुणको छडीले घोडाहरूमाथि प्रहार गरेर उनलाई असह्य पीडा प्रदान गर्दछ ।।२२।।

नृपमन्दिरनैकरत्नजैः किरणैः शक्रधनुस्ततिः कृता ।
तनुते परदेशगामिनामिह वर्षर्तुधियं सदा नृणाम् ।।२३।।

अन्वयः - इह, नृपमन्दिरनैकरत्नजैः, किरणैः, कृता, शक्रधनुस्ततिः, परदेशगामिनाम्, नृणाम्, सदा, वर्षर्तुधियम्, तनुते ।

चूडामणिः - **इह** = कुण्डिननगरे, **नृपमन्दिरनैकरत्नजैः** - **नृपमन्दिरे** = राजभवने, **नैकानि** = अनेकानि, **रत्नानि** = मणिमाणिक्यानि सन्ति, तेभ्यो जायन्ते इति नृपमन्दिरनैकरत्नजाः, तैः, **किरणैः** = रश्मिभिः, **कृता** = निर्मिता, **शक्रधनुस्ततिः**- **शक्रस्य** = इन्द्रस्य, **धनुषाम्** = चापानाम्, **ततिः** = पङ्क्तिः, इति, इन्द्रचापपङ्क्तिः, **परदेशगामिनाम्** = विदेशं जिगमिषूणाम्, **नृणाम्**= जनानाम्, **सदा** = सर्वदा, **वर्षर्तुधियम्** = वर्षाकालबुद्धिम्, **तनुते** = विस्तारयति । कुण्डिननगराकाशे सदैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शक्रधनुस्ततिं विलोक्य परदेशं गच्छन्तो जना वर्षाकाले न गन्तव्यमिति भावेन परदेशं नैव यान्तीति भावः । अत्रातिशयोक्तिरलङ्कारः ।।२३।।

दिव्यलक्ष्मी - कुण्डिननगरीको राजदरबारमा जडान गरिएका अनेक रत्नहरूबाट निस्किने रङ्गीन किरणहरूबाट तयार हुन आएको इन्द्रेणीले यहाँको राजमार्गबाट परदेश यात्रा गरिरहेका मानिसहरूका मनमा सधैं वर्षाऋतुको आभास दिलाउँछ।।२३।।

नृपमन्दिररत्नभित्तिषु प्रतियान्तः प्रतिबिम्बिता जनाः ।
प्रतिहारनिवारिता इह प्रविशन्तः प्रतिभान्ति ते पुनः ।।२४।।

अन्वयः - इह, प्रतियान्तः, नृपमन्दिरत्नभित्तिषु, प्रतिबिम्बिता, जनाः, प्रतिहारनिवारिताः, ते, पुनः, प्रविशन्तः, प्रतिभान्ति ।

चूडामणिः - इह = कुण्डिनपुरे, **प्रतियान्तः** = निर्गच्छन्तः, **नृपमन्दिररत्नभित्तिषु**- नृपस्य = राज्ञः, **मन्दिरम्** = भवनम्, तस्य **रत्नभित्तयः** = मणिमयभित्तिकाः, तासु इति राजभवनमणिमयभित्तिकासु, **प्रतिबिम्बिताः** = छायया दृश्यमानाः, **जनाः** = मानवाः, वास्तविका मनुष्या इव दृश्यन्ते, अत एव **प्रतिहारनिवारिताः** = द्वारपालनेपिद्धाः, प्रतिहारैर्न निर्गच्छन्तु इति **निवारिता** = निषिद्धाः, इव, **ते** = जनाः, **पुनः**= भूयः, **प्रविशन्तः** = राजभवनं विशन्त इव, **प्रतिभान्ति** = दृश्यन्ते । अत्रोत्प्रेक्षा, अतिशयोक्तिश्च अलङ्कारौ ।।२४।।

दिव्यलक्ष्मी - कुण्डिननगरमा राजभवनका मणि जडान गरिएका भित्ताहरूमा यताउति गरिरहेका नरनारीहरूको प्रतिबिम्ब देखिन्छ । फेरि तिनै भित्ताहरूमा मूलढोकामा बसेका पालेद्वारा बाहिर जानबाट रोकिएका र त्यसपछि फर्किएर भित्र प्रवेश गरिररहेका नरनारीहरूको दृश्य देखिन्छ ।।२४।।

नृपसुन्दरमन्दिरोदरं हरिदश्माचितमायतन्नृणाम् ।
नवशाद्वलभूमिविभ्रमं कुरुते नूतनगामिनामिह ।।२५।।

अन्वयः - इह, आयतम्, हरिदश्माचितम्, नृपसुन्दरमन्दिरोदरम्, नूतनगामिनाम्, नवशाद्वलभूमिविभ्रमम्, कुरुते ।

चूडामणिः - इह = कुण्डिननगरे, **आयतम्** = विस्तृतम्, **हरिदश्माचितम्**- हरित्=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरिद्वर्णमयः, **अश्मा** = मरकतमणिः, तेन, **आचितम्** = व्याप्तमिति मरकतमणिनिर्मितम् (गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः - इत्यमरः), **नृपसुन्दरमन्दिरोदरम्- नृपस्य** = राज्ञः, **सुन्दरम्**= रमणीयम्, **मन्दिरम्** = भवनम्, तस्य **उदरम्** = मध्यभाग इति भूपतिरमणीयराजभवनाभ्यन्तरम्, **नूतनगामिनाम्** = नवागन्तुकानाम्, **नवशाद्वलभूमिविभ्रमम् - नवैः** = नूतनैः, **शाद्वलैः** = बालतृणैरथवा शादहरितैर्युता (शाद्वलः शादहरिते - इत्यमरः), या **भूमिः** = धरा, तस्याः, **विभ्रमम्** = भ्रान्तिम्, **कुरुते** = जनयति । अर्थान्नूतनबालतृणहरितायाः पृथिव्या विभ्रमं कुरुत इति तात्पर्यम् । अत्र भ्रान्तिमान्, अतिशयोक्तिश्चालङ्कारौ ।२५।।

दिव्यलक्ष्मी - कुण्डिननगरीमा मरकतमणिद्वारा छापिंएको र चौडा आकारको राजभवनको भुइँले त्यहाँ नयाँनयाँ आएका मानिसलाई 'म हरियो चौरमा आएँ' भन्ने भ्रम पैदा गराउँछ।।२५।।

मणिकुट्टिमचारिणी वधूः प्रपदालम्बिकटीतटीपटी ।
नृपसद्मनि गूहते निजावयवेयत्त्वमिहाभिपश्यताम् ।।२६।।

अन्वयः - इह, अभिपश्यताम् (जनानां समक्षे), प्रपदालम्बिकटीतटीपटी, मणिकुट्टिमचारिणी, वधूः, निजावयवेयत्त्वम्, नृपसद्मनि, गूहते ।

चूडामणिः - इह = कुण्डिननगरे, **अभिपश्यताम्** = विलोकयतां जनानां समक्षे, **प्रपदालम्बिकटीतटीपटी- प्रपदयोः**= पादाग्रयोः, **आलम्बते** = आश्रयत इति **प्रपदालम्बिनी** = पादाग्रावलम्बिता, **कट्याः** = शरीरमध्यभागस्य, **तटी** = तटम्, इति **कटीतटी** = अवलग्नतटी, तस्याम्, या **पटी** = वस्त्रम्, यस्याः सा, पादाग्रावलम्बितकटिपर्यन्तवसनधारिणी (पादाग्रं प्रपदम्- इत्यमरः), **मणिकुट्टिमचारिणी- मणीनाम्**= रत्नानाम्, **कुट्टिमेषु** = निबद्धभूमिषु, **चरति** = गच्छति इति, रत्ननिबद्धभूतलसञ्चारिणीति तात्पर्यम् (कुट्टिमोऽस्त्री निबद्धा भूः - इति रामाश्रमी), **वधूः** = सीमन्तिनी (नारी सीमन्तिनी वधूः- इत्यमरः), **निजावयवेयत्त्वम्- निजानाम्** = स्वीयानाम्, **अवयवानाम्** = अङ्गानाम्, **इयत्त्वम्** = इयत्ताम्, अर्थाद् यादृक् स्वरूपं तत्, (अङ्गं प्रतीकोऽवयवोऽपघनः- इत्यमरः), **नृपसद्मनि** = राजभवने, **गूहते** = संवृणोति, अन्तर्भावयत्यथवा गोपायति । तस्मात् कुण्डिननगरी सकलसमृद्धिसारभूता वर्तत इत्यर्थः । अत्रातिशयोक्तिरलङ्कारः ।।२६।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - कम्मरदेखि कुर्कुच्चासम्म लत्रिएका वस्त्रले सुहाएकी कुलवधूले राजभवनको बीचमा मणिहरू जडान गरी तयार गरिएको भुइँमा हिँडिरहँदा मानिसहरूको देखादेखी आफ्ना सजिएका अङ्ग-प्रत्यङ्गको सम्पूर्ण सौन्दर्यलाई राजभवनभित्र लुकाउँछिन्। अर्थात् मणिमाणिक्यले बनेको राजभवनको भुइँमा तिनका समग्र अङ्ग-प्रत्यङ्ग प्रतिबिम्बित हुन्छन् ।।२६।।

स्फटिकाश्मतलेषु योषितां पदपद्मं प्रतिबिम्बितं क्षणात् ।
इह नाभसपद्मपक्षकानुमितेः पक्षपदे नृपालये ।।२७।।

अन्वयः - इह, नाभसपद्मपक्षकानुमितेः, पक्षपदे, नृपालये, स्फटिकाश्मतलेषु, योषिताम्, पदपद्मम्, क्षणात्, प्रतिबिम्बितम्, (भवति) ।

चूडामणिः - **इह** = कुण्डिनपुरे, **नाभसपद्मपक्षकानुमितेः**- नभसि भवमिति **नाभसम्**= आकाशजम्, **पद्मम्** = कमलमिति नाभसपद्मम्, तस्य **पक्षका** = आश्रयिणी, **अनुमितिः**= अनुमानम्, इति नाभसपद्मपक्षकानुमितिः, **तस्याः**= आकाशजपद्माश्रयकानुमानस्य, **पक्षपदे**= पक्षस्थाने, **नृपालये** = राजभवने, **स्फटिकाश्मतलेषु- स्फटिकैः** = सूर्यकान्तचन्द्रकान्त-जलकान्तहंसगर्भेतिभेदचतुष्टययुतैः, **अश्मभिः** = उपलैः, निबद्धानि **तलानि** = कुट्टिमानि, इति स्फटिकाश्मतलानि, तेषु, एकादशतमरत्नरूपेण स्फटिकेन निबद्धेषु कुट्टिमेषु, (रत्न-मेकादशं प्रोक्तं सर्वैः स्फटिकसंज्ञकम्- पं. फणीन्द्रपाण्डेयः, संस्कृतनेपालीबृहच्छब्दकोशः), गतागतं कुर्वतीनाम्, **योषिताम्** = सीमन्तिनीनाम् (स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः- इत्यमरः), **पदपद्मम्** = चरणकमलम्, **क्षणात्** = अचिरेण, **प्रतिबिम्बितम्** = प्रतिरूपितं भवति । अत्रानुमानालङ्कारः ।।२७।।

त्रिशक्तिः - अर्थान्नृपालय आकाशपद्मवान्, स्फटिकाश्मतलेषु योषित्पदपद्मप्रतिबिम्ब-नादित्यनुमानवाक्ये नृपालय आकाशकमलाश्रयत्वेन पक्षसंज्ञां प्राप्नोति। पक्षरूपस्य गगन-स्पर्शिनो राजभवनस्य स्फाटिककुट्टिमेषु पर्वते वह्निरिव योषिच्चरणरूपं कमलं नयनगोचरी-भवति । अतो नृपालये योषिच्चरणकमलस्याश्रयताऽथवा पक्षधर्मता वर्तते । एतावदनुमान-शैलीमाश्रित्य कृतेन राजभवनवर्णनेन तस्य विलक्षणं सौन्दर्यं व्यज्यते। यद्यपि आकाशकमलं न भवति तथापि कविना स्वबुद्ध्या आकाशकमलस्योद्भावना कृता । इयमेवोद्भावना चमत्कारजननी वर्तते । एतच्च कवेर्वैशिष्ट्यम् ।

दिव्यलक्ष्मी - कुण्डिननगरीमा 'आकाशमा कमल फुल्छ' भन्ने अनुमानको पक्षका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपमा रहेको राजभवनका स्फटिकमणि जडिएका चिल्ला, सुन्दर र पारदर्शी भुइँमा आई–जाई गर्ने सुन्दरीहरूका चरणरूप कमल प्रतिबिम्बित हुँदा आकाशमा कमल फुल्छ भन्ने अनुमान यथार्थ सावित हुन्छ । त्यहाँका सुन्दरीहरूका कोमल र रक्तिम आभाले टल्किने पाउहरू कमलजस्ता छन् र त्यो भुइँ आकाशजस्तो निर्मल र पारदर्शी छ । निर्मल एवं पारदर्शी भुइँनै आकाशका रूपमा देखिएको हुँदा त्यसमा परेको सुन्दरीको चरण कमलको रूपमा रहेको छ ।।२७।।

त्रिशक्ति – 'वस्तुत जहाँ जहाँ धुवाँ हुन्छ, त्यहाँ त्यहाँ आगो हुन्छ भन्ने व्याप्तिको प्रकृतिअनुसार पर्वतमा धुवाँ देखिँदा त्यहाँ आगो रहेको अनुमान गरिन्छ र '**पर्वतो वह्निमान् धूमात्**' भन्ने वाक्य प्रयोग गरिन्छ । उक्त अनुमानवाक्यमा पर्वत पक्ष भएझैं अथवा पर्वतमा पक्षधर्मता रहेझैं कुण्डिननगरीको राजभवनका चिल्ला भुइँहरूमा सुन्दरीहरूको चरणकमल प्रतिबिम्बित हुनाले त्यो राजभवन आकाशकमलको आश्रय अर्थात् आकाशकमलवान् कहलाउँछ । कमलरूप हेतुका कारण राजभवन अनुमान-वाक्यको पक्ष बन्दछ ।' यस अनुमानशैलीबाट कविद्वारा गरिएको सौन्दर्य निरूपणले राजभवनको विचित्र समृद्धि र सौन्दर्य प्रकट गर्दछ ।

नृपगेहसुवर्णश्रृङ्गभा मणिभासा द्युमणिं पुरःप्रभम् ।
अपि तक्षसुशाततेजसं तनुतेऽभ्यासगताविहान्वहम् ।।२८।।

अन्वयः – इह, अन्वहम्, नृपगेहसुवर्णश्रृङ्गभा, मणिभासा, पुरःप्रभम्, द्युमणिं, अभ्यासगतौ, तक्षसुशाततेजसम्, तनुते, ननु ।

चूडामणिः – इह = कुण्डिनपुरे, **अन्वहम्** = प्रतिदिनम्, **नृपगेहसुवर्णश्रृङ्गभा** - **नृपगेहस्य**= राजभवनस्य, यत्, **सुवर्णश्रृङ्गम्** = हेममयशिखरम्, तस्य **भा** = कान्तिः, इति राजभवनसुवर्णशिखरकान्तिः, **मणिभासा** = रत्नहीरककान्त्या, **पुरःप्रभम्** = अग्रगामिद्युतिम्, **द्युमणिम्** = सूर्यम्, **अभ्यासगतौ** = पार्श्वगमने, **तक्षसुशाततेजसम्**- **तक्ष्णा**= शिल्पकारेण, **सुशातम्** = उल्लीढम्, **तेजः** = वर्चो यस्येति तम्, शाणोल्लीढ-तेजसम्, **तनुते** = जनयति । अत्रोत्प्रेक्षालङ्कारः ।।२८।।

दिव्यलक्ष्मी – सुवर्णमय गजुरको सौन्दर्यका साथ प्रकाशित हुने राजभवनको मणिमय प्रभाले पूर्वदिशाबाट आफूसामु आउँदै गरेका सूर्यलाई दिनदिनै अभ्यासका क्रममा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घर्षण गर्नाले 'उध्याउने ढुङ्गाले हँसिया, बञ्चरा चम्काए' झ अझ तेजिलो तुल्याउँछ।।२८।।

नृपपस्त्यहिरण्यशृङ्गभा मणिवज्रप्रभयातिभासुरा ।
इह भासयतः परस्परन्तरुणार्कस्य विभापि सन्निधौ ।।२९।।

अन्वयः - इह, मणिवज्रप्रभया, अतिभासुरा, नृपपस्त्यहिरण्यशृङ्गभा, तरुणार्कस्य, विभा, अपि, सन्निधौ, परस्परम्, भासयतः ।

चूडामणिः - **इह** = कुण्डिनपुरे, **मणिवज्रप्रभया** - **मणीनाम्** = रत्नानाम्, **वज्रस्य**= हीरकस्य च, **प्रभा**= कान्तिरिति तया, रत्नहीरककान्त्या, **अतिभासुरा**= समधिक-चमत्कृता, **नृपपस्त्यहिरण्यशृङ्गभा**- **नृपस्य**= राज्ञः, **पस्त्यम्** = भवनमिति, नृपपस्त्यम्, तस्य यद् **हिरण्यमयं शृङ्गम्** = सुवर्णमयं कूटम्, तस्य **भा** = आभा, इति राजगेह-सौवर्णशिखरकान्तिः (कुलोदवसितं पस्त्यम्- इति वाचस्पतिः), **तरुणार्कस्य** = मध्याह्नसूर्यस्य, **विभा** = कान्तिः, **अपि**= च, **सन्निधौ**= समक्षे, **परस्परम्** = मिथः, **भासयतः** = प्रकाशयतः। अत्र गम्या उपमेयोपमा ।।२९।।

दिव्यलक्ष्मी - कुण्डिननगरीका राजभवनमा जडिएका मणि र हीराको कान्तिबाट अत्यन्त चहकिलो देखिने राजभवनको सुनैसुनले बनेको गजुरको कान्ति र मध्याह्नका सूर्यको कान्ति दुबैले एकअर्काको नजिकमा रहेर एकले अर्कालाई प्रकाशित गर्दछन्।।२९।।

मदमत्तमतङ्गजावलीचलकर्णाञ्चलतालवृन्तकैः ।
इह राजगृहं गृहावलीप्रभुभूतं परितः प्रवीज्यते ।।३०।।

अन्वयः - इह, मदमत्तमतङ्गजावलीचलकर्णाञ्चलतालवृन्तकैः, गृहावलीप्रभुभूतम्, राजगृहम्, परितः, प्रवीज्यते ।

चूडामणिः - **इह** = कुण्डिनपुरे, **मदमत्तमतङ्गजावलीचलकर्णाञ्चलतालवृन्तकैः**- **मदैः**= यौवनजन्याभिः, मदधाराभिः, **मत्तानाम्**= उन्मत्तानाम्, **मतङ्गजानाम्**= गजानाम्, **आवली** = पङ्क्तिरिति मदमत्तमतङ्गजावली, तस्याः, **चलानि**= चञ्चलानि, **कर्णाञ्चलानि**= श्रोत्रप्रान्तानि, एव **तालवृन्तानि** = व्यजनानि (व्यजनं तालवृन्तकम् - इत्यमरः), तैः, उन्मत्तगजपङ्क्तिचञ्चलश्रोत्राञ्चलरूपव्यजनैः, **गृहावलीप्रभुभूतम्** - **गृहाणाम्**= भवनानाम्, **आवली** = पङ्क्तिरिति गृहावली, तस्याः **प्रभुभूतम्** = अधीशम्, कुण्डिन-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नगरस्थसदनपङ्क्तिस्वामिभूतमित्यर्थः, राजगृहम् = राजभवनम्, **परितः** = समन्तात्, **प्रवीज्यते** = व्यजनविषयीक्रियते । अत्र परिणामः समासोक्तिश्चालङ्कारौ ।।३०।।

दिव्यलक्ष्मी - कुण्डिननगरीका सम्पूर्ण भवनहरूको स्वामी बनेर चम्किएको राजभवनलाई मदमत्त हात्तीहरूका चञ्चल र नाङ्लाजस्ता देखिने कानहरूले पङ्खा बनेर चारैतिरबाट हम्किरहेझैं देखिन्छ।।३०।।

अतिबन्धुरसिन्धुरक्षरन्मधुलुब्धभ्रमरोद्धुरारवैः ।
इह भूपतिमन्दिराजिरं विरमद्गीति कदापि नेक्ष्यते ।।३१।।

अन्वयः - इह, अतिबन्धुरसिन्धुरक्षरन्मधुलुब्धभ्रमरोद्धुरारवैः, भूपतिमन्दिराजिरम्, कदापि, विरमद्गीति, न, ईक्ष्यते ।

चूडामणिः - इह = कुण्डिननगरे, **अतिबन्धुरसिन्धुरक्षरन्मधुलुब्धभ्रमरोद्धुरारवैः**- **अतिबन्धुराणाम्** = अतिमत्तानाम्, **सिन्धुराणाम्** = गजानाम्, **क्षरत्सु** = पतत्सु, **मधुषु**= मदरसेषु, **लुब्धानाम्** = अभिलाषुकाणाम्, **भ्रमराणाम्** = अलीनाम्, **उद्धुरैः** = अतितीव्रैः, **आरवैः** = नादैः, **भूपतिमन्दिराजिरम्**- **भूपतेः** = राज्ञः, **मन्दिरस्य** = भवनस्य, **अजिरम्** = चत्वरं प्राङ्गणं वा (अङ्गनं चत्वराजिरे - इत्यमरः), **कदापि**= कस्मिन्नपि समये, **विरमद्गीति** - विरमते इति **विरमन्ती** = विश्रामं कुर्वती, **गीतिः** = गानम्, यस्मिन् तत्, गीतिविश्रान्तियुतम्, (गै गाने क्तिन्, तवास्मि गीतिरागेण हारिणा प्रसभं हृतः - इति शाकुन्तले प्रयोगः), **न** = नैव, **ईक्ष्यते** = विलोक्यते । तद् राजभवनं सर्वदैव गीतिगुञ्जनमुखरितं विभातीत्यर्थः। अत्र अतिशयोक्तिरलङ्कारः ।।३१।।

दिव्यलक्ष्मी - मदले मातिएका हात्तीहरूको गालाबाट बग्ने मदरसलाई पिउन लोभिएका भमराहरूको चर्को गुञ्जन चलिरहने हुँदा कुण्डिननगरीको सुन्दर राजभवन सधैं सङ्गीतनादमा डुबिरहेझैं लाग्दछ ।।३१।।

इह सञ्चितशालभञ्जिका प्रविशच्चित्तविषादगञ्जिका ।
नरनाथमनोऽनुरञ्जिका समितिः शिल्पपदार्थपञ्जिका ।।३२।।

अन्वयः - इह, सञ्चितशालभञ्जिका, प्रविशच्चित्तविषादगञ्जिका, नरनाथमनोऽनुरञ्जिका,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिल्पपदार्थपञ्जिका, समितिः (अस्ति)।

चूडामणिः - **इह** - कुण्डिननगरीराजभवने, **सञ्चितशालभञ्जिका** - **शालेन** = सर्जुकाष्ठेन, **भञ्ज्यते** = निर्मीयते, इति **शालभञ्जिका** = दीपधानी, **सञ्चिता** = एकत्रीकृताः, अथवा कलात्मकरूपेण स्थापिता, शालभञ्जिका यस्यां सा, गेहशृङ्गस्थ-शोभामयदीपधानीसमूहमनोरमा, **शालभञ्जिकाः** = दन्तादिरचिताः, स्तम्भादिषु विनिर्मिताः पुत्रिका यस्यां सा, अथवा सज्जिता इति पाठे, **सज्जिताः** = सज्जां विधाय स्थापिताः, शालभञ्जिकाः= स्तम्भेषु विनिर्मिताः पुत्रिकाः, यस्यां सा, **प्रविशच्चित्तविषादगञ्जिका**- **प्रविशताम्**= प्रवेशं कुर्वतां जनानाम्, **चित्तविषादस्य** - **चित्त** = मानसे, यः, विषादः = चिन्ता, तस्य, **गञ्जिका** = विनाशिनी, **नरनाथमनोऽनुरञ्जिका**- **नरनाथानाम्**= भूपतीनाम्, **मनसाम्** = चेतसाम्, **अनुरञ्जिका** = आनन्ददायिका, **शिल्पपदार्थपञ्जिका**- **शिल्पपदार्थानाम्** = कलाकौशलव्यञ्जकवस्तूनाम्, **पच्यन्ते** = व्यक्तीक्रियन्ते पदार्था अनयेति पञ्चिका, पृषोदरादित्वाज्जत्वे **पञ्जिका** = प्रकाशिका, पञ्जिका- आयव्यय-लिखनार्थेति मुकुटमतम्, (पिञ्जयतेऽर्थोऽस्यामिति पञ्जिका, गुरोश्च इति सूत्रेण 'अः', पृषोदरादित्वादिकारस्याऽकारः- इति रामाश्रमो), **समितिः** = राजसभा अस्ति । अत्रानु-प्रासालङ्कारः ।।३२।।

दिव्यलक्ष्मी - कुण्डिननगरीमा सालको काठबाट तयार गरिएका दीपदानीले सुहाएको अथवा कठपुतलीले भरिभराउ रहेको, आउने मानिसहरूका मनको ताप मेटाउने, राजामहाराजाहरूलाई मनोरञ्जन प्रदान गर्ने र सम्पूर्ण शिल्पकलाको कौशल व्यक्त गर्ने सुन्दर पदार्थहरूद्वारा सजिएको महिमामय राजसभा रहेको छ ।।३२।।

पयसि भ्रममश्नुते यतो मणिभाभासिनि धार्त्तराष्ट्रधीः ।
विदुरोक्तिरदूरगामिनी शुभगाङ्गेयविभावनापि यत् ।।३३।।

गुणचित्रकथासमाश्रिता विजयेनार्जितभूरिवैभवा ।
इह धर्मसभा कथन्न सा धृतनासत्यभवोदया मुहुः ।।३४।।

(युग्मम्)

अन्वयः - यतः, धार्त्तराष्ट्रधीः, मणिभाभासिनि, पयसि, भ्रमम्, अश्नुते, (यत्र),

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदुरोक्तिः, अदूरगामिनी, यत्, शुभगाङ्गेयविभावना, अपि, गुणचित्रकथासमाश्रिता, विजयेन, अर्जितभूरिवैभवा, मुहुः, धृतनासत्यभवोदया, सा, कथम्, धर्मसभा, न।

चूडामणिः - (कुण्डिनराजसभापक्षः) - यतः = यस्या राजसभायाः सौन्दर्यं विलोक्य, **धार्त्तराष्ट्रधीः- धार्तराष्ट्रस्य** = कृष्णचञ्चुचरणहंसस्य, **धीः** = बुद्धिः, (राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः, मलिनैर्मल्लिकाख्यास्ते धार्तराष्ट्राः सितेतरैः-इत्यमरः), **मणिभाभासिनि** = रत्नकान्तिचमत्कृते धवले, **पयसि** = जले, **भ्रमम्**= दुग्धभ्रान्तिम्, **अश्नुते** = अनुभवति, यत्र, **विदुरोक्तिः** = विदुरनीतिः, **अदूरगामिनी**= समीपस्था वर्तत अर्थाद् विदुरनीतिवाक्यानि सर्वे पालयन्ति, **यत्** = यत्र, **शुभगाङ्गेय-विभावना - शुभानाम्** = मङ्गलदायकानाम्, **गङ्गायाः** = भागीरथ्याः, पुत्रा इति गाङ्गेयाः, तेषाम्, वसूनाम्, **भावना**= माङ्गलिको विचारः, वर्तते, **अपि** = च, **गुणचित्र-कथासमाश्रिता** = गुणवतोनां चित्रकथानामाश्रयेण या सद्भावं विस्तारयति, **विजयेन**= शत्रुजयेन, **अर्जितभूरिवैभवा** = प्राप्तैश्वर्या, **मुहुः** = पुनः, **धृतनासत्यभवोदयाधृतः**= कलितः, **नासत्येन** = सत्येन, **भवः** = जातः, **उदयः**= उन्नतिः, यया सा, कुण्डिराज-भवनसभा, **कथम्** = कथङ्कारम्, **धर्मसभा** = युधिष्ठिरराजसभा, **न** = नभवति अर्थाद् भवत्येव। अत्र श्लेषालङ्कारः ।

(युधिष्ठिरराजसभापक्षः) - यतः = यस्याः सभायाः, स्वरूपं विलोक्य, **धार्त्तराष्ट्रधीः**= दुर्योधनबुद्धिः, **मणिभाभासिनि** = युद्धिष्ठिरराजभवनसञ्चितमणिमाणिक्यकान्तिप्रतिबिम्बिते, **पयसि** = जले, **भ्रमम्** = स्थलभ्रान्तिम्, **अश्नुते** = अनुभवति, यत्र, **विदुरोक्तिः** = महाभारतोत्तमपात्रस्य विदुरस्योपदेशः अथवा राजनीतिः, **अदूरगामिनी** = सर्वसुलभा भवति, **यत्**= यस्याम्, **शुभगाङ्गेयविभावना- शुभस्य** = लोकमङ्गलकारिणः **गाङ्गेयस्य**= भीष्मपितामहस्य, **विभावना** = जगन्मङ्गलभावना प्रकाशिता भवति, **अपि** = पुनः, **गुणचित्रकथासमाश्रिता- गुणैः** = दयादाक्षिण्यादिभिः, **चित्रासु** = विलक्षणासु, **कथासु**= उक्तिप्रत्युक्तिषु, **समाश्रिता** = आधारिता, **विजयेन** = अर्जुनेन, **अर्जितभूरिवैभवा** = लब्धैरैश्वर्यैः समृद्धा, **मुहुः** = पुनः, **धृतनासत्यभवोदया** = कलितनकुलसहदेवकल्याण-कथोदया, सा **धर्मसभा** = युधिष्ठिरराजसभा, **इह** = कुण्डिनगरे, **कथम्** = कथङ्कारम्, **न** = न विद्यते, अर्थाद् विद्यते । यतो हि कुण्डिननगरीराजसभा युधिष्ठिरराजसभासमाना वर्तत इति भावः ।।३३-३४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - जसको दृश्यावलोकन गर्दा दुर्योधनलाई मणिको कान्ति फैलिएका कारण रङ्गीन देखिने पानीमा जमिनको भ्रान्ति भएको थियो, जहाँ नीतिशास्त्रका ज्ञाता विदुरका तत्काल फल दिने उक्तिहरू फैलिने गर्दथे, जहाँ भीष्मपितामहका मङ्गलमय विचार प्रसारित हुन्थे, जहाँ दया, उदारता र जगत्कल्याणजस्ता विषयमा आधारित गम्भीर संवाद चलिररहेका हुन्थे, जहाँ अर्जुनले विश्वविजय गरी सङ्ग्रह गरेको अपूर्व वैभव सुहाएको थियो, जहाँ माद्रीनन्दन नकुल एवं सहदेवका मङ्गलमय लीलाकथा चर्चाका विषय बन्दथे त्यो युधिष्ठिर महाराजको धर्मसभा नै कुण्डिन नगरीको राजसभाका रूपमा परिणत भएझैं लाग्छ । किनकि, कुण्डिननगरीको राजसभाबाट हेर्दा यहाँको मणिमय राजभवनको उज्ज्वल कान्ति प्रतिबिम्बित हुनाले नजिकै रहेको पानी पनि मणिकान्तिका कारण उज्ज्वल देखिन्छ र हाँसको बुद्धिले त्यसैलाई दूध देख्ने गर्दछ। यहाँ तत्काल फल प्रदान गर्ने विदुरनीतिका महत्त्वपूर्ण नीतिपद्य घन्किरहेका छन् । यहाँ मङ्गलकर्मद्वारा धन प्राप्त गर्ने विचारविमर्श चलिरहन्छ। यहाँ पाण्डववीर एवं श्रीकृष्णका दया, धर्म आदि गुणले भरिएका पुरुषार्थका कथाहरू सुन्न पाइन्छ। यहाँ राजाहरूले शत्रुमाथि विजय गरी प्राप्त गरेको अकूत ऐश्वर्य रहेको छ । यहाँ बारम्बार असत्यको प्रतिकूल सत्यको उदयका गम्भीर ज्ञानकथा नित्य चलिरहन्छन्। यी सबै विशेषताका कारण कुण्डिननगरीको राजसभालाई युधिष्ठिरको धर्मसभा नै हो भन्न सकिन्छ ।।३३-३४।।

विदर्भभूपतेर्भोजस्य वर्णनम् -

क्रथकैशिकवंशमौक्तिकं गुणविश्रामललामधाम सः ।
इह भोज इति प्रथाङ्गतो धरणीजानिरलं विराजते ।।३५।।

अन्वयः - इह, क्रथकैशिकवंशमौक्तिकम्, गुणविश्रामललामधाम, भोज, इति, प्रथाम्, गतः, सः, धरणीजानिः, अलम्, विराजते ।

चूडामणिः - **इह** = कुण्डिनपुरे, **क्रथकैशिकवंशमौक्तिकम्** - क्रथकैशिकाभिधो यो **वंशः** = कुलम्, तस्य, **मौक्तिकम्** = मुक्तामणिः, **गुणविश्रामललामधाम** - **गुणानाम्** = दयादाक्षिण्यशौर्यपुरुषार्थादीनाम्, **विश्रामस्य** = विश्रान्तेः, **ललाम** = भूषणम्, तस्य **धाम** = परमाश्रयः, **भोज इति** = राजा भोज इति, **प्रथाम्**= प्रसिद्धिम्, **गतः** = प्राप्तः, **सः** = तादृशः, अपरिमितगुणगणाधारः, **धरणीजानिः**- धरणी जाया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्य सः, पृथिवीपतिः, **अलम्** = अत्यन्तम्, **विराजते** = शोभते । अत्र राज्ञो भोजस्योदात्तवंशवर्णनादुदात्तालङ्कारः ॥३५॥

दिव्यलक्ष्मी – कुण्डिननगरीमा क्रथकैशिक कुलका रत्न, उदार एवं दया, दाक्षिण्य, शौर्य आदि उच्च गुणद्वारा सुशोभित हुनाले मनोहर आधार बनेका, ऐश्वर्य, प्रतिष्ठा र सम्पूर्ण राजाज्ञाका आश्रयभूत सुप्रसिद्ध राजा भोज विराजमान छन् ॥३५॥

यदजस्रविसर्जनाम्बुभिर्मरुरारोहति कच्छभूमिताम् ।
यदगण्यवनीयकावली धनदं रङ्कमवैत्यशङ्कया ॥३६॥

अन्वयः – यदजस्रविसर्जनाम्बुभिः, मरुः, कच्छभूमिताम्, आरोहति, यदगण्य-वनीयकावली, अशङ्कया, धनदम्, रङ्कम्, अवैति ।

चूडामणिः – यदजस्रविसर्जनाम्बुभिः – यस्य **अजस्रम्**= निरन्तरम्, **विसर्जनस्य**= दानस्य, **अम्बुभिः** = जलैः, **मरुः** = निर्जलदेशः, **कच्छभूमिताम्** – कच्छा चासौ भूमिः, कच्छभूमिस्तस्या भावस्ताम्, अनूपभूमिताम् अर्थाज्जलाधिकदेशताम् (जलप्राय-मनूपं स्यात् पुंसि कच्छस्तथाविधः – इत्यमरः), **आरोहति** = परिणमते, **यदगण्य-वनीयकावली** – यस्य, **अगण्यानाम्** = असङ्ख्यानाम्, **वनीयकानाम्** = याचकानाम् (वनीयको याचनको मार्गणो याचकार्थिनौ – इत्यमरः), वनीपकानामिति पाठान्तरम्, **आवली** = पङ्क्तिः, **अशङ्कया** = निस्सन्देहम्, **धनदम्**= कुबेरम् (कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः । मनुष्यधर्मा धनदो राजराजो धनाधिपः– इत्यमरः), अपि, **रङ्कम्**= दरिद्रम्, **अवैति** = जानाति । अत्र व्यतिरेकालङ्कारः॥३६॥

दिव्यलक्ष्मी – राजा भोजद्वारा नित्य दानकार्यमा सङ्कल्प लिँदा प्रवाहित गरिने जलका कारण मरुभूमि पनि जलमय र हराभरा प्रदेश बनेको छ। उनका दरबारमा आउने याचकहरूको समूहले निर्धक्कसँग कुबेरलाई पनि कङ्गाल मान्दछ ॥३६॥

यदुदग्रकृपाणपाणिना पणितं युद्धमहापणे द्वयम् ।
हरिदन्तविहारि सद्यशो निजसौधैकरतिर्जयेन्दिरा ॥३७॥

अन्वयः – यदुदग्रकृपाणपाणिना, युद्धमहापणे, हरिदन्तविहारि, सद्यशः, निजसौधैकरतिः, जयेन्दिरा, द्वयम्, पणितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - **यदुदग्रकृपाणपाणिना** - यस्य **उदग्रः**- उद्गतमग्रमस्य सः, तुङ्गः (उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे- इत्यमरः), **कृपाणः** = चन्द्रहासः, एव, **पाणिः** = हस्तः, तेन, नृपभोजचमत्कारपूर्णचन्द्रहासहस्तेन, **युद्धमहापणे**- महाँश्चासौ आपणः, महापणः = महाहट्टः, **युद्धमेव** = आयोधनमेव, महापण इति तस्मिन्, महायुद्धहट्टे (आपणस्तु निषद्यायां विपणिः पण्यवीथिका- इत्यमरः), **हरिदन्तविहारि- हरिताम्**= पूर्वादिकाष्ठानाम्, **अन्तेषु** = सीमासु, **विहरति** = प्रसरति, इति दिग्दिगन्तव्यापकम्, सद्यशः = उत्तमा कीर्तिः, **निजसौधैकरतिः** - **निजे** = स्वकीये, **सौधे** = भवने, एव, **एका** = अद्वितीया, **रतिः** = प्रीतिः, यस्या सा, **जयेन्दिरा** = विजयलक्ष्मीः, इति, **द्वयम्** = वस्तुद्वयम्, **पणितम्** = क्रीतम् । भोजराजेन निजपराक्रमेण दिग्दिगन्तव्यापकं यशो विजयलक्ष्मीश्चेति वस्तुद्वयं प्राप्य संसारे प्रसिद्धिः प्राप्तेति भावः । अत्र रूपकानुप्राणितपरिणामालङ्कारः ।।३७।।

दिव्यलक्ष्मी - राजा भोजको प्रचण्ड तेजले सुहाएको तरबारसमान हातले युद्धको मैदानरूप बजारबाट दिग्दिगन्तमा फैलिने उत्तम कीर्ति र चिरस्थायी रूपमा रहने विजयलक्ष्मी गरी यी दुई मूल्यवान् पदार्थ खरिद गरेको छ ।।३७।।

यदरातिनृपालसुन्दरीं दरदीर्णां शबरी वरीयसी ।
झरयुक्तदरीनिकेतनं परिदर्श्यातनुते दरादरम् ।।३८।।

अन्वयः - वरीयसी, शबरी, दरदीर्णाम्, यदरातिनृपालसुन्दरीम्, झरयुक्तदरीनिकेतनम्, परिदर्श्य, दरादरम्, आतनुते ।

चूडामणिः - **वरीयसी** = वृद्धा, **शबरी** = भिल्ली, **दरदीर्णाम्** = भयग्रस्ताम् (दरोऽस्त्रियां भये श्वभ्रे - इत्यमरः), **यदरातिनृपालसुन्दरीम्**- यस्य अरातिनृपालस्य- अरातिश्चासौ नृपाल इति शत्रुभूपः, तस्य, **सुन्दरीम्**= प्रियतमाम्, **झरयुक्तदरीनिकेतनम्**- झरेण= निझरिण (वारिप्रवाहो निर्झरो झरः - इत्यमरः), **युक्ता** = सहिता, या दरी= गुहा, सा एव **निकेतनम्** = गृहमिति निर्झरभयङ्करगह्वरगृहम्, **परिदर्श्य** = दर्शयित्वा, **दरादरम्**- **दरञ्च**= भयञ्च, **आदरश्च** = सम्मानश्चेति द्वयम्, **आतनुते** = विस्तारयति। झरयुक्तदरीनिवासस्थानसङ्केताद् भयं विस्तारयति, शत्रुगणतो रक्षाविधानादादरञ्चापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शयतीति भावः। अनेन राज्ञो भोजस्य शत्रूणां दुर्दशा व्यज्यते । अत्र रूपकाऽतिशयोक्ती अलङ्कारौ ।।३८।।

दिव्यलक्ष्मी - वनवासिनी वृद्धा शबरीले शरणमा आएकी र डरले काँपिरहेकी राजा भोजका शत्रुकी सुन्दरीलाई बस्नका लागि झरना भएको गुफा देखाएर भय र सम्मान दुबै कुरा प्रदान गर्दछिन्।।३८।।

यदरालकरालरुक्करकरवालक्षपितारिबालिका ।
दवदीर्घदरीसरीसृपैरपि सख्यं प्रचरीकरोत्यलम् ।।३९।।

अन्वयः - यदरालकरालरुक्करकरवालक्षपिता, अरिबालिका, दवदीर्घदरीसरीसृपैः, अपि, अलम्, सख्यम्, प्रचरीकरोति ।

चूडामणिः - यदरालकरालरुक्करकरवालक्षपिता - करे = हस्ते, वर्तमानः, **करवालः** = खड्गः, इति करकरवालः, यस्य **अरालया** = वक्रया, **करालया** = भयङ्करया, **रुचा** = कान्त्या युतः, पाणौ विराजमानः खड्गः (अरालं वृजिनं जिह्म-मूर्मिमत् कुञ्चितं नतम् । आविलं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि- इत्यमरः, करालं दन्तुरे तुङ्गे- इति रामाश्रमी, प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः- इत्यमरः), तेन, **क्षपिता** = निश्चेष्टीकृता, **अरिबालिका - अरिरूपा** = शत्रुरूपा, **बालिका** = बाला, **दवदीर्घदरीसरीसृपैः**- **दवे**= वने, या, **दीर्घा** = विशाला, **दरी**= गुहा, तस्याम्, स्थिता, ये, **सरीसृपाः** = सर्पाः, तैः, **अपि** = च, **अलम्** = पूर्णतया, **सख्यम्** = मैत्रीम्, **प्रचरीकरोति** = विस्तारयति । अनेन पद्येन भोजस्य राज्ञः शत्रूणां दुर्दशा प्रकाश्यते । अत्रानुप्रासः, रूपकञ्चालङ्कारौ ।।३९।।

दिव्यलक्ष्मी - समरभूमिमा राजा भोजले वीरतापूर्वक नचाउँदा बाङ्गो-टिङ्गो आकारमा देखिने र डरलाग्दो कान्ति भएको तरबारको प्रहारबाट निश्चेष्ट भई भुइँमा फ्याँकिएकी बालिकाझैं कातर कुनै शत्रु वनको विशाल गुफामा शरण लिएर त्यहाँका सर्पहरूसँग मितेरी गाँसिरहेको देखिन्छ ।।३९।।

यदनुष्ठितसप्ततन्तुजा भुवनं कीर्तिपटी समश्नुते ।
यदुदारशयः कुशेशयं विहरन्नैति विसर्जनाम्बुना ।।४०।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - यदनुष्ठितसप्ततन्तुजा, कीर्तिपटी, भुवनम्, समश्नुते, यदुदारशयः, विसर्जनाम्बुना, विहरन्, कुशेशयम्, न, एति ।

चूडामणिः - यदनुष्ठितसप्ततन्तुजा - येन, **अनुष्ठितात्** = सम्पादितात्, **सप्ततन्तोः**= यज्ञात्, **जाता** = समुत्पन्ना (यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः - इत्यमरः), **कीर्तिपटी**= कीर्तिरूपं वस्त्रम्, अथवा कीर्तिवसनम्, **भुवनम्** = लोकम्, **समश्नुते**= व्याप्नोति, **यदुदारशयः** - यस्य, **उदारः** = अकृपणः, **शयः** = हस्तः, यस्य निरन्तरं दानशीलो हस्तः, **विसर्जनाम्बुना** - विसर्जनस्य = दानस्य, अम्बु = जलम्, तेन, दानजलेन, **विहरन्**= नित्यं क्रीडन्, **कुशेशयम्** = कमलम्, न एति = न प्राप्नोति ? अर्थात् कमलरूपतां प्राप्नोतीत्यर्थः, अथवा **कुशे** = दानजले (कुशमप्सु च - इत्यमरः, कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशे जले - इति विश्वः), **शयम्** = शम शान्तिं वा (पाणिः शमः शयो हस्तः - इति माला), **न एति** = न प्राप्नोति ? । अत्र रूपकालङ्कारः ॥४०॥

दिव्यलक्ष्मी - राजा भोजद्वारा सम्पन्न गरिएका यज्ञहरूका कारण पैदा भएको कीर्तिरूप वस्त्रले सम्पूर्ण संसारलाई ढाकेको छ। सधैं उदारतापूर्वक दान गर्न तत्पर रहने राजा भोजको हात देयपदार्थ लिई सङ्कल्प गर्दा प्रयोग गरिने जलधारासँग निरन्तर सम्पर्कमा रहँदा के कमलको रूपमा परिणत हुँदैन ? अथवा के राजा भोजको हातले दानजललाई नित्य प्रवाहित गराउन पाउँदा शान्ति प्राप्त गर्दैन ? ॥४०॥

भोजकन्यायाः कनकप्रभाया वर्णनम् -

> विधिना निरमायि किङ्गुणान्निखिलानेकपदे दधाति न ।
> द्रुहिणः शठ एवमीरितं परिवादं परिमार्ष्टुमाश्रयः ॥४१॥
>
> (३५-४१ कुलकम्)

अन्वयः - शठः, द्रुहिणः, निखिलान्, गुणान्, एकपदे, न, दधाति, एवम्, ईरितम्, परिवादम्, परिमार्ष्टुम्, आश्रयः, विधिना, निरमायि, किम् ।

चूडामणिः - शठः = धूर्तः, **द्रुहिणः** = धाता (धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः - इत्यमरः), **निखिलान्** = सकलान्, **गुणान्** = सौन्दर्यशीलदयाप्रभृतीन्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सद्गुणान्, **एकपदे** = एकस्थाने, **न** = नैव, **दधाति** = स्थापयति, **एवम्** = अनेन प्रकारेण, **ईरितम्** = कथितम्, **परिवादम्** = अपवादं निन्दां वा (परिवादोऽपवादे स्यात्- इति रामाश्रमी), **परिमार्ष्टुम्**= संशोधयितुम्, **आश्रयः** = आधारः, काचन सुन्दरी, **विधिना**= दैवेन, **निरमायि**= निर्मिता, **किम्**= किमु ?। अत्र अतिशयोक्तिरलङ्कारः।।४१।।

दिव्यलक्ष्मी - 'सृष्टिकर्ता ब्रह्माजीले योग्य वरका लागि योग्य कन्या र योग्य कन्याका लागि योग्य वरको रचना गर्दैनन्। यिनको सृष्टिमा जोडा मिलेको हुँदैन। तसर्थ ब्रह्माजी धूर्त हुन्' भन्ने लोकापवाद रहेको छ। त्यो लोकापवादलाई खारेज गर्ने उपायका रूपमा ब्रह्माजीले राजा भोजका निमित्त एउटी परमसुन्दरी कन्याको रचना गरेजस्तो लाग्छ ।।४१।।

अमुतो बहुवाहिनीपतेरुदितास्ते कनकप्रभाभिधा ।
कमला विमलाब्जभूषितं दधती पाणिपदं सुकोमलम् ।।४२।।

अन्वयः - बहुवाहिनीपतेः, अमुतः, विमलाब्जभूषितम्, सुकोमलम्, पाणिपदम्, दधती, कनकप्रभाभिधा, कमला, उदिता, आस्ते ।

चूडामणिः - बहुवाहिनीपतेः - बह्वीनाम् = अनेकासाम्, **वाहिनीनाम्** = नदीनाम्, **पतिः** = स्वामी समुद्र इत्यर्थः, तस्मात् समुद्राद्, यथा **विमलाब्जभूषितम् - विमलैः**= निर्मलैः, **अब्जैः** = कमलचिह्नैः, **भूषितम्** = समलङ्कृतमिति निर्मलकमलालङ्कृतम्, **सुकोमलम्** = अत्यन्तमेव मृदु, **पाणिपदम् - पाणी** = हस्तौ, **पदे** = चरणे इति **पाणिपदम्**= करचरणम्, **दधती** = धारयन्ती, **कमला** = लक्ष्मीः, **उदिता** = अवतीर्णा, **आस्ते** = आसीत् । (ततः कृतस्वस्त्ययनोत्पलस्रजम्, नदद्द्विरेफां परिगृह्य पाणिना। चचाल वक्त्रं सुकपोलकुण्डलम्, सव्रीडहासं दधती सुशोभनम्।। -श्रीमद्भागवते ८।८।१७) तथैव **बहुवाहिनीपतेः** = असङ्ख्यसैन्यस्वामिनः, **अमुतः** = राज्ञो भोजात्, **विमलाब्जभूषितम्- विमलैः** = निर्मलैः स्वच्छैर्वा, **अब्जैः** = कमलैः, **भूषितम्**= अलङ्कृतमिति निर्मलकमलचिह्नाङ्कितम्, **सुकोमलम्**= अत्यन्तमेव मृदु, **पाणिपदम्**= करचरणम्, **दधती** = धारयन्ती, कनकप्रभानाम्नी **कमला** = लक्ष्मीरेव, **उदिता**= अवतीर्णा, **आस्ते** = वर्तते । अत्र श्लेषरूपकालङ्कारौ ।।४२।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - अनेक नदीहरूका स्वामी समुद्रबाट कमलद्वारा अलङ्कृत भएकी सुन्दर स्वरूपकी लक्ष्मी पैदा भएझैं अनेक सैनिकहरूका स्वामी राजा भोजबाट कमलजस्ता हात र पाउ भएकी कनकप्रभा नामकी लक्ष्मीसमान कन्या पैदा भएकीछिन् ।।४२।।

दिगधीश्वरवाञ्छितश्रियं विलसत्कल्पलतासहोदराम् ।
अपि सोमसपर्ययोज्ज्वलां न वदामः कथमिन्दिरान्नु ताम् ।।४३।।

अन्वयः - दिगधीश्वरवाञ्छितश्रियम्, विलसत्कल्पलतासहोदराम्, सोमसपर्ययोज्ज्वलाम्, अपि, ताम्, कथम्, इन्दिराम्, न, वदामः, नु ।

चूडामणिः - दिगधीश्वरवाञ्छितश्रियम् - दिशाम् = काष्ठानाम्, **अधीश्वराः** = स्वामिनः, इति **दिगधीश्वराः**= इन्द्रादयो दिक्पालाः, तैः, **वाञ्छिता**= अभीष्टा, **श्रीः**= शोभा, यस्याः ताम्, दिक्पालाभीप्सितसौन्दर्याम्, **विलसत्कल्पलतासहोदराम्** - **विलसन्ती** = शोभायमाना, या, **कल्पलता** = कल्पवृक्षवल्ली, तस्याः, **सहोदरा** = सहजाता इति ताम्, कल्पलतासहजाताम्, अथवा, कल्पलतातुल्यशरीरशोभासम्पन्नाम्, **सोमसपर्ययोज्ज्वलाम् - सोमस्य** = उमयासहितस्य शिवस्य, **सपर्यया**= आराधनया, **उज्ज्वलाम्** = दीप्तिमतीम्, अथवा चन्द्रस्य आराधनया कान्तिमतीम्, अथवा सोमलता-रससेवनोज्ज्वलाम्, **अपि**= च, **ताम्**= भोजकन्याम्, तादृशैर्गुणग्रामैर्विभूषिताम्, **कथम्**= किमु , **इन्दिराम्** = लक्ष्मीम्, **न वदामः** = न कथयामः, **नु** = वितर्के । भोजस्य कन्या कनकप्रभा साक्षाद् लक्ष्मीरस्तीति भावः । अत्र श्लेष उत्प्रेक्षा च ।।४३।।

दिव्यलक्ष्मी - दिक्पालहरूद्वारा सौन्दर्यपान गर्ने इच्छाले लालसापूर्वक हेरिएकी, पुष्प एवं पत्रद्वारा सुहाउने कल्पलताझैं मसिनो कम्मरले चिटिक्क स्वरूपमा देखिएकी अथवा समुद्रबाट कल्पलतासँगै पैदा भएकी मातापिताद्वारा गरिएको शिवजीको आराधनाका कारण उज्ज्वल आत्मा लिएर धर्तीमा उदाएकी कनकप्रभालाई समुद्रबाट पैदा हुँदा दिक्पालहरूद्वारा इच्छा गरिएकी, समुद्रबाट कल्पलताका साथ पैदा भएकी, निरन्तर सोमलताको रसपान गर्नाले उज्यालो कान्तिले सुहाएकी लक्ष्मी नै हुन् भन्ने कुरा कसरी नभनौं ?।।४३।।

प्रणिधाय विधिर्व्यधादिमां हृदयं प्राणनिरोधकौशलः ।
हृदयस्थिरताञ्जनोऽश्नुते भृशमस्याः प्रविलोकनेऽपि तत् ।।४४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - प्राणनिरोधकौशलः, विधिः, हृदयम्, प्रणिधाय, इमाम्, व्यधात्, तत्, अस्याः, प्रविलोकने, अपि, जनः, भृशम्, हृदयस्थिरताम्, अश्नुते ।

चूडामणिः - प्राणनिरोधकौशलः - प्राणस्य = प्राणवायोः, **निरोधः** = निग्रहः (निग्रहस्तु निरोधः स्यात् - इत्यमरः), इति प्राणनिरोधः, तस्मिन्, **कौशलम्** = चातुर्यम्, यस्य सः, **विधिः** = ब्रह्मा, **हृदयम्** = चित्तम्, **प्रणिधाय** = एकाग्रं विधाय, **इमाम्** = कनकप्रभाम्, **व्यधात्** = रचयामास, **तत्** = तस्मात् कारणात्, **अस्याः** = कनकप्रभायाः, **प्रविलोकने** = दर्शने, **अपि**= च, **जनः**= लोकः, **भृशम्**= अत्यन्तम्, **हृदयस्थिरताम्** = चित्तस्थैर्यम्, **अश्नुते** = अनुभवति । अत्रार्थान्तरन्यासनामा अलङ्कारः ॥४४॥

त्रिशक्तिः - कारणगुणाः कार्येषु प्रतिबिम्बिता भवन्तीति शास्त्रीयो नियमः । कनकप्रभाया निर्माणे ब्रह्मणो हृदयस्थिरता एकं कारणमस्ति । अत एव कनकप्रभाया दर्शनेऽपि सा हृदयस्थिरता कार्यरूपेण परिणता सती दर्शकान् विमोहयति । तद्दर्शनेन विमोहिता दर्शका जडा इव जायन्त इति भावः ।

दिव्यलक्ष्मी - अष्टाङ्गयोगको अभ्यास गरी प्राणमाथि वशीकार गर्ने क्रियामा कुशल ब्रह्माजीले आफ्नो हृदयलाई स्थिर गराई कनकप्रभाको रचना गरेका हुन् । ब्रह्माजीले आफ्नो हृदयलाई एकाग्र गराई यिनको रचना गरेका हुनाले यिनलाइ नियालेर हेर्ने कुनै पनि युवाको हृदय स्तब्ध हुन्छ र त्यो युवा सम्मोहित भई स्थिर अवस्थामा रहेको हुन्छ। वास्तवमा कारणका गुण कार्यमा आउनु स्वाभाविक नै हो॥४४॥

अनुवाकविवेककुण्ठधीर्विधिरेतद्वपुरासृजत् कथम् ।
किमु वारिधिजास्तवश्रुतिर्व्रजति स्मास्य सहायतामलम् ॥४५॥

अन्वयः - अनुवाकविवेककुण्ठधीः, विधिः, एतद्वपुः, कथम्, आसृजत्, किमु, वारिधिजास्तवश्रुतिः, अस्य, सहायताम्, अलम्, व्रजति, स्म ।

चूडामणिः - अनुवाकविवेककुण्ठधीः - अनुवाकस्य- अनु = पश्चात्, उच्यते= उदीर्यते इति, तस्य, ऋग्यजुःसमूहस्य, **विवेके** = भेदज्ञाने विवेचने वा, **कुण्ठधीः**= कुण्ठितबुद्धिः, **विधिः** = ब्रह्मा, **एतद्वपुः**= कनकप्रभाशरीरम्, **कथम्**= केन प्रकारेण,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आसृजत् = रचयामास, **किमु** = किम्, **वारिधिजास्तवश्रुतिः** - **वारिधेः** = समुद्रात्, जाता इति **वारिधिजा** = लक्ष्मीः, तस्याः, **स्तवः** = स्तुतिः, इति वारिधिजा-स्तवः, तस्य **श्रुतिः**= श्रवणम्, **अस्य** = विधेः, **सहायताम्** = सहयोगम्, **अलम्**= पूर्णतया, **व्रजति स्म** = जगाम । अत्र व्याजस्तुतिनामालङ्कारः।।४५।।

त्रिशक्तिः - तात्पर्यमस्ति यत् ब्रह्मणो या शक्तिः, सा तु वेदार्थविवेके कुण्ठिता भवति, तादृशो रुक्षो विधाता कथमेतद्रूपं कमनीयं निर्मातुं सफलो भवेत् ? परन्तु तेन देवस्तुतिविधौ भगवत्या लक्ष्म्याः सम्बद्धा ये मन्त्रास्तत्र दृष्टाः, तेषामर्थज्ञानद्वारा लक्ष्मीसदृशी कन्या मया रचनीयेति विचारेण कनकप्रभा निर्मितेति विभावयितुं शक्यते।

दिव्यलक्ष्मी - नित्य वेदका ऋचाहरूको विचारविमर्श र विश्लेषणमा लागिरहँदा सौन्दर्यबोध गर्ने बुद्धिलाई कुण्ठित तुल्याएका ब्रह्माजीले कनकप्रभाको यतिविधि राम्रो स्वरूपको सिर्जना कसरी गरे होलान् ? के वेदमा रहेका श्रीसूक्त आदि लक्ष्मीस्तुतिसँग सम्बद्ध मन्त्रहरूमा व्यक्त गरिने लक्ष्मीका गुणहरू नै कनकप्रभाको रचनामा लागेका ब्रह्माजीका निमित्त पूर्ण रूपमा सहायकसामग्री बनेका हुन् त ?।।४५।।

कनकस्य न तत्र सा प्रभा कनके तत्प्रभया स्थितं खलु ।
कनकं क्व नु रङ्करङ्गतस्तुलितं क्वातुलना जगत्सु सा ।।४६।।

अन्वयः - तत्र, कनकस्य, सा, प्रभा, न, तत्प्रभया, कनके, स्थितम्, खलु, क्व, रङ्करङ्गतः, तुलितम्, कनकम्, क्व, जगत्सु, अतुलना, सा, नु ?

चूडामणिः - **तत्र**= कनकप्रभायाम्, **कनकस्य** = सुवर्णस्य, **सा** = सौवर्णी, **प्रभा**= कान्तिः, **न** = नास्ति, **तत्प्रभया** = कनकप्रभाकमनीयकान्त्या, **कनके** = सुवर्णे, **स्थितम्** = अवस्थितम्, **खलु** = निश्चयेन, **क्व** = कुत्र, **रङ्करङ्गतः** = दरिद्रपीतवर्णतः, **तुलितम्** = उपमितम्, **कनकम्** = स्वर्णम् ? **क्व** = कुत्र, **जगत्सु** = त्रिलोक्याम्, **अतुलना** = अनुपमा, **सा** = कनकप्रभा ?, **नु** = वितर्के, कनककनकप्रभयोराकाश-पातालवद् महदन्तरमस्तीति भावः । अत्र कनकात् कनकप्रभायाः सौन्दर्यविशेषचित्रणाद् व्यतिरेकालङ्कारः ।।४६।।

दिव्यलक्ष्मी - राजा भोजकी राजकुमारीको नाम कनकप्रभा हो । कनकप्रभा नामको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्युत्पत्ति गर्दा दुई अर्थ लाग्दछन् - **कनकस्य** - सुवर्णको, **प्रभा** - कान्तिले सम्पन्न भन्ने एउटा अर्थ हुन्छ भने अर्को अर्थ **कनके** - सुवर्णमा जसको, **प्रभा** - कान्ति स्थानान्तरित भएको छ भन्ने हुन्छ। मेरो विचारमा कनकप्रभा सुवर्णको कान्ति पाएर कान्तिमती बनेकी होइनन्। अपितु यिनको कान्ति पाएर सुवर्ण कान्तिमान् बनेको हो। कहाँ निर्जीव पहेंलो रङ्गसँग तुलना गरिने सुवर्ण ? कहाँ स्वर्ग, मर्त्य र पातालका सुन्दरीहरूसँग दाँज्न नसकिने अपूर्व सौन्दर्यकी स्वामिनी कनकप्रभा ? यी दुईको तुलना नै हुन सक्दैन ।।४६।।

शिशुरेव जगत्त्रयीभुवामधिरूढा सुषमाधिरोहणीम् ।
रुचिगर्वितसुभ्रुवामियं गुणभारोन्नतमौलिमण्डलीम् ।।४७।।

अन्वयः - शिशुः, एव, इयम्, जगत्त्रयीभुवाम्, रुचिगर्वितसुभ्रुवाम्, सुषमाधिरोहणीम्, गुणभारोन्नतमौलिमण्डलीम्, अधिरूढा ।

चूडामणिः - **शिशुः एव** = अनतिक्रान्तशैशवैव, **इयम्** = कनकप्रभा, **जगत्त्रयीभुवाम्** - **जगत्त्रय्याम्** = त्रिलोक्याम्, भवन्तीति **जगत्त्रयीभुवः** = स्वर्गमर्त्यपातालभवाः, तासाम्, **रुचिगर्वितसुभ्रुवाम्**- **रुच्या**= शोभया, **गर्वितानाम्** = मत्तानाम्, **सुभ्रुवाम्**= सुन्दरीणाम्, अर्थात् सौन्दर्यमत्तसुन्दरीणाम्, **सुषमाधिरोहणीम्**- **सुषमायाः**= शोभायाः, **अधिरोहिणी** = निश्रेणिः, अधिरुह्यतेऽनयेति, सकलसुन्दरीशोभाविजयिनीति तात्पर्यम्, ताम्, **गुणभारोन्नतमौलिमण्डलीम्**- **गुणभारेण**- **गुणानाम्**= सौन्दर्यादीनाम्, **भारेण** = भरेण, सौन्दर्यादिगुणसन्दोहभरेणेत्यर्थः, **उन्नताः**= समुच्छ्रिताः, य **मौलयः** = शिरांसि, तेषाम् **मण्डली** = संहतिस्ताम्, **अधिरूढा**= आरूढा वर्तते । एषा कनकप्रभा त्रिलोकगतानां सुन्दरीणां सौन्दर्यपुञ्जमधिरूढा विशिष्टा सुन्दरी वर्तत इति भावः । अत्र व्यतिरेकः प्रतीपश्चालङ्कारौ ।।४७।।

दिव्यलक्ष्मी - कनकप्रभा अहिले शैशव अवस्थामै छिन् तापनि यी सौन्दर्यको अभिमानले मत्त भएका सुन्दरीहरूमध्ये पनि चरम सौन्दर्यले सम्पन्न सुन्दरीहरूका सौन्दर्यसोपानको अन्तिम शिखरमा विराजमान भएकी छिन्।।४७।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कनकप्रभाया अङ्ग-प्रत्यङ्गवर्णनम् -

वदनं सदनं सुरोचिषां नयने साचिविलोकनायने ।
असिता लसिताः शिरोरुहा निरवद्यं कनकप्रभावपुः ।।४८।।

अन्वयः - कनकप्रभायाः, वदनम्, सुरोचिषाम्, सदनम्, नयने, साचिविलोकनायने, शिरोरुहाः, असिताः, लसिताः (सन्ति), कनकप्रभावपुः, निरवद्यम् (अस्ति) ।

चूडामणिः - कनकप्रभायाः, **वदनम्** = मुखमण्डलम्, **सुरोचिषाम्** = सुकान्तीनाम्, सदनम् = धाम वर्तते, **नयने** = लोचने, **साचिविलोकनायने** - **साचि** = तिर्यक् (तिर्यगर्थे साचि तिरोऽपि- इत्यमरः), **विलोकनम्**= अवलोकनम्, इति साचिविलोकनम्, तस्य, **अयने**= आश्रयभूते वर्तेते, तस्याः, **शिरोरुहाः** = केशाः, **असिताः**= कृष्णाः, **लसिताः** = चमत्कृताश्च सन्ति, **कनकप्रभावपुः** - **कनकप्रभायाः** = भोजकन्यायाः, **वपुः** = शरीरम्, **निरवद्यम्** = अनिन्द्यसौन्दर्यसम्पन्नमस्ति । अत्र काव्यलिङ्गालङ्कारः ।।४८।।

दिव्यलक्ष्मी - कनकप्रभाको मुखमण्डल तेजोमय आभाको मुहान बनेर रहेको छ। उनका दुई आँखा संसारलाई लोभ्याउने कर्के नजरका स्रोत हुन्। उनका काला केश चहकिलो कालिमाका कारण आकर्षक बनेर रहेका छन् । तसर्थ कनकप्रभाको कलेवर अनिन्द्य सौन्दर्यले सुहाएको छ ।।४८।।

कनकाम्बुजचन्द्रचन्दिरात् क्वथितात् सौरभवत् सुशीतलम् ।
हृदयङ्गममुज्ज्वलञ्जलं विधिरादाय विलिम्पतीव ताम् ।।४९।।

अन्वयः - विधिः, क्वथितात्, कनकाम्बुजचन्द्रचन्दिरात्, सौरभवत्, सुशीतलम्, उज्ज्वलम्, हृदयङ्गमम्, जलम्, आदाय, ताम्, विलिम्पति, इव ।

चूडामणिः - **विधिः** = ब्रह्मा, **क्वथितात्** = पाकक्रियया साकल्येन पक्वात् (निष्पक्वं क्वथितम् - इत्यमरः), **कनकाम्बुजचन्द्रचन्दिरात्** - **कनकञ्च** = सुवर्णञ्च, अम्बुजञ्च = श्वेतकमलञ्च, **चन्द्रश्च** = कर्पूरश्च, **चन्दिरश्च** = सुधांशुश्चैतेषां समाहारः, तस्मात्, सुवर्णश्वेतकमलकर्पूरचन्द्रात् (चन्द्रःकर्पूरकाम्पिल्लसुधांशुस्वर्णचारुषु,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चन्दिरोऽनेकपे चन्द्रे- इति मेदिनी), **सौरभवत्** = सुरभितम्, **सुशीतलम्** = शैत्यगुण-सम्पन्नम्, **उज्ज्वलम्** = अतिधवलम्, **हृदयङ्गमम्** = हृदयस्पर्शि, **जलम्** = जलमयं लेपनम्, **आदाय** = गृहीत्वा, **ताम्** = कनकप्रभाम्, **विलिम्पतीव** = लेपनं करोतीति प्रतीयते । कनकप्रभा कनककमलचन्द्रकर्पूरजन्योज्ज्वलगुणराशिदेदीप्यमाना सुन्दरी वर्तत इति भावः । अत्रोत्प्रेक्षालङ्कारः ।।४९।।

दिव्यलक्ष्मी - ब्रह्माजीले सुवर्ण, कमल, चन्द्रमा र कपूर यी सबैलाई एकै ठाउँमा राखी पिसेपछि भाँडामा पकाएर तयार पारिएको कल्क लेदो निचोरेर निस्किएको रसले कनकप्रभाको पूरा शरीरमा लेपन गरिएको हो कि ? अन्यथा कनकप्रभा यति राम्री र यति आकर्षक कसरी हुने थिइन् भन्ने मैले सोचेको छु ।।४९।।

प्रतिदर्शमदर्शनङ्गतान् विधिरादाय विधून् विचूर्ण्य तान् ।
कुरुते प्रतिवासरन्नु तन्मुखनिर्णेजनचूर्णपूरणम् ।।५०।।

अन्वयः - विधिः, प्रतिदर्शम्, अदर्शनम्, गतान्, विधून्, आदाय, तान्, विचूर्ण्य, प्रतिवासरम्, तन्मुखनिर्णेजनचूर्णपूरणम्, कुरुते, नु ।

चूडामणिः - **विधिः** - विधत्ते इति **विधिः** = विधाता, **प्रतिदर्शम्** = सर्वासु अमावास्यासु, **अदर्शनम्** = लोपम्, **गतान्** = प्राप्तान्, **विधून्** - विशेषेण यान् धयन्ति सुरा इति **विधवः** = चन्द्राः, तान्, **आदाय** = गृहीत्वा, **विचूर्ण्य** = चूर्णयित्वा, **प्रतिवासरम्** = प्रतिदिनम्, **तन्मुखनिर्णेजनचूर्णपूरणम्** - तस्या मुखमिति **तन्मुखम्**= कनकप्रभामुखम्, तस्य, **निर्णेजनम्** = स्वच्छतापादकम्, **चूर्णम्** = पिष्टम्, तस्य, **पूरणम्** = पूर्तिविधायकम्, अर्थात् कनकप्रभावदनमण्डलस्वच्छतापादनकार्य-पूर्तिविधायकं पिष्टमित्यर्थः, **कुरुते** = सम्पादयति, **नु** = इति सम्भावये । अत्रो-त्प्रेक्षालङ्कारः ।।५०।।

दिव्यलक्ष्मी - प्रत्येक महिनाको औंसी तिथिमा नदेखिने चन्द्रमाको समूहलाई एक-एक गरी एकै ठाउँमा थुपारेपछि पिनेर तयार गरिएको चूर्णद्वारा ब्रह्माजीले दिनदिनै कनकप्रभाको मुखमा लगाउने बास्नादार र शीतल धूलो (पाउडर) तयार गर्दछन् जस्तो लाग्दछ।।५०।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधुमण्डलतः सुधां समां विधिरादाय विधाय तन्मुखम् ।
गतसारमिदं किमातनोदलकालङ्कृतिसिक्थकालयम् ।।५१।।

अन्वयः - विधिः, विधुमण्डलतः, समाम्, सुधाम्, आदाय, तन्मुखम्, विधाय, इदम्, गतसारम्, किम्, अलकालङ्कृतिसिक्थकालयम्, आतनोत् ?

चूडामणिः - **विधिः** = विधाता, विधुमण्डलतः- **विधोः** = चन्द्रस्य, **मण्डलम्**= चक्रम्, इति विधुमण्डलम्, तस्मात्, **समाम्** = सम्पूर्णाम्, **सुधाम्** = अमृतम्, आदाय = गृहीत्वा, **तन्मुखम्** = कनकप्रभावदनम्, **विधाय** = रचयित्वा, **इदम्** = चन्द्रमण्डलम्, **गतसारम्** = तत्त्वहीनम्, अथवा सौन्दर्यहीनम्, **अलकालङ्कृति-सिक्थकालयम्** - **अलकानाम्** = केशानाम्, **अलङ्कृतये** = भूषणाय, पर्याप्तम्, यत् **सिक्थकम्** = मधूच्छिष्टम् (मधूच्छिष्टन्तु सिक्थकम् - इत्यमरः), तस्य **आलयम्**= आश्रयम्, **आतनोत्** = सम्पादयामास, **किम्** = किमु ?। अत्रोत्प्रेक्षालङ्कारः, व्याजस्तुतिश्च ।।५१।।

दिव्यलक्ष्मी - विधाताले चन्द्रमण्डलबाट सबै अमृत खिँचेर ल्याई कनप्रभाको मुखमण्डल बनाउँदा चन्द्रमण्डललाई सारहीन बनाई केशपाशलाई चिल्लो एवं आकर्षक तुल्याउन प्रयोग गरिने मैनको घरजस्तो बनाएका होइनन् त ? अन्यथा कनकप्रभाको मुखमण्डल चन्द्रमाभन्दा चहकिलो र अमृतवर्षी कसरी बन्न गयो ?।।५१।।

कृतविष्णुपदावलम्बनो विधुरेतन्मुखकान्तिवाञ्छया ।
प्रतपन् तनुतामुपागतो द्विजराजत्वमगाद् न भां तु ताम् ।।५२।।

अन्वयः - विधुः, एतन्मुखकान्तिवाञ्छया, कृतविष्णुपदावलम्बनः, प्रतपन्, तनुताम्, उपागतः, द्विजराजत्वम्, अगात्, ताम्, भाम्, तु, न ।

चूडामणिः - **विधुः** = चन्द्रमाः, **एतन्मुखकान्तिवाञ्छया** - **एतस्याः** = कनकप्रभायाः, **मुखम्** = वदनम्, इति एतन्मुखम्, तस्य **कान्तिः** = सुषमा, इति एतन्मुखकान्तिः, तस्याः, **वाञ्छा** = इच्छा, इति एतन्मुखकान्तिवाञ्छा, तया, कृतविष्णुपदावलम्बनः - **कृतम्** = विहितम्, **विष्णोः** = नारायणस्य, **पदे** = चरणे, इति विष्णुपदे, तयोः, **अवलम्बनम्** = आश्रयणम्, इति विष्णुपदावलम्बनम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथवा **विष्णुपदे** = आकाशे (वियद् विष्णुपदं वा तु पुंस्याकाशविहायसौ – इत्यमरः), हस्तौ प्रसार्य तस्य, **अवलम्बनम्** = आश्रयग्रहणम्, विहितं येन सः, विहितनारायण-चरणाश्रयोऽथवा विहिताकाशवास इत्यर्थः, **प्रतपन्**= तपस्यां कुर्वन्, **तनुताम्**= कृशताम्, **उपागतः** = प्राप्तः, **द्विजराजत्वम्** = तपस्विराजत्वम्, अथवा द्विजन्मजनाधिपत्वम्, **अगात्**= गतवान्, **ताम्** = कनकप्रभायां विशेषरूपेण प्रतीयमानाम्, **भाम्** = सुषमाम्, तु, **न** = नैव प्राप्तवान् । कनकप्रभा चन्द्रमसोऽपि विशिष्टया कान्त्या समलङ्कृता सुन्दरी वर्तत इति भावः । अत्र व्यतिरेकालङ्कारः, व्यज्यमानोत्प्रेक्षा च ।।५२।।

दिव्यलक्ष्मी – चन्द्रमाले आफ्नो मण्डललाई कनकप्रभाको मुखमण्डलभन्दा नराम्रो ठानेर त्यसलाई कनप्रभाको मुखमण्डलजस्तै आकर्षक बनाउछु भन्ने उद्देश्यले नारायणका चरणारविन्दको अथवा आकाशको आश्रय लिएर तपस्या सुरु गरे। तपस्याको क्रममा उनी दुब्लाउँदै गए । फलस्वरूप दुब्लाएका चन्द्रमाले तपस्विराज अथवा प्रत्येक चान्द्रमासको शुक्लपक्षमा उदाउने हुँदा दुई पटक जन्मिएका कारण द्विजराज भन्ने उपाधि पाए, परन्तु कनकप्रभाको मुखमण्डलमा रहेजस्तो आनन्ददायक र चहकिलो सुन्दरता भने पाउन सकेनन् ।।५२।।

निशि सुप्तमवेत्य तन्मुखं रजनीशो द्युतिभिर्विजृम्भते ।
प्रतिबुध्य तदानने जगत्युदिते स क्व दिवा भृशायते ।।५३।।

अन्वयः – रजनीशः, निशि, तन्मुखम्, सुप्तम्, अवेत्य, द्युतिभिः, विजृम्भते, दिवा, प्रतिबुध्य, तदानने, जगति, उदिते, स, क्व, भृशायते ।

चूडामणिः – **रजनीशः** – **रजन्याः** = रात्रेः, **ईशः** = स्वामी, चन्द्रमाः, **निशि** = रात्रौ, **तन्मुखम्** = कनकप्रभावदनम्, **सुप्तम्** = निद्रया निश्चेष्टम्, **अवेत्य** = ज्ञात्वा, **द्युतिभिः** = प्रभाभिः, **विजृम्भते** = प्रकाशते, **दिवा** = दिने, **प्रतिबुध्य** = जागृतिमाप्य, **तदानने** = कनकप्रभामुखे, **जगति** = संसारे, **उदिते** = प्रकाशिते, **सः** = चन्द्रमाः, **क्व** = कुत्र, **भृशायते**– अभृशो भृशो भवतीति **भृशायते** = अधःपतति (भृशु भ्रंशु अधःपतने इति दिवादीयधातोर्लटि रूपम्), अर्थात् कनकप्रभामुखम्, चन्द्रादपि कान्तिपूर्णमस्तीति ज्ञायते । अत्रातिशयोक्तिर्व्यतिरेकोऽर्थान्तरन्यासश्च ।।५३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - उज्यालो रातका स्वामी चन्द्रमाले रातमा सौन्दर्य र चहककी स्वामिनी कनकप्रभाको मुखमण्डल निद्राको अधीनमा परेको थाहा पाएपछि आफ्नो सम्पूर्ण जुनेली फैलाएर संसारलाई प्रकाशमा डुबाउँछन्। बिहानीपख कनप्रभा जागेपछि उनको मुखमण्डल ज्योतिमय बनी उदाउँदा लजाएका चन्द्रमा थाहै नपाउने गरी हराउँछन्।।५३।।

कमला, कनकप्रभा ध्रुवं कमलं तच्चरणाम्बुजासनम् ।
प्रतियातु कथन्तुलाकथामथ तस्या वदनेन भास्वता ।।५४।।

अन्वयः - कनकप्रभा, ध्रुवम्, कमला, अथ, तच्चरणाम्बुजासनम्, कमलम्, कथम्, तस्याः, भास्वता, वदनेन, तुलाकथाम्, प्रतियातु ।

चूडामणिः - कनकप्रभा = भोजनन्दिनी, **ध्रुवम्** = निश्चयेन, **कमला** = लक्ष्मीः, अथ = एतस्माद् हेतोः, **तच्चरणाम्बुजासनम् - तस्याः** = कनकप्रभायाः, **चरणे**= पदे, एव, **अम्बुजे** = कमले, तयोः, **आसनम्** = पीठम्, इति कनकप्रभाचरणकमल-पीठम्, **कमलम्**= नलिनम्, **कथम्** = कथङ्कारम्, **तस्याः** = कनकप्रभायाः, **भास्वता**= उज्ज्वलेन, **वदनेन**= मुखेन, **तुलाकथाम्** = उपमाम्, **प्रतियातु** = प्राप्नोतु। लक्ष्मी-रूपायाः कनकप्रभायाश्चरणयोराश्रयभूतं दासतुल्यं कमलं कथं कनकप्रभामुखेन तुलितं भवत्वित्यर्थः । अत्रोत्प्रेक्षापह्नुतिश्च ।।५४।।

दिव्यलक्ष्मी - वास्तवमा कनप्रभा लक्ष्मी नै हुन्। कनकप्रभाको रूपमा रहेकी लक्ष्मीका चरणाविन्दको आश्रय बनेर रहने कमलको फूलले कनप्रभाको चहकिलो अनुहारसँग कसरी बराबरी गर्न सक्छ ? अथवा त्यो कसरी तुलनायोग्य बन्न सक्छ। लक्ष्मीका पाउले कुल्चिने दासको रूपमा रहेको कमलले आफ्नी स्वामिनी लक्ष्मीको अनुहारसँग बराबरी गर्ने हिम्मत कसरी गर्न सक्दछ ?।।५४।।

कमले विमलेऽपि नो सुधाऽमृतसिन्धौ न विधौ च सौरभम् ।
अदसीयमुखञ्जगत्सुखन्द्वितयन्तद्भरतेऽतिनिर्भरम् ।।५५।।

अन्वयः - विमले, अपि, कमले, सुधा, नो, अमृतसिन्धौ, विधौ, च, न, सौरभम्, जगत्सुखम्, अदसीयमुखम्, तद्, द्वितयम्, अतिनिर्भरम्, भरते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - विमले = निर्मले, **अपि** = च, **कमले** = नलिने, **सुधा** = अमृतम्, **नो** = नास्ति, **अमृतसिन्धौ** = पीयूषपारावारे, **विधौ** = चन्द्रे, च, **न सौरभम्** = न सुगन्धः, **जगत्सुखम्** = संसारसुखदायकम्, **अदसीयमुखम्** = कनकप्रभावदनम्, **तद्** = उपरि वर्णितम्, **द्वितयम्** = सौरभामृतद्वयम्, **अतिनिर्भरम्** = अत्यन्तमेव, **भरते** = धारयति । अत एव कनकप्रभामुखं कमलाच्चन्द्राच्च श्रेष्ठमिति भावः । अत्र व्यतिरेकालङ्कारः ।।५५।।

दिव्यलक्ष्मी - कुनै दाग नभएको कमलपुष्पमा केही सौन्दर्य र सुगन्ध भए पनि अमृत हुँदैन। अमृतको समुद्र अथवा मुहान मानिएको चन्द्रमामा केही चहक रहे पनि सुगन्ध पाइँदैन। संसारलाई आफ्नो सौन्दर्यद्वारा परम आनन्द र तृप्ति प्रदान गर्ने कनकप्रभाको मुखमण्डल सुगन्ध र अमृतको खानी भएकाले आफ्नो कान्तिले संसारलाई परम आनन्द र तृप्ति प्रदान गर्न पूर्ण समर्थ छ । तसर्थ कमल र चन्द्रमा दुबै कहिले पनि कनकप्रभाको अनुहारसँग तुलनायोग्य हुन सक्दैनन् ।।५५।।

कमलं कमलन्न निर्मलं सकलङ्कं विधुमण्डलं स्फुटम् ।
विलसद्रदनं तदाननं समताङ्केन समेतु विष्टपे ।।५६।।

अन्वयः - कमलम्, कमलम्, न, निर्मलम्, विधुमण्डलम्, स्फुटम्, सकलङ्कम्, विलसद्रदनम्, तदाननम्, विष्टपे, केन, समताम्, समेतु ।

चूडामणिः - कमलम् = पद्मम्, **कमलम् - कस्य** = जलस्य, **मलम्** = दूषणमिति जलमलमेवास्ति, **न** = नैव, **निर्मलम्** = विमलम्, **विधुमण्डलम्** = चन्द्रमण्डलम्, **स्फुटम्** = स्पष्टमेव, **सकलङ्कम्** = कलङ्कदूषितम्, **विलसद्रदनम् - विलसन्तः** = शोभायमानाः, **रदनाः** = दन्ताः, यस्मिन्, तत् (रदास्तु दशना दन्ताः- इत्यमरः), **विलसद्रदनम्** = उज्ज्वलदन्तपङ्क्तिशोभितम्, **तदाननम्** = कनकप्रभामुखम्, **विष्टपे**= लोके (अथो जगती लोको विष्टपं भुवनं जगत्- इत्यमरः), **केन**= कतमेन वस्तुना, **समताम्**= तुल्यताम्, **समेतु**= प्राप्नोतु । अत्र ध्वन्यमानोऽनन्वयो व्यतिरेकालङ्कारश्च ।।५६।।

दिव्यलक्ष्मी - वास्तवमा कमल **क** - पानीको, **मलम्** - मयल नै हो । चन्द्रमाको मण्डलमा स्पष्ट रूपमा कलङ्क अर्थात् कालो दाग देखिनाले त्यो दागी छ । पानीको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मयलका रूपमा रहेको कमल र कालो दागका कारण विरूप देखिने चन्द्रमासँग कनकप्रभाको अनुहारलाई कसरी दाँज्न सकिन्छ ? सेतो दन्तपङ्क्तिले सुहाएको अमृत र सुगन्धको खानी कनकप्रभाको मुखमण्डल संसारमा कुन पदार्थसँग तुलना गर्न योग्य हुन सक्छ ? अर्थात् हुँदैन ।।५६।।

जलजं च तदाननं समं कमलावासतया कथं भवेत् ।
मधुपैः परिचुम्बितं रसाद्विधिपत्नीप्रियवासभावितम् ।।५७।।

अन्वयः - मधुपैः, रसात्, परिचुम्बितम्, विधिपत्नीप्रियवासभावितम्, जलजम्, तदाननम्, च, कमलावासतया, कथम्, समम्, भवेत् ।

चूडामणिः - मधुपैः = भ्रमरैः, **रसात्** = स्वारस्येन, **परिचुम्बितम्** = आस्वादितम्, **विधिपत्नीप्रियवासभावितम् - विधिपत्न्याः** = सरस्वत्याः, **प्रियः** = प्रीतिदायकः, **वासः** = आश्रयः, इति **भावितम्** = सेवितं वासितं वा, **जलजम्** = कमलम्, **तदाननम्** = कनकप्रभाया मुखञ्च, **कमलावासतया** = सौन्दर्यश्रियो निवासहेतोरथवा लक्ष्म्या आसनत्वेन, **कथम्** = कथङ्कारम्, **समम्** = समानम्, **भवेत्** = स्यात्, अर्थात् समानं नास्ति । व्यतिरेकालङ्कारः ।।५७।।

दिव्यलक्ष्मी - भमराहरूद्वारा आनन्दपूर्वक चुम्बन गरी बिटुलो बनाइएको र सरस्वतीद्वारा पनि प्यारो आसन भनी स्वीकार गरिएको कमल केवल लक्ष्मीको आसन भएका कारण कनकप्रभाको मुखमण्डलसँग कसरी तुलनायोग्य बन्न सक्दछ ।।५७।।

नलिनं विकचं लसत्कचं द्विजराजप्रभया गतप्रभम् ।
स्फुरितञ्च तया तदाननं सदृशं तस्य कथं भवेन्नु तत् ।।५८।।

अन्वयः - लसत्कचम्, विकचम्, नलिनम्, द्विजराजप्रभया, गतप्रभम्, तया, स्फुरितम्, च, तत्, तदाननम्, तस्य, सदृशम्, कथम्, नु, भवेत् ।

चूडामणिः - लसत्कचम् = सुन्दरबन्धम् (कचः शुष्कव्रणे केशे बन्धे पुत्रे च गीर्पतेः - इति हैमः), **विकचम्** = विकसितम्, **नलिनम्** = कमलम्, **द्विजराजप्रभया- द्विजानाम्** = ब्राह्मणानाम्, अथवा द्विवारमुत्पद्यमानानां दन्तानाम्, **राजा** = अधिपः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति, तेषां कनकप्रभादन्तानाम्, **प्रभया** = कान्त्या, **गतप्रभम्** = कान्तिहीनम्, जातम्, **तया** = दन्तकान्त्या अथवा चन्द्रकान्त्या, **स्फुरितम्** = विकसितम्, च, **तत्**= अपूर्व-सौन्दर्यसम्पन्नम्, **तदाननम्** = कनकप्रभामुखमण्डलम्, **तस्य**= कमलस्य, **सदृशम्**= तुल्यम्, **कथम्**= कथङ्कारम्, **भवेत्**= स्यात्, **नु**= वितर्के। अत्रोत्प्रेक्षाव्यतिरेकौ।।५८।।

दिव्यलक्ष्मी - वृन्तरूप बन्धनमा रही फुलेको सेतो कमल कनकप्रभाका सेता दाँतका लहरका सामु कान्ति नभएको अर्थात् मलिन देखिन्छ। सेता दन्तपङ्क्तिको मनोरम कान्तिले सुहाएको कनकप्रभाको अनुहार कुनै परिस्थितिमा पनि सेतो कमलसँग तुलना गर्न योग्य हुँदैन।।५८।।

चपले विपुले विलोचने हरिणीगर्धविमोचने श्रिया ।
शिशुखञ्जनगर्वगञ्जने जयतोऽस्या लसदञ्जने पुनः ।।५९।।

अन्वयः - अस्याः, चपले, विपुले, श्रिया, हरिणीगर्धविमोचने, पुनः, लसदञ्जने, शिशुखञ्जनगर्वगञ्जने, विलोचने, जयतः ।

चूडामणिः - अस्याः = कनकप्रभायाः, **चपले** = चञ्चले, **विपुले** = दीर्घे, **श्रिया**= कान्त्या, **हरिणीगर्धविमोचने- हरिण्याः** = मृग्याः, **गर्धम्** = दर्शनलिप्साम्, मोचयत इति मृगीनयनदर्शनलिप्सामोचने भवतः (गर्ध इति गृध्नु अभिकाङ्क्षायामिति धातोरच्-प्रत्यये रूपम्), **पुनः** = भूयः, **लसदञ्जने** = अञ्जनेन, अर्थात् कज्ज्लेन, सुशोभिते, **शिशुखञ्जनगर्वगञ्जने - शिशोः** = किशोरस्य, **खञ्जनस्य** = खञ्जरीटस्य, **गर्वम्**= सौन्दर्याभिमानम्, **गञ्जयेत इति** = परिहरत इति, किशोरखञ्जरीटसौन्दर्याभिमाननाशके इति (खञ्जरीटस्तु खञ्जनः - इत्यमरः), **विलोचने** = नयने, **जयतः** = सर्वोत्कृष्टे भूत्वा विराजेते । व्यतिरेकालङ्कारः ।।५९।।

दिव्यलक्ष्मी - मृगका आँखा हेर्न चाहने मानिसहरूको इच्छालाई आफ्नो आँखाको सौन्दर्य प्रकट गरेर व्यर्थ तुल्याउने कनकप्रभा आफ्ना ठूलाठूला र चञ्चल नयनयुगलले सुहाएकी छन् । फेरि कनकप्रभाका ती नयनयुगलमा गाजल लगाउँदा तिनले बालक खञ्जन चराको सौन्दर्यको अभिमानलाई समाप्त पारिदिन्छन् । मृगका आँखाको शोभा र खञ्जन चराको सौन्दर्यलाई मलिन तुल्याउने कनकप्रभाका नयनयुगल संसारमा सर्वोत्तम सौन्दर्यका खजाना बनेर रहेका छन् ।।५९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरलोचनवह्निकीलया मदनं भस्मकृतं महौषधी ।
पुनरानयितुं विनिर्मिते विधिना तन्नयने धरापते ।।६०।।

अन्वयः - धरापते !, विधिना, हरलोचनवह्निकीलया, भस्मकृतम्, मदनम्, पुनरानयितुम्, विनिर्मिते, महौषधी, तन्नयने (स्तः)।

चूडामणिः - **धरापते !** = पृथ्वीपते !, **विधिना** = दैवेन, **हरलोचनवह्निकीलया** - हरस्य = शिवस्य, **लोचने** = नयने, तयोः, या **वह्निकीला** = अग्निज्वाला, तया, शिवनयनानलज्वालया (वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् - इत्यमरः, स्त्रीत्वविवक्षायां अजाद्यतष्टापि कीलाशब्दो निष्पद्यते), **भस्मकृतम्** = भूतिसात्कृतम्, मदनम्= कामदेवम्, **पुनः** = भूयः, **आनयितुम्** = उज्जीवयितुम्, **विनिर्मिते** = रचिते, महौषधी = भेषजे, **तन्नयने** = कनकप्रभालोचने स्तः । कनकप्रभारूपदर्शनात् कामदेवजागरणं जायते इति हेतोः सा विलक्षणसौन्दर्या विश्वस्मिन् विश्वे जयतीति भावः । अतिशयोक्तिः ।।६०।।

दिव्यलक्ष्मी - हे राजन् ! शिवजीका रिसको आगोबाट निस्केको ज्वालाबाट खरानी बनेका कामदेवलाई फेरि जीवित गराएर सक्रिय बनाउन चाहने विधाताले कनकप्रभाका दुई नयनलाई सञ्जीवनी बुटीसमान अचूक औषधिका रूपमा निर्माण गरेका छन्।।६०।।

त्रिजगज्जययात्रिकं रतिस्मरयुग्मं ध्वजयष्टिरुत्तमा ।
अदसीयतनुर्विलोचनद्वितयं मीनयुगं तदङ्कितम् ।।६१।।

अन्वयः - रतिस्मरयुग्मम्, त्रिजगज्जययात्रिकम्, अदसीयतनुः, उत्तमा, ध्वजयष्टिः, तदङ्कितम्, विलोचनद्वितयम्, मीनयुगम् ।

चूडामणिः - **रतिस्मरयुग्मम्** - **रतिश्च** = कामप्रियाश्च, **स्मरश्च** = कामदेवश्च इति रतिस्मरौ, तयो **युग्मम्** = युगलम्, इति कामप्रियाकामदेवयुगलम्, **त्रिजगज्जययात्रिकम्**- यात्राऽस्यास्तीति **यात्रिकम्** = पर्यटकम्, **त्रयाणाम्** = त्रिसङ्ख्यकानाम्, जगताम्= लोकानाम्, यात्रिकमिति त्रिलोकीविजयाभियानकृत्, अस्ति, **अदसीयतनुः**= कनकप्रभावपुः, **उत्तमा** = सर्वश्रेष्ठा, **ध्वजयष्टिः** = पताकादण्डः, **विलोचनद्वितयम्**= कनकप्रभानयनद्वयम्, **तदङ्कितम्** = ध्वजयष्टौ स्थापितम्, **मीनयुगम्** = मत्स्ययुगलम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्ति । अत्र परम्परितरूपकम् ।।६१।।

दिव्यलक्ष्मी - स्वर्ग, मर्त्य र पातालमाथि विजयको पताका फहराउन विजयाभियानमा निस्केका यात्री रति र कामदेव हुन्। कनकप्रभाको कमनीय शरीर पताका अड्याउने आधारदण्ड हो। कनकप्रभाको ध्वजयष्टिरूप शरीरमा अङ्कित दुई नयन दुई माछा हुन्। तसर्थ रति र कामदेवको जोडा मत्स्यचिह्न (माछाको चिह्न)ले अङ्कित ध्वजा धारण गरेकै कारण मकरध्वजदम्पतीका नामबाट प्रसिद्ध छ ।।६१।।

नलिनीदलसत्स्थलस्थितो विजयां प्राप्य तिथिं स खञ्जनः ।
प्रविलोकयितुर्जयं दिशन्नपि तन्नेत्रयुगात् पलायते ।।६२।।

अन्वयः - नलिनीदलसत्स्थलस्थितः, सः, खञ्जनः, विजयाम्, तिथिम्, प्राप्य, प्रविलोकयितुः, जयम्, दिशन्, अपि, तन्नेत्रयुगात्, पलायते ।

चूडामणिः - **नलिनीदलसत्स्थलस्थितः** - **नलिन्याः** = कमलिन्याः, **दलानि** = पत्राणि एव, **सत्स्थलानि** = उत्तमस्थानानि, तेषु, **स्थितः** = विराजमानः, अर्थात् कमलिनीपत्ररूपोत्तमस्थाने आसीनः, **सः** = सौन्दर्याधिष्ठानभूतः, **खञ्जनः** = खञ्जरीटः, **विजयाम्** = विजयानाम्नीम्, **तिथिम्** = नवरात्रस्य दशमीं तिथिम्, **प्राप्य** = लब्ध्वा, **प्रविलोकयितुः** = विजयादशम्यां खञ्जरीटदर्शकस्य, **जयम्** = विजयम्, **दिशन्** = सङ्केतयन्, अपि, (विजयायां तिथौ खञ्जरीटदर्शनं विजयदायकं भवतीति शकुनशास्त्रम्) **तन्नेत्रयुगात्**= कनकप्रभानयनयुगलात् **पलायते** = आत्मानं सौन्दर्यहीनं मत्वा भृशायत इति तत्त्वम्। अतिशयोक्तिर्व्यतिरेकश्च ।।६२।।

दिव्यलक्ष्मी - कमलिनीको पातजस्तो निर्मल र सुन्दर आश्रयमा निवास गर्ने मङ्गलमय खञ्जन चराले नवरात्रको विजयातिथिमा आफ्नो दर्शन गर्ने अवसर पाउने दर्शकलाई सर्वत्र विजयी हुने कुराको सङ्केत गरेता पनि आफू कनकप्रभाका नयनयुगलका सामु हीनताबोध गर्दै पलायन गर्दछ ।।६२।।

रुचिहीनसुपीनमीनतः कथमेतन्नयनोपमा भवेत् ।
यदमू खलु वामदक्षिणश्रुतिमार्गानुगते न चाण्डजः ।।६३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - रुचिहीनसुपीनमीनतः, एतन्नयनोपमा, कथम्, भवेत्, यद्, अमू, वामदक्षिणश्रुतिमार्गानुगते, खलु, अण्डजः, च, न ।

चूडामणिः - **रुचिहीनसुपीनमीनतः** - **रुच्या** = कान्त्या, **हीनः** = रहित इति रुचिहीनः = कान्तिरहितः, **सुपीनः** = स्थूलः, चासौ, **मीनः** = मत्स्यः, तस्मात्, कान्तिरहितस्थूलमत्स्यात्, **एतन्नयनोपमा** - **एतस्याः** = कनकप्रभायाः, **नयने** = लोचने इति तयोः, **उपमा** = तुलना, **कथम्** = केन प्रकारेण, **भवेत्** = स्यात्, **यद्**= यस्मात्, **अमू** = कनकप्रभानयने, **वामदक्षिण-श्रुतिमार्गानुगते** - **वामश्च** = सव्यश्च, **दक्षिणश्च** = वामेतरश्च, इति वामदक्षिणौ, **श्रुतेः** = वेदस्य श्रोत्रस्य वा, **मार्गौ** = पन्थानौ, इति **श्रुतिमार्गौ** = दक्षिणाम्नायोत्त-राम्नायाभिधौ, तयोः, **अनुगते** = अनुयाते, कनकप्रभानयने, **खलु** = निश्चयेन, **अण्डजः** = मीनः, **न** = वामदक्षिणश्रुतिमार्गानुगतो नास्ति, तस्मात्, कनकप्रभानयनयुगलेन साकं तस्य तुलना योग्या न भवति । व्यतिरेका-लङ्कारः ।।६३।।

दिव्यलक्ष्मी - कान्तिहीन र मांसल माछासँग कनकप्रभाका आँखाहरूको तुलना हुन सक्दैन । कनकप्रभाका ती दुई आँखामध्ये बायाँ आँखा बायाँ कानसम्म र दायाँ आँखा दायाँ कानसम्म फैलिएको छ भने माछो शरीरपिण्डधारी जलीय जीव भएकाले त्यसरी फैलिने सम्भावना नै हुँदैन । अर्कोतर्फ कनकप्रभाका दुबै आँखाले वैदिक दक्षिणमार्ग अर्थात् वेदानुकूल दक्षिणाम्नाय भनेर चिनिने तन्त्रवाङ्मय र वाममार्ग अर्थात् वेदानुकूल उत्तराम्नाय भनेर चिनिने तन्त्रवाङ्मयलाई पनि नजर गर्ने अवसर पाएका छन्। तर अण्डज प्राणी माछाले यस्तो सौभाग्य पाएको हुँदैन। तसर्थ कनकप्रभाका दुई आँखासँग माछाको तुलना गर्न सकिँदैन।।६३।।

श्रुतिरेव हि तच्छुती मता यदिह व्यासकृता नवद्वयी ।
प्रविभज्य पुराणसंहतिः स्थितिमाप्तास्ति नवाङ्कसंविदा ।।६४।।

अन्वयः - श्रुतिः, एव, हि, तच्छुती, मता, यद्, इह, व्यासकृता, नवद्वयी, पुराणसंहतिः, नवाङ्कसंविदा, प्रविभज्य, स्थितिम्, आप्ता, अस्ति ।

चूडामणिः - **श्रुतिः** = त्रयी, **एव**, **हि** = निश्चयेन, **तच्छुती** = तत्कर्णेन्द्रिये, **मता** =

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकृता, **यद्** = यतो हि, **इह** = कनकप्रभायाम्, **व्यासकृता** = बादरायणरचिता, **नवद्वयी** = अष्टादशसङ्ख्यात्मिका, **पुराणसंहतिः** = पुराणपङ्क्तिः, **नवाङ्कसंविदा**= शाश्वतब्रह्मवाचकनवाङ्करूपेण सङ्केतेन, **प्रविभज्य** = विभागं कृत्वा, **स्थितिम्** = द्व्यङ्करूपां लब्धिमादाय, कनकप्रभाकर्णद्वयरूपेण स्थानम्, **आप्ता** = प्राप्ता, अस्ति। वस्तुतः कनकप्रभा केवलं सुन्दरी नास्ति, अपि तु वेदानां पुराणानां विज्ञात्री सा वेदपुराणमूर्तिरूपेणापि विराजते । यतो हि तस्याः श्रुतिद्वयं वेदपुराणप्रतिनिधितया वर्तत इति भावः । अत्र रूपकम्, अतिशयोक्तिश्च ।।६४।।

दिव्यलक्ष्मी - एउटा **श्रुति-** वेद नै कनकप्रभाका **श्रुती** - दुई कान बनेर सुहाएको छ। किनकि संसारमा भगवान् वेदव्यासद्वारा रचिएको १८ पुराणको समुदायले शाश्वत ब्रह्मको प्रतिपादक ९ अङ्कद्वारा आफ्नो १८ सङ्ख्यामा भाग गर्दा लब्धिका रूपमा प्राप्त हुने २ अङ्कलाई आधार बनाई कनकप्रभाका २ कानका रूपमा प्रतिष्ठा प्राप्त गरेको छ। अर्थात् मूल रूपमा श्रुति १ भए पनि श्रुतिप्रतिपाद्य ब्रह्मको निर्देशक अङ्क ९ द्वारा श्रुतिसार संवहन गर्ने १८ पुराणको भाग गर्दा लब्धिका रूपमा आएको २ अङ्कले दक्षिण श्रुतिमार्ग र वाम श्रुतिमार्गका रूपमा कनकप्रभाका दुई कानमा प्रतिष्ठा प्राप्त गरेको छ।।६४।।

चमरी कवरीमदश्शिरोविलसन्तीं प्रविलोक्य साम्प्रतम् ।
जघनेन बिभर्ति चामरं परिनिश्चित्य गतप्रयोजनम् ।।६५।।

अन्वयः - साम्प्रतम्, चमरी, अदश्शिरोविलसन्तीम्, कवरीम्, प्रविलोक्य, चामरम्, गतप्रयोजनम्, परिनिश्चित्य, जघनेन, बिभर्ति ।

चूडामणिः - साम्प्रतम् = अधुना, **चमरी** = चमरमृगी, **अदश्शिरोविलसन्तीम्- अमुष्याः** = कनकप्रभायाः, **शिरसि** = उत्तमाङ्गे, शीर्षे वा, **विलसन्तीम्** = शोभायमानाम्, **कवरीम्** = केशबन्धरचनाम्, केशसन्निवेशम्, केशविन्यासं वा (कवरी केशवेशः- इत्यमरः), **प्रविलोक्य** = गम्भीरतया नयनविषयीकृत्य, **चामरम्** = निजं पुच्छम्, **गतप्रयोजनम्- गतम्** = निर्गतम्, **प्रयोजनम्** = उद्देश्यम्, यस्य तत्, सौन्दर्यहीनत्वात् प्रयोजनहीनम्, **परिनिश्चित्य** = समन्तान्निर्णीय, **जघनेन**= कटिपश्चाद्भागेन, **बिभर्ति**= धारयति । चमरी निजं चामरं निष्प्रयोजनं मनुते, यतो हि कनकप्रभायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्यसम्पन्नां केशवेशरचनां विलोक्य हीनभावनाग्रस्ता सा निजं सौन्दर्यहीनं चामरं तिरस्कृत्य हीनाङ्गे नीत्वा तस्य व्यर्थतां प्रमाणयति । अत्रातिशयोक्तिर्व्यतिरेकश्च ।।६५।।

दिव्यलक्ष्मी - चौंरीगाई (चमरीमृग)ले कनकप्रभाको शिरमा सुहाएको केशपाश नजर गरेर मेरो चवँर कनकप्रभाका केशपाशका सामु व्यर्थ छ यसलाई मैले अब आफ्नो हीन अङ्गमा राख्नु नै उचित हुन्छ भन्ने निधो गरी त्यसलाई अहिले नितम्बनजिक पुऱ्याएर धारण गरिरहेको छ ।।६५।।

इदमीयशिरोरुहस्पृहां कलयन्ती कलया कलापिनी ।
निजबर्हरुचा शरत्कृतं लभते बर्हनिबर्हदण्डनम् ।।६६।।

अन्वयः - कलापिनी, निजबर्हरुचा, कलया, इदमीयशिरोरुहस्पृहाम्, कलयन्ती, शरत्कृतम्, बर्हनिबर्हदण्डनम्, लभते ।

चूडामणिः - कलापिनी = मयूरी, **निजबर्हरुचा**- **निजानाम्** = स्वकीयानाम्, **बर्हाणाम्**= पक्षाणाम्, **रुचा** = कान्त्या, **कलया** = सप्तरङ्गात्मकशिल्पसौन्दर्येण, **इदमीय-शिरोरुहस्पृहाम्** - **अस्याः** = कनकप्रभायाः, **शिरोरुहाणाम्** = कुन्तलानाम्, **स्पृहाम्**= सादृश्यलिप्साम्, **कलयन्ती** = धारयन्ती, सती अनधिकारचेष्टाहेतोः, **शरत्कृतम्** = शरदृतुना प्रदत्तम्, **बर्हनिबर्हदण्डनम्** - **बर्हाणाम्** = निजशिखण्डानाम्, **निबर्हस्य**= पतनस्य, **दण्डनम्**= दण्डम्, **लभते**= प्राप्नोति । मयूरी अपि निजशिखण्डसौन्दर्येण कनकप्रभायाः केशसौन्दर्यसमानतां कामयमानाऽनधिकारचेष्टाजन्यं दण्डं प्राप्नोतीति भावः। एतेन कनकप्रभाकेशपाशस्यानुपमं सौन्दर्यं व्यज्यते। अत्रोत्प्रेक्षाव्यतिरेकौ ।।६६।।

दिव्यलक्ष्मी - आफ्ना नौरङ्गी प्वाँख र नृत्यकलाले सुहाएकी मयूरी कनकप्रभाको केशपाशको सौन्दर्य नजर गरेर मेरा प्वाँख पनि यस्तै राम्रा भएका भए म कति खुसी हुने थिएँ भनी सौन्दर्यलुब्ध भएकी थिई। अरूको सौन्दर्यसम्पत्तिमा लालसा गर्दै नजर लगाएका कारण शरद् ऋतुमा त्यो मयूरीले आफ्ना सम्पूर्ण प्वाँख गुमाएर सौन्दर्यहीन भई पापको दण्ड भोगिरहेकी छ ।।६६।।

अदसीयललाटपट्टिकाष्टमतिथ्यब्जवपुर्विशेषिणी ।
मृगनाभिकृताङ्कमावहत्यमलां बिन्दुतनुश्च रोहिणीम् ।।६७।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः – अष्टमतिथ्यब्जवपुर्विशेषिणी, अदसीयललाटपट्टिका, मृगनाभिकृताङ्कम्, अमलाम्, बिन्दुतनुम्, रोहिणीम्, च, आवहति ।

चूडामणिः – अष्टमतिथ्यब्जवपुर्विशेषिणी – अष्टमी चासौ तिथिः, **अष्टमीतिथिः**= प्रतिपदातिथितो गणनया अष्टमाङ्कयुता तिथिः, तस्याम् **अब्जस्य** = चन्द्रस्य, **वपुः** = अर्धाकारम्, **विशेषयति** = कलयतीति सा, अष्टमीचन्द्राकृतिविशेषिता अथवा अष्टमीचन्द्राकारा, **अदसीयललाटपट्टिका** – **अमुष्याः** = कनकप्रभाया इयमिति अदसीया, **ललाटपट्टिका** = भालपट्टी अर्थात् कनकप्रभाया भूषणभूता भालपट्टी, **मृगनाभिकृताङ्कम्** – **मृगनाभिना** = कस्तूर्या, **कृतम्** = विहितम्, **अङ्कम्** = तिलकचिह्नम्, अर्थात् कस्तूरीरचितं तिलकम्, **अमलाम्**= निर्मलाम्, **बिन्दुतनुम्** = तिलकबिन्दुरूपामूर्ध्वगामिनीम्, **रोहिणीम्** = रोहिणीनक्षत्रत्वेन जगति प्रसिद्धां चन्द्रमसः प्रियां ताराम्, च, **आवहति**= बिभर्ति । एतेन यथा गगनतलं रोहिणीसहितेन चन्द्रमसा शोभते तथैव कनकप्रभाऽपि अर्धचन्द्रकारेण ललाटेन, मृगनाभितिलकबिन्दुरूपया रोहिण्या च शोभत इत्यर्थः । कनकप्रभाया भालपट्टिकाऽष्टमी–चन्द्राकारा वर्तते, कस्तूरी तिलकबिन्दवश्च रोहिणीरूपेण राजन्त इति रोहिणीचन्द्रावपि निजे भालपट्टे दधाना कनकप्रभा निस्सीमसौन्दर्यमयी वर्तत इति भावः । अत्र रूपकातिशयोक्ती ॥६७॥

दिव्यलक्ष्मी – अष्टमी तिथिमा उदाउने अर्धचन्द्रको आकारमा सुहाएको कनकप्रभाको निधार कस्तूरीको तिलकका साथै सौभाग्य एवं ऐश्वर्यलाई व्यक्त गर्ने तिलकबिन्दुका रूपमा रोहिणीनक्षत्रले पनि सुहाएको छ । यसरी रोहिणीका साथमा सुहाएका चन्द्रमालाई आफ्नै निधारमा धारण गर्ने कनकप्रभा चन्द्रमाभन्दा विशिष्ट छिन् भन्न सकिन्छ।।६७॥

शुकतुण्डमदोमुखाम्बुजं सरसं वर्णयतीति मत्सरि ।
शुकतुण्डमुवास तत्र किं विलसद्गन्धवहच्छलात् परम् ।।६८।।

अन्वयः – शुकतुण्डम्, अदोमुखाम्बुजम्, सरसम्, वर्णयति, इति, परम्, मत्सरि, शुकतुण्डम्, किम्, विलसद्गन्धवहच्छलात्, उवास ।

चूडामणिः – शुकतुण्डम् = पुराणेषु वर्णितस्य व्यासपुत्रस्य शुकदेवस्य मुखम्, **अदोमुखाम्बुजम्** – **अदस्याः** = कनकप्रभायाः, **मुखरूपम्** = आननरूपम्, **अब्जम्**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कमलम्, इति लक्ष्मीरूपायाः कनकप्रभाया मुखकमलम्, **सरसम्** = सानन्दम्, भक्तिरसाभिनिवेशसहितं वा, **वर्णयति** = निरूपयति, इति = ज्ञात्वा, **परम्**= अत्यन्तम्, मत्सरि= ईर्ष्याग्रस्तम्, **शुकतुण्डम्**= कीरमुखम्, **किम्** = किमु, **विलसद्गन्ध-वहच्छलात्- गन्धम्** = सुगन्धम्, **वहति** = धारयतीति **गन्धवहः**= नासिका, **विलसन्**= शोभायमानः, यो गन्धवहः, तस्य, **छलम्** = व्याजः, **तस्मात्**= सुरुचिरनासिका-व्याजात्, **उवास** = कनकप्रभामुखमण्डले अध्युवास ? अर्थात् कनकप्रभामुखमण्डले विराजमाना नासिका शुकनासिकाकारा वर्तते । शुकतुण्डाकारा नासिका वैदुष्यस्य व्यञ्जिका भवतीति शकुनशास्त्रम् । अत्रापह्नुतिनामालङ्कारः ।।६८।।

दिव्यलक्ष्मी - वेदव्यासका सुपुत्र शुकदेव स्वामीले आफ्नो मुखद्वारा श्रीमद्भागवत आदि पुण्यग्रन्थहरूमा लक्ष्मीरूप कनकप्रभाका मुखकमलमा टल्किने पवित्र सौन्दर्यको निरूपण गरेको देखेर उनीसँग ईर्ष्या गर्ने **शुकपक्षी**- सुगा चरो कनकप्रभाको नासिकाको रूपमा रहेको छ कि जस्तो लाग्छ। वास्तवमा कनकप्रभाको नाक सुगाको नाकजस्तै आकर्षक छ ।।६८।।

रदनाः फणिवल्लिपर्णभूरसरक्ता विलसन्ति तन्मुखे ।
मदनाहवतुष्टिपुष्टये भवितारः कतमोत्तरोष्ठके ।।६९।।

अन्वयः - तन्मुखे, फणिवल्लिपर्णभूरसरक्ताः, रदनाः, कतमोत्तरोष्ठके, मदनाहवतुष्टि-पुष्ट्ये, भवितारः ।

चूडामणिः - तन्मुखे = कनकप्रभाया आनने स्थिताः, **फणिवल्लिपर्णभूरसरक्ताः**- **फणिनाम्** = नागानाम्, प्रिया, या **वल्लयः** = नागवल्लीत्यभिधाना लताः, तासाम्, **पर्णेभ्यः** = पत्रेभ्यः, **भवन्ति** = जायन्ते इति **फणिवल्लिपर्णभुवः** = नागवल्लिलता-पत्रजाताः, ये **रसाः**= द्रवाः, तैः, **रक्ताः** = लोहिताः, अर्थात् नागवल्लिपत्रोत्पन्नद्रव-रञ्जिताः, **रदनाः**= दन्ताः, **कतमोत्तरोष्ठके**= कस्य भाग्यशालिनः पुरुषस्योर्ध्वोष्ठे, **मदनाहवतुष्टिपुष्टये - मदनस्य**= कामदेवस्य, यः, **आहवः** = रतिकेलिः, तस्मिन्, तुष्ट्याः = सन्तोषस्य, **पुष्टये** = परिपोषाय, **भवितारः** = सहयोगिनः सम्पत्स्यन्ते । प्रियतमेन साकं विधास्यमानायां कामकेलौ यद् दशनदंशनं तस्य सफलयितारस्तदीया रदना भविष्यन्तीति भावः।।६९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - नागवल्ली अर्थात् पानका पातबाट प्रकट हुने रातो रङ्गको रसले नुहाएजस्ता कनकप्रभाका सुन्दर दाँतहरू कुन भाग्यशाली पुरुषका ओंठमा सम्भोगको तृप्ति र तुष्टिका कारण बन्ने हुन् भन्ने मलाई कौतूहल लागिरहेको छ।।६९।।

मसृणो घुसृणप्रभोऽधरो धरतेऽस्या मरुमार्गबन्धुताम् ।
युवभिः कलितैः पिपासया श्रुतिमात्रेण गवेषितामृतः ।।७०।।

अन्वयः - पिपासया, कलितैः, युवभिः, श्रुतिमात्रेण, गवेषितामृतः, मसृणः, घुसृणप्रभः, अस्याः, अधरः, मरुमार्गबन्धुताम्, धरते ।

चूडामणिः - **पिपासया** - पातुम् इच्छा **पिपासा** = तृषा, तया, **कलितैः** = आक्रान्तैः, **युवभिः** = तरुणैः, **श्रुतिमात्रेण** = श्रवणमात्रेण, **गवेषितामृतः**- **गवेषितम्**= परिमार्गितम्, **अमृतम्** = सुधा, यस्मिन् सः, **मसृणः** = चिक्कणः, **घुसृणप्रभः**- **घुसृणस्य**= कुङ्कुमस्य, **प्रभा** = कान्तिः, इव प्रभा, यस्य सः, **अस्याः** = कनकप्रभायाः, **अधरः** = अधरोष्ठम्, **मरुमार्गबन्धुताम्**- **मरुमार्गस्य**- **मरोः** = गिरेः, **मार्गः** = पन्थाः, इति तस्य, गिरिमार्गस्य, **बन्धुः** = बान्धवः, तस्य भावः, मरुमार्गबन्धुता, ताम्, जलान्वेषणाय गिरिमार्गे गमन-प्रयासस्यानावश्यकतां द्योतयन् गिरिरिव यूनां पिपासायाः शमनं विधाय गिरौ बन्धुभावम्, अथवा **मरुमार्गस्य**= धन्वाध्वनः **बन्धुताम्**= मित्रताम्, **धरते**= दधाति (मरौ तु गिरिधन्वानौ-इत्यमरः), अर्थात् मरुस्थलं निर्जलमस्ति तत्र पिपासया गता युवानो नैराश्यं कलयन्ति, मरुश्च लज्जामनुभवति। परं कनकप्रभाया अधरौ मरौ सहानुभूत्या पिपासाकलितानां पिपासाशमनेन मरौ बन्धुतां विस्तारयतीति भावः, **धरते**= दधाति । अतिशयोक्तिः ।।७०।।

दिव्यलक्ष्मी - रतिरागको प्यासले आत्तिएका युवाहरू कनकप्रभा भन्ने मीठो नाम सुन्नासाथ मानसिक रूपमा जुन अधरोष्ठमा अमृतको अनुसन्धान गर्दछन् तिनको त्यो अधरोष्ठ अर्थात् तल्लो आठ प्यासाहरूका लागि तृप्ति प्रदान गर्ने अमृतरसको स्रोत बनेर रहेको छ। वास्तवमा कनकप्रभाको तल्लो आठ रहेसम्म प्यासले सताइएका मानिसहरूलाई पानी खोज्न पहाडका खोंचहरूमा जानुपर्दैन र मरुभूमिमा भौंतारिनु पनि पर्दैन ।।७०।।

त्रिजगद्गतकान्तिदर्शनं विधिरादर्शमदोमुखाम्बुजम् ।
विरचय्य भवत्कृते नु किञ्चिबुकं वृत्तमपि व्यधात् पुनः ।।७१।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - विधिः, त्रिजगद्गतकान्तिदर्शनम्, आदर्शम्, अदोमुखाम्बुजम्, भवत्कृते, विरचय्य, पुनः, चिबुकम्, अपि, वृत्तम्, व्यधात्, किम्, नु ।

चूडामणिः - **विधिः** = विधाता, **त्रिजगद्गतकान्तिदर्शनम्** - **त्रीणि** = त्रिसङ्ख्यकानि, जगन्ति = स्वर्गमर्त्यपातालाभिधा लोकाः, तेषु **गतायाः** = स्थितायाः, **कान्त्याः** = शोभायाः, **दर्शनम्** = प्रदर्शकम्, त्रिलोकीगतसकलसुषमादर्शनाधारभूतमित्यर्थः, आदर्शम् = दर्पणायितम्, **अदोमुखाम्बुजम्** - **अदस्याः** = कनकप्रभायाः, मुखाम्बुजम् = मुखकमलम्, **भवत्कृते** = तव कार्तवीर्यस्य कृते, **विरचय्य** = निर्माय, **पुनः** = भूयः, भवानेव कनकप्रभायै विधिना निर्मितः, अन्यो जनो नैव तस्याः पतिर्भवितुमर्हतीति, निषेधाय, **चिबुकम्**= कनकप्रभाया अधरोष्ठस्याधोवर्तिभागम्, चिबुं वा (अधस्तादधरोष्ठस्य चिबुः स्याच्चिबुकं तथा - इत्यमरः), **अपि** = निषेध-व्यञ्जकतया, **वृत्तम्** = वर्तुलम्, **व्यधात्** = रचयामास, **किम्** = किमु, **नु** = वितर्के। कनकप्रभाया मुखमण्डलं त्रिजगत्कान्तिसारभूतमिति हेतोर्विधिना तदीयं चिबुकं वृत्तं विधाय तस्याः स्वामित्वेन भवानेव योग्य इति तत्त्वं प्रतिपादितम्। उत्प्रेक्षालङ्कारः ॥७१॥

दिव्यलक्ष्मी - कनकप्रभाको निर्मल, मुखकमल त्रिलोकीमा फैलिएका सम्पूर्ण राम्रा पदार्थहरूको झलक देखाउने ऐना बनेर रहेको छ। वस्तुतः त्यो मुखकमल स्वर्ग, मर्त्य र पातालको सौन्दर्यपुञ्जलाई आत्मसात् गरी प्रकाशित गर्ने दिव्यदर्पण हो। ब्रह्माजीले यो दर्पण तपाइँका निमित्त रचेका हुन् । यसको रचना गरेपछि उनले यसमा अरूले आशा नगरून् भन्ने उद्देश्यले बाटुलो आकारको अर्थात् शून्यजस्तै गोलो आकारको चिउँडो बनाएर अरूलाई निषेध गरेझैं लाग्दछ॥७१॥

अदसीयगलाध्वना स्वरानखिलान् वाक् तनुते यदश्रमात् ।
तदवैमि विरञ्चिरादधे निजकान्ताकरकच्छपीमिह ॥७२॥

अन्वयः - यद्, वाक्, अश्रमात्, अदसीयगलाध्वना, अखिलान्, स्वरान्, तनुते, तत्, इह, विरञ्चिः, निजकान्ताकरकच्छपीम्, आदधे (इति), अवैमि ।

चूडामणिः - **यद्** = यस्मात्, कारणात्, **वाक्** = सरस्वती, **अश्रमात्** = विनैव प्रयासम्, **अदसीयगलाध्वना** - **अदस्याः** = कनकप्रभायाः, **गलस्य** = कण्ठस्य, **अध्वना** = मार्गेण, कनकप्रभायाः कण्ठमार्गेणेत्यर्थः, **अखिलान्** = सम्पूर्णान्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वरान् = षड्जधैवतपञ्चमादीन्, **तनुते**= विस्तारयति प्रकाशयति वा, **तत्** = तस्मात् हेतोः, **इह** = कनकप्रभायाः कण्ठे, **विरञ्चिः** = विधिः, **निजकान्ताकरकच्छपीम्**- **निजा** = स्वीया, चासौ **कान्ता** = प्रिया, सरस्वतीत्यर्थः, तस्याः, **करयोः** = हस्तयोः, या, **कच्छपी**= वीणा (कच्छपी वल्लकी भेदे डुलौ० - इत्यमरः), ताम्, सरस्वती-पाणिपल्लवयोर्विराजमानां वीणाम्, **आदधे** = स्थापितवान्, इति, **अवैमि** = जानामि। एतेन कनकप्रभा सकलस्वरझङ्कारमयीं सरस्वतीविपञ्चीं कण्ठे दधाना सरस्वतीमूर्ति-रासीदित्यवगम्यते । उत्प्रेक्षानुमानौ ।।७२।।

दिव्यलक्ष्मी - कनकप्रभाको बोलीबाट सहजै 'सरेगमपधनि' अर्थात् षड्ज, ऋषभ, गान्धार, मध्यम, पञ्चम, धैवत र निषाद नामक सात स्वर प्रकाशित हुन्छन्। त्यसकारण विधाताले कनकप्रभाको कण्ठभित्र सरस्वतीको वीणा स्थापित गरिदिएका छन् भन्ने विश्वास मैले गरेको छु ।।७२।।

कविता भविता रसान्विता वचनं सद्रचनं विवञ्चनम् ।
असमा सुषमेति तद्गलङ्गणयन् किं विदधे त्रिरेखकम् ।।७३।।

अन्वयः - विधिः (कनकप्रभायाः कण्ठे), कविता, रसान्विता, वचनम्, विवञ्चनम्, सद्रचनम्, असमा, सुषमा, च, भविता, इति, गणयन्, तद्गलम्, त्रिरेखकम्, विदधे, किम्।

चूडामणिः- **विधिः** = विधाता, कनकप्रभायाः कण्ठे, **कविता** = काव्यम्, **रसान्विता**= सरसा, **वचनम्** = वचः, **विवञ्चनम्** = निश्छलम्, **सद्रचनम्** = लालित्यपूर्णञ्च, **असमा** = अनुपमा, **सुषमा** = शोभा, च, **भविता** = भविष्यति, **इति** = इत्थम्, **गणयन्** = विचारयन्, **तद्गलम्** - **तस्याः** = कनकप्रभायाः, **गलः** = कण्ठः, इति तद् गलः, तम्, **त्रिरेखकम्**- **तिस्रः** = त्रिसङ्ख्याकाः, **रेखाः**= लेखाः, यस्मिन् तम्, रेखात्रयविलसितम्, **विदधे** = व्यधात्, **किम्** = किमु । अत्रोत्प्रेक्षालङ्कारः ।।७३।।

त्रिशक्तिः - कनकप्रभाकण्ठसौन्दर्यं विलक्षणमस्ति, रेखात्रयालङ्कृतः तस्याः कण्ठः शकुनशास्त्रानुसारेण सौभाग्यं सौन्दर्यं कवित्वशक्तिं सुमधुरं वाग्विशेषञ्च सूचयति । दमयन्तीकण्ठसौन्दर्यवर्णनविधौ श्रीहर्षेण नैषधेऽपि इयमेव रीतिरवलम्बिता -

कवित्वगानप्रियवादसत्यान्यस्या विधाता व्यधिताधिकण्ठम् ।
रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ।। (नै.च. ७।६७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी - कनकप्रभाको कण्ठभित्र **एक**– सरस कविता, **दुई**– निश्छल एवं ललित वाणी र **तीन** – अनुपम सुषमा रहनेछन् भनी गणना गर्दै विधाताले कनकप्रभाको कण्ठलाई तीनवटा रेखाले सम्पन्न बनाएको हो कि जस्तो लाग्छ ।।७३।।

अतिबालमृणालनालया स ममे तद्भुजयोर्युगं द्रुतम् ।
नवसङ्गमवाप्य कण्टकैर्भविता सद्रुचि राजहंस! ते ।।७४।।

अन्वयः - राजहंस ! सः, तद्भुजयोः, युगम्, अतिबालमृणालनालया, ममे, (तत्), ते, नवसङ्गम्, अवाप्य, द्रुतम्, कण्टकैः, सद्रुचि, भविता ।

चूडामणिः - राजहंस ! = नृपश्रेष्ठ !, **सः =** विधाता, **तद्भुजयोः =** कनकप्रभा-बाहुदण्डयोः, **युगम् =** युगलम्, **अतिबालमृणालनालया - अतिबालम् =** अति-कोमलम्, **मृणालम् =** कमलमिति, अतिबालमृणालम्, तस्य **नाला =** दण्ड इति तया, अतिसुकुमारकमलदण्डेन (नाला नालं मृणालं विस-मित्यमरः), **ममे =** अमास्त, वस्तुतः कनकप्रभायास्तद् बाहुयुगलं निरतिशयसुकुमारमस्ति, **ते =** भवतः, **नवसङ्गम् =** नूतनं सम्पर्कम्, **अवाप्य =** प्राप्य, **द्रुतम् =** शीघ्रम्, **कण्टकैः =** रोमाञ्चैः, **सद्रुचि =** सुरुचिरम्, **भविता =** भविष्यति । यथा बालमृणालनाला हंससान्निध्यमवाप्य सुरुचिरा विलोक्यते तथैव तव नवसङ्गं प्राप्य कनकप्रभाऽपि सुषमामयी भविष्यति । पुनश्च कनकप्रभा निरतिशयभुजसौकुमार्यविलसिता सुन्दरी वर्तते, सा राजहंसतुल्यस्य तव सङ्गमे सरोमाञ्चा कण्टकिता मृणालीतुल्या भविष्यतीति तत्त्वम्। अत्र भाविकालङ्कारः।।७४।।

दिव्यलक्ष्मी - हे राजहंस ! विधाताले कनकप्रभाका दुई भुजाको रचना गर्दा सुकोमल, कमलनाल हेरेर नापेपछि त्यही नापोको हिसाबबाट काम गरेको हुँदा कनकप्रभाका दुवै भुजा कमलनालजस्तै सुन्दर र आकर्षक देखिन्छन्। तपाइँ र कनकप्रभाको मङ्गलमय विवाह सम्पन्न भएपछि पहिलो मधु दिवसमा ती दुवै बाहुली काँडादार रोमाञ्चका कारण अत्यन्त आकर्षक बनेर टल्किने छन्।।७४।।

अवनीसुरभूरुहो भवांस्तव सा कल्पलताऽर्हति क्षितौ ।
वहतेऽङ्गुलिनालपल्लवां प्रतनुं या व्रततिं भुजच्छलात् ।।७५।।

अन्वयः - भवान्, अवनीसुरभूरुहः, सा, क्षितौ, तव, कल्पलता (त्वाम्), अर्हति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

या, भुजच्छलात्, अङ्गुलिनालपल्लवाम्, प्रतनुम्, व्रततिम्, वहते ।

चूडामणिः - भवान् = कार्तवीर्यः, **अवनीसुरभूरुहः - अवन्याः** = पृथिव्याः, सुराणां भुवि रोहतीति- **सुरभूरुहः** = कल्पपादप इति, पृथिवीकल्पपादपः, वर्तते, **क्षितौ** = पृथिव्याम्, **तव** = भवतः, **कल्पलता** = कल्पवल्ली, **सा** = कनकप्रभा, त्वाम्, **अर्हति** = वाञ्छति अथवा तव योग्या भवति, **या** = कल्पलतातुल्या कनकप्रभा, **भुजच्छलात्** = बाहुव्याजात्, **अङ्गुलिनालपल्लवाम् - अङ्गुलयः** = करशाखाः, एव **नालपल्लवा** = कमलनालकिसलयाः, यस्याः, ताम्, करशाखारूपकमलनाल-किसलययुताम्, **प्रतनुम्** = सूक्ष्माम्, **व्रततिम्** = लतिकाम्, (वल्ली तु व्रततिर्लता - इत्यमरः) **वहते**= धारयति । यथा कल्पपादपः कल्पलतया सुरलोके सुशोभते तथैव अवनीकल्पपादपसदृशो भवान् अवनीकल्पलतासमानया कनकप्रभया निरतिशयां शोभां प्राप्स्यत इति भावः। अत्रोपमालङ्कारः ।।७५।।

दिव्यलक्ष्मी - हे राजन् ! हजुर पृथिवीमा विराजमान कल्पवृक्ष हुनुहुन्छ । कनकप्रभाले आफ्ना मसिना लहराजस्ता दुई भुजा र पालुवाजस्ता औंलाहरू धारण गरेकी हुँदा ती पृथिवीमा हजुरकी कल्पलता बन्न योग्य छन् ।।७५।।

बहुमीलितपर्वसन्धयो मृदुला भारतगा गिरो यथा ।
नखलोहितवर्णशोभनाः करशाखाः परिभान्ति सुभ्रुवः ।।७६।।

अन्वयः - सुभ्रुवः, भारतगाः, गिरः, यथा, मृदुलाः, बहुमीलितपर्वसन्धयः, नखलोहित-वर्णशोभनाः, करशाखाः, परिभान्ति ।

चूडामणिः - सुभ्रुवः = सुन्दर्याः कनकप्रभायाः, **भारतगाः - भारतम्** = महाभारत-काव्यम्, **गताः** = प्राप्ताः, **गिरः** = वाचः, **यथा** = इव, **मृदुलाः** = सुकोमलाः, **बहुमीलितपर्वसन्धयः - बहु** = अत्यन्तमेव, मीलिताः = श्लिष्टाः सङ्कुचिता वा, **पर्वणाम्** = ग्रन्थीनां खण्डानां वा, **सन्धयः** = सङ्घटनानि सन्धानानि वा, (सन्धिः पुमान् सुरुङ्गायां भागे सङ्घटनेऽपि च - इति मेदिनी), यासु ताः, **नखलोहितवर्ण-शोभनाः - नखानाम्** = करशाखानाम्, **लोहितैः** = रक्तैः, **वर्णैः** = रङ्गैः, **शोभनाः**= मनोहराः, नखरक्तरङ्गरञ्जिता इत्यर्थः, **करशाखाः** = अङ्गुलयः, **परिभान्ति** = शोभन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रोपमालङ्कारः ।।७६।।

दिव्यलक्ष्मी - पूर्वापर सम्बन्धले जोडिएका, पर्वहरूका सन्धिले सम्पन्न र मधुर अर्थ प्रकाशित गर्ने वेदव्यासको रचना महाभारतमा रहेका वचनहरूझैं सुन्दरी कनकप्रभाका औंलाहरू पनि परस्परमा समान रूपले मिलेका सुन्दर संरचनाले सुहाएका र नङमा टल्किने लालिमाका कारण अत्यन्त आकर्षक देखिन्छन्।।७६।।

मृदु मांसलमंसमुन्नतङ्करनालाकरहाटसन्निभम् ।
रसकालमवाप्य सुभ्रुवो भविता कण्टकिताङ्कुरान्वितम् ।।७७।।

अन्वयः - सुभ्रुवः, मृदु, मांसलम्, उन्नतम्, करनालाकरहाटसन्निभम्, अंसम्, रसकालम्, अवाप्य, कण्टकिताङ्कुरान्वितम्, भविता ।

चूडामणिः - सुभ्रुवः = सुन्दर्याः कनकप्रभायाः, **मृदु** = सुकोमलम्, **मांसलम्** = स्थूलम्, **उन्नतम्** = समुन्नतम्, **करनालाकरहाटसन्निभम् - करनालाकरहाटाभ्याम्**= कमलदण्डकमलकन्दाभ्याम्, **सन्निभम्** = सदृशम्, **अंसम्** = स्कन्धम् (स्कन्धो भुजशिरोंऽसोऽस्त्री - इत्यमरः), **रसकालम्** = कामकेलिसमयम्, **अवाप्य** = लब्ध्वा, **कण्टकिताङ्कुरान्वितम् - कण्टकितैः** = रोमाञ्चितैः, **अङ्कुरैः** = रोमाङ्कुरैः, **अन्वितम्**= युक्तम्, अर्थाद्रोमाञ्चरञ्जितम्, **भविता** = भविष्यति । अत्र भाविकालङ्कारः।।७७।।

दिव्यलक्ष्मी - सुन्दरी कनकप्रभाको सुकोमल, स्थूल र माथि उठेको काँध कमलनाल र कमलकन्दझैं रमणीय देखिन्छ। तपाइँका साथ कनकप्रभाको कामविलासको अवसरमा त्यो आकर्षक अङ्ग काँध पनि अवश्य नै रोमाञ्चित हुनेछ।।७७।।

बदरं विपुलास्थि नो वरं विमलं चामलकञ्च तूवरम् ।
कुचकोरकयुग्ममुच्यतां सदृशं केन विदर्भभूश्रियः ।।७८।।

अन्वयः - बदरम्, विपुलास्थि, (अतः), नो, वरम्, विमलम्, आमलकम्, च, तूवरम्, (अतः) विदर्भभूश्रियः, कुचकोरकयुग्मम्, केन, सदृशम्, उच्यताम् ।

चूडामणिः - बदरम् = बदरीफलम् (कोलं कुवलफेनिले । सौवीरं बदरं घोण्टापि- इति मेदिनी), **विपुलास्थि** = स्थूलकीकसयुतम्, **नो** = नैव, **वरम्** = उत्तमम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विमलम् = निर्मलम्, **आमलकम्** = धात्रीफलम्, **च** = अपि, **तूवरम्** = कषायरसान्वितम्, (तूवरोऽश्मश्रुपुरुषे प्रौढाशृङ्गगवेऽपि च । पुरुषे व्यञ्जनत्यक्ते स्यात् कषायरसेऽपि च – इति मेदिनी) अतः, **विदर्भभूश्रियः** – **विदर्भभुवः** = विदर्भदेशस्य, **श्रीः** = लक्ष्मीरिति, विदर्भभूश्रीः, तस्याः, विदर्भभूमि–शोभाधामभूतायाः कनकप्रभायाः, **कुचकोरकयुग्मम्** – **कुचयोः** = स्तनयोः, **कोरकौ** = कलिके (कलिका कोरकः पुमान्– इत्यमरः), इति कुचकोरकौ, तयोः, **युग्मम्** = युगलमर्थात् स्तनचूचुकयुगलम्, **केन**= कतमेन वस्तुना, **सदृशम्** = समानमस्तीति, **उच्यताम्** = कथ्यताम्, अर्थात् ताभ्यां तुलनीयं नास्ति किमपि वस्त्विति बोध्यम् । अनन्वयालङ्कारः ।।७८।।

दिव्यलक्ष्मी – विदर्भदेशकी लक्ष्मीझैं सुहाएकी कनकप्रभाका छातीमा कोपिलाको आकारमा रहेका कुचहरूलाई बयरका दानासँग दाँजौं भने बयरमा हाडको मात्रा धेरै छ र त्यो गुलियो पनि हुँदैन। निर्मल एवं सफा अमलाका दानसँग दाँजौं भने त्यो टर्रो र अमिलो पनि हुन्छ। त्यस कारण कनकप्रभाका छातीमा सुहाउने कुचहरूको तुलना कुन पदार्थसँग गरौं ? कुनै पनि पदार्थ तुलनायोग्य देखिँदैन।।७८।।

कनकाचलजा शिला भवेत् सुरतक्ष्णा मसृणीकृता मुहुः ।
सुरभीपयसाभिषेचिता जनयेदङ्कुरयुग्ममुज्ज्वलम् ।।७९।।

तदपि स्फुरितौजसां भरैर्यदि वृत्तत्वमवाप्नुयात्तदा ।
दरनिर्गतकूर्चसूचिनस्तुलना स्यात् कनकप्रभोरसः ।।८०।।

(युग्मम्)

अन्वयः – सुरतक्ष्णा, मुहुः, मसृणीकृता, कनकाचलजा, शिला, सुरभीपयसा, अभिषेचिता, भवेत्, उज्ज्वलम्, अङ्कुरयुग्मम्, जनयेत्, तद्, अपि, स्फुरितौजसाम्, भरैः, यदि, वृत्तत्वम्, अवाप्नुयात्, तदा, दरनिर्गतकूर्चसूचिनः, कनकप्रभोरसः, तुलना, स्यात् ।

चूडामणिः – **सुरतक्ष्णा** – **तक्ष्णोति** = तनूकरोतीति **तक्षा** = शिल्पी, **सुराणाम्**= देवानाम्, तक्षा, इति सुरतक्षा, तेन, देववर्धकिना (तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् – इत्यमरः), **मुहुः** = पुनः, **मसृणीकृता** = चिक्कणीकृता, **कनकाचलजा**– **कनकस्य** = सुवर्णस्य, **अचलः** = पर्वत इति **कनकाचलः** = सुमेरुपर्वतः, तस्माज्जाता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति सुमेरुपर्वतसमुत्पन्ना, **शिला** = पाषाणः, **सुरभीपयसा** = कामधेनुदुग्धेन (सुरभिर्गवि च - इत्यमरः), **अभिषेचिता** = निषेचिता, **भवेत्** = स्यात्, **उज्ज्वलम्** = धवलम्, **अङ्कुरयुग्मम्** = अभिनवोद्भिद्युगलम् (अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि- इति मेदिनी), **जनयेत्** = उत्पादयेत्, **तदपि** = अङ्कुरयुग्ममपि, **स्फुरितौजसाम्** = चमत्कृतदीप्तीनाम्, **भरैः** = भारैः, **यदि** = चेत्, **वृत्तत्वम्** = वर्तुलत्वम्, **अवाप्नुयात्** = प्राप्नुयात्, **तदा** = तस्यामवस्थायाम्, **दरनिर्गतकूर्चसूचिनः - दरम्** = ईषत्, **निर्गतम्** = प्रकटम्, **कूर्चम्** = रोमराजिः, तत् सूचयतीति दरनिर्गतकूर्चसूचि, तस्य, ईषदुत्पन्न- रोमराजिसूचकस्य, (वाचस्पत्यानुसारेण कूर्चं भ्रूमध्यस्थितलोमोच्चयवाचकम्, परं लक्षणयाऽत्र तत्तुल्योदरवर्तिरोमराजिवाचकं ज्ञेयम्), **कनकप्रभोरसः - कनकप्रभायाः** = भोजकन्यायाः, **उरसः** = वत्सस्य (उरो वत्सञ्च वक्षश्च- इत्यमरः), **तुलना** = उपमा, **स्यात्** = भवेत् । कनकप्रभायाः सुकुमारमुज्ज्वलं विलक्षणसौन्दर्यसम्पन्नमनुपमञ्च वक्षःस्थलं दरनिर्गताभ्यां वर्तुलाभ्यामाकर्षकाभ्यां कुचाभ्यां शोभत इति भावः। अत्रातिशयोक्तिरलङ्कारः ।।७९-८०।।

दिव्यलक्ष्मी - देवताका शिल्पीद्वारा चिल्लो तुल्याइएको सुमेरु पर्वतको सुनौलो शिला होस्, कामधेनु गाईको पवित्र दूधले त्यसमाथि अभिषेक गरियोस् र त्यसले सेता दुई आँकुरा पैदा गरोस्, त्यसपछि ती आँकुरा चहकिलो कान्ति फैलाउँदै बाटुलो आकारमा परिणत होऊन्। त्यस बेलामात्र अलिअलि बाहिर निस्किएका दुई स्तनले सुहाएको कनकप्रभाको छातीसँग सुमेरुपवर्तको स्वर्णिम र गोलाकार शिलाको तुलना गर्न सकिनेछ ।।७९-८०।।

सरसी रसपूरितैव सा तदुरोजौ जलजातकोरकौ ।
गतभृङ्गरसावहो लसद्भ्रमरौ राजकरप्रकाशिनौ ।।८१।।

अन्वयः - सा, रसपूरिता, सरसी, एव, अहो, तदुरोजौ, जलजातकोरकौ, गतभृङ्गरसौ, लसद्भ्रमरौ, राजकरप्रकाशिनौ ।

चूडामणिः - सा = कनकप्रभा, **रसपूरिता** = सरसा अर्थात् यौवनारम्भजन्यानन्दमय- सौन्दर्यरसपरिपूर्णा, **सरसी** = सरोवरः, **एव** = निश्चयेन, **अहो** = आश्चर्यम्, **तदुरोजौ- तस्याः** = कनकप्रभायाः, **उरसि** = वक्षःस्थले, **जातौ** = उत्पन्नौ कनकप्रभाकुचौ,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलजातकोरकौ - **जले** = सलिले, **जातौ** = उत्पन्नाविति जलजौ, **कोरकौ** = जलोत्पन्नकमलकलिके एव, **गतभृङ्गरसौ** - **गतः** = निर्गतः, **भृङ्गानाम्** = भ्रमराणाम्, **रसः** = आनन्दः, याभ्याम्, तौ, भ्रमरतर्पणकार्यवर्जितौ, **लसद्भ्रमरौ**- **लसन्ति**= शोभन्ते, **भ्रमराः**= कामुकाः, ययोः, तौ, कामुकोल्लासहेतुभूतौ अथवा लसति, **भ्रमरः** = गैरिकवर्णः, ययोः, तौ, लसद्गैरिकवर्णौ, **राजकरप्रकाशिनौ**- **राज्ञः**= चन्द्रस्य, **कराः**= किरणाः, इति राजकराः, तान्, **प्रकाशयतः** = भासयतः, अथवा **राजकराभ्याम्** = कार्तवीर्यपाणिभ्याम्, प्रकाशिष्येते इति राजकरप्रकाशिनौ स्तः । हृदयाकर्षककुचयुगलेन विलसिता कनकप्रभा, सर्वाकर्षणविषयीभूता वर्तत इति भावः। अत्र रूपकं विरोधश्चालङ्कारौ ।।८१।।

दिव्यलक्ष्मी - कनकप्रभा आनन्दरसले भरिएकी सरोबर नै हुन्। तिनको छातीमा पैदा भएका बाटुलो आकारका साना साना कुचहरू कमलका कोपिला नै हुन्। जसरी रस नपाइने हुँदा कमलको कोपिलालाई भमराले त्यति रुचिपूर्वक हेर्दैनन् त्यसरी नै कनकप्रभाको छातीमा टुसाएका र नफक्रिएको कोपिलाजस्ता साना साना कुचहरू हेर्न भमराजस्ता विलासी तन्नेरीहरूको पनि रुचि हुँदैन । तर, कमलका कोपिला वरिपरि कोपिला कहिले फक्रिन्छ र रसपान गर्न पाइन्छ भन्ने आशाले भमराहरू झुम्मिएकै हुन्छन्। कनकप्रभाका कोपिलाजस्ता कुच भने **लसद्भ्रमरौ** - केही पहेंलो र केही रातोपन हुने जोगिया रंगले सुहाएका छन्। कमलका कोपिलाले **राजकरप्रकाशिनौ** - चन्द्रमाका किरणलाई प्रकाशित हुन व्यवधान पुऱ्याउँदैनन् तर सूर्यको किरण फैलिएपछि मात्र फक्रिन्छन्। कनकप्रभाका कोपिलाजस्ता कुच भने कामक्रीडाको अवसरमा तपाइँका हातबाट पोषक मर्दन पाएपछि विशाल आकार लिएर चहकिलो कान्तिका साथ प्रकाशित हुनेछन्।।८१।।

> तव चित्रचरित्रसंश्रवद्रुतसंविद्रुतवक्षसि स्थिरम् ।
> मदनाङ्गुलिनालचालितङ्गुलिकायुग्ममदःकुचौ किमु ।।८२।।

अन्वयः - अदःकुचौ, तव, चित्रचरित्रसंश्रवद्रुतसंविद्रुतवक्षसि, स्थिरम्, मदनाङ्गुलिनालचालितम्, गुलिकायुग्मम्, किमु ।

चूडामणिः - **अदःकुचौ** - **अदस्याः** = कनकप्रभायाः, **कुचौ** = स्तनौ, **तव** = कार्तवीर्यस्य, **चित्रचरित्रसंश्रवद्रुतसंविद्रुतवक्षसि**- **चित्रस्य** = विचित्रस्य, **चरित्रस्य**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चरितस्य, **संश्रवेण** = श्रवणेन, **द्रुतम्** = शीघ्रम्, **संविद्रुतम्** = द्रवीभूतम्, **वक्षः** = उरः, **तस्मिन्** = विचित्रचरित्रश्रवणशीघ्रविद्रुतहृदये, **स्थिरम्** = निश्चलतया, वर्तमानम्, **मदनाङ्गुलिनालचालितम्** - **मदनस्य** = कामदेवस्य, **अङ्गुलिनालेन** = करशाखा-कमलदण्डेन, **चालितम्** = सञ्चालितम्, कामदेवकरशाखाकमलदण्डसञ्चालितमित्यर्थः, **गुलिकायुग्मम्** = गोलकयुगलम्, **किमु** = वितर्के । अत्रोत्प्रेक्षालङ्कारः ॥८२॥

दिव्यलक्ष्मी - हे माहिष्मतीनरेश ! हजुरको विचित्र स्नेहले परिपूर्ण चरित्र श्रवण गरी भावमा तन्मय हुँदा पग्लिएको कनकप्रभाको कोमल छातीमा कामदेवले औंलाको दण्डद्वारा प्रहार गरिएका ती दुई गोली पहिले गढे र पछिबाट कुचका रूपमा प्रकट भएका हुन् जस्तो मलाई लागेको छ। वास्तवमा कनकप्रभाको छातीको आडमा ठडिएका दुई स्तनले कामदेवको गोलीकै काम गर्छन् । अर्थात् जसका नजरमा ती स्तन पर्दछन् त्यसलाई कामदेवका ती गोलीले बेहोस बनाउँछन् ॥८२॥

मुखनिर्जितराजमण्डलाऽधरसंस्थाननवासवा सदा ।
विनिबद्धवलिश्च मध्यतो न कथं साखिललोकवन्दिता ॥८३॥

अन्वयः - मुखनिर्जितराजमण्डला, अधरसंस्थाननवासवा, मध्यतः, विनिबद्धवलिः, च, सा, सदा, कथम्, अखिललोकवन्दिता, न ।

चूडामणिः - (प्रथमपक्षः) - मुखनिर्जितराजमण्डला- मुखमण्डलेन = आननबिम्बेन, **निर्जितम्** = पराजितम्, **राजमण्डलम्** = चन्द्रमण्डलम्, यया सा, आननबिम्बपराजितचन्द्रबिम्बेत्यर्थः, **अधरसंस्थाननवासवा** - **अधरे** = अधरोष्ठे, **संस्थानम्**= स्थितिः, यस्य सः - अधरसंस्थानः, अधरसंस्थानो **नवासवः** = नूतनोन्मा-दकमद्यरसः, यस्याः सा, अधरोष्ठनिहितनूतनोन्मादकमद्यरसा, **मध्यतः**= उदरमध्ये, **विनिबद्धवलिः** - **विनिबद्धा**= स्थापिता, बलिः = त्रिबलीरेखा, यया सा, त्रिवलीरेखा-समन्विता सकलसौन्दर्यसारमयीत्यर्थः, **सा** = कनकप्रभा, **सदा** = निरन्तरम्, **कथम्**= केन हेतुना, **अखिललोकवन्दिता- अखिलेन** = सकलेन, लोकेन = जनसमूहेन अथवा स्वर्गमर्त्यपातालादिलोकसमूहेन, **वन्दिता** = सम्मानिता, **न** = न भवेत् अर्थात् भवत्येव । सकलसौन्दर्यसाररूपा कनकप्रभा सर्वलोकवन्दिताऽस्तीति भावः । अत्र श्लेषोऽर्थान्तरन्यासश्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(**द्वितीयपक्षः**) – **मुखनिर्जितराजमण्डला** – **मुखेन** = वदनेन, **निर्जितम्**= पराजितम्, **राजमण्डलम्** = भूपमण्डलम्, यया सा, सकलराजकुलविजयिनी, **अधरसंस्थाननवासवा** – **अधरे** = अधोभागे, **संस्थम्** = स्थितम्, **आननम्** = मुखम्, यस्य सः, अधरसंस्थाननः, अधरसंस्थाननः कृतः, **वासवः** = इन्द्रः, यया सा, आननमण्डलेनेन्द्रस्वाभिमानविजयिनी, अथवा **अधरे** = अधरोष्ठे, **संस्थानम्** = स्थितिः, यस्य स चासौ, **नवः** = नूतनः, **आसवः** = मधु, इति तादृशोऽधरसंस्थाननवासवो विद्यते यस्यां सा, **मध्यतः** = मध्यभागे, **विनिबद्धवलिः** – **विनिबद्धाः**= धृताः, **वलयः**= वेदयः, यया सा, अथवा मध्यभागे, अथवा मध्यभागे **विनिबद्धाः** = स्थापिताः, **वलयः** = सकलपराजितजनसमुदायसमर्पितोपहाराः, यया सा, अथवा **मध्यभागे**= स्वनिवासमध्यस्थाने, **विनिबद्धाः** = स्थापिताः, **बलयः**= ईश्वरपूजोपकरणानि, यया सा, कनकप्रभा, अथवा त्रिवलीरेखामाध्यमेन पातालाकारे नाभौ **विनिबद्धः** = विष्णुनैव पाशीकृतः, **बलिः** = वैरोचनो धृतो यया सा, **सदा** = निरन्तरम्, **कथम्** = केन हेतुना, **अखिललोकवन्दिता**- **अखिलैः** = सम्पूर्णैः, **लोकैः** = जनैः, **वन्दिता** = पूजिता, **न** = न स्यादित्यर्थः ।।८३।।

दिव्यलक्ष्मी – आफ्नो मुखमण्डलद्वारा चन्द्रबिम्बलाई परास्त गर्ने अथवा सम्पूर्ण राजमण्डललाई दास तुल्याउने र आफ्नो सौन्दर्यले इन्द्रलाई तिरस्कार गर्ने अथवा आफ्नो तल्लो ओंठमा सधैं सबैलाई मुग्ध तुल्याउने नयाँ मदिराकै समान मीठो रस धारण गर्ने, शरीरको मध्यभागमा त्रिवलीरेखा धारण गर्ने अथवा त्रिवली रेखा धारण गर्ने निहुँबाट पातालाकार नाभिमा विष्णुले झैं राजा वलिलाई बाँधेर राख्ने अथवा आफ्नो गहिरो नाभिमा त्रिबलिरेखाको निहुँबाट राजा बलिलाई धारण गर्ने अपूर्व सौन्दर्यका कारण सबैकी सम्मानपात्र कनकप्रभा के विश्वद्वारा वन्दित विलक्षण सुन्दरी होइनन् त ? ।।८३।।

हरलोचनवह्नितापितो मदनोऽस्याः सरसे पयोधरे।
त्रिवलित्रिपथातटान्तरे रमते नाभिसरोवरेऽप्यलम् ।।८४।।

अन्वयः – हरलोचनवह्नितापितः, मदनः, अस्याः, सरसे, पयोधरे, त्रिवलित्रिपथातटान्तरे, नाभिसरोवरे, अपि, अलम्, रमते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - हरलोचनवह्नितापितः - पापं दुःखं वा हरतीति **हरः** = शिवः, तस्य, **लोचनम्** = तृतीयनेत्रम्, तस्य, **वह्निना** = अनलेन, **तापितः** = सन्तापितः, इति शङ्करतृतीयनयनाग्निज्वालाभस्मीकृतः, **मदनः** = कामदेवः, (स्तुतिं कुर्वत्सु देवेषु क्रुद्धस्याति हरस्य हि। तृतीयात् तस्य नेत्राद्वै निःससार ततो महान् ।। ललाटमध्यगात्तस्मात् स वह्निर्द्रुतसम्भवः। जज्वलोर्ध्वशिखो दीप्तः प्रलयाग्निसमप्रभः ।। उत्पत्य गगनं तूर्णं निपत्य धरणीतले । भ्रामं भ्रामं स्वपरितः पपात धरणीतले ।। भस्मसात् कृतवान् साधो ! मदनं तावदेव हि। यावच्च मरुतां वाचः क्षम्यतां क्षम्यतामिति ।।- शिवपुराणे रुद्रसंहितायां पार्वतीखण्डे, १९।१४-१६) **अस्याः** = कनकप्रभायाः, **सरसे** = सुधारसपूर्णे, **पयोधरे** = कुचे, **त्रिवलित्रिपथातटान्तरे** - तिस्रो वलयो यस्यां सा त्रिवलिः, सा एव **त्रिपथा**= भागीरथीति त्रिवलित्रिपथा, तस्याः, **तटयोः** = तीरयोः, **अन्तरे** = मध्ये इति त्रिवलिगङ्गातीराभ्यन्तरे, **नाभिसरोवरे** = नाभिचक्रसरसि, अपि, **अलम्** = पूर्णतया, **रमते**= रमणं कुरुते। शङ्करदग्धस्य मदनस्य जागरणहेतुभूताया कनकप्रभाया नाभिः पयोधरौ च नितरां कामरमणस्थलत्वेन उद्दीपका जाता इति भावः। रूपकमतिशयोक्तिश्च ।।८४।।

दिव्यलक्ष्मी - शिवजीको तेस्रो आँखाबाट निस्किएको आगाले डढाइएको कामदेव शीतल र सुन्दर आश्रय खोज्दै जाँदा कनकप्रभाको सरस कुचमण्डल र त्रिवलीरूप गङ्गाको तटमा रहेको नाभिरूप तलाउमा आई रमण गरिरहेजस्तो लाग्छ । किनकि उनको नाभि र कुचको दर्शनमात्रले दर्शकहरूका मनमा कामदेवको जागरण हुन्छ।।८४।।

कुचचक्रशिशुः सरोवरे विजिहीर्षुः किल नाभिसंज्ञके ।
यदुदस्यति शैवलन्नु तद् रुचिराऽस्यास्तनुरोमराजिका ।।८५।।

अन्वयः - नाभिसंज्ञके, सरोवरे, विजिहीर्षुः, कुचचक्रशिशुः, किल, यद्, शैवलम्, उदस्यति, तद्, एव, अस्याः, रुचिरा, तनुरोमराजिका, नु ।

चूडामणिः- नाभिसंज्ञके= कनकप्रभाया नाभिनामके, **सरोवरे** = सरसि, **विजिहीर्षुः**= विहारं कर्तुमिच्छुः, **कुचचक्रशिशुः- कुचरूपः** = स्तनरूपः, **चक्राकारः** = मण्डलाकारः, **शिशुः** = बालः, इति कुचरूपो वर्तुलाकारो बालकः, **किल** = निश्चयेन, **यद्** = यस्मात्, **शैवलम्** = जलनीलीम्, **उदस्यति** = उपरि निःसारयति, **तद् एव**= तत् शैवलमेव, **अस्याः** = कनकप्रभायाः, **रुचिरा** = हृदयहारिणी, **तनुरोमराजिका**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूक्ष्मरोमपङ्क्तिः, सञ्जातमिति नु= विभावयामि । कनकप्रभाया नाभिप्रदेशे यौवनारम्भसूचिका तन्वी रोमरेखा प्रादुर्भूतेत्यर्थः । उत्प्रेक्षालङ्कारः ।।८५।।

दिव्यलक्ष्मी - कनकप्रभाको नाभिसरोवरमा विहारको इच्छा गर्ने गोलाकार कुच रूप बालकले नाभिसरोवरमा फैलिएको हरियो झ्याउ हटाउँदा त्यो नै नाभिमाथिको सुन्दर रोमावलीका रूपमा प्रकट भएझैं लाग्छ ।।८५।।

सविधेऽस्ति पयोधरोन्नतिरिति संसूचयितुं विनिस्सृता ।
किमु सूक्ष्मपिपीलिकावलिस्तनुरोमावलिकैतवादिह ।।८६।।

अन्वयः - इह, सविधे, पयोधरोन्नतिः, अस्ति, इति संसूचयितुम्, तनुरोमावलिकैतवात्, सूक्ष्मपिपीलिकावलिः, किमु, विनिस्सृता ।

चूडामणिः - इह = कनकप्रभाया उरसि, **सविधे** = समीपे एव, **पयोधरोन्नतिः** - **पयोधरयोः** = कुचयोः, **उन्नतिः** = उन्नयनम्, **अस्ति** = वर्तत इति, **संसूचयितुम्** = सङ्केतयितुम्, **तनुरोमावलिकैतवात्** - **तन्वाः** = कृशायाः, **रोमावल्याः** = लोमराज्याः, **कैतवात्** = छलात्, **सूक्ष्मपिपीलिकावलिः** - पिपीलिकानामावलिरिति पिपीलिकावलिः सूक्ष्मा चासौ पिपीलिकावलिः, इति तन्वी पिपीलकपङ्क्तिः, (अपि पील्यते इति पिपीलिका, पीलप्रतिष्टम्भ इति वष्टिभागुरिरल्लोपमित्यपेरल्लोपः, स्वार्थे कन्, 'शनैर्याति पिपीलकः' इति प्रयोगात् पुँस्त्वमपि - इति रामाश्रमी), **किमु**= किम्, **विनिस्सृता**= प्रादुर्भूता । कनकप्रभायाः पयोधरसमीपेऽपि तन्वी रोमराजिः प्रकटी-भूता । इयं चास्या यौवनारम्भं विज्ञापयतीति भावः। अत्रापह्नुतिरुत्प्रेक्षा चालङ्कारौ ।।८६।।

दिव्यलक्ष्मी - नजिकै आकाशमाथि बादलहरू आएका छन् भन्ने सूचना दिन कमिलाहरूको ताँति प्रकट भएझैं कनकप्रभाको छातीमाथि अग्ला र सुन्दर कुचयुगल छन् भन्ने कुरा सबैलाई बोध गराउन साना-साना कमिलाहरूको ताँतिले मसिना रौंहरूको रूप लिएजस्तो लाग्छ ।।८६।।

तपसानुपमेन किं विधिः परमाणुं शुचिसर्गकारणम् ।
परिगृह्य विदर्भसिन्धुजोदरसृष्टिं विदधे विलोक्य च ।।८७।।

अन्वयः - विधिः, अनुपमेन, तपसा, शुचिसर्गकारणम्, परमाणुम्, परिगृह्य, विलोक्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च, विदर्भसिन्धुजोदरसृष्टिम्, विदधे, किम् ?

चूडामणिः - विधिः = विधाता, **अनुपमेन** = विलक्षणेन, **तपसा** = तपस्यया, **शुचिसर्गकारणम् - शुचेः** = शृङ्गारस्य, **सर्गस्य** = उत्पत्तेः, **कारणम्** = हेतुभूतमिति, शृङ्गारोत्पत्तिहेतुभूतम्, अथवा पवित्रनिर्मितिहेतुभूतम्, **परमाणुम्**= परमसूक्ष्मतत्त्वम्, **परिगृह्य** = गृहीत्वा, **विलोक्य च** = समीक्ष्य च, **विदर्भसिन्धुजोदरसृष्टिम् - विदर्भस्य** = विदर्भदेशस्य, या, **सिन्धुजा** = लक्ष्मीः, कनकप्रभा, तस्याः, **उदरस्य**= वक्षःस्थलस्य, **सृष्टिम्** = निर्मितिमर्थाद् विदर्भलक्ष्मीवक्षःस्थलनिर्मितिम्, **विदधे**= कृतवान्, **किम्**= किमु ? एतेन कनकप्रभायाः सूक्ष्मोदरत्वं व्यज्यते । उत्प्रेक्षालङ्कारः ।८७।।

दिव्यलक्ष्मी - के ब्रह्माजीले अरूसँग दाँज्न नसकिने कठोर तपस्या गरेर उज्ज्वल सृष्टिको हेतु अथवा शृङ्गाररसको उत्पत्तिको कारण परमाणु लिएर राम्ररी हेरी कनकप्रभाको पातलो कम्मर बनाएका हुन् त ? अन्यथा रतिरागको उद्दीपन गराउने यतिविधि पातलो कम्मर कसरी रचियो ? ।।८७।।

परमाणुरपि प्रदृश्यतां तपसा योगवतेति वाञ्छया ।
विदधे विधिना विदर्भभूकटिरन्येक्षणगोचरो न किम् ।।८८।।

अन्वयः - तपसा, योगवता, न, अन्येक्षणगोचरः, परमाणुः, प्रदृश्यताम्, इति, वाञ्छया, विधिना, विदर्भभूकटिः, अन्येक्षणगोचरः, किम्, न, विदधे ?

चूडामणिः- तपसा = नियमस्थितितनुसंयमकृच्छ्रसाधनादिरूपया तपस्यया, **योगवता**= अष्टाङ्गयोगसिद्धिं प्राप्तवता हरेश्चक्रावतारेण कार्तवीर्येणाथवा तादृशेनान्येन, **न अन्येक्षणगोचरः** - इतरजननयनादर्शनीयः, **परमाणुः** = पञ्चप्रकृत्यधिष्ठानभूत सूक्ष्म-मणुतत्त्वम्, **अपि**= च, **प्रदृश्यताम्**= ईक्ष्यताम्, **इति**= इत्थम्भूतया, **वाञ्छया** = इच्छया, **विधिना** = विधात्रा, **विदर्भभूकटिः** = कनकप्रभाश्रोणिः, (कटिः श्रोणिः ककुद्मती- इत्यमरः), **अन्येक्षणगोचरः** = सूक्ष्मत्वेऽपीतरजननयनदर्शनीयः, **न विदधे** = न कृतः, **किम्** = किमु ? अर्थादन्यजननयनप्रतीतिविषयः कृत एव । अत्रोत्प्रेक्षालङ्कारः ।।८८।।

त्रिशक्तिः - अत्र 'विदधे' इति भावकर्मणो रूपम्, कनकप्रभाश्रोणिर्नितरां सूक्ष्मा हृद्या चास्तीति भावः । सूक्ष्मोऽन्यजननयनागोचरः परमाणुः कार्तवीर्यादियोगवज्जननयनगोचरो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवेदितीच्छया विधाता तं परमाणुं कनकप्रभाकटिरूपे परिणमय्य दर्शनीयं सम्पादयामासेति सम्भावनासुस्पष्टा । पुनश्चोभयलिङ्गिनः कटिशब्दस्यात्र पुंसि प्रयोगस्तु 'अन्येक्षणगोचरः' इति पदस्य कटेः परमाणोश्च विशेषणत्वेनोपयोगाय विहित इति ज्ञेयम् । अत एवात्र अन्येक्षणगोचरः, इति पदस्योभयत्र योगः ।८८।।

दिव्यलक्ष्मी - पृथिवी, पानी, प्रकाश, हावा र आकाश यी पाँच प्रकारका प्रकृतिका सूक्ष्म आधार परमाणुलाई सामान्य प्राणीले आँखाले हेर्न सक्दैनन् । तपस्याद्वारा अष्टाङ्गयोग सिद्धि गरी योगीका रूपमा प्रसिद्ध भएका भगवान् नारायणका चक्रावतार कार्तवीर्यले परमाणुलाई नजर गर्न सकून् भन्ने इच्छा गरी ब्रह्माजीले परमाणुलाई कनकप्रभाको कम्मरका रूपमा परिणत गराई कार्तवीर्यलगायत योगीहरू र माता–पिताद्वारा नजर गर्न सकिने बनाएका होइनन् त ? अर्थात् बनाएकै हुन् ।।८८।।

त्रिजगज्जयिनो मनोभुवो रथचक्रं सुनितम्बदम्भतः ।
वहते महते रणाय सा परिसन्नद्धतरञ्च वर्तुलम् ।।८९।।

अन्वयः - सा, त्रिजगज्जयिनः, मनोभुवः, परिसन्नद्धतरम्, वर्तुलम् च, रथचक्रम्, सुनितम्बदम्भतः, महते, रणाय, वहते ।

चूडामणिः - सा = कनकप्रभा, **त्रिजगज्जयिनः** - त्रीणि जगन्ति = स्वर्गमर्त्य-पातालाख्या लोकाः, तानि जयतीति, त्रिजगज्जयी, तस्य, त्रिलोकीविजयिनः, **मनोभुवः**= मनसिजस्य, **परिसन्नद्धतरम्**= युद्धोद्‌धुरम्, **वर्तुलम्** = गोलाकारम्, अथवा वृत्ताकारम्, **रथचक्रम्** = स्यन्दनचक्रम्, **सुनितम्बदम्भतः**- शोभनश्चासौ **नितम्बः** = कटिपश्चाद्-भागः, तस्य **दम्भतः** = व्याजतः, **महते** = दीर्घकालव्यापिने, **रणाय** = कामयुद्धाय, **वहते**= धारयति। सुनितम्बिनी कनकप्रभा रतिरिव सौन्दर्यसम्पन्ना सर्वाकर्षणसमर्था वर्तते। तस्या नितम्बः कामकेलिक्षमताव्यञ्जको वर्तत इति भावः । अत्रापह्नुतिरलङ्कारः ।।८९।।

दिव्यलक्ष्मी - कनकप्रभाले तीनै लोकमा विजयपताका फहराउने कामदेवलाई कामक्रीडारूप महायुद्धमा सहयोग पुऱ्याउने उद्देश्यले बाटुलो र सुन्दर नितम्बका रूपमा कामरथ धारण गरेकी छिन् ।।८९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथुवृत्तनितम्बमण्डलोपरिशिञ्जन्मणिमञ्जुमेखला ।
दरघूर्णितनेत्रपङ्कजा शयिताऽङ्के कृतिनो नु कस्य सा ।।९०।।

अन्वयः - पृथुवृत्तनितम्बमण्डलोपरिशिञ्जन्मणिमञ्जुमेखला, दरघूर्णितनेत्रपङ्कजा, सा, कस्य, कृतिनः, अङ्के, शयिता, नु ।

चूडामणिः - पृथुवृत्तनितम्बमण्डलोपरिशिञ्जन्मणिमञ्जुमेखला - पृथोः = विशालस्य, **वृत्तस्य** = गोलाकारस्य च, **नितम्बस्य** = जघनस्य, **उपरि** = ऊर्ध्वभागे, **शिञ्जन्ती** = शब्दायमाना, **मञ्जुः** = मनोहरा, **मेखला** = रसना यस्याः सा, जघनोपरि शब्दायमानरत्नरमणीयरशना धारिणी, **दरघूर्णितनेत्रपङ्कजा - दरम्** = स्वल्पम्, यथा स्यात् तथा **घूर्णिते**= कटाक्षिते, **नेत्रपङ्कजे** = नयनकमले, यया सा, ईषत्कटाक्षितनयनकमला, **सा** = कनकप्रभा, **कस्य** = किन्नामधेयस्य, **कृतिनः** = भाग्यशालिनो जनस्य, **अङ्के** = वक्षःस्थले, **शयिता** = शयिष्यते, **नु** = इति वितर्कयामि । वस्तुतः पृथुवर्तुलसुन्दरनितम्बमण्डिता कटाक्षपातकुशला कनकप्रभा रमणी यस्य वामाङ्गिनी भविता स नितान्तमेव भुवि भाग्यशाली जनो भविष्यतीति भावः । रूपकम् ।।९०।।

दिव्यलक्ष्मी - विशाल र गोलाकार नितम्बमाथि मणिले बनेको सुन्दर मेखला (कन्दनी) धारण गर्ने, कमलजस्ता सुन्दर आँखाद्वारा कर्के नजरले हेर्ने ती कनकप्रभा कुन भाग्यशाली पुरुषकी अङ्कशायिनी (काखमा शयन गर्ने) सुन्दरी हुने छिन् ? अर्थात् त्यस्तो भाग्यशाली पुरुष को होला जसले अर्धाङ्गिनीका रूपमा कनकप्रभालाई वरण गर्नेछ भन्ने मेरो मनमा तर्क-वितर्क चलिरहेको छ ।।९०।।

कदली सरसापि चिक्कणा न विलोमापि तदूरुसन्निभा ।
करिराजकरोऽपि रोकवाननुलोमोऽपि न तत्तुलाङ्गतः ।।९१।।

अन्वयः - कदली, चिक्कणा, विलोमा, सरसा, अपि, तदूरुसन्निभा, न (अस्ति), अनुलोमः, अपि, रोकवान्, करिराजकरः, अपि, तत्तुलाम्, न गतः ।

चूडामणिः - कदली = रम्भा, **चिक्कणा** = स्निग्धा, **विलोमा** = लोमरहिता, **सरसा** = रसमयी, अपि, **तदूरुसन्निभा**- तस्या **ऊरू**= सक्थिनी इति तदूरू, तदूर्वोः **सन्निभा** = तुल्या इति कनकप्रभासक्थितुल्या, **न** = नास्ति, **अनुलोमोऽपि**= लोम-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहितोऽपि, **रोकवान्** = क्षिद्रवान्, (अथ कुहरं शुषिरं विलम् । छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः – इत्यमरः), **करिराजकरः** = गजराजशुण्डादण्डः, **तत्तुलाम्**= कनकप्रभोरुसादृश्यम्, **न गतः**= लोमवत्त्वाद्रन्ध्रवत्त्वाच्च न प्राप्तः। व्यतिरेकालङ्कारः।।९१।।
अस्मिन् पद्ये निम्नाङ्कितस्य पद्यस्य प्रभावो विलोक्यते –

कदली कदली, करभः करभः, करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः ।। (कुमारसम्भवम्)

दिव्यलक्ष्मी – केराको थाममा रौं हुँदैनन् । त्यो चिल्लो भए तापनि त्यसमा जलीय आर्द्रता रहिरहने हुँदा त्यसले कनकप्रभाका आकर्षक चिल्ला र ऊष्माले भरिएका तिघ्राहरूको बराबरी गर्न सक्दैन । हात्तीको सुँड माथिल्तिर मोटो र क्रमशः मसिनो हुँदै जाने हुनाले अनुलोम भएता पनि टुप्पामा प्वाल भएका कारण त्यसले कनकप्रभाको जाँघसँग दाँजिने क्षमता राख्दैन ।।९१।।

कनकप्रभया निजोरुणा नृप! रम्भा हरिणी पराजिता
करिराजकरोऽपि तद्भिया कुरुते सङ्कुचितं मुहुर्मुहुः ।।९२।।

अन्वयः – नृप !, कनकप्रभया, निजोरुणा, हरिणी, रम्भा, पराजिता, करिराजकरः, अपि, तद्भिया, मुहुर्मुहुः, सङ्कुचितम्, कुरुते ।

चूडामणिः – नृप ! = राजन् !, **कनकप्रभया** = भोजराजकुमार्या, **निजोरुणा** = स्वसक्थिना, **हरिणी** = अनुपमसौन्दर्यसम्पन्ना, **रम्भा** = एतन्नाम्नी स्वर्वेश्या, अथवा **हरिणी** = हरिद्वर्णा, **रम्भा** = कदली, **पराजिता** = तिरस्कृता, **करिराजकरः** = गजराजशुण्डोऽपि, **तद्भिया** = कनकप्रभाया ऊर्वोर्भयेन, **मुहुर्मुहुः** = पौनःपुन्येन, **सङ्कुचितम्**= अग्रभागसङ्कुचनम्, **कुरुते**= विदधाति (कुचसङ्कुचने इति धातो-र्निष्ठायां भावे क्तः) । अनेन पद्येन कनकप्रभाया जानूपरिभागस्य विलक्षणं सौन्दर्यं व्यज्यते । अतिशयोक्त्यलङ्कारः ।।९२।।

दिव्यलक्ष्मी – हे राजन् ! कनकप्रभाले आफ्ना तिघ्राहरूको अद्वितीय सौन्दर्यबाट हरिणी, शंखिनी, चित्रिणी र हस्तिनी वर्गका सुन्दरीहरूमध्ये हरिणीवर्गमा पर्ने रम्भा नामक अप्सराको सौन्दर्यलाई जितेकी छन्। कनकप्रभाका तिघ्राहरूको विचित्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्य देखेर परास्त भएको हात्तीको सूँढ पनि उनीसँग लाज मानेर बारम्बार प्वालसहितको सूँढको टुप्पालाई खोल्ने र बन्द गर्ने काम गरिरहन्छ।।९२।।

रुचिगर्वविवादशालिनोर्जघनं साक्षि तदूरुकाण्डयोः ।
परिगृह्य गजाशनच्छदं कुरुते सन्धिमिहान्तरा किमु ।।९३।।

अन्वयः - रुचिगर्वविवादशालिनोः, तदूरुकाण्डयोः, साक्षि, जघनम्, इह, अन्तरा, गजाशनच्छदम्, परिगृह्य, सन्धिम्, कुरुते, किमु ?

चूडामणिः - रुचिगर्वविवादशालिनोः - रुचेः = शोभायाः, **गर्वः** = अहङ्कारः, इति रुचिगर्वः, तेन परस्परम्, **विवादशालिनौ- विवादेन** = जल्पेन, **शालेते** = शोभेते, इति सौन्दर्यातिशयाहङ्कारेण विवदमानौ, **तदूरुकाण्डयोः - तस्याः** = कनकप्रभायाः, **ऊरुकाण्डौ** = जानूपरिभागौ, तयोः, **साक्षि** = प्रत्यक्षदर्शकम्, **जघनम्** = श्रोणिपूर्वभागः, **इह** = करिराजकराकारयोः कनकप्रभाकमनीयोरुकाण्डयोः, **अन्तरा**= मध्ये, **गजाशनच्छदम्** = करिराजभोज्यपिप्पलपत्राकारं मदनमन्दिररूपं पिधानम्, **परिगृह्य** = स्थापयित्वा, व्यवधानमाविष्कृत्येत्यर्थः, **सन्धिम्** = सन्धानम्, **कुरुते** = विदधाति, **किमु** = किम्, इति वितर्कयामि । विलक्षणसौन्दर्यसमन्वितौ ऊरुकाण्डौ पिप्पलपत्राकारं कामकेन्द्रञ्च कनकप्रभायाः सर्वोत्तमनारीस्वरूपं संसूचयन्ति । उत्प्रेक्षालङ्कारः ।।९३।।

दिव्यलक्ष्मी - कनकप्रभाका दुबै जाँघहरूले आआफ्नो सौन्दर्यको अभिमान प्रकट गर्दै एकआपसमा तँभन्दा म के कम भनी विवाद गरिरहेको देखेर कनकप्रभाका दुई जाँघको विवाद सुन्ने साक्षी नितम्बले अन्तमा ती दुबै जाँघको परस्पर राम्रो सम्बन्ध कायम गराउने उद्देश्यले तिनीहरूको ठीक बीचमा रहेको कामकेन्द्रमा पीपलको पातको आकारको राखिदिएर सम्झौता गराइदिएजस्तो लाग्दछ।। ९३।।

अदसीयपदारविन्दयोः सुषमामाप्तुमलन्तपस्यति ।
कमलञ्जलवाससंश्रवं धृतभृङ्गालिजपाक्षमालिकम् ।।९४।।

अन्वयः - धृतभृङ्गालिजपाक्षमालिकम्, जलवाससंश्रवम्, कमलम्, अदसीयपदारविन्दयोः, सुषमाम्, आप्तुम्, अलम्, तपस्यति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः - धृतभृङ्गालिजपाक्षमालिकम् - भृङ्गनाम् = भ्रमराणाम्, **आलिः**= पङ्क्तिः, एव **जपाक्षमालिका- जपाय** = भगवन्नामोच्चारणाय, **धृता** = गृहीता, **अक्षमालिका** = जपानुष्ठानमाल्यम्, येन तत्, अङ्गीकृतभ्रमरपङ्क्तिरूपजपमाल्यम्, **जलवाससंश्रवम् - जले** = सलिले, **वासः** = निवास इति जलवासः, तस्य **संश्रवः**= नियमः, प्रतिज्ञानं वा, यस्य तत्, (संविदागूः प्रतिज्ञाननियमाश्रवसंश्रवाः । अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः - इत्यमरः), **कमलम्** = नीरजम्, **अदसीयपदारविन्दयोः- अदस्याः** = कनकप्रभायाः, इमे इति अदसीये, **पदे** = चरणे एव, **अरविन्दे** = कमले इति, तयोः, कनकप्रभाचरणकमलयोः, **सुषमाम्** = कान्तिम्, **आप्तुम्** = लब्धुम्, **अलम्** = सर्वसमर्पणपूर्वकम्, **तपस्यति** = तपस्यामाचरति । कनकप्रभायाश्चरणकान्तिः सर्वातिशायिरामणीयकसम्पन्नाऽस्तीति विभाव्य तामाप्तुं कमलं स्वयं तपस्यतीति कथनेन तस्याश्चरणसौन्दर्यं कमलसौन्दर्यपराभवकारीति तथ्यं भवत्यवगतम्। रूपक गम्योत्प्रेक्षा च ।।९४।।

दिव्यलक्ष्मी - पानीभित्र बसी **तपस्या गर्छु** भन्ने प्रतिज्ञाका साथ भमराहरूको ताँतिलाई जप गर्ने मालाका रूपमा प्रयोग गरी कमलपुष्प कनकप्रभाका चरणयुगलमा रहेको सौन्दर्य प्राप्त गर्न राम्ररी तपस्या गरिरहेको छ ।।९४।।

जलजञ्जलवासजन्मना तपसा तत्पदताङ्गतं ननु ।
यदिदं श्रितचारुहंसकं कविवाक्यैर्मधुरैश्च संस्तुतम् ।।९५।।

अन्वयः - ननु, जलजम्, जलवासजन्मना, तपसा, तत्पदताम्, गतम्, यद्, श्रितचारुहंसकम्, इदम्, मधुरैः, कविवाक्यैः, संस्तुतम् ।

चूडामणिः - ननु= निश्चयमेव, **जलजम्** = कमलम्, **जलवासजन्मना - जले** = सलिले, **वासः** = निवासः, तस्मात्, जायते इति जलवासजन्मा, तेन, सलिलाशयनिवासजन्येन, **तपसा**= तपश्चरणेन, **तत्पदताम्** = कनकप्रभाचरणरूपताम्, **गतम्**= प्राप्तम्, **यद्**= कनकप्रभाचरणरूपताप्राप्तिहेतोः, **श्रितचारुहंसकम्- श्रितः** = आश्रितः, **चारुः** = रमणीयः, **हंसकः** = पादकटकः, यस्मिन् तत्, रमणीयनूपुरसहितम्, (हंसकः पादकटकः - इत्यमरः), **इदम्** = कनकप्रभापदरूपं कमलम्, **मधुरैः** = आह्लादकैः, **कविवाक्यैः** = काव्यैः, **संस्तुतम्** = प्रशस्तम् । कनकप्रभाया नूपुरान्वितं चरणकमलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नितान्तमेव शोभत इति भावः । उत्प्रेक्षालङ्कारः ॥९५॥

दिव्यलक्ष्मी - निश्चय नै कमलले जलमा डुबेर निरन्तर तपस्या गरेको पुण्यबाट कनकप्रभाको चरणकमल बन्ने सौभाग्य पाएको छ । त्यस कारण नै कविहरूले सुन्दर नूपुरले सुहाएका कनकप्रभाका चरणकमलको भूरिभूरि प्रशंसा गरेका छन् ॥९५॥

द्विविधे द्विविधां प्रवालके दधते तत्पदपङ्कजं घृणाम् ।
अवनीजमतीव कोमलं स्थिररागं न जडास्पदं पुनः ॥९६॥

अन्वयः - तत्पदपङ्कजम्, द्विविधे, प्रवालके, द्विविधाम्, घृणाम्, दधते, अवनीजम्, अतीव कोमलम्, न, स्थिररागम्, पुनः, जडास्पदम्, न, अतीव, कोमलम्, स्थिररागम्, (इति) ।

चूडामणिः - तत्पदपङ्कजम् = तच्चरणकमलम्, **द्विविधे** = द्विप्रकारके, **प्रवालके**= किसलये, विद्रुमे च (प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे- इति मेदिनी), **द्विविधाम्**= द्विप्रकाराम्, **घृणाम्** = जुगुप्सां करुणाञ्च (जुगुप्साकरुणे घृणे- इत्यमरः), **दधते** = धारयति, यतो हि **अवनीजम्** = पृथिव्यां समुत्पन्नम्, **अतीव कोमलम्** = अत्यन्तमेव मृदु, **न स्थिररागम्**= नैव नित्यलोहितमिति किसलयरूपं प्रवालं करुणादृष्ट्या विलोकयति, **पुनः** = भूयः, **जडास्पदम्** = डलयोरैक्याज्जले समुत्पन्नं विद्रुमम्, **न कोमलम्** = कठोरम्, **स्थिररागम्**= नित्यलोहितमस्तीति जुगुप्सापूर्वकं पश्यति । वस्तुतः कनकप्रभा-चरणपङ्कजं विद्रुमवाचकात् प्रवालात् किसलयवाचकात् प्रवालाच्चाह्लादकमस्तीति तत्त्वम् । श्लेषो व्यतिरेकालङ्कारश्च ॥९६॥

दिव्यलक्ष्मी - कनकप्रभाको चरणकमललाई वृक्षहरूको पालुवा भन्ने अर्थ बुझाउने प्रवाल र मुगा भन्ने अर्थ बुझाउने प्रवालमध्ये कुन चाहिँ प्रवालसँग तुलना गर्न सकिन्छ भन्ने कुरा छुट्याउन पारखीहरूलाई हम्मे-हम्मे परेको छ । पालुवाको अर्थ बताउने प्रवाल जमिनमा उम्रिएको हुन्छ र साह्रै कोमल पनि । अर्को पानीमा पैदा हुने मुगामणि भन्ने अर्थ बुझाउने प्रवाल चाहिँ कठोर र नित्य रातो रङ्गमा टल्किएको हुन्छ । पालुवा अर्थमा प्रसिद्ध प्रवाललाई कनकप्रभाको पाउले साह्रै कोमल भनी दयादृष्टिले हेर्दछ । फेरि पानीमा पैदा हुने मुगा भन्ने अर्थमा प्रसिद्ध प्रवाललाई साह्रै कठोर र सधैं गाढा रङ्गमा देखिने भएका कारण घृणा गर्दछ । तसर्थ पालुवा र मुगा दुबै अर्थमा प्रसिद्ध प्रवालहरू कनकप्रभाको चरणकमलसँग दाँजिन सक्दैनन् भन्ने मलाई लागेको छ ॥९६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि मानवती विदर्भजा रमणीयैर्मणिभिः समाचितम् ।
कनकान्वयमौलिभूषणं पदपद्मेन विलोडयत्यलम् ।।९७।।

अन्वयः - मानवती, विदर्भजा, रमणीयैः, मणिभिः, समाचितम्, कनकान्वयमौलि-भूषणम्, अपि, पदपद्मेन, अलम्, विलोडयति ।

चूडामणिः - मानवती = मानिनी, **विदर्भजा** = कनकप्रभा, **रमणीयैः** = आह्लादकैः, **मणिभिः** = रत्नैः, **समाचितम्**= समन्वितम्, **कनकान्वयमौलिभूषणम् - कनकस्य**= कनकनामकस्य, नृपस्य, **अन्वयः** = वंशः, इति कनकान्वयः, तस्य **मौलिः** = शीर्षम्, तस्य **भूषणम्** = अलङ्करणम्, कनकवंशचूडारत्नं कार्तवीर्यमित्यर्थः, अथवा **कनकान्वयमौलिभूषणम् - कनकस्य** = सुवर्णस्य, **अन्वयः** = वंश इति कनकान्वयः, तस्य **मौलिः** = सर्वोत्तमम्, **भूषणम्** = अलङ्करणम्, स्ववंशमौलिभूतसुवर्णनिर्मित-विभूषणमित्यर्थः, **अपि** = किम्, **पदपद्मेन**= चरणकमलेन, **अलम्** = सम्पूर्णतया **विलोडयति** = मृद्नाति । एतेन सुवर्णविभूषणादपि श्रेष्ठं कनकप्रभाचरणकमलमिति सिद्ध्यति । पुनश्च भाविनि समये कनकप्रभा कार्तवीर्यमपि वशीभूतं विधास्यतीति तथ्यमपि सूचितं भवति ।।९७।।

दिव्यलक्ष्मी - के मानिनी कनकप्रभाले रमणीय मणिद्वारा देदीप्यमान सुवर्णरचित चूडामणिलाई आफ्ना चरणकमलले राम्ररी कुल्चेर निस्तेज तुल्याएकी छैनन् ? अथवा मानिनी कनकप्रभाले कामक्रीडाको मधुमय अवसरमा कनकराजको वंशमा जन्मनुभएका तपाइँ कार्तवीर्यको शिरमा टल्किने चूडामणिमाथि आफ्नो चरणकमलले प्रहार गर्ने छैनन् ? ।।९७।।

शिखराग्रदती पदाम्बुजे नखरान्नातिखरान्बिभर्ति सा ।
रमणीगणमौलिमण्डलीमणिशाणोत्कषणैः समुज्ज्वलान् ।।९८।।

अन्वयः - शिखराग्रदती, सा, पदाम्बुजे, रमणीगणमौलिमण्डलीमणिशाणोत्कषणैः, समुज्ज्वलान्, नातिखरान्, नखरान्, बिभर्ति ।

चूडामणिः - शिखराग्रदती - शिखराग्राणि इव दन्ताः यस्याः सा, **शिखराग्रदती**= शिखरिदशना, **सा** = कनकप्रभा, **पदाम्बुजे** = चरणकमले, **रमणीगणमौलिमण्डली-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मणिशाणोत्कषणैः - रमणीनाम् = सुन्दरीणाम्, **गणः** = समूहः, तस्य **मौलीनाम्**= शिरसाम्, या **मण्डली** = समुदायः, तस्याः, **मणीनाम्** = रत्नानाम्, **शाणोत्कषणैः**= निकषपरीक्षणैः, **समुज्ज्वलान्** = अतिचमत्कृतान्, **नातिखरान्** = नातिकठोरान्, **नखरान्** = नखान्, **बिभर्ति** = धारयति । वस्तुतः कनकप्रभाचरणेषु नतानां विशिष्ट-सुन्दरीणां चरणपातेन तासां शिरःसु विराजमानायां मणिमण्डल्यां शाणोत्कषणमिव जातम् । तस्याश्चरणनखाश्च दीप्रा जाता इति तात्पर्यम् । एतेन कनकप्रभायाः सकल-सुन्दरीगणशिरोमणित्वं विवृतं भवति । अतिशयोक्तिरलङ्कारः ।।९८।।

दिव्यलक्ष्मी - हिउँझैं सेता एवं तिखा दाँतले सुहाएकी कनकप्रभाले संसारका मैं हुँ भन्ने सुन्दरीहरू आफ्नो चरणमा नुहिँदा तिनका शिरमा चम्किएका मणिहरूको घर्षण(रगड)का कारण उज्वल बनेका आफ्ना चरणकमलमा कोमल नङ धारण गरेकी छिन् ।।९८।।

> **मदमत्तमरालकामिनी मनसा मन्दगमाभिमानकम् ।**
> **विजहाति विदर्भसुभ्रुवो गतिमालोक्य विलासलालिताम् ।।९९।।**

अन्वयः - मदमत्तमरालकामिनी, विदर्भसुभ्रुवः, विलासलालिताम्, गतिम्, आलोक्य, मनसा, मन्दगमाभिमानकम्, विजहाति ।

चूडामणिः - मदमत्तमरालकामिनी - मदेन = यौवनोन्मादेन, **मत्ता** = उन्मत्ता, **मरालकामिनी** = हंससुन्दरी, **विदर्भसुभ्रुवः** - विदर्भदेशरत्नभूताया रमण्याः, कनकप्रभायाः, **विलासलालिताम्- विलासेन** = विभ्रमेण, **लालिता** = प्रसादिता, इति ताम्, मुखनेत्राद्यङ्गचेष्टाविशेषमनोहारिणीम् (यानस्थानासनादीनां मुखनेत्रादि-कर्मणाम् । विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ।। - सा.द. ३।९९-१००), **गतिम्** = गमनक्रियाम्, **आलोक्य** = समीक्ष्य, **मनसा** = चेतसा, **मन्दगमाभिमानकम्**- **मन्दः** = शिथिलः, चासौ **गमः** = गमनम्, तस्य, यः, **अभिमानकः** = गर्वः, तम्, मन्थरगमनगर्वम्, **विजहाति** = त्यजति । एतेन गतिदृष्ट्याऽपि कनकप्रभाऽनुपमा वर्तत इति व्यज्यते । व्यतिरेकः ।।९९।।

दिव्यलक्ष्मी - विदर्भसुन्दरी कनकप्रभाको विलासमय मन्द गति देखेर मदमत्त राजहंसीले पनि म मन्दगामिनी छु भन्ने अभिमानलाई मनैवाट हटाउँछे ।।९९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भृतसम्भ्रमविभ्रमा भ्रमद्भ्रमराल्यभ्रगजप्रियाऽभ्रमुः ।
परिदृश्य विदर्भजागतिं सविलासां करिणी हृणीयते ।।१००।।

अन्वयः - भृतसम्भ्रमविभ्रमा, भ्रमद्भ्रमराली, अभ्रगजप्रिया, अभ्रमुः, करिणी, सविलासाम्, विदर्भजागतिम्, परिदृश्य, हृणीयते ।

चूडामणिः - भृतसम्भ्रमविभ्रमा - **संभ्रमश्च** = भ्रान्तिश्च, **विभ्रमश्च** = शैघ्र्यमिति संभ्रमविभ्रमौ, **भृतौ** = धृतौ, तौ, यया सा, अनवस्थितचित्ता, **भ्रमद्भ्रमराली** - **भ्रमन्ती** = विचरन्ती, **भ्रमराणाम्** = मधुपानाम्, **आली** = पङ्क्तिः, यस्यां सा, चञ्चलद्विरेफपङ्क्तियुता, **अभ्रगजप्रिया** = ऐरावतस्य प्रिया, **अभ्रमुः** = मन्थरगामिनी, अथवा अभ्रमुनाम्नी (ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।। - इत्यमरः, तेषां करिण्यः क्रमशः- करिण्योऽभ्रमुः कपिला पिङ्गलानुपमा क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।। - इत्यमरः, एतेनैरावतस्य करिण्या नामाऽभ्रमुरिति स्पष्टम्), **करिणी**= गजिनी, **सविलासाम्** = विभ्रमपूर्णाम्, **विदर्भजागतिम्**- **विदर्भजायाः** = कनकप्रभायाः, **गतिम्** = सविलास-गमनम्, **परिदृश्य**= विलोक्य, **हृणीयते** = त्रपते । विदर्भजायाः कनकप्रभाया विलास-पूर्णा गतिरैरावतप्रियाया अभ्रमोः करिण्या गतेरपि श्रेष्ठा वर्तते, का वार्ताऽन्यासां सामान्यगजिनीनामिति भावः । व्याजस्तुतिव्यतिरेकालङ्कारौ ।।१००।।

दिव्यलक्ष्मी - अहिले कनकप्रभाको विलासमय मन्द मन्द हिँडाइ देखेर आत्तिएकी र चारैतिरबाट भमराहरूले घेरिएकी ऐरावत नामक हात्तीकी सुन्दरी अभ्रमुनामक हथिनीले नराम्रोसँग लाजको अनुभव गरिरहेकी छ ।।१००।।

कुतुकाद्विधिना व्यधायि सा कचपाशात् प्रपदाद् गुणास्पदम् ।
कृतिनः कतमस्य सा कृते कृतिरास्ते नु सरोजजन्मनः ।।१०१।।

अन्वयः - विधिना, कुतुकात्, कचपाशाद्, प्रपदात्, गुणास्पदम्, व्यधायि, सरोजजन्मनः, सा, कृतिः, कतमस्य, कृतिनः, कृते, आस्ते, नु ।

चूडामणिः - विधिना= ब्रह्मणा, **कुतुकात्** = कौतूहलात्, **कचपाशात्** = केश-बन्धादारभ्य प्रपदपर्यन्तम्, **प्रपदात्** = पादाग्रात्, कचपाशपर्यन्तम्, **गुणास्पदम्**=

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकलगुणनिवासललामधाम, **सा** = अनुपमसौन्दर्यविलसिता, **व्यधायि** = रचिता, **सरोजजन्मनः** = कमलासनस्य, **कृतिः** = रचना, **सा** = कनकप्रभा, **कतमस्य** = किंगुणविशिष्टस्य, किन्नामधेयस्य वा, **कृतिनः** = पुण्यवतो जनस्य, **कृते** = उपभोगाय, **आस्ते** = अस्ति, **नु** = इति वितर्कयामि। कनकप्रभासदृश्यः शीलगुणरूपविलसिताः सुन्दर्यः पुण्येनैव लभ्यन्त इति भावः । रूपककाव्यलिङ्गालङ्कारौ ।।१०१।।

दिव्यलक्ष्मी - तीनै लोकमा रहेका सुन्दरीहरूको सौन्दर्यलाई पराजित गर्ने अपूर्व सुषमाले सुहाएकी विचित्र सुन्दरी बनाउँछु भनी कौतूहलका साथ ब्रह्माजी कनकप्रभाको रचना गर्न प्रवृत्त भए । केशपाशदेखि कुर्कुच्चासम्मका अङ्ग तयार भए । ब्रह्माजीले तयार गरिएका ती ती अङ्गहरूलाई उज्ज्वल, चिल्ला, कलात्मक र आभामय तुल्याउने उद्देश्यले कुर्कुच्चादेखि शिरसम्मका सबै अङ्ग प्रत्यङ्गहरूका संरचनाको निरीक्षण परीक्षण गरी आवश्यक थपघट गर्दै ती अङ्गहरूमा अपूर्व सौन्दर्य भर्ने काम गरे । यसरी दोहोऱ्याई तेहेऱ्याई परिष्कार गरेपछि कनकप्रभाका ती सबै अङ्ग प्रत्यङ्गहरू उज्ज्वल, सुषमामय र आकर्षक देखिए । फलस्वरूप प्रत्येक अङ्गमा टल्किएको सौन्दर्यका कारण कनकप्रभा अपूर्व सुन्दरी बनेर पैदा भइन् र अहिले विश्वमा विलक्षण सुन्दरीका रूपमा प्रसिद्ध भएकी छन् । ब्रह्माजीको अपूर्व रचना यी सुन्दरी कुन भाग्यशाली पुरुषका लागि रचिएकी हुन् भन्ने जिज्ञासाले मलाई चञ्चल बनाइरहेको छ ।।१०१।।

अधुना मधुनातिसाधुना विधुनामात्यवरेण सीधुना ।
मदनः प्रचिकीर्षते नु किं कृतमन्त्रः सदनं तदङ्गकम् ।।१०२।।

अन्वयः - अधुना, अतिसाधुना, मधुना, अमात्यवरेण, विधुना, सीधुना, कृतमन्त्रः, मदनः, किम्, तदङ्गकम्, सदनम्, प्रचिकीर्षते, नु ।

चूडामणिः - अधुना = सम्प्रति, **अतिसाधुना** = कुलीनेन, सज्जनेन अथवा अतिरमणीयेन, (सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्- इत्यमरः) **मधुना** = वसन्तेन, पुष्परसेन अथवा क्षौद्रेण, (मधु मद्ये पुष्परसे क्षौद्रेऽपि- इत्यमरः) **अमात्यवरेण**= मन्त्रणादानकुशलेन मन्त्रिणा, **विधुना** = चन्द्रेण अथवा विष्णुना, (विधुः श्रीवत्सलाञ्छनः- इत्यमरः) **सीधुना** = मैरेयेण, (मैरेयमासवः सीधु- इत्यमरः) **कृतमन्त्रः**= विहितमन्त्रणः, **मदनः** = कामदेवः, **किम्** = किमु, **तदङ्गकम्** = कनकप्रभाशरीरम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदनम् = पुष्परसस्य रमणीयतायाः, अमृतस्य, निःश्रेयसस्य, मैरेयस्य, चन्द्रसौन्दर्यस्य वा धाम, **प्रचिकीर्षते**= कर्तुमिच्छति, **नु**= इति वितर्कयामि । अनुप्रासोत्प्रेक्षालङ्कारौ।।१०२।।

दिव्यलक्ष्मी - अहिले कामदेव सौन्दर्यको धाम वसन्त ऋतु, अमृतको मुहान चन्द्रमा र उन्मादनकलामा निपुण मदिराजस्ता पदार्थहरूसँग राम्ररी मन्त्रणा गरी यौवनको आरम्भ र बाल्यकालको अवसानका कारण अतिरमणीय देखिने कनकप्रभाका अङ्ग-प्रत्यङ्गहरूमा आह्लादकता, अमृतमयता, उन्मादकता र सौम्यता भर्न अत्यन्त उत्सुक भएझैं लाग्दछ ।।१०२।।

इयमस्ति नरेन्द्रनन्दिनी शिशुताप्रेमवतीति यौवनम् ।
शिशुतामवलम्ब्य तत्तनौ रमते सम्प्रति सत्प्रतिश्रवम् ।।१०३।।

अन्वयः - सम्प्रति, सत्प्रतिश्रवम्, यौवनम्, इयम्, नरेन्द्रनन्दिनी, शिशुताप्रेमवती, इति, शिशुताम्, अवलम्ब्य, तत्तनौ, रमते ।

चूडामणिः - सम्प्रति = साम्प्रतम्, **सत्प्रतिश्रवम्** - **सत्यः** = यथार्थः, **प्रतिश्रवः**= प्रतिज्ञा, यस्य तत्, सत्यप्रतिज्ञम्, अर्थात् शिशुताया अनन्तरमागमनस्य प्रतिज्ञा यस्य सत्या भवति तादृशम्, **यौवनम्** = तारुण्यम्, **इयम्** = एषा, **नरेन्द्रनन्दिनी** = भोजपुत्री कनकप्रभा, **शिशुताप्रेमवती** = शैशवानुरागिणी, अस्ति **इति** = इत्थं विचार्य तस्याः प्रीत्यर्थम्, **शिशुताम्** = शैशवम्, **अवलम्ब्य** = अङ्गीकृत्यार्थात् स्वयमपि शिशुरूपेण स्थित्वा, **तत्तनौ** = कनकप्रभाकमनीयकलेवरे, **रमते** = क्रीडति । एतेन कनकप्रभायां यौवनस्य प्रारम्भिकं पदार्पणं सूच्यते । काव्यलिङ्गं गम्योत्प्रेक्षाविरोधौ च ।।१०३।।

दिव्यलक्ष्मी - शैशव अवस्थाको अन्तिम समयमा पनि शिशुसुलभ गुण चञ्चलता, सौम्यता, सरला र स्पष्टता देखिनाले कनकप्रभा बालभावमा नै रमाउन चाहन्छिन् भन्ने कुरा थाहा पाएर मनमनै आत्तिएको यौवनले कनकप्रभाका अङ्ग प्रत्यङ्गमा आफ्नो अधिकार कायम गर्न आफू पनि शिशुरूप बनेर प्रवेश गरिरहेको छ । अर्थात् म पनि शिशु नै बन्दछु भन्ने प्रतिज्ञा गरी शिशुभावमा रहेर रमाएको छ ।।१०३।।

शिशुता युवता च तत्तनौ निजनिघ्नत्वविधित्सया किमु ।
कलहं कलहंससंरुवत्कलकाञ्च्यास्तनुतोऽद्य कैतवात् ।।१०४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - अद्य, शिशुता, युवता, च, तत्तनौ, निजनिघ्नत्वविधित्सया, कलहंससंरुवत्कलकाञ्च्याः, कैतवात्, कलहम्, तनुतः, किमु ।

चूडामणिः - अद्य = सम्प्रति, **शिशुता** = शैशवम्, **युवता** = यौवनम्, च, **तत्तनौ**= कनकप्रभाकलेवरे, **निजनिघ्नत्वविधित्सया** - विधातुमिच्छा **विधित्सा**= चिकीर्षा, **निजस्य** = स्वस्य, **निघ्नत्वस्य** = स्वाधीनत्वस्य, **विधित्सा** = चिकीर्षा, तया, **कलहंससंरुवत्कलकाञ्च्याः** - **कलहंसः** = राजहंसः, **इव** = यथा, **संरुवती** = शब्दायमाना, **कलकाञ्ची** = मधुरा रसना, तस्याः, अथवा **कलहंसेन** = कटकेन सह, शब्दायमाना, मधुरा रसना, तस्याः, **कैतवात्** = व्याजात्, **कलहम्** = वाग्युद्धम्, **तनुतः** = विस्तारयतः?, **किमु** = किम्। उत्प्रेक्षालङ्कारः॥१०४॥

दिव्यलक्ष्मी - शरीरमा छाएको शैशव र प्रतिदिन तिनका अङ्गहरूमा विकसित हुँदै गरेको मोहकताका कारण लहसिएको यौवन यी दुबैले कनकप्रभामाथि आफ्नो अधिकार कायम गर्न तँछाडमछाड गरिरहेका छन् । यो प्रतिस्पर्धामा ती दुबैले आ-आफ्नो कलहको स्वरलाई कनकप्रभाको कमरमा रहेको कन्दनीको मणि र पाउमा रहेको नूपुरको ध्वनिको माध्यमबाट प्रकट गरिहरेका छन् ॥१०४॥

युवतां युवता स्मरेण तच्छिशुताशेषनिषेधनाय किम् ।
हृदये कुचधीरदर्शको धृतरोमावलिदण्ड आहितः ॥१०५॥

अन्वयः - युवताम्, युवता, स्मरेण, तच्छिशुताशेषनिषेधनाय, हृदये, धृतरोमावलिदण्डः, कुचधीरदर्शकः, आहितः, किम् ?

चूडामणिः - युवताम् = कनकप्रभाशरीरे तारुण्यम्, **युवता** = योजयता, **स्मरेण**= कामदेवेन, **तच्छिशुताशेषनिषेधनाय** - **तस्याः** = कनकप्रभायाः, **शिशुतायाः** = बाल्यस्य, **शेषः** = अवशिष्टो भाग इति **तच्छिशुताशेषः** = कनकप्रभाबाल्यावशिष्टभागः, तस्य, **निषेधनम्** = निषेधः, तस्मै, कनकप्रभाया अवशिष्टशैशवस्य स्थानाभावप्रदर्शनाय, **हृदये** = कनकप्रभाया वक्षःस्थले, **धृतरोमावलिदण्डः** - **रोम्णाम्** = लोम्नाम्, **आवलिः** = पङ्क्तिरिति रोमावलिः, सा एव **दण्डः** = लगुडः, **धृतः** = अङ्गीकृतः, लोमराजिलगुडो येन सः, **कुचधीरदर्शकः**- **धीरः** = धैर्यवान्, च,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असौ, **दर्शकः** = साक्षी, इति धीरदर्शकः, **कुचः** = उरोजः, साक्षी, **आहितः** = स्थापितः ?, **किम्** = किमु ? शैशवेऽपुष्टे सत्यपि कनकप्रभायां कलेवरपुष्टिवशात् कुचादीनि यौवनलक्षणानि प्रादुर्भूतानीति तत्त्वम् । उत्प्रेक्षालङ्कारः ॥१०५॥

दिव्यलक्ष्मी – कनकप्रभाको कमनीय कलेवरमा थाहै नपाइकन यौवनको पदार्पण गराउन चाहने कामदेवले बाँकी रहेको शैशवलाई अब तिम्रो समयसीमा टुङ्गिंदै छ, कनकप्रभाको शरीरमा आफ्नो अधिकार कायम गरिराख्ने मोह छाडिदेऊ भनी शैशवलाई सुस्तरी सुस्तरी पन्छाउने हेतुले कनकप्रभाको छातीको खोल्सीमा उम्रिएका मसिना रौंहरूलाई छडी बनाई धारण गर्ने र कनकप्रभाको यौवन विकासक्रमलाई धैर्यपूर्वक नियालेर हेर्ने कुचलाई पहरेदार बनाएर नियुक्त गरेको हो कि ? ॥१०५॥

अनुदिनरममाणयौवनोष्मप्रसरविशीर्णशिशुत्वशैत्यमान्द्या ।
शुचिरसलतिका कियत्पुराणाभिनवदलेव नरेन्द्रजाऽद्य भाति ॥१०६॥

अन्वयः – अद्य, नरेन्द्रजा, अनुदिनरममाणयौवनोष्मप्रसरविशीर्णशिशुत्वशैत्यमान्द्या, अभिनवदला, कियत्पुराणा, शुचिरसलतिका, इव, भाति ।

चूडामणिः – **अद्य** = सम्प्रति, **अनुदिनरममाणयौवनोष्मप्रसरविशीर्णशिशुत्वशैत्यमान्द्या** – **शिशुत्वम्** = शैशवम्, च, **शैत्यम्** = शीतलत्वम्, च, **मान्द्यम्** = मन्दता, चेति शिशुत्वशैत्यमान्द्यानि, दिने दिने इति **अनुदिनम्** = प्रतिदिनम्, **रममाणस्य**= रन्तुं शीलस्य, **यौवनस्य** = तारुण्यस्य, **ऊष्मणः** = तापस्य, **प्रसरेण** = विस्तारेण, **विशीर्णानि** = छिन्नभिन्नानि, शिशुत्वशैत्यमान्द्यानि, यस्याः सा, प्रतिदिनरमणशीलतारुण्यतेजोविसारदूरीकृतशैशवजाड्यमन्दभावेत्यर्थः, **नरेन्द्रजा** = कनकप्रभा, **अभिनवदला**= नूतनपर्णसहिता, **कियत्पुराणा** = कतिपयसमयप्राचीना, **शुचिरसलतिका** = शृङ्गाररसवल्ली, **इव** = यथा, **भाति** = शोभते । विलक्षणसौन्दर्येण स्फुर्त्याऽऽकर्षकाङ्गजातैश्च कनकप्रभा शृङ्गाररसवल्लीव विद्योतमाना जातेति भावः। अत्र पुष्पिताग्रावृत्तमुत्प्रेक्षालङ्कारश्च ॥१०६॥

दिव्यलक्ष्मी – दिनदिनै आफ्नो शरीरमा रमाइरहेको यौवनको तातो फैलिनाले जसका बालभाव, मन्दता र चिसोपन हट्‌दै गएका छन्, ती कनकप्रभा सुन्दरी अहिले नयाँ नयाँ पातहरूले भरिएको केही पुरानो शृङ्गाररसको लताझैं सुहाएकी छन् ॥१०६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदयुगमतिमन्दञ्चञ्चलन्नेत्रयुग्मं
कृशतरमवलग्नम्पीनपीनो नितम्बः ।
कुचयुगलमपीषत्प्रांशु नाभिर्गभीरा
जयति मदनमित्रं यौवनं प्राप्य तस्याः ।।१०७।।

अन्वयः - पदयुगम्, अतिमन्दम्, नेत्रयुग्मम्, चञ्चलम्, अवलग्नम्, कृशतरम्, नितम्बः, पीनपीनः, कुचयुगलम्, ईषत्प्रांशु, नाभिः, गभीरा, च, अपि, तस्याः, यौवनम्, मदनमित्रम्, प्राप्य, जयति ।

चूडामणिः - पदयुगम्= चरणयुगलम्, **अतिमन्दम्** = विलाससालसम्, **नेत्रयुग्मम्**= नयनयुगलम्, **चञ्चलम्**= चपलम्, **अवलग्नम्**= कटिः, **कृशतरम्**= छिन्नम्, **नितम्बः**= कटिपश्चाद्भागः, **पीनपीनः** = स्थूलायमान, **कुचयुगलम्** = वक्षोजयुग्मम्, **ईषत्प्रांशु**= किञ्चिद् उन्नतम्, **नाभिः**= उदरकूपः, **गभीरा**= गहना, **अपि**= च, **तस्याः**= कनकप्रभायाः, **यौवनम्** = तारुण्यम्, **मदनमित्रम्** = कामदेवरूपं सखायम्, **प्राप्य**= लब्ध्वा, **जयति**= विश्वं विमोहयति। अत्र मालिनीवृत्तम्, काव्यलिङ्गसमुच्चयालङ्कारौ च ।।१०७।।

दिव्यलक्ष्मी - यौवनमा पदार्पण गर्न लागेकी कनकप्रभाको शरीर मन्दगतिका साथ सुहाएका चरणयुगल, चञ्चल-चञ्चल नयनयुगल, छिनिएको कम्मर, चाक्लो एवं बाटुलो नितम्ब, ठूलो आकार लिँदै गरेको कुचयुगल र गहिरो नाइटोले सुहाएको छ । अहिले तिनको नवयौवनले आफ्नो परम मित्र कामदेवसँग पनि सम्पर्क गरेको हुँदा त्यसमा आनन्ददायक रमणीयता थपिनाले त्यो नवयौवन विश्वविजयी बन्न पुगेको छ ।।१०७।।

कनकप्रभायाः स्वयंवरप्रसङ्गनिरूपणम् -

अनुदिनमुदयन्तं यौवनारम्भमग्र्यं
जनकनृपतिरस्याः प्रेक्ष्य भूमीपतीनाम्।
दिशि दिशि निजदूतान् हुतये सन्दिदेशा-
वधृतदुहितृवाञ्छासाध्यतत्पाणिपीड्यः ।।१०८।।

अन्वयः - जनकनृपतिः, अस्याः, अनुदिनम्, उदयन्तम्, अग्र्यम्, यौवनारम्भम्, प्रेक्ष्य, अवधृतदुहितृवाञ्छासाध्यतत्पाणिपीड्यः, (सन्), भूमीपतीनाम्, हुतये, निजदूतान्, दिशि दिशि, सन्दिदेश ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिः- जनकनृपतिः= कनकप्रभायाः पिता राजा भोजः, **अस्याः**= कनकप्रभायाः, **अनुदिनम्**= प्रतिदिनम्, **उदयन्तम्**= उदीयमानम्, **अग्र्यम्**= हृदयाभिरामम्, **यौवनारम्भम्**= तारुण्यप्रवेशम्, **प्रेक्ष्य**= दृष्ट्वा, **अवधृतदुहितृवाञ्छासाध्यतत्पाणिपीड्यः**- **अवधृतया**= मनसि गृहीतया, **दुहितृवाञ्छया**= कनकप्रभालसया, **साध्यम्** = विधेयम्, **तत्पाणिपीड्यम्** = तत्पाणिग्रहणसंस्कारः, येन सः, अनुभूतया पुत्रीहृदयस्य कामनया तदीयं वैवाहिकं मङ्गलं विधातुं तत्पर इत्यर्थः, **भूमीपतीनाम्** = भूपानाम्, **हुतये** = आमन्त्रणाय, **निजदूतान्** = सन्देशवाहकान्, सम्प्रेष्य, **दिशि दिशि** = प्रतिदिशम्, **सन्दिदेश** = सन्देशं दत्तवान् । अत्र मालिनीवृत्तं काव्यालिङ्गालङ्कारश्च ।।१०८।।

दिव्यलक्ष्मी - राजा भोजले आफ्नी सुन्दरी पुत्री कनकप्रभाको शरीरमा दिनदिनै विकसित हुँदै गइरहेको यौवनलाई दृष्टिगत गरेर अब कनकप्रभाको मनमा सुयोग्य जीवनसाथीसँग सहवास गर्ने इच्छा अङ्कुरित भएको छ भन्ने कुरा बुझी तदनुसार तिनको विवाह गर्ने लक्ष्य लिएर सुयोग्य राजाहरूलाई स्वयंवरसमारोहमा भाग लिनका लागि आमन्त्रण गर्न दिशा-दिशामा आफ्ना कुशल दूतहरू खटाए ।।१०८।।

यातेषु जङ्घाकरिकेषु भोजश्शुद्धान्तशुद्धान्तरचारशुद्धम् ।
मां प्रेषयामास निमन्त्रणार्थं सहेह पुत्रीप्रणयावलोकैः ।।१०९।।

अन्वयः - भोजः, जङ्घाकरिकेषु, यातेषु, शुद्धान्तशुद्धान्तरचारशुद्धम्, माम्, पुत्रीप्रणयावलोकैः, सह, इह, निमन्त्रणार्थम्, प्रेषयामास ।

चूडामणिः - भोजः = भोजनृपतिः, **जङ्घाकरिकेषु** = अतिवेगयुतेषु, (अतिवेगयुतो जङ्घाकरिकः- इत्यमरः), दूतेषु, **यातेषु** = सन्देशमादाय गतेषु, **शुद्धान्तशुद्धान्तरचारशुद्धम्- शुद्धान्ते** = अवरोधे, **शुद्धान्तरेण** = पवित्रभावेन, **चारेण**= विचरणेन, **शुद्धम्**= पवित्रमर्थादन्तःपुरे शुद्धभावनया सञ्चारेण समुज्ज्वलमानसम्, (स्त्र्यगारं भूभुजामन्तःपुरं शुद्धान्तश्चावरोधश्च- इत्यमरः) **माम्** = ब्राह्मणं दूतम्, **पुत्रीप्रणयावलोकैः- पुत्र्याः**= कन्यायाः कनकप्रभायाः, **प्रणयस्य**= अनुरागस्य, **अवलोकाः** = विलोकनानीति, तैः, कनकप्रभाप्रीतिपूर्णनयनपातैः, **सह**= साकम्, **इह** = भवतः समक्षे, **निमन्त्रणार्थम्** = आमन्त्रणार्थम्, **प्रेषयामास** = प्रेषितवान् । अनुप्राससहोक्त्यलङ्कारौ ।।१०९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यलक्ष्मी- विभिन्न दिशामा खटाइएका दूतहरू आफ्ना कार्यको जिम्मा लिएर ती ती ठाउँहरूतर्फ गएपछि राजा भोजले रानीहरूको रनिवासमा शुद्ध मनका साथ विना रोकतोक आइ जाइ गर्ने अधिकार पाएको म ब्राह्मणलाई यी ब्राह्मण सदाचारी छन् भन्ने विश्वास गरेर आफ्नी छोरी कनकप्रभाका प्रेमपूर्ण नजरबाट प्रकट भएको अनुरागरूपी कोसेलीका साथ यहाँ खटाएको हुनाले म अहिले हजुरका समक्षमा उपस्थित भएको छु।।१०९।।

स्वयंवरसमारोहे सहभागितायै दूतस्य कार्तवीर्यसमक्षेऽनुरोधः -

तत्स्वयंवरमलङ्कुरु तस्या भाविनं कतिपयेन दिनेन ।
राजतं खलु युवामभीप्सितं सङ्गमेत्य रतिमन्मथौ यथा ।।११०।।

अन्वयः - तत्, कतिपयेन, दिनेन, भाविनम्, तस्याः, स्वयंवरम्, अलङ्कुरु, युवाम्, अभीप्सितम्, सङ्गम्, एत्य, रतिमन्मथौ, यथा, राजतम् ।

चूडामणिः - तत् = तस्मात्, **कतिपयेन** = कतिचित्, **दिनेन** = दिवसेन, **भाविनम्**= भविष्यन्तम्, **तस्याः** = कनकप्रभायाः, **स्वयंवरम्** = स्वयंवरसमारोहम्, **अलङ्कुरु**= शोभायमानं विधत्स्व, **युवाम्**= कनकप्रभाकार्तवीर्यौ, **अभीप्सितम्**= मनोरथविषयीभूतम्, **सङ्गम्**= सहभावम्, **एत्य**= प्राप्य, **रतिमन्मथौ** = कामप्रियाकामदेवौ, **यथा**= इव, **राजतम्** = विराजतम् । अत्र स्वागतावृत्तम्, उपमालङ्कारश्च ।।११०।।

दिव्यलक्ष्मी - अब केही दिनपछि आयोजना गरिने स्वयंवर समारोहमा सहभागी हुनुहोस् । म यसकै निमित्त राजा भोजको निमन्त्रणापत्र लिएर हजुरसमक्ष उपस्थित भएको हुँ । कनकप्रभा र हजुर दुबै आफूले चाहेको सुमधुर दाम्पत्यसम्बन्ध कायम गरी रति र कामदेवझैं सुहाउनुहोस् भन्ने मेरो प्रार्थना छ ।।११०।।

आयादायाति चायास्यति च वसुमतीजानिवृन्दं वरीतुं
तां सौन्दर्यैकसीमान्नृपमुकुटशिरोरत्नभूयं* तथापि ।
तस्यास्तत्कालभावोदयजडविसरत्स्वेदरोमाञ्चराजत्-
प्रेमौत्सुक्यप्रकर्षप्रहितभुजगतस्त्रग्धरा कन्धरा ते ।।१११।।

---

* राष्ट्रियाभिलेखालयस्य पाण्डुलिपौ प्रकाशितपुस्तकेषु च 'शिरोरत्नभूयस्तथापि' इति पाठो लभ्यते । सङ्गतेरभावादत्र परिवर्तनं कृतम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्वयः - वसुमतीजानिवृन्दम्, नृपमुकुटशिरोरत्नभूयम्, सौन्दर्यैकसीमाम्, ताम्, वरीतुम्, आयात्, आयाति, आयास्यति, च, तथापि, ते, कन्धरा, तस्याः, तत्कालभावोदयजडविसरत्स्वेदरोमाञ्चराजत्प्रेमौत्सुक्यप्रकर्षप्रहितभुजगतस्त्रग्धरा (भवेत्)।

चूडामणिः - वसुमतीजानिवृन्दम् - वसुमती= पृथिवी, **जाया** = पत्नी, येषान्ते, वसुमतीजानयः, तेषाम्, **वृन्दम्** = समूहः, इति पृथिवीपतिसमूहः, **नृपमुकुटशिरोरत्नभूयम् - नृपाणाम्** = राज्ञाम्, यानि **शिरोरत्नानि**= चूडामणिनामधेयानि, तेषाम्, **भूयम्**= भावम्, बिभ्राणा, अर्थात् राजमुकुटचूडामणिरूपामित्यर्थः, **सौन्दर्यैकसीमाम्**- सुन्दरस्य भावः, **सौन्दर्यम्**= रमणीयता, तस्य, **एका** = अद्वितीया, अन्तिमा वा, या, **सीमा** = परिधिः, **ताम्** = रमणीयतानुपमस्वरूपाम्, कनकप्रभाम्, **वरीतुम्**= वरणं कर्तुम्, **आयात्**= आगच्छत्, **आयाति** = आगच्छति, **आयास्यति** = आगमिष्यति, च, **तथापि** = तेषु, आगतेषु, आगच्छत्सु, आगमिष्यत्सु अपि, **ते** = तव, **कन्धरा** = ग्रीवा, **तस्याः** = कनकप्रभायाः, **तत्कालभावोदयजडविसरत्स्वेदरोमाञ्चराजत्प्रेमौत्सुक्यप्रकर्षप्रहितभुजगतस्त्रग्धरा- तत्कालम्**= तस्मिन् समये, **भावस्य**= मनोविकारस्य (निर्विकारात्मके चित्ते भावः प्रथमविक्रिया - इति सा.द.), **उदयः** = आविर्भावः, तेन, **जडयोः**= निश्चलयोः, **विसरद्भ्याम्**= प्रसरद्भ्याम्, **स्वेदरोमाञ्चाभ्याम्** = घर्मजलरोमहर्षणाभ्याम्, **राजतोः**= शोभायमानयोः, **प्रेमौत्सुक्ययोः**= प्रीत्युत्कण्ठयोः, **प्रकर्षेण** = आधिक्येन, **प्रहितयोः**= सञ्चालितयोः, **भुजयोः** = बाहुदण्डयोः, **गताम्**= प्राप्ताम्, **स्रजम्**= माल्यम्, धरतीति **धरा** = धारिणी, भवेत्। अत्र स्रग्धरावृत्तम्, रूपकालङ्कारश्च ।।१११।।

दिव्यलक्ष्मी - सौन्दर्यकी अन्तिम सीमा कनकप्रभाका हातबाट स्वयंवरको माला प्राप्त गर्ने उद्देश्यले अनेकौं उत्तम-उत्तम राजाहरूमध्ये केही यहाँ आइसकेका छन्, केही आइरहेका छन् र केही आउनेछन् । यस्तो हो तापनि स्वयंवरको समयमा मनमा रतिभाव अङ्कुरित हुँदा अनिर्वचनीय आनन्दको गुदगुदी छाउनाले प्रकट हुने पसिना र रोमाञ्चमा अन्तर्निहित प्रेम र उत्सुकताका साथ उभिएकी कनकप्रभाको हातमा टल्किने वरमालालाई धारण गर्ने वास्तविक अधिकारी हजूरकै कण्ठ हो भन्ने कुरामा कुनै सन्देह छैन ।।१११।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सा त्वां प्राप्य भवांश्च तामनुदिनं सौन्दर्यसारश्रिया
सौख्यं यातु पयोजजन्मविबुधः सृष्टिप्रमोदोत्करम् ।
वृत्तं वामघकुम्भिकुम्भदलने शार्दूलविक्रीडितं-
स्मारं स्मारमुदारमालयलसन्निःश्रेयसं सत्कृती ।।११२।।

अन्वयः - सा, त्वाम्, प्राप्य, अनुदिनम्, सौन्दर्यसारश्रिया, सौख्यम्, यातु, भवान्, च, ताम्, (प्राप्य, अनुदिनम्, सान्दर्यसारश्रिया, सौख्यम्, यातु), पयोजजन्मविबुधः, सृष्टिप्रमोदोत्करम्, तम्, यातु, वाम्, वृत्तम्, अघकुम्भिकुम्भदलने, शार्दूलविक्रीडितम्, (स्यात्), युवाम्, उदारम्, आलयलसत्, निःश्रेयसम्, स्मारम्, स्मारम्, सत्कृती (स्याताम्)।

चूडामणिः - सा = कनकप्रभा, **त्वाम्** = भवन्तं कार्तवीर्यम्, **प्राप्य** = लब्ध्वा, **अनुदिनम्** = प्रतिदिनम्, सौन्दर्यसारश्रिया- सुन्दरस्य भावः **सौन्दर्यम्** = रामणीयकम्, तस्य **सारः**= निष्कर्षः, अथवा केन्द्रीयतत्त्वम्, तस्य **श्रीः** = शोभा, तया, भवदाश्रित-रमणीयकान्त्या, **सौख्यम्** = आनन्दम्, **यातु** = गच्छतु, **भवान्** = कार्तवीर्यः, **च** = अपि, **ताम्** = कनकप्रभाम्, (**प्राप्य** = लब्ध्वा, **अनुदिनम्** = प्रतिदिनम्, **सौन्दर्य-सारश्रिया**- सुन्दरस्य भावः **सौन्दर्यम्**= रामणीयकम्, तस्य **सारः**= निष्कर्षः, अथवा केन्द्रीयतत्त्वम्, तस्य **श्रीः** = शोभा, तया, कनकप्रभाश्रितरमणीयकान्त्या, **सौख्यम्**= आनन्दम्, **यातु**= गच्छतु, **पयोजजन्मविबुधः**- **पयसि** = जले, **जायते** = उत्पद्यत इति **पयोजम्** = कमलम्, तस्मात् **जन्म** = उत्पत्तिः, यस्य सः, **पयोजजन्मा** = ब्रह्मा, स चासौ, **विबुधः** = देवः, कमलोत्पन्नो देवो विधाता इत्यर्थः, **सृष्टिप्रमोदोत्करम्**- **सृष्टेः** = उत्तमरचनायाः, यः, **प्रमोदः** = हर्षः, इति सृष्टिप्रमोदः, तस्य, **उत्करः** = पुञ्ज इति, तम्, उत्तमरचनाजन्यानन्दपुञ्जम् (पुञ्जराशी तूत्करः कूटमस्त्रियाम् - इत्यमरः), **यातु** = प्राप्नोतु), **वाम्** = युवयोः, कनकप्रभाकार्तवीर्ययोः, **अघकुम्भिकुम्भदलने**- **अघः** = पापम्, एव, **कुम्भी** = गजराजः, तस्य **कुम्भस्य**= गण्डस्थलस्य, **दलने** = चूर्णने, पापरूपगजगण्डनिर्दलने, अथवा व्यसनरूपगजगण्ड-विदारणे अथवा दुःखरूपगजगण्डनिर्दलने, **शार्दूलविक्रीडितम्** - **शार्दूलस्य** = सिंहस्य, **विक्रीडितम्**= पराक्रममयः क्रीडाव्यापार इव, **विक्रीडितम्** = विलासमयो व्यापारः, यस्मिन् तत् सिंहसमानपराक्रममयपवित्रक्रियाकलापसम्पन्नम्, **वृत्तम्**= चरित्रम्, स्यात्, **युवाम्**= कनकप्रभाकार्तवीर्यौ, **उदारम्** = उत्तमम्, **आलयलसत्**- **आलये** = गृहे, लसतीति

Jayatu Sanskritam, Kathmandu, Nepal •

CC-0. Digitized by eGangotri and MIDF- Delhi

लसत्= शोभायमानम्, यत्, **निःश्रेयसम्**= कल्याणम्, तत्, **स्मारं स्मारम्** = पौनःपुन्येन स्मृत्वा, **सत्कृती** = सुकृती, स्याताम् । शार्दूलविक्रीडितम्, रूपकालङ्कारश्च ।।११२।।

दिव्यलक्ष्मी – सुन्दरी कनकप्रभाले हजूरलाई र हजुरले कनकप्रभालाई प्राप्त गर्नुभएपछि दुबैले आ– आफ्नो सौन्दर्यको परम ऐश्वर्यका कारण मनमा नअटाउने आनन्द प्राप्त गर्नु हुनेछ । नारायणको नाभिकमलबाट पैदा हुनुभएका गम्भीर बुद्धिका मुहान ब्रह्माजी पनि तपाइँहरूको पवित्र एवं प्रेममय दाम्पत्यजीवन अवलोकन गरी आफूले गरेका सृष्टिको परम सौन्दर्यबाट प्राप्त हुने प्रसन्नताले परिपूर्ण हुनुहुनेछ । वास्तवमा तपाइँहरूको दाम्पत्यचरित्र हात्तीको गाला फोरिदिने सिंहको पराक्रमसमान पापरूपी हात्तीको गाला फोरिदिने पराक्रमले सम्पन्न र पवित्र विलासले परिपूर्ण हुनेछ । हजूर र कनकप्रभाले दाम्पत्यजीवनमा नित्य सम्पन्न गरिने गृहस्थ आश्रम सुहाउँदा माङ्गलिक कार्यहरूबाट परम कल्याण प्राप्त गुर्नहुनेछ ।।११२।।

शुद्धान्तप्रणयप्रचारनिपुणक्षोणीसुरेणोदितं
दृष्टं भोजकुलावतंसतनुजाप्रत्यङ्गमानोज्ञकम् ।
यत्तत्कानकिभूभुजः श्रुतिपुटद्वारा निपीतं मनः
सौख्यक्षेमपयोधिमग्नमतनोत्संख्यावतस्तद् द्विजात् ।।११३।।

अन्वयः – शुद्धान्तप्रणयप्रचारनिपुणक्षोणीसुरेण, यत्, भोजकुलावतंसतनुजाप्रत्यङ्ग-मानोज्ञकम्, दृष्टम्, तत्, उदितम्, सङ्ख्यावतः, द्विजात्, श्रुतिपुटद्वारा, निपीतम्, तत्, कानकिभूभुजः, मनः, सौख्यक्षेमपयोधिमग्नम्, अतनोत् ।

चूडामणिः – **शुद्धान्तप्रणयप्रचारनिपुणक्षोणीसुरेण** – **शुद्धान्ते** = अन्तःपुरे, **प्रणयस्य**= अनुरागस्य, **प्रचारे** = सञ्चारे, **निपुणः** = चतुरः, अर्थादन्तःपुरप्रेमसञ्चारचतुरः, यः, **क्षोणीसुरः** = पृथिवीदेवः, दूतरूपो ब्राह्मण इत्यर्थः, तेन, **यद्** = यादृशम्, **भोजकुलावतंसतनुजाप्रत्यङ्गमानोज्ञकम्**– **भोजकुलावतंसायाः**– **भोजस्य** = भोजधराधिपस्य, **कुलम्** = वंशः, इति भोजकुलम्, तस्य, **अवतंसः** = भूषणम्, तद्रूपायाः, **तनुजायाः** = कन्यायाः कनप्रभायाः, **यत्** = यादृशम्, **प्रत्यङ्गम्** = अङ्गेषु अङ्गेषु, **मानोज्ञकम्** = मनोज्ञस्य भावः, सौन्दर्यम्, **दृष्टम्** = नयनगोचरीकृतम्, **तत्** = तादृशं सर्वमेव रामणीयकम्, **उदितम्** = वाचा प्रकटीकृतम्, **सङ्ख्यावतः** = विद्वद्वर्यात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(सङ्ख्यावान् पण्डितः कविः - इत्यमरः), **द्विजात्** = ब्राह्मणात्, **श्रुतिपुटद्वारा** = कर्णपुटाभ्याम्, **निपीतम्** = साभिरुचि पानविषयीकृतम्, **तत्** = कनकप्रभायाः प्रत्यङ्ग-रामणीयकम्, **कानकिभूभुजः** = कनकवंशललामस्याथवा कनकभूपतिपौत्रस्य कार्तवीर्यनृपस्य, **मनः** = मानसम्, **सौख्यक्षेमपयोधिमग्नम्** - सुखस्य भावः **सौख्यम्**= आनन्दः, च **क्षेमम्** = कल्याणम्, च सौख्यक्षेम, तयोः, **पयोधौ** = पारावारे, **मग्नम्** = निमग्नम्, **अतनोत्** = तनुते स्म । शार्दूलविक्रीडितवृत्तम्, रूपकालङ्कारश्च ॥११३॥

दिव्यलक्ष्मी - अन्तःपुरमा रहेका रानी–महारानीहरूका हृदयमा राजाप्रति प्रेम अङ्कुरित गराउने र त्यसलाई राजाका समक्ष प्रस्तुत गर्ने कलामा कुशल ब्राह्मणले आफूले देखेअनुसार कनकप्रभाका अङ्ग–अङ्गमा भरिएको आनन्ददायक सौन्दर्यको वर्णन गरेपछि राजा कार्तवीर्यले पनि दूतको रूपमा आएका ती विद्वान् ब्राह्मणबाट प्रस्तुत गरिएको सौन्दर्य वर्णनलाई मनोयोगपूर्वक सुन्दा उनको मन परम आनन्द र महामङ्गलको महासागरमा निमग्न भयो ॥११३॥

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोर्नवमो गुणैरनवमः सर्गोऽगमत् पूर्णतां
काव्येऽस्मिन् सुकृतेः कृतौ कृतिमतो रत्नावलीभ्रातरि॥११४॥

इतिश्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये स्वयंवरोपक्रमे कनकप्रभावर्णनन्नाम नवमः सर्गः ।

अन्वयः - श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये, श्रीभवदत्तपण्डितवरः, जातः, श्रीभार्गवी, तत्प्रिया (आसीत्), तत्सूनोः, कृतिमतः, सुकृतेः, कृतौ, रत्नावलीभ्रातरि, अस्मिन्, काव्ये, गुणैः, अनवमः, नवमः, सर्गः, पूर्णताम्, अगमत् ।

चूडामणिः - **श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये** - **श्रीमति** = ऐश्वर्य-सम्पन्ने, **कूर्मधराधरेन्द्रे** = कूर्माचले, **वसतिः** = निवासः, यस्य तस्मिन्, **प्रख्याते** = प्रसिद्धे, **पन्तान्वये** = पन्तवंशे, **श्रीभवदत्तपण्डितवरः** = श्रीयुतो भवदत्तनामको विद्वान्, **जातः** = उत्पन्नः, **तत्प्रिया** = तस्य अर्धाङ्गिनी, **श्रीभार्गवी** = श्रीयुता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भार्गवीनाम्नी आसीत्, तत्सूनोः = भार्गवीभवदत्तपुत्रस्य, कृतिमतः = भाग्यशालिनः, सुकृतेः = सुकृतिदत्तस्य, महाकवेः, कृतौ = रचनायाम्, रत्नावलीभ्रातरि = रत्नावलीरचनान्तरं रचिते, अस्मिन् = एतस्मिन्, काव्ये = कार्तवीर्योदयमहाकाव्ये, गुणैः = अलङ्काररसादिभिः, अनवमः = उत्तमः, नवमः = नवसंख्यापूरणः, सर्गः= परिच्छेदः, पूर्णताम् = समाप्तिम्, अगमत् = अगच्छत् ॥११४॥

पार्वतीपरमेश्वरकल्पयोर्दिव्यलक्ष्मीचूडामणिढकालेतिपुण्याभिधानयोर्जननी-
जनकयोः कनिष्ठसूनुना पाल्पाजनुषा ढकालोपाह्वेन प्राध्यापकपदभाजा
विद्यावारिधिपदवीकेन वेणीमाधवशर्मणा प्रणीता महाकविसुकृति-
दत्तविरचितश्रीकार्तवीर्योदयमहाकाव्यान्तर्गतनवमसर्गाश्रिता
चूडामणिनाम्नी संस्कृतटीका सम्पूर्णतां गता ।

दिव्यलक्ष्मी- समृद्धि र ऐश्वर्यले परिपूर्ण कुमाउप्रदेशमा रहेका र आफ्नो विद्वत्ता एवं वुद्धिका कारण संसारमा प्रख्यात भएका पन्तहरूको वंशमा भवदत्त पन्त नामक विद्वान् पैदा भएका थिए । तिनकी पतिव्रता धर्मपत्नीको नाम भार्गवी थियो । भार्गवी पन्त र भवदत्त पन्तका सुपुत्र कवि सुकृतिदत्त पन्तद्वारा रत्नावलीनामक काव्यको रचनापछि रचिएको कार्तवीर्योदय महाकाव्यको साहित्यिक सौन्दर्यले सम्पन्न नवम सर्ग पूरा भयो ॥११४॥

पार्वती एवं परमेश्वरसमान वन्दनीय माताश्री दिव्यलक्ष्मी एवं पिता श्रीचूडामणि
ढकालका कनिष्ठपुत्र पाल्पानिवासी प्राध्यापक डा. वेणीमाधव ढकाल-
द्वारा कार्तवीर्योदय महाकाव्यको स्वयंवरको उपक्रममा
कनकप्रभाको सौन्दर्यवर्णन शीर्षकमा आधारित
नवमसर्गको दिव्यलक्ष्मीनामक नेपाली
टीका पूर्ण गरियो ।

ॐ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकार्तवीर्योदयमहाकाव्यस्य परिपूर्णता

नागेन्द्रनेत्रनवभूमितवैक्रमाब्दे
वैशाखमासि सितपक्षतृतीयतिथ्याम् ।
श्रीकार्तवीर्यचरितोदितकाव्यमेतत्
श्रीतारिणीकरुणया परिपूर्णमासीत् ।।

– महाकविः सुकृतिः (कार्त० १७/३५)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविकृता भुवनतारिकाप्रार्थना

चिरञ्जयतु रञ्जयत्वलमिदं सुकाव्यं बुधान्
मुदेव वसुधातले भवतु मिष्टमिष्टन्नृणाम् ।
मयीव परिशीलनश्रमयुतेऽस्य मर्त्यान्तरे
पतन्तु करुणादृशो भुवनतारिकाया द्रुतम् ।।
(कार्त० १७/३६)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रा. डा. वेणीमाधव ढकाल

जन्मस्थान - पोरकनी, ठिमुरे, पाल्पा ।
माता - स्व. दिव्यलक्ष्मी ढकाल
पिता - स्व. चूडामणि ढकाल
शिक्षा - आचार्य (साहित्य एवं दर्शन), विद्यावारिधि।
सम्प्रति - प्राध्यापक, नेपाल संस्कृत विश्वविद्यालय, वाल्मीकि विद्यापीठ, काठमाडौं ।
सम्पर्क - फो. ०१-४३११३३०, मो. ९७४१२०७४२६।

पुरस्कार एवं सम्मान

राष्ट्रिय प्रतिभा पुरस्कार-२०५४, पाणिनि पुरस्कार-२०६०, जयतु संस्कृतम् पुरस्कार-२०६०, श्री प्रेमदत्त गोमा त्रिपाठी सम्मान-२०६७, शिवकला स्मृति सम्मान-२०६७, दधिराम स्मृति प्रतिभा सम्मान-२०६८, तोयनाथ पाण्डेय स्मृति पुरस्कार २०६८ एवं बलराम जोशी ज्ञानविज्ञान पुरस्कार २०६९ ।

प्रकाशित कृति

* शैलेश - खण्डकाव्य-२०३० ।
* ज्योतिष्मती - खण्डकाव्य - २०३१ ।
* अर्जुन - शोककाव्य - २०५६ ।
* दिव्यलक्ष्मी स्मृतिकाव्य - २०६५ ।
* रश्मिप्रभास महाकाव्य - २०६९ ।
* लिच्छविकालिक अभिलेखहरूको साहित्यिक अनुशीलन - विद्यावारिधि शोधप्रवन्ध - २०५९।
* हरिकेलिमहाकाव्यम् - सम्पादन २०५१ ।
* हरिकेलिनवनीतम् - टीकाप्रणयन २०५५ ।
* काव्यदीपिका - संस्कृत एवं नेपाली अनुवाद २०५८।
* चन्द्रसम्भवमहाकाव्यम् - सम्पादन २०५८ ।
* स्वर्गद्वारी के महाप्रभु - हिन्दी भाषामा महाप्रभुको जीवनी र योगदानमा आधारित कृति २०५८ ।
* गणेशपुराणम् - अनुसन्धानपूर्ण भूमिका एवं नेपालीभाषानुवाद २०६६ ।
* निर्णयसिन्धु - चूडामणि टीका २०६८ ।
* विवाहपद्धति - नेपाली अनुवाद २०६९ ।
* हिमवत्खण्डः - अनुसन्धानपूर्ण भूमिका एवं नेपालीभाषानुवाद ।
* श्रीदेवीभागवतम् - अनुसन्धानपूर्ण भूमिका एवं नेपालीभाषानुवाद ।
* आह्निकसूत्रावली - नेपाली अनुवाद ।

महत्त्वपूर्ण प्राज्ञिक कार्य

* काव्य-महाकाव्य रचना, पत्रिका सम्पादन, ग्रन्थ सम्पादन, शास्त्रीय ग्रन्थहरूको अनुवाद, पाठ्यपुस्तक रचना, राष्ट्रिय एवं अन्तर्राष्ट्रिय गोष्ठीहरूमा कार्यपत्र प्रस्तुति ।

प्रकाशक
नवेन्दु ढकाल
तिलोत्तमा क्याम्पस, बुटवल

9789994616664

Jayatu Sanskritam, Kathmandu, Nepal